# A TRIENNIAL CATALOGUE OF MANUSCRIPTS

Vol 2, pt 1
(Sanskrit - C)

COLLECTED DURING THE TRIENNIUM

## 1913-14 TO 1915-16

FOR THE

## GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS

BY

S. KUPPUSWAMI SASTRI, M.A.,

CURATOR, GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY AND PROFESSOR OF SANSKRIT AND COMPARATIVE PHILOLOGY, PRESIDENCY COLLEGE, MADRAS.

29259

*Prepared under the orders of the Government of Madras.*




*Volume II.—Part 1.—Sanskrit C.*




091.4912
G.O.M.L.M.

MADRAS:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1917.

CENTRAL ARCHAEOLOGICAL
LIBRARY, NEW DELHI.
Acc. No. 28259
Date 16/3/60
Call No. 891.2912/G.S.-M.L.M.

# A TRIENNIAL CATALOGUE OF MANUSCRIPTS.

## 1913-14 TO 1915-16.

## VOLUME II.

### PART I—SANSKRIT—C.

R. No. **1457.**

Palm-leaf. 18¾ × 1¾ inches. Foll. 85. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

**रामायणव्याख्यानम्—भूषणम्.**

RĀMĀYAṆAVYĀKHYĀNAM : BHŪṢAṆAM.

A commentary on the Rāmāyaṇa of Vālmīki : written by Prabalamukundasūri, son of Śiṅgayārya, probably at the instance of Dēcavara Padmanābhapaṇḍita. This commentary is different from the commentary of Gōvindarāja on the Rāmāyaṇa called also Bhūṣaṇa.

Begins in the Sundarakāṇḍa and breaks off in the sixty-fifth Sarga thereof.

**Beginning :**

मनस्समाधाय महानुभावो जगाम लङ्कां मनसा मनस्वीति मनसा गमनं कृतम्। इदानीं कायेनापि गमनं कर्तुमैच्छदित्याह। तत इति। अत्र वरदराजः प्राह—चारणाचरिते पथि रावणनीतायाः रावणेन हृतायाः सीतायाः पदं निवासस्थानमन्वेष्टुमियेषेत्यन्वय इति तच्चिन्त्यम्। विशेषणवैयर्थ्यव्यवहितान्वयादिदोषप्रसङ्गात्। तस्मादित्थं व्याख्यायते। चारणाचरिते पथि सुरवर्त्मनि। गत्वेति शेषः तृतीयार्थे सप्तमी। तथाचोपा . . . चरिते पथि सुरवर्त्मनि गन्तुमियेषेत्यन्वयः। दुष्करमिति। दुष्करम् अन्येन मनसापि कर्तुमशक्यमित्यर्थः।

* * * *



CANCELLED

**Colophon :**

इति श्रीदेवरपद्मनाभपण्डितसाम्राज्यधुरन्धरेण शिङ्गयार्यपुत्रेण प्रबल-मुकुन्दसूरिणा विरचिते मुकुन्दीये सुन्दरकाण्डव्याख्याने रामायणभूषणाख्याने प्रथमस्सर्गः ।

**End :**

हनुरस्यास्तीति हनुमान् शे[रि]रादीनां चेति संज्ञायां मतौ दीर्घः । संज्ञाया-मिति मतुपो वत्वं यवादेराकृतिगणत्वान्न भवति ।

**Colophon :**

इति सुन्दरकाण्डव्याख्याने चतुःषष्टितमस्सर्गः ।

रोधं निरोधम् । यश्चायं समयः कृत इति मासद्वयादूर्ध्वं हनिष्यामीति यस्सङ्केतः रावणेन कृत इत्यर्थः । तमिति शेषः । प्रणम्येति । प्रणामश्च सीतायाः स्मरणकृत इति बोध्यम् । सीताया दर्शनं यथेति । येन प्रकारेण सीतादर्शनं जातं तेन प्रकारेण युक्तं वाक्यमुवाचेत्यन्वयः ।

* * * *

न कार्यान्तरविमुखः । नयते नयिष्यति । वर्तमानसामीप्ये वर्तमानप्रयोगः । सा समीक्ष्येति । दिगवलोकन . . . . . .

---

R. No. **1458.**

Palm-leaf. 16 × 1¼ inches. Foll. 55. Lines, 6 in a page. Telugu. Fair.

Purchased in 1915-16 from M.R.Ry. Pendyāla Subrahmanya Śāstrigāru of Cocanada.

**प्रक्रियाकौमुदीव्याख्या—प्रक्रियाव्याकृतिः.**

**PRAKRIYĀKAUMUDĪVYĀKHYĀ: PRAKRIYĀVYĀKṚTIḤ.**

A commentary by Viśvakarmavidvat, son of Dāmōdaravijña and grandson of Bhīmasēna. The commentator refers to Prasāda, a commentary by Viṭṭhala on the same text, which has been described under No. 1337 of the D.C.S. MSS., Vol. III.

Wants beginning. Contains the Parasmaipadaprakriyā and the Ātmanēpadaprakriyā complete, the Miśraprakriyā being incomplete.

**Beginning :**

तदभावे अकारः यथा नेह भज्यते पच्यत इति तदा लादेशे . . . . . वक्तुर्विवक्षितत्वादकर्मकादकर्मणि लकारः । यथा सुखमनुभवतीति कर्मणि कर्तरि चेति । कर्मणि कर्तुरीप्सिततमादौ । कर्तरि क्रियायां स्वातन्त्र्येण विवक्षितेऽर्थे । अकर्मकाद्भावे इति । भावे धात्वर्थे ।

**End:**

आयादय आर्धधातुके वेति यङोऽभावपक्षे ऋतेरिकारस्यानुदात्तेच्चा-दार्तिष्टेत्यादि भवतीति प्रसादकाराः। अन्ये त्वियङोऽभावपक्षे आर्तीदित्यादि परस्मैपदमुदाहरन्ति।

**Colophon:**

श्रीदामोदरविज्ञमण्डनमणिर्यो भीमसेनात्मजः
सारासारविवित्क . . गुणयुक्साधुस्सतां संमतः।
तत्पुत्रस्य च विश्वकर्मविदुषः सत्क्रियाव्याकृतौ
संक्षेपेण कृतौ समाप्तिमगमत् भ्वादिः परस्मैपदे ॥

अथात्मनेपदप्रक्रिया— एध। इत आरभ्य गाङवधिकाः प्वञ्चवर्जाः द्वाविंशतिस्सेटः।

**End:**

यद्यपि सम्भ्रमस्साध्वसेऽपि स्यात्संयोगादरयोरपि। इति विश्वोक्तेः सम्भ्रमशब्दो नानार्थस्तथापीह सम्भ्रमशब्देनाशुकारिता गृह्यते। त्वरते अत्वरिष्ट तत्वरे त्वरिता त्वरिष्टेत्यादि॥

अथ मिश्रप्रक्रिया—

पत्लृ। इतस्त्रयः परस्मैपदिनः। पतति प्रण्यपतदिति . . .

* * * *

अयमर्थः—धि चेति सूत्रे अधिकारानुरोधेन धादौ प्रत्यये परे सिचो लोपः स्यादिति श्लोकवार्तिककारव्याख्यानात्तन्मते सस्य दः भाष्यकारमते सलोपः स्यादित्येव व्याख्यानात् दत्वं नास्तीति। तदेवानुपदमाह। भाष्यकारमतेन धि चेति। सलोप इति। अत एवार्धेरुभयमतसाधारण्याय सलोपः स्यात्.

---

R. No 1459.

Palm-leaf. 17¼ × 1¼ inches. Foll 41. Lines, 5 in a page. Telugu. Fair.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmanya Śāstrigāru of Cocanada.

तत्त्वबोधिनीटिप्पणी—तर्कोज्जीविनी.

TATTVABŌDHINĪṬIPPAṆĪ: TARKŌJJĪVINĪ.

A commentary on the Tattvapratōdhinī of Gaṇēśadīkṣita, which work has been described under Nos. 4119 and 4120 of the D.C.S. MSS., Vol. VIII: by Agnihōtrabhaṭṭasūri.

This manuscript is said to have been copied by Dēvulapalli Sītanna, the transcription having been completed on Monday, the 9th day of the dark fortnight of the Bhādrapada month in the year Durmati.

Contains the Pramēyanirūpaṇa only.

**Beginning:**

. . . . . (प्र)भादेरप्रत्यक्षत्वप्रसङ्गः । उद्भूतस्पर्शविरहादित्याशङ्क्याह—इति मीमांसकेति । पिण्डीभूतस्य दीपादेर्देशान्तरप्रसृतरूपं प्रभा । न तेजोऽन्तरम् । इति तैरभ्युपगमात् गौणप्रत्यक्षतायाश्चास्याप्रयोजकत्वादिति भावः ।

* * * *

ननु वायुप्रत्यक्षतावादिनः ऊष्मादिप्रत्यक्षवच्चामिष्टमेवेत्याशङ्क्याह इति सङ्क्षेप इति । द्रव्ययोग्यतयैव सामान्यगुणानां योग्यत्वावधारणात् तद्गतसङ्ख्यापरिमाणादेश्चाप्रत्यक्षत्वात् नोष्मादि प्रत्यक्षार्हमित्यर्थः ।

**End:**

यद्वा विशेषपदप्रयोजनमाह । आकुञ्चनादिक्रियावत्स्वित्यर्थः । इदं च स्थितस्थापकसंस्कारः क्रियादिचतुष्टयवृत्तिरिति । मतान्तरे तु पृथिवीमात्रवृत्तित्वं द्रष्टव्यम् ॥

**Colophon:**

इति श्रीमदग्निहोत्रभट्टकृतौ तत्त्वबोधिनीटिप्पण्यां तर्कोज्जीविन्यां प्रमेयनिरूपणं संपूर्णम् ॥

---

R. No. **1460.**

Palm-leaf. 15½ × 1½ inches. Foll. 8. Lines, 9 in a page. Telugu. Good.

Purchased in 1915-16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

**रामायणसारः.**

RĀMĀYAṆASĀRAḤ.

This is a record of the leading events in the Rāmāyaṇa, giving the time of their occurrence and chronologically arranged. By Agnivēśa.

Complete.

**Beginning:**

पञ्चाद्वादश हायनानि (रुचिरं) जातान्ययोध्यापुरे
तातस्तस्य तदा महोद्यमपरः पट्टाभिषेकेऽभवत् ।

पञ्चाब्दाधिकविंशती रघुपतिस्त्वष्टादशाब्दा प्रिया
कैकेयी च तथा वरद्वयमिदं राजानमस्मारयत् ॥
एकेनास्य वने चतुर्दश समाः सौमित्रिसीतासमं
वासस्त्वीयतनूरुहेऽथ भरते राज्यं द्वितीयेन वै ।

**End:**

भूमौ निर्गतसीतया विरहितो रामो महीं केवलं
वर्षाणामयुतं ततः समभुनक् चैकातपत्रेण वै ।
राज्येष्वासनसंस्थितौ स्वतनयौ ज्ञात्वा समं बान्धवैः
सार्धं स्वीयपुरप्रजाभिरमरस्थानं विमानैर्ययौ ॥
इत्येतद्वै चरित्रं पठ(ति) रघुपतेर्यो नरो वा शृणोति
. . . . . अभिवेशेन गीतम् ।
सोऽयं निर्धूतपापो जलधरपथमारोप्य यानेन याति
स्वर्गं दिव्येन दिव्यैराभिमुखमखिलैः . . . . ॥

**Colophon:**

इति श्रीअभिवेशविरचितं रामायणसारं संपूर्णम् ॥

---

R. No. **1461.**

Palm-leaf. 15§ × 1⅛ inches. Foll. 32. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

**स्यमन्तकोपाख्यानम्.**

SYAMANTAKŌPĀKHYĀNAM.

Corresponds to the Adhyāyas 55 to 59 of the Vālmīkicaritra described under No. 2299 of the D.C.S. MSS., Vol. IV, Part I, and deals with the story relating to the precious gem Syamantaka.

Contains the Adhyāyas 61—65 of the Dharmakhaṇḍa.

The transcription of this manuscript is said to have been completed by Dēvulapalli Sītanna Śāstri on Saturday, the 8th day of the Āṣāḍha month in the year Raktākṣi.

---

R. No. **1462.**

Palm-leaf. 16¼ × 1⅛ inches. Foll. 46. Lines, 5 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

28259

कृष्णकर्णामृतम्— सुवर्णचषकव्याख्यासहितम्.

KRSNAKARNAMRTAM WITH THE COMMENTARY SUVARNACASAKAM.

The text is the same as that described under No. 9893 of the D.C.S. MSS., Vol. XVIII, but the commentary is different, the author thereof being Pālaki Brahmabhaṭṭa

Contains the first Śataka complete, but 9 leaves are wanting in the beginning.

**Beginning:**

. . . . . र्थः । राजाहस्सखिभ्यष्टच् । अह्नष्टखोरेवेति टिलोपः । नूतनाभ्यां प्रत्यहं प्रतिक्षणमधिकाभ्यां हर्षविशालाभ्यां प्रस्नुवती आश्रयाणां सकलैश्वर्यप्रवर्षिणी . . . . . लोचने च प्रस्नुवदिति ष्णुप्रस्रवण इति धातोस्तौदादिकात् कर्तरि लटः शतरि(श)स्य ङित्त्वात् गुणाभावे अचि श्नुधातुत्वियुवङि रूपम् । ताभ्यामुपलक्षितः किशोरो वा . . . . . प्राणनाथः श्रीकृष्णः नः हृदये प्रभवतु आविर्भवतु । मालिनीवृत्तं लक्षणमुक्तम् ।

माधुर्यवारिधिमदान्धतरङ्गभाङ्गि(शृङ्गार)सङ्कलितशीतकिशोरवेषम् ।
आमन्दहासललिताननचन्द्रबिम्बमानन्द संप्लवमनुप्लवतां मनो मे ॥

**End:**

अनुग्रहद्विगुणविशाललोचनैरनुस्मरन् मृदुमुरलीरवामृतैः ।
यतो यतः पुनरपि मे विलोचनं ततस्ततस्स्फुरतु तवैव वैभवम् ॥

* * * *

मे मदीयं चक्षुः ज्ञानसाधनम् कर्तृ यतो यतः प्रसरति ततस्ततस्तव वैभवं मे स्फुरतु[स्फुरतु] यद्वा मे मदीयं चक्षुः कर्तृ यतो यतः प्रसरति ततस्ततस्तव वैभवं कर्म स्फुरतु स्फोरयतु गोचरयत्वित्यर्थः । सर्वथा त्वय्येव सर्वेन्द्रियव्यापारोऽस्त्विति तात्पर्यार्थः । छन्दसि वृत्तभेदः ।

**Colophon:**

इति श्रीमत् पालकि ब्रह्मभट्टकृते कर्णामृतव्याख्याने सुवर्णचषकसमाख्याने द्वादशोत्तरमाद्यशतकं संपूर्णम् ॥

---

R. No. **1463.**

Palm-leaf. 15¼ × 1⅜ inches. Foll. 42. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

वेदान्तपरिभाषाव्याख्यानम्—भूषणम्.

VĒDĀNTAPARIBHĀṢĀVYĀKHYĀNAM: BHŪṢAṆAM.

A commentary on the Vēdāntaparibhāṣā of Dharmarājādhvarīndra, which work has been described under No. 4727 of the D.C.S. MSS., Vol. IX: by Nārāyaṇavidvat of Guṇḍu family, son of Pārvatī and Paradēśibhaṭṭa and a disciple of Vēṅkaṭādribhaṭṭāraka.

Breaks off in the eighth Paricchēda.

**Beginning:**

रङ्गद्वाङ्गतरङ्गधिक्कृतिकृतो भङ्गीर्गिरां कुर्वतो
यद्वन्दारुजनस्य सर्वजनतास्वच्छन्दवन्दारवः ।
यस्यास्सत्करुणाकटाक्षकरणापेक्षास्सुराग्रेसराः
सेयं मद्रसनाङ्गणेऽम्बुजभुवो नारी नरीनृत्यताम् ॥
श्रीपार्वतीयं परदेशिभट्टादीशादसूतानुगुणं कुमारम् ।
योऽशिक्षि शास्त्रेषु च वेङ्कटाद्रिभट्टारकश्रीगुरुभिर्गरिष्ठैः ॥
गुण्डुवंशेन्दुना तेन नारायणमनीषिणा ।
वेदान्तपरिभाषाया भूषणं परिकल्प्यते ॥

इह खलु कुतश्चिद्भाग्यविभवान्वितान्तनिष्कलङ्कस्वान्ततया स्वयमवगतं निखिलवेदान्तप्रतिपाद्यसच्चिदानन्दात्मकपरमात्मस्वरूपं परेषामपि बोधयितुं वेदान्तपरिभाषाख्यं ग्रन्थं चिकीर्षुः धर्मराजदीक्षितो नाम शुद्धाद्वैतः स्वचिकीर्षितस्य निर्विघ्नपरिसमाप्तये प्रचयगमनाय च शिष्टाचारपरिप्राप्तं सच्चिदानन्दात्मकपरमात्मस्तवरूपमङ्गलमुपनिबध्नाति—यदविद्येति—सच्चिदानन्दविग्रहं सच्चिदानन्दात्मकं तं परमात्मानं नौमि स्तौमीत्यन्वयः । यत्तदोर्नित्यसम्बन्धादाह यदिति ।

* * * * *

परमतप्रक्रियानिष्पादितमाकाशमाश्रित्याभ्युपेत्यवादेन कृतमिति सर्वं सुन्दरतरम् । उपपादितं प्रत्यक्षमुपसंहरति, तदेवमिति ।

**Colophon:**

इति श्रीनारायणभट्टशास्त्रिविरचिते वेदान्तपरिभाषाभूषणे प्रथमः परिच्छेदः ।

**End:**

प्राथमिकारोप इति । तज्जनकसंस्काराभावादिति भावः । प्रत्यक्षस्वरूपयोरैक्यमुपपादितमेवेति । लक्षणया स्वरूपयोर्विशेष्ययोरैक्यमुपपादितमेवेत्यर्थः । सच्चि(ति)ग्रहादिति । अन्वयबोधादित्यर्थः । वेदान्तशास्त्रविषयमुपसंहरति एवमित्यादिना ।

**Colophon:**

इति विषयपरिच्छेदः ।

अवशिष्टं प्रयोजनपरिच्छेदं निरूपयितुं प्रतिजानीते इदानीमिति । प्रयोजनस्य लक्षणमाह यदवगतमिति । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्तीति प्रकृतस्य ब्रह्मात्मकसुखस्य वैशेषिकाणि सुखानि अंशमनुसरन्तीत्यर्थः ।

* * * *

मुक्तव्यवस्थाशक्तिभेदेन कल्पनीयेति भावः । तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुत्युपपादितं ब्रह्मज्ञानस्य मोक्षसाधनत्वम्.

---

R. No. **1464.**

Palm-leaf. $17\frac{1}{4} \times 1\frac{1}{4}$ inches. Foll. 60. Lines, 6 in a page. Telugu. Fair.

Purchased in 1915-16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

न्यायसिद्धान्तमञ्जरीव्याख्या—भावदीपिका.

NYĀYASIDDHĀNTAMAÑJARĪVYĀKHYĀ: BHĀVADĪPIKĀ.

A commentary on the Nyāyasiddhāntamañjarī of Jānakīnātha, otherwise called Cūḍāmaṇibhaṭṭācārya, which work has been described under No. 4215 of the D.C.S. MSS., Vol. VIII: by Kṛṣṇanyāyavāgīśa, son of Gōvindanyāyālaṅkārabhaṭṭācārya.

Contains Pratyakṣa to Upamāna complete.

This manuscript is said to have been copied by Dēvulapalli Sītarāmuḍu, the copying having been completed on Wednesday, the 3rd day of the dark fortnight of the Māgha month in the year Dundubhi.

**Beginning:**

शैवालवन्या रुचिरे तटिन्यास्तीरे भवान्यादरलेशशून्या ।
इन्द्रादिमान्या भुवनेष्वनन्या मां पातु धन्या गिरिराजकन्या ॥
प्रणम्य शिवयोः पादौ श्रीमता कृष्णशर्मणा ।
सिद्धान्तमञ्जरीव्याख्या क्रियते भावदीपिका ॥

प्रारिप्सितग्रन्थप्रतिबन्धकोपशमनाय कृतं परमात्मनमस्काररूपं मङ्गलं शिष्यशिक्षायै प्रसङ्गतोऽध्यापकाध्येतॄणां मङ्गलाचरणाय चादौ निबध्नाति—प्रणम्येत्यादि । प्रणम्य, भक्तिश्रद्धातिशयपूर्वकं नमस्कारं कृत्वा । भक्तिश्रा-

राध्यत्वेन ज्ञानम्, श्रद्धा च फलावश्यंभावनिश्चयः । ईदृशातिशयस्य प्रशब्दो द्योतको न तु वाचक इति । द्योतकत्वं च तात्पर्यग्राहकत्वम् । विवेचयिष्यते चेदं शब्दमञ्जरीव्याख्याने ।

**End:**

कीदृक् करभ इति । दीर्घग्रीवं प्रलम्बचञ्चो(ञ्चू)ष्ठं कठोरकण्टकाशिनं कुत्सकावयव[यव]सन्निवेशमपशदं पशूनामिति श्रौतपदतः करभपिण्डदर्शनानन्तरं करभः करभपदवाच्य इति या मतिः सापि वैधर्म्यज्ञानजन्या ।

**Colophon:**

इति श्रीगोविन्दन्यायालङ्कारभट्टाचार्यात्मजश्रीकृष्णन्यायवागीशविरचितायां सिद्धान्तमञ्जरीटीकायां भावदीपिकायामुपमानखण्डव्याख्या समाप्ता ॥

---

R. No. **1465.**

Palm-leaf. 16¼ × 1⅜ inches. Foll. 14. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

**चन्नुभट्टीयटिप्पणी.**

CANNUBHAṬṬĪYAṬIPPAṆĪ.

An easy gloss on the Cannubhaṭṭa's commentary on Tarkabhāṣā, which commentary is described under No. 4126 of the D.C.S. MSS., Vol. VIII.

Incomplete.

**Beginning:**

पुण्डरीकाजिनधरं पुण्डरीकारिलोचनम् ।
पुण्डरीकाक्षनाराचं चण्डिकापतिमाश्रये ॥
. . . . . .
. . . . . मायार्धजानिं सदा ।
मुक्ताहारविराजितं त्रिपथगापूरोल्लसच्छेखरं
वन्दे भक्तसुराप्रियं सुरनुतं यत्किञ्चिदेकं महः ॥
नत्वा गुरुं भवानीशं स्वर(रच)यिष्ये यथामति ।
बालानामवबोधाय चन्नुभट्टीयपिटप्पीम् ॥
यः प्रेरयति मामेवं कुरुतादिति हीश्वरः ।
एतस्य गुणदोषौ तु तस्यैव भवतो न मे ॥

अत्रभवान् शिष्टाग्रणीर्ग्रन्थकर्ता स्वचिकीर्षितस्य ग्रन्थस्य निरन्तरायपरिसमाप्तये शिष्टाचारपरिपालना(य) (शिष्टा)चा(रा)नुमि(त)श्रुतिबोधितकर्तव्यताकं नृसिंहानुस्मरणात्मकं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—सकृदिति । यं नृकेसरिणं सकृदपि नत्वा लोकः शान्तिसम्पदं लभते सः योगानन्दनृ(हरि)स्वरूपः ।

**End:**

तत्र प्रमाणं च स्वावसरे वक्ष्यामः । पूर्वोक्तेष्विति । अवयवावयविगुणगुणिक्रियाक्रियावज्जातिव्यक्तिविशेषनित्यद्रव्यरूपेष्वित्यर्थः । पूर्वोक्तोपसंहारभ्रमं वारयति फलितमिति । तच्छब्दार्थमाह येनेति । पृथक्भेदादिति । यथा तुरीपटमनाश्रिता एव वर्तते एवं पटोऽपि तुरीमनाश्रित्यैव वर्तत इत्यर्थः । पौनरुक्त्यं परिहरति उपपादितमिति । स्मारयतीति पौनरु.

---

R. No. **1466.**

Palm-leaf. 16½ × 1½ inches. Foll. 94. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

(*a*) नरकासुरविजयव्यायोगः.

NARAKĀSURAVIJAYAVYĀYŌGAḤ.

Foll. 1*a*—15*b*.

Same work as that described under R. No. 821(*f*) *ante*.

Wants beginning; otherwise complete.

This manuscript is said to have been copied by Lakṣmīnārāyaṇa, son of Kandarpa Sītārāma Śāstri, the copying having been completed on Friday, the 3rd day of the bright fortnight of the Śrāvaṇa month in the year Krōdhi.

---

(*b*) यक्षोल्लासः.

YAKṢŌLLĀSAḤ.

17¼ × 1⅝ inches. Foll. 16*a*—24*b*.

A love-poem in two Sargas, evidently written in imitation of the Mēghasandēśa of Kālidāsa. Herein also the cloud is made to carry the message of the separated lover to his beloved. By Kṛṣṇamūrti, who bore the title of Abhinava Kālidāsa and who was the son of Sarva Śāstrin of Vāsiṣṭhagōtra.

Complete.

This manuscript is said to have been copied by Dēvallā Subbarāyaḍu, the copying having been completed on Saturday, the 11th day of the bright fortnight of the month of Kārtika in the year Dhātu.

**Beginning:**

यक्षस्यैवं विरहविवरं याचतो वाचमस्य
श्रावं श्रावं श्रमहृतिमतिर्दैवतो देवतात्मा ।
सानुक्रोशस्सपदि स घनस्सम्यगालोच्य कार्यं
निर्यायागान्निजपथगतो मारुतप्रेरितोऽगात् ॥
स्वाङ्गासङ्गक्षणपरिचितभ्रम्युदीराग्रनेमिः
स्थाने स्वर्णध्वजयुजि दिवि व्योमयानप्रताने ।
सद्यःप्रोद्यत्स्तनितमुखरो विद्युदुद्योतिपक्षो
दुर्लक्षोऽभूदपि निपुणधीस्सर्गिणां स्वर्गिणां सः ॥

* * * *

विद्युत्वानप्यनुचरमरुत्प्रेर्यमाणोऽर्यमाध्व-
प्रत्याख्यानप्रथिमभवनीभूतभूजाग्रकूटम् ।
स्वस्त्रीवीक्षाक्षणनिनयिषास्पन्दनस्कन्दघोटं
क्रीडत्खेटं पुनरपि कृती प्राप तं चित्रकूटम् ॥
कालीदत्ताधिकतमधियः कालिदासस्य वाक्ये
श्लाघापात्रे सकलविदुषां मेघसन्देशकाव्ये ।
कर्तुस्स्फूर्तेस्सरसवचसः कृष्णमूर्तेरिहाभूत्
यक्षोल्लासाह्वययुजि कृतावादिमस्सर्ग एषः ॥

**Colophon:**

इति श्रीमद्वासिष्ठगोत्रस्य शिष्टकुलपवित्रस्य सर्वशास्त्रिपुत्रस्य सकलकवि-कुलमित्रस्य श्रीमदभिनवकालिदासविरुदसमुज्ज्वलत्स्फूर्तेः कृष्णमूर्तेः कृतौ यक्षोल्लासे महाकाव्ये प्रथमस्सर्गः सम्पूर्णः ।

**End:**

एवं दैवात्पुनराधिगतामीप्सितार्थापि(भ)पूर्णां
पूर्वातीतप्रचुरविभवाभोगिनीं भोगलक्ष्मीम् ।
वध्वा साकं चिरमनुभवन् या(वा)सवश्रीस्तथा सः
प्रासादं स्वं सुरगिरिसदृग्भासमासाद्य रेजे ॥

कालीदत्ताधिकतमधियः कालिदासस्य वाण्याः
श्लाघापात्रे सकलविदुषां मेघसन्देशकाव्ये ।
कर्तुस्स्फूर्तेस्सरसवचसः कृष्णमूर्तेरिहाभूत्
यक्षोल्लासाह्वययुजि कृतौ सर्ग एष द्वितीयः ॥

Colophon:

इति श्रीकृष्णमूर्तिकृतौ यक्षोल्लासे महाकाव्ये द्वितीयस्सर्गः ।

---

(*c*) धनञ्जयविजयव्यायोगः.

DHANAÑJAYAVIJAYAVYĀYŌGAḤ.

$14\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 25*a*—38*b*.

Same work as that described under No. 18 of the Report on a Search for Sanskrit and Tamil MSS. for 1896–97, No. I.

Complete.

This manuscript is said to have been transcribed for Lakṣmīnārāyaṇa, son of Kandarpa Sītārāma Śāstri, the trancription having been completed on Sunday, the 13th day of the Adhika Śrāvaṇa month in the year Krōdhi.

---

(*d*) पञ्चबाणविजयभाणः.

PAÑCABĀṆAVIJAYABHĀṆAḤ.

$14\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 39*a*—75*b*.

A kind of dramatic composition describing the spring season and the over-powering of the hearts of men by Manmatha, the god of Love; by Raṅgārya, the younger brother and disciple of Rāmānujācārya of Vādhūlagōtra. The latter was the author of the works entitled the Rāmānujacampu and the Raṅganāyakīsaundaryastuti and was honoured by Rāghavārya, a high official in the court of a Pāṇḍya king. The name of the author's father was Bhāvanācārya, who had a younger brother named Rāmānujācārya, and the author is said to have been given in adoption to him. This drama was intended to be put on stage for the first time in Srirangam at the time of the celebration of the festival of God Raṅganātha in the month of Caitra.

Complete.

**Beginning:**

श्रीमद्गोपशिशोस्तवाद्रिभरणं मिथ्येति लीलोत्कया
रुक्मिण्याभिहितो वहामि शिखरिद्वन्द्वं प्रिये लोकय।
इत्युक्त्वा तदुरोजशैलयुगलं गृह्णन् कराभ्यां तया
लज्जानम्रमुखाब्जया सरभसश्लिष्टो हरिः पातु नः ॥

किञ्च—श्रीवत्सो दनुसूनुसूदनभुजामध्यस्थलीभूषणं
जम्भारातिमणिप्रकाण्डशकलश्रीगर्वसर्वङ्कषः।
गाढाश्लिष्टरमापयोधरतटीसङ्क्रान्तकस्तूरिका-
पङ्कक्षोदनिभः शुभाय भवतां बोभूयतां भूयसे ॥

नान्द्यन्ते सूत्रधारः—

कलानिधिकलापवर्त्तिमिरपाङ्क्तिमुक्ताफल-
स्फुरत्कनकदर्पणं दरानिमीलदिन्दीवरम्।
धरोद्ध . . . तैंकमं चटकचक्रवाकद्वयं
विशृङ्खलमनोभवं विजयतां रतं योषिताम्॥

इति पुष्पाञ्जलिं विकीर्य.

मारिष इतस्तावदादिष्टोऽसि, निरन्तरविनमदमरमकुटघटितमणिगणविसृमर-किरणपुञ्जकिञ्जल्कितचरणारविन्दस्य गाङ्गेयतरङ्गिणीतरङ्गपरम्परापरिवेल्लितरङ्गाल-वालवलयालङ्कारपारिजाताङ्कुरस्य

* * * *

शृङ्गाररसभूयिष्ठं कुसुमायुधजीवितं रूपकं रसिकानन्दजनकं रूप्यतामिति। किन्ता-दृशं रूपकम् (स्मरणमभिनीय) अस्ति हि—

सन्ध्यानानटचमानत्रिपुरहरजटाजूटबंभ्रम्यमाण-
स्वर्गौकस्सिन्धगर्भप्रसृमरलहरीगर्वसर्वङ्कषोक्तिः।
श्रीमान् रामानुजार्यः प्रतिकथकघटाकेसरी वाग्वधूटी-
क्षौमीभूतस्वकीर्तिः श्रितजनसकलाभीष्टसन्तानशाखी ॥
दृप्यत्कुम्भीन्द्रकुम्भस्थलदलनसमुद्युक्तहर्यक्षमुक्त-
प्रौढारावप्रणीते परिहसितचणैः कण्ठनादैर्गभीरैः।
स्वैरं शास्त्राणि यस्मिन् व्यवहरति गुरुस्स्वर्गमाप त्रपातः
शेषः पातालमागादगमदगगुहागह्वरं धूर्जटिश्च ॥

* * * *

निर्मुक्तो निगलान्मदावलवरो मत्तो निराघोरणो
नत्वायं सभयं स्वयं सविनयं स्वालानमाटीकत ।
शार्दूलः शमवाप यत्करतलस्पर्शेन तत्तादृशः
स श्रीरङ्गगुरूत्तमो विजयते यद्वंशमुक्तामणिः ॥

ब्रह्मर्षिर्भावनार्यो जयति तदनुजः पन्नगाध्यक्षवाणी-
मल्लीवल्लीमतल्लीप्रसवसमुदयप्रायवाक्सम्प्रदायः ।
आन्वीक्षिक्यां प्रचण्डो भवुकमणिनिधिर्भाष्यकृद्भाववेदी
वेदप्रामाण्यरक्षाचणविमलतराश्रयचर्याभिरामः ॥

श्रीमान् रामानुजार्यः फणिपतिभणितिप्रक्रियाचक्रवर्ती
तर्कातर्कप्रवीणो यतिनृपतिमतोद्धारसंजातकीर्तिः ।
मीमांसासार्वभौमो निरुपमकविताकल्पनाकल्पशाखी
विद्वद्वोष्ठीधुरीणो व्यवहरणचणस्तत्सुतोऽयं विभाति ॥

किंच—

पाण्ड्यास्खण्डलवाहिनीपरिबृढश्रीराघवार्याग्रणी—
संमानप्रथमावतारसरणिर्विद्वत्कविग्रामणीः ।
श्रीरामानुजचम्पुरङ्गधरणीधौरेयसीमन्तिनी-
सौन्दर्यस्तुतिमुख्यसत्कृतिकृती सोऽयं विजेजीयते ॥
तस्यायं सहजः तदीयकरुणासंप्राप्तबोधोज्ज्वलः
तज्ज्यायोजनकेन सत्कवितया चैष स्वयं स्वीकृतः ।
श्रीरङ्गार्यकविर्बभाण ललितं शृङ्गारशृङ्गाटकं
भाणं कञ्चन पञ्चबाणविजयारम्भं प्रियंभावुकम् ॥
स एव सामाजिकसमाजसंमोदकरः ।

यतः—

प्रभातभास्करप्रभाप्रबुद्धपङ्कजव्रज-
क्षरन्मरन्दसंविभा विभाति भारती कवेः ।
सभा चकास्ति पाण्डितप्रकाण्डमण्डितान्तरा
रतिप्रियप्रियाकरो रसश्च यत्र राजते ॥

समन्तादवलोक्य सोल्लासम् ।

परभृतपरिपाटीत्रोटिकोटीकवाटीपुटविघटनकेलीकल्पनाकुशिकाली ।
नववकुलमधूलीपानमत्तालिपालीरवमुखरदिगन्तः प्रादुरासीद्वसन्तः ॥

**End:**

किन्ते भूयः प्रियमुपहरामि, तथाप्येवमस्तु भरतवाक्यम्—

श्रीरङ्गार्यकवीन्द्रचन्द्रमहवा काचित्समृद्धिं श्रितः
गम्भीरो मधुरोक्तिमौक्तिकमणिश्रेणीसमुत्पत्तिभूः ।
आविर्भावपदं श्रियो मुरभिदः प्रेमास्पदं सत्त्वभृत्
वाधूलान्वयवारिधिर्विजयतामाचन्द्रतारं भुवि ॥
श्रीरङ्गं श्रिततुङ्गमङ्गलपदं श्रीरङ्गतामश्नुतां
सन्तस्सन्तु सदा निराकुलधियस्सन्तस्समृद्धे श्रियः ।
नानालङ्कृतिभूषणं नयविदामुज्जृम्भतां भाषणं
कन्दर्पागमदेशिकाश्च रसिकाः क्रन्दन्तु शृङ्गारिणः ॥

**Colophon:**

इति श्रीवाधूलकुलतिलकश्रीरङ्गार्यकृतपञ्चबाणविजयनामा भाणस्समाप्तः ॥

The scribes add—

श्रीदेवल्लकुलाब्धिपूर्णशशभृच्छ्रीसुव्वराव्वाह्वयो
भाणं कंचन पञ्चबाणविजयाभिख्यं विलिख्य स्फुटम् ।
प्रादाच्छ्रीमुखवत्सरे शरदृतौ मासीषनाम्न्यां त्र[illegible]
दश्यामादिमपक्षके शनिदिने मित्राय कस्मै चन ।

---

(*e*) वसन्ततिलकभाणः.

VASANTATILAKABHĀṆAḤ.

14½ × 1¼ inches. Foll. 76*a*—94*b*.

Similar to the above. Herein also the spring season and the feeling of love, which it inspires, is described. By Vātsya Varadārya, son of Ghatikāśata Sudarśanakavi and a native of Kāñcī (Conjeeveram).

Incomplete.

**Beginning:**

जयन्ति जगतां मातुस्स्तनकुङ्कुमबिन्दवः ।
मुकुन्दाश्लेषसङ्क्रान्तकौस्तुभश्रीविडम्बिनः ॥

अपिच —

क्रीडाभिन्नहिरण्यशुक्तिकुहरे रक्तात्मनावस्थितान्
हारंहारमुदारकुङ्कुमरसानव्याजसिद्धान्नखैः ।
वीरश्रीकुचकुम्भसीम्नि लिखितो देवस्य पत्रावली(लि)-
स्तत्कालोचितभावबन्धमधुरं मन्दस्मितं पातु नः ॥

नान्द्यन्ते सूत्रधारः । सविनयानन्दम् । मो भोस्समन्ततस्सन्ततमधुमदमुदितमत्तकाशिनीविलासविवशापाङ्गशृङ्गलाविशृङ्खलितविविधरासिकजनविहारहारिणीहारहराहिरण्यगर्भादिनिखिलसुरासुरमणिमकुटोपलालितशासनस्य भगवतो मकरध्वजस्य

* * * *

(ससंभ्रमं कर्णं दत्वा) किं ब्रूथ सकलजनहृदयानन्दकन्दलविकसनविदग्धमुग्धमधुरं किमपि रूपकमभिनेतव्यमिति । (स्मरणमभिनीय) श्रुतं हि मया सकलनगरातिशायिन्यां समस्तकलालापशालिन्यामुज्जयिन्याम् । यथा किल

काञ्चीपुरे कविरभूद्वरदार्यनामा सूनुस्सुदर्शनकवेर्घटिकाशतस्य ।
वेदान्ततर्कविविधाध्वविचारदक्षो वात्स्यो वसन्ततिलकं स बभाण भाणम् ।
स भाणस्सहृदयरञ्जकस्सुप्रयोग इति ।

* * * *

समुल्लासो वाचां सरसमधुनिष्यन्दलहरी-
समुन्मेषद्वेषी सकलजनतोषोपजनकः ।
न केषामादत्ते मनसि परितोषं नवनवैः
विकासैरुन्मीलद्विचकिलमधूलीपरिमलः ॥

यदि तस्य कवेः प्रबन्धस्सत्वरेण भवता भवितव्यामिति ।
(सपरितोषम्)—

सोऽयं चेत्कविरत्र सुन्दरगिरस्सन्त्येव तेषामसौ
मध्येकोटि वयन्तु नाटचरचनापाण्डित्यपारङ्गताः ।
भाणश्चेद्दशरूपकेषु मधुरस्तत्सर्वमास्तामियं
सारज्ञा हि सभा किमन्यदधुना वाञ्छानुकूलो विधिः ॥

**End :**

वीथ्यन्तरमवलोक्य। महानयमत्र समरसंरम्भः कुटिलविषमवेल्लितविकटतिर-
[illegible]खिलिखिलित्कारमुखानामतिनिशितखुराशिखरो-

त्खातभूतलानामनवरतप्रहारपरिणतकिणकलितरणकण्डूलमस्तकानामसोढपरबलोन्मेषाणामगाधरोषाणां मेषाणाम् । किञ्च ।

पश्चात्सुदूरमुपसृत्य निबद्धलक्ष्यान्नेत्रैर्नितान्तकलुषैः कृतचण्डवेगाः ।
प्रत्यागताः पटुतरं प्रहरन्ति मेषा मूर्च्छत्स्फुलिङ्ग(निवहैर्मुहुरुत्तमाङ्गैः)॥

परिवृत्यावलोक्य, सकल . . नकसार्व.

---

R. No. **1467.**

Palm-leaf. 14⅜ × 1⅜ inches. Foll. 24. Lines, 8 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

**मदनाभ्युदयभाणः.**

MADANĀBHYUDAYABHĀṆAḤ.

A kind of dramatic composition in one Aṅka describing the passion of love between Madanaśēkhara and Madanamañjarī: by Kṛṣṇamūrti Śāstri, who is evidently the same as the author of Yakṣōllāsa described under sub-division (*b*) of the last number. His grandfather's name is given as Sūra and his mother's name Ambujabhū (Lakṣmī).

Incomplete.

**Beginning:**

श्रीमद्यामुनतीरशाद्वलतले गोपालिकां चालय-
न्नेकां सैकतसीम्नि तद्वदपरां दूरे मुहुः खेलयन् ।
सङ्केतोक्तलतानिकेतनगतामन्यां रते लालयन्
योऽभूद्वल्लवधान्नि पल्लववरो देयात् स वोऽत्युत्सवम् ॥

नान्द्यन्ते सूत्रधारः——

ईषन्मीलितभावलोलनयनं हेलाविवृत्तानन
चेलाकर्षणजत्रपानुचलनं चेतोभवोद्योतनम् ।
प्रारम्भावसरोच्चलत्प्रयतनं प्रादुर्भवत्कामनं
मोदं वो विदधातु मोहजननं मुग्धाङ्गनालिङ्गनम् ॥

भो भोः समस्तभुवनवास्तव्यजनस्तव्यतमलावण्यपुण्यसरण्यगण्यपण्यनितम्बिनीकदम्बकालम्बनधन्यंमन्यरसिकनिकरमूर्धन्यनिकरनिरन्तराभ्यस्यमानातिरहस्यरतिरहस्यव्याख्यानसमाख्यानानुरूपरुचिरतरबहिर्विहारवेदिकानिकायप्रकाशमानवेशवाटिका ।

* * * *

किमेतादृशं रूपकम् । (स्मृतिमभिनीय सानन्दम्)

धीरस्सूरसमाह्वयो वरमतिर्वासिष्ठवंशेऽजनि
स्थेयांस्तस्य सुतः श्रुताध्वनि कनद्धीस्सर्वशास्त्री सुधीः ।
तत्पुत्रोऽम्बुजभूसतीस्तनयुगस्तन्यासिधन्यात्मवाक्-
स्फूर्तिस्संप्रति कृष्णमूर्तिरुदयत्कीर्तिः कृती वर्तते ॥

यस्तु तेन सकलसुकविसमुदयस्तुतेन कृतो मदनाभ्युदयो नाम भाणः । स एव सामाजिकमनोरञ्जनप्रवीणः ।

**End :**

किं ब्रवीषि, अस्मत्स्वामिनीकनीयस्याः चन्द्रिकायाः प्रथमरङ्गाधिरोहणमहोत्सवारम्भसंभ्रमः । तत्त्वयापि सत्वरं समागन्तव्यमित्यहो बहोः कालादेतादृशमहोत्सवलाभः । (पश्चादवलोक्य, साश्चर्यम्)

भृङ्गादिविभ्रमकृदम्बुजबीजमालासङ्गाजहत्कमलगन्धसुगन्धिवक्षाः ।
अङ्गारकृप्ततिलकाळिकपालिशाली शृङ्गारमौलिरनपायमुपैति कोऽयम् ॥

(निपुणं निरूप्य, सोल्लासम्) अयं खलु रामाचार्यनामा श्रीकाकुलधामा ममाबाल्यसुहृदतिसरस.

---

R. No. **1468.**

Palm-leaf. $16\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 69. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

Fol. 44*b* is left blank. Foll. 68—69 are the duplicate of the 66th and 67th foll.

काणादसङ्ग्रहव्याख्या—न्यायरत्नाकरः.

KĀṆĀDASAṄGRAHAVYĀKHYĀ: NYĀYARATNĀKARAḤ.

A commentary on the Kāṇādasaṅgraha, which is a brief treatise on the Vaiśēṣika system of philosophy : by Tallayārya. The commentary is called Nyāyaratnākara.

Breaks off in the Manōnirūpaṇa.

See under R. No. 1562(*b*) for extracts.

## R. No. 1469.

Palm-leaf. 17×1¼ inches. Foll. 93. Lines, 8 in a page. Telugu. Much injured.

Purchased in 1915–16 from M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

(*a*) शास्त्रदीपिका.

ŚĀSTRADĪPIKĀ.

Foll. 1*a*—45*b*.

Same work as that described under No. 4478 of the D.C.S. MSS., Vol. IX.

Wants beginning in the third Pāda of the first Adhyāya and breaks off in the fourth Pāda of the second Adhyāya.

---

(*b*) शास्त्रदीपिकाव्याख्या—न्यायकर्पूरवर्तिका.

ŚĀSTRADĪPIKĀVYĀKHYĀ: NYĀYAKARPŪRAVARTIKĀ.

Foll. 46*a*—93*b*.

Similar to the work described under No. 4497 of the D.C.S. MSS., Vol. IX. By Rājacūḍāmaṇidīkṣita, who, according to the colophon here, is the son of Satyamaṅgala Ratnakhēṭa Śrīnivāsadīkṣita and Kāmākṣī, and the grandson of Kṛṣṇabhaṭṭa and the great grandson of Lakṣmīvallabha of Viśvāmitragōtra and the disciple of Ardhanārīśvara.

Begins in the course of the second Pāda of the first Adhyāya and ends with the fourth Pāda of the first Adhyāya.

**Beginning :**

प्रतिफलत्वमदृष्टस्वरूपन्तस्य कालत्वप्रत्यायननियमस्य तज्जनकत्वं चेति चतुष्टयं कल्प्यम् । उच्चारणाददृष्टकल्पने तु कल्पनात्रयमेवेति तदेव युक्तमिति चेन्न ।

* * * *

**Colophon :**

इति श्रीचूडामणिदीक्षितकृतशास्त्रदीपिकाव्याख्यायां न्यायकर्पूरवर्तिकाख्यायां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

**End :**

कल्पनाविकल्पितं वाक्यमपि सन्दिग्धार्थनिर्णायकतया प्रमाणम् । न च पौरुषं त . . . . . प्रमाणमिति वाच्यम् । श्रुतार्थापत्तिकल्पितस्य वाक्यस्यापि श्रुतैकदेशत्वादिति.

**Colophon:**

इति श्रीदन्तिद्योतिदिवाप्रदीपाङ्गविश्वामित्रवंशमुक्ताफललक्ष्मीवल्लभस्वामिभट्टसुकृतपरिपाकाद्वैतविद्याचार्यसर्वतन्त्रस्वतन्त्रषट्(भाषा)वल्लभप्रतिदिनप्रबन्धपरमेश्वराष्टभाषासार्वभौमकृष्णभट्टपौत्रसाग्निचित्यसर्वक्रतुविश्वजिदतिरात्रयाजिसत्यमङ्गलरत्नखेटश्रीनिवासदीक्षिततनूजन्यकामाक्षीगर्भसंभवस्य श्रीमदर्धनारीश्वरगुरुचरणारविन्दलब्धविद्यावैशद्यस्य श्रीराजचूडामणिदीक्षितस्य कृतिषु शास्त्रदीपिकाव्याख्यायां कर्पूरवर्तिकाख्यायां प्रथमस्याध्यायस्य चतुर्थः पादः ॥ समाप्तोऽध्यायश्च।

---

R. No. **1470.**

Palm-leaf. 14½ × 1½ inches. Foll. 111. Lines, 8 in a page. Telugu. Injured.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

**महाभाष्यप्रदीपप्रकाशिका.**

MAHĀBHĀṢYAPRADĪPAPRAKĀŚIKĀ.

By Pravartakōpādhyāya. Same work as that described under No. 1302 of the D.C.S. MSS., Vol. III.

Contains from the sixth Āhnika of the first Pāda of the first Adhyāya to the end of the second Pāda of the same Adhyāya.

**End:**

ग्राम्यपशुसङ्घेषु । सूत्रारम्भप्रयोजने निज . . . . . प्रत्याख्यानं सुकरमिति तदाह—स्त्रीपुंसात्मकस्येति । उभयात्मकत्वे हि सङ्घस्य पुंसः शेषप्राप्तौ स्त्रीशेषविधिस्स्यात् । तदेव तु नास्तीति प्रत्याख्यानाभिप्रायमाह—उभयात्मकत्वामिति ।

* * * *

उक्तविशेषलिङ्गाविशेषसिद्धिरित्याशङ्क्याह—तत्रेति न्यायेन विशिष्टलिङ्गस्य नियतत्वोपपादनादित्यर्थः ॥

**Colophon:**

इति प्रवर्तकोपाध्यायविरचिते भाष्यप्रदीपप्रकाशे प्रथमस्याध्यायस्य द्वि-

R. No. **1471.**

Palm-leaf. 16 × 1⅜ inches. Foll. 20. Lines, 8 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

## अभिनयदर्पणम्.

## ABHINAYADARPAṆAM.

A work on the art of dancing and gesticulation. It includes Nāṭyam, Nṛttam and Nṛtyam.

Complete.

**Beginning:**

आङ्गिकं भुवनं यस्य वाचिकं सर्ववाङ्मयम् ।
आहार्यं चन्द्रतारादि तन्नमस्सात्त्विकं शिवम् ॥

नाट्यवेदं ददौ पूर्वं भरताय चतुर्मुखः ।
ततश्च भरतस्सार्धं गन्धर्वाप्सरसां वदेत् ॥

नाट्यं नृत्तं तथा नृत्यमग्रे शम्भोः प्रयुक्तवान् ।
प्रयोगमुद्धतं श्रुत्वा संप्रयुक्तस्ततो हरः ॥
तण्डुना च गणाग्रण्या भरताय न्यदीदिशत् ।
लास्यमस्याग्रतः प्रीत्या पार्वत्या समदीदिशत् ॥
बुद्ध्वा तु ताण्डवं तण्डोः मर्त्येभ्यो मुनयोऽवदन् ।

* * * *

अपि ब्रह्मपरानन्दादिदमभ्यधिकं मतम् ।
जहार नारदादीनां चित्तानि कथमन्यथा ॥

इति नाट्यप्रशंसा ।

**End:**

एतैश्च नर्तनविधा शास्त्रतत्संप्रदायतः ।
सतामनुग्रहेणैव विज्ञेया नान्यथा भुवि ॥

इति नाट्यप्रकरणं समाप्तम् ।

यन्मन्दस्मितमिन्दुसुन्दरमुखोद्गीतं तदानीमभूत्
कन्दर्पायुतकल्पनापटुतरा ये वा दृशो विभ्रमाः ।

या च प्राकृतगीतगानकलना तस्यास्तदेतत्सदा-
प्यग्रे मे स्फुरतीतरत्तु न किमप्याः किं जगत्तन्मयम् ॥

**Colophon:**

अभिनयदर्पणं नाम प्रकरणम् ॥

The name of the scribe and the date of transcription are given thus:

प्रमादीचाभिधे वर्षे कटके शुक्लपक्षके ।
दशम्यां भानुवारे च वैद्यनाथेन सूरिणा ॥

---

R. No. **1472.**

Palm-leaf. 17 × 1½ inches. Foll. 117. Lines, 10 in a page. Telugu. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

(*a*) तत्त्वचिन्तामणिदीधितिप्रकाशोपन्यासः.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚŌPANYĀSAḤ.

Foll. 1*a*—90*a*. Foll. 39, 68, 79*b* and 90*b* are left blank.

By Vīrarāghavayajvan. Same work as that described under R. No. 88(*b*) *ante*. This is also called Nyāyakaustubha.

Breaks off in the Kūṭaghaṭitalakṣaṇa in the Caturdaśalākṣaṇī.

---

(*b*) राजपुरुषवादार्थः.

RĀJAPURUṢAVĀDĀRTHAḤ.

Foll. 91*a*—99*b*.

An investigation of the meaning of the compound expression Rājapuruṣa and of the component words Rāja and Puruṣa.

Incomplete.

**Beginning:**

राजपुरुष इत्यत्र राजपदस्य राजसंबन्धिनि लक्षणा स्वीक्रियते । राजसम्बन्धिनश्च पुरुषे अभेदेनान्वयः तथा च राजनिष्ठनिरूपितत्वसम्बन्धावच्छिन्नप्रकारतानिरूपितस्वत्वरूपसम्बन्धनिष्ठाश्रयतासम्बन्धावच्छिन्नप्रकारतानिरूपितसम्बन्धिनिष्ठाभेदसम्बन्धावच्छिन्नविशेष्यताभिन्नप्रकारतानिरूपितपुरुषनिष्ठविशेष्यताशाली शाब्दबोधः ।

**End:**

प्रत्ययजन्यतावच्छेदकविशेष्यतासम्बन्धेन प्रत्ययजन्योपस्थितेः पुरुषे सत्त्वेन पुरुषविशेष्यकराजप्रकारकस्वत्वसंसर्गकशाब्दबोधो दुर्वार इति चेन्न.

Foll. 100*a*—103*b* contain a few lines of Cakravartilakṣaṇa and Pragalbhalakṣaṇa of the Caturdaśalakṣaṇī. Fol. 104*a* contains a few lines from the second Lakṣaṇa in the Pañcalakṣaṇī. Foll. 104*b*—107*a* contain portions of Pramātvalakṣaṇa. Fol. 107*b* is left blank.

---

(*c*) शिशुपालवधः.

ŚIŚUPĀLAVADHAḤ.

Foll. 108*a*—117*b*.

Same work as that described under R.No. 659 *ante*.

Contains the Sargas four and five only complete.

---

## R. No. 1473.

Śrītāla. 9 × 1¾ inches. Foll. 45. Lines, 10 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

रामायणतात्पर्यदीपिका.

RĀMĀYAṆATĀTPARYADĪPIKĀ.

Foll. 1*a*—45*a*.

A work purporting to give the inner meaning and import of the Vālmīkirāmāyaṇa. The nature of this work is indicated in the second stanza. It is said to have been taught to Dharmarāja by Vyāsa.

Contains Kāṇḍas one to six.

**Beginning:**

(श्रीकरं) करुणासारं नत्वा वैकुण्ठनायकम् ।
श्रीरामायणतात्पर्यदीपिकां प्रवदाम्यहम् ॥

जन्मप्रभृति रामस्य यानि कृत्यानि भूतले ।
तानि कृत्यानि तात्पर्यगर्भितानि वदाम्यहम् ॥

पुरा व्यासं नमस्कृत्य धर्मराजो महामतिः ।
श्रीरामायणतात्पर्यं वदेत्युक्तोऽवदन्मुनिः ॥

व्यासः—

येष्वहस्सु यथाकाले कृतानि विविधानि च ।
रामेण तान्यहं ज्ञात्वा न दृष्टाज्ञा महीपते ॥

तुभ्यं वदामि श्रवणात् पातकघ्नानि तानि तु ।
ओम् । तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥

इति दीपिकायाम् ।

विष्णुः संप्रार्थितो देवैः रावणस्य वधार्थिभिः ।
तदा प्रादुरभूद्दाशरथिः श्रीरामनामभृत् ॥
शङ्खचक्रावभूतां तौ शत्रुघ्नभरतावुभौ ।

**End :**

पापिनां पुण्यमनसामपि संजातविस्मृति ॥
परिहृत्य स्मृतिं स्वीयां दत्वामुत्र गतिं शुभाम् ।
ददाति वैष्णवीं रामस्सत्यसन्धश्च सत्यवान् ॥
असत्यं राघवे नास्ति दुर्गतिर्नास्ति संस्कृतेः ।
एतस्य पठनात् राजन् भवेदन्ते स्मृतिर्हरेः ॥

**Colophon :**

इति श्रीव्यासोदितं रामायणतात्पर्यदीपिका युद्धकाण्डः समाप्तः ॥

Fol. 45*b* contains a few stanzas relating to the Jananakālanirṇaya of Rāvaṇa, etc.

---

## R. No. 1474.

Palm-leaf. 15⅝ × 1⅛ inches. Foll. 17. Lines, 7 in a page. Grantha Good.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

कालनिर्णयसङ्ग्रहश्लोकाः—सव्याख्याः.

KĀLANIRṆAYASAṄGRAHAŚLŌKĀḤ WITH COMMENTARY.

The text deals with the determination of the proper time for the performance of certain ceremonies and rites. It is the same as the Kālanirṇayakārikā which forms part of the Kālamādhavīya (described under No. 3109 of the D C.S. MSS., Vol. VI) of Mādhavācārya, son of Śrīmatī and Māyaṇa and the Prime Minister of Bukkaṇa, king of Vijayanagar. The author belongs to Bhāradvajāgōtra and is the follower of the Bōdhāyanasūtra; and he is said to have brothers by name Śāyaṇa and Bhōganātha. The author of the commentary is stated to be Bhāratītīrtha.

**Beginning:**

सोऽहं प्राप्य विवेकतीर्थपदवीमाम्नायतीर्थे परं
मज्जन् सज्जनतीर्थसङ्गनिपुणस्सद्वृत्ततीर्थं श्रयन् ।
लब्धामाकलयं(यन्) प्रभावलहरीं श्रीभारतीतीर्थतो
विद्यातीर्थमुपाश्रयन् हृदि भजे श्रीकण्ठमव्याहतम् ॥
सत्यैकव्रतपालनो द्विगुणधीस्त्र्यर्थश्चतुर्वेदिता
पञ्चस्कन्धवता षडन्वयधृतस्सप्ताङ्गसर्वंसहः ।
अष्टव्यक्तिकलाधरो नवनिधिः पुष्यद्दशप्रत्यय-
स्मार्तोच्छ्रायधुरन्धरो विजयते श्रीबुक्कणक्ष्मापतिः ॥
इन्द्रस्याङ्गिरसो नलस्य सुमतिः शैव्यस्य मेधातिथिः
धौम्यो धर्मसुतस्य वैन्यनृपतेस्स्वौजा निमेर्गौतमः ।
प्रत्यग्दृष्टिररुन्धतीसहचरो रामस्य पुण्यात्मनो
यद्वृत्तस्य विभारभूत् कुलगुरुर्मन्त्री तथा माधवः ॥
श्रीमती जननी यस्य सुकीर्तिर्मायणः पिता ।
सायणो भोगनाथश्च मनोबुद्धिस्स(स)होदराः(रौ) ॥
यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी ।
भारद्वाजकुलं यस्य सर्वज्ञस्स हि माधवः ॥
व्याख्याय माधवाचार्यो धर्मान् पाराशरानथ ।
तदनुष्ठानकालस्य निर्णयं वक्तुमुद्यतः ॥
व्यामूढानामिह तनुभृतां जाह्नवीतीर्थमेकं
विद्यातीर्थं प्रकृतिविमलं सद्विवेकोदयानाम् ।
सर्वेषां तत् प्रथमसुखदं भारतीतीर्थमाहुः
तद्भावान् मे विपुलमनसो निर्णये शक्तिरस्ति ॥

ननु भवता यश्चिकीर्षितः कालनिर्णयः स किं नानाविधश्रुतिवचोभिः तदनुग्राहकन्यायैश्चोपबृंहितो न वा ।

* * * *

सङ्ग्रहविवरणाभ्यां नोक्तदोषावित्याह ।

अर्थोऽनुक्रम्यते श्लोकैरखिलो निर्णिनीषतः ।
तावतैवानुतिष्ठासुः निस्सन्देहः प्रवर्तताम् ॥

ततो मीमांसाचित्तस्य समाधानाय तत्पुनः ।
विवरिष्ये यथान्यायं श्रुतिस्मृतिवचोबलात् ॥

श्रोतृबुद्धिसमाधानाय वक्ष्यमाणप्रमेयविभागक्रमं संगृह्णाति—

पञ्च प्रकरणान्यत्र तेषूपोद्घातवत्सरौ ।
प्रतिपच्छिष्टतिथयो नक्षत्रादिरिति क्रमः ॥

**End:**

तदेवं वर्णितमुपसंहरति। सङ्ग्रहमीदृशं निर्णयं न्यायैर्विवरीतुमिहोद्यम इति।

**Colophon:**

इति श्रीभारतीतीर्थयोगीन्द्रविरचिता कालनिर्णयसङ्ग्रहश्लोकव्याख्या समाप्ता॥

---

R. No. **1475.**

Palm-leaf. 15⅓ × 1¼ inches. Foll. 66. Lines, 8 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

**ऐतरेयोपनिषद्भाष्यटीका.**

AITARĒYŌPANIṢADBHĀṢYAṬĪKĀ.

A commentary on the Aitarēyōpaniṣadbhāṣya described under No. 330 of the D.C.S. MSS., Vol. I, Part III : by Abhinavanārāyaṇēndrasarasvatī, a pupil of Jñānēndrasarasvatī who was himself the disciple of Kaivalyēndrasarasvatī.

Complete.

**Beginning:**

आत्मा वा इदमित्यादिना केवलात्मविद्यारम्भस्यावसरं वक्तुं वृत्तं कीर्तयति । परिसमाप्तमिति। तत् परिसमाप्तिः । कथं गम्यत इत्याशङ्क्य तत्फलोपसंहारादित्याह एषेति। परा गतिरिति। परं गन्तव्यं प्राप्तव्यं फलमित्यर्थः । उपसंहारमेव वाक्योदाहरणेन दर्शयति—एतदिति ।

**End:**

ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
कण्ठं भित्त्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ ॥

इति स्मृतेः ओङ्कारेण ब्रह्मात्मानुसन्धानलक्षणं मङ्गलं कर्तुम् ओमित्युक्तमिति। ओम्॥

Colophon:

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कैवले(ल्ये)न्द्रसरस्वतीपूज्यपाद-शिष्यश्रीमज्ज्ञानेन्द्रसरस्वतीपूज्यपादशिष्यश्रीमदभिनवनारायणेन्द्रसरस्वतीविरचितायामैतरेयोपनिषद्भाष्यटीकायां षष्ठोऽध्यायः॥

एवं षष्ठाध्याये तत्त्वविद्यां परिसमाप्य सप्तमे शान्तिकरो मन्त्रः पठितः। वाङ्(ङ्मे)मनसीत्यादिः। तस्य स्पष्टार्थं त्वादात्मतत्त्वाप्रतिपादकत्वाच्च भाष्यकारैर्न व्याख्यातः। स मन्दानां बोधाय दीपिकाकारोक्तरीत्या व्याख्यायते।

* * * *

अनेन मन्त्रपाठेन विद्योत्पत्तेः पुराविद्याप्रतिबन्धका विघ्नाः परिहियन्ते। विद्योत्पत्तेरूर्ध्वं संभावनाविपरीतभावनोत्पादकविघ्नाः परिहियन्ते। अवतु वक्तारमित्यभ्यासोऽभ्यासपरिसमाप्त्यर्थद्वितीयोक्तपरिसमाप्त्यर्थश्च॥

**Colophon:**

इति सप्तमाध्यायस्समाप्तः॥

म(ा)(यारोप्यसमस्तमद्वय इदं तस्मिन् प्रवेशान्मृषा
भुक्त्वा जागरिकादिदुःखमखिलं निर्वि . . . .।
कोऽहं वेति विचार्य वायुकरणग्रामात् पृथक्सर्वकं(गं)
प्रज्ञानैकरसं निरस्तनिखिलोपाधिं परं ब्रह्म च॥

---

R. No. **1476.**

**Palm-leaf.** 17½ × 1½ inches. Foll. 110. Lines, 5 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

श्वेताश्वतरोपनिषद्दीपिका.
ŚVĒTĀŚVATARŌPANIṢADDĪPIKĀ.

By Vijñānōttama, pupil of Jñānōttama. Same work as that described under No. 810 of the D.C.S. MSS., Vol. I, Part III.

**Complete.**

## R. No. 1477.

Palm-leaf. $15\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 124. Lines, 10 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

बृहदारण्यकभाष्यटीका.

BṚHADĀRAṆYAKABHĀṢYAṬĪKĀ.

By Ānandajñāna, pupil of Śuddhānanda. Same work as that described under No. 645 of the D.C.S. MSS., Vol. I, Part III.

Breaks off in the fifth Adhyāya or Madhukāṇḍa.

---

## R. No. 1478.

Palm-leaf. $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 129. Lines, 8 in a page. Telugu. Injured.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

Foll. 1 and 2 contain a few sentences relating to Anantavratakalpa.

(*a*) ईशावास्योपनिषद्भाष्यम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAM.

Foll. 3*a*—10*a*. Fol. 10*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 310 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(*b*) ईशावास्योपनिषद्दीपिका.

ĪŚĀVĀSYŌPANIṢADDĪPIKĀ.

Foll. 11*a*—14*a*. Fol. 14*b* is left blank.

By Śaṅkarānanda, pupil of Ānandātman. Same work as that described under No. 316 of the D.C.S. MSS., Vol I, Part III.

Complete.

---

(*c*) ईशावास्योपनिषद्भाष्यटिप्पणम्.

ĪŚĀVĀSYŌPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 15*a*—20*b*.

By Śivānandayati. Same work as that described under No. 312 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*d*) केनोपनिषद्भाष्यम्.

KĒNŌPANIṢADBHĀṢYAM.

Foll. 21*a*—33*a*. Fol. 33*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 387 of the D.C.S. MSS., Vol. I, Part III.

Contains the portion called Vākyavivaraṇa or sentence exposition.

---

(*e*) तलवकारोपनिषद्भाष्यटिप्पणम्.

TALAVAKĀRŌPANIṢADBHĀṢYAṬIPPAṆAM.

Foll. 34*a*—40*a*. Fol. 40*b* is left blank.

By Śivānandayati. Same work as that described under No. 389 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(*f*) ऐतरेयोपनिषद्भाष्यम्.

AITARĒYŌPNIṢADBHĀṢYAM.

Foll. 41*a*—54*a*. Fol. 54*b* is left blank.

By Śaṅkarācārya. Same work as that described under No. 330 of the D.C.S. MSS., Vol. I, Part III.

Complete.

---

(*g*) ऐतरेयोपनिषद्भाष्यटीका.

AITARĒYŌPANIṢADBHĀṢYAṬĪKĀ.

Foll. 55*a*—86*b*.

By Abhinavanārāyaṇēndrasarasvatī, a disciple of Jñānēndrasarasvatī. Same work as that described under R.No. 1475 *ante*.

Complete.

---

(*h*) कैवल्योपनिषद्दीपिका.

KAIVALYŌPANIṢADDĪPIKĀ

Foll. 87*a*—90*b*.

By Śaṅkarānanda. Same work as that described under No. 411 of the D.C.S. MSS., Vol. I, Part III.

Complete.

(*i*) अथर्वशिखोपनिषद्दीपिका.

ATHARVAŚIKHŌPANIṢADDĪPIKĀ.

Foll. 91*a*—94*a*. Fol. 94*b* is left blank.

A gloss on the Atharvaśikhōpaniṣad, which is described under No. 250 of the D.C.S. MSS., Vol. I, Part III : by Śaṅkarānanda, a pupil of Ānandātman.

Complete.

**Beginning :**

ऋचोऽथर्वशिखानाम्नः श्रुतेः क्लेशविनाशिनी ।
क्रियते ब्रह्मबोधार्थं तया शुध्यतु मे मनः ॥

ब्रह्मविद्याप्राप्त्यर्थं तपोविद्यासम्पन्नैरपि गुरुशुश्रूषादिकं करणीयमित्येतदर्थं प्रथमत आख्यायिकामवतारयति अथेति । अथ अधिकारिसम्पत्त्यनन्तरम् । ह किल एनं वक्ष्यमाणम् अथर्वाणम् पैप्पलादः पिप्पलं कर्मफलं तदत्तीति पिप्पलादः । स्वयमुद्यमशून्यः । पुराकृतकर्मवशात् प्राप्तान्नोदकादिना शरीरधारक इत्यर्थः ।

**End :**

ध्यानयोग्यः शिवङ्करः मङ्गलकरः, सर्वं निखिलम् अन्यत् शिवव्यतिरिक्तम् । परित्यज्य स्पष्टम् । समाप्ता समाप्तिं गता । अथर्वशिखा अथर्ववेदे शिखेव सारभूता उपनिषत् अथर्वशिखा एतामथर्वशिखामधीत्य पाठतोऽर्थतश्च स्वाधीनं कृत्वा, द्विजः त्रैवर्णिकः गर्भवासात् गर्भवासमलात् अज्ञानात् विमुक्तः आत्मज्ञानाद्विमुक्तः । आत्मज्ञानेनापगताज्ञानो जीवन् विमुच्यते देहपाते सर्वथा संस्कारहीनत्वेन मुक्तो भवति । उपनिषत्परिसमाप्त्यर्थः, उपनिषत्प्रतिपाद्यमर्थं समाप्तौ दर्शयति । ओम् ओङ्कारसत्यम् अबाधितं पूर्वरूपम् जगत् न त्वन्यत् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यआनन्दात्मपूज्यपादशिष्यश्रीशङ्करानन्दभगवतः कृतिः अथर्वशिखोपनिषद्दीपिका समाप्ता ॥

---

(*j*) श्वेताश्वतरोपनिषद्दीपिका

ŚVĒTĀŚVATARŌPANIṢADDĪPIKĀ.

Foll. 95*a*—129*b*.

By Vijñānōttama, pupil of Jñānōttama. Same work as that described under No. 810 of the D.C.S. MSS., Vol. I, Part III.

Contains Adhyāyas one to five complete and the sixth incomplete. The last leaf is much injured.

---

## R. No. 1479.

Palm-leaf. 12⅝ × 1½ inches. Foll. 35. Lines, 12 in a page. Grantha. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

**गणेशसहस्रनामव्याख्या—खद्योतः.**

GAṆĒŚASAHASRANĀMAVYĀKHYĀ: KHADYŌTAḤ.

A commentary on the Gaṇēśasahasranāmastōtra which contains about one thousand names in praise of Gaṇēśa or Vināyaka: by Bhāskarabhāratī. The commentator summarises the meanings explained, in the form of stanzas.

Complete in ten Śatakas. The portion relating to Phalaśruti, etc., is incomplete.

**Beginning:**

गणेशो नः पायात् प्रणमत गणेशं जगदिदं
गणेशेन त्रातं नम इह गणेशाय महते ।
गणेशान्नास्त्यन्यत् त्रिजगति गणेशस्य महिमा
गणेशे मच्चित्तं निवसतु गणेश त्वमव माम् ॥

गुरुरेव गतिर्गुरुमेव भजे गुरुणैव सहास्मि नमो गुरवे ।
न गुरोरधिकं शिशुरस्मि गुरोः मतिरस्ति गुरौ मम पाहि गुरो ॥

प्राचां कुसृष्टिरचनैकमयस्वभावामज्ञानगाणपततन्त्रपुराणभावाम् ।
व्याख्यामुदस्य सुविभाव्य गणेशनामान्युत्थापयामि तदुपासकतोषहेतोः ॥

नन्वर्था नाम्न्यनन्ताः फणिपतिविषणाशक्यकृत्स्नप्रकाशा
मन्दस्तत्र प्रवृत्तोऽप्युपहसितपदं स्याज्जनस्येति चेन्न ।
यत्तार्क्ष्यद्योमणिभ्यामपि दुरधिगमं कृत्स्नशो दुष्प्रकाशं
तत्खद्योतः पतत् खं किमपि विशदयत्येव नेहास्त्यवद्यम् ॥

नाम्नामर्थश्चिदाकाशस्तं द्योतयितुमुद्यतः ।
ग्रन्थः खद्योतनामास्तु ब्रह्म खं गगनं च खम् ॥

केषां न दुष्करं नाम्नां साकल्येनार्थवर्णनम् ।
अतस्संक्षिप्य वक्तव्यश्लोकैरेव स वर्ण्यते ॥

इह खलु सर्ववेदान्तसंवेद्यमखण्डसच्चिदानन्दं निरस्तत्रिविधभेदमवाङ्मनस-गोचरं स्वप्रकाशं मुक्तोपसृप्यं परं ब्रह्म । तन्निर्विकल्पेन तद्विषयकसविलासा-ज्ञाननिवृत्त्या कर्णचामीकरन्यायेन तदात्मकतावाप्तिरूपो मोक्ष इत्यविवादः ।

* * * *

"गणेश्वरो गणक्रीडो गणनाथो गणाधिपः ।

एकदंष्ट्रो वक्रतुण्डः" "गणेश्वरो गणेशस्य गणक्रीडाभिधो गुरुः । तच्छि-ष्यो विकटस्तस्य शिष्यो वै विघ्ननायकः ।" इत्यादयोऽपि . . . देन गणेशा एव देशिकाः ।

मन्त्रारम्भे गुरुस्मृत्यावश्यकत्वेन कीर्तिताः ।
वियदादिगणस्यान्तः प्रविश्य क्रीडनेन वा ॥
गणक्रीड इति प्रोक्तः तत्सृष्ट्वेत्यादितच्छ्रुतेः ॥

**End:**

प्रातिस्विकमनन्तानामानन्त्ये गणना तु या ॥
तावन्तं ददानन्दमनन्तानन्दसौख्यदम् ।
अनन्तानन्ददानं तु स्वाद्वैते पर्यवस्यति ॥
इति भारत्युपाख्यस्य भास्काराग्निचितः कृतौ ।
गणेशनामसाहस्रखद्योते दशमं शतम् ॥

* * * *

विज्ञानं शास्त्रशिल्पविषयकम् । चतुर्विधम्— सुरनरतिर्यक्स्थावरवश्य-भेदात् । नरवश्यविशेषमाह—राज्ञ इति ।

समस्तकलहध्वंसि दग्धबीजप्ररोहणम् ।

प्रजोत्पादनसामर्थ्यप्रदम् । षट् कर्माणि मोहनमाकर्षणं स्तम्भनं विद्वेषण-मुच्चाटनमारण.

---

R No. **1480.**

Palm-leaf. 16¾ × 1⅝ inches. Foll. 15. Lines, 12 in a page. Telugu. Injured.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kumārāpuram, Trichinopoly district.

तैत्तिरीयोपनिषद्भाष्यम्.

TAITTIRĪYŌPANIṢADBHĀṢYAM.

By Śaṅkarācārya. Same work as that described under No. 505 of the D.C.S. MSS., Vol. I, Part III.

Incomplete.

---

R. No. **1481.**

Palm-leaf. $14\frac{1}{2} \times 1\frac{5}{8}$ inches. Foll. 36. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

(*a*) वैयासिकन्यायमाला.

VAIYĀSIKANYĀYAMĀLĀ.

Foll. 1*a*—24*b*.

By Bhāratītīrtha. Same work as that described under No 4751 of the D.C.S. MSS., Vol. IX.

Contains from the first Adhyāya to the end of the second Pāda of the fourth Adhyāya.

---

(*b*) माण्डूक्योपनिषद्विवरणकारिका.

MĀṆḌŪKYŌPANIṢADVIVARAṆAKĀRIKĀ.

Foll. 25*a*—34*b*.

This is the Kārikā referred to under No. 694 of the D.C.S. MSS. By Gauḍapādācārya.

Wants the beginning, otherwise complete.

**Beginning :**

वैतथ्यं सर्वभावानां स्वप्न आहुर्मनीषिणः ।
अन्तस्थानान्तु भावानां संवृतत्वेन हेतुना ॥
अदीर्घत्वाच्च कालस्य गत्वा देहान् न पश्यति ।
प्रतिबुद्धश्च वै सर्वस्तस्मिन् देशे न विद्यते ॥

* * * *

**Colophon :**

गौडपादीयं वैतथ्यप्रकरणं समाप्तम् ॥

**End :**

क्रमते न हि बुद्धस्य ज्ञानं धर्मेषु तायिनः ।
सर्वे धर्मास्तथा ज्ञानं नैतत् बुद्धेन[ा] भाषितम् ॥

दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम् ।
बुद्ध्वा पदमनानात्वं नमस्कुर्मो यथाबलम् ॥

**Colophon:**

इति श्रीगौडपादीयमाण्डूक्यविवरणे अलातशान्त्याख्यं चतुर्थं प्रकरणं समाप्तम् ॥

Foll. 35—36 contain a few stanzas of Viṣṇusahasranāmavyākhyāna of Śaṅkarācārya.

---

R. No. **1482.**

Palm-leaf. $15\frac{5}{8} \times 1\frac{1}{2}$ inches. Foll. 63. Lines, 8 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

(*a*) न्यायसङ्ग्रहः.

NYÂYASAṄGRAHAḤ.

Foll. 1*a*—37*a*. Fol. 37*b* is left blank.

Similar to the work described under No. 4212 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and end.

**Beginning:**

आत्मा इतरेभ्यो भिद्यते, शरीरमितरेभ्यो भिद्यते इति एवंरूपेण प्रत्येकमितराभिन्नत्व . . . . ज्ञानानन्तरं सर्वप्रमेयाणि स्वेतरेभ्यो भिद्यन्त इति समूहालम्बनरूपत्वज्ञानं ततश्चात्मा. . . . . .

* * * *

यद्यपि भोगायतनत्वं भोगादिकरणत्वमात्मनोऽत्रासंभवि, तथापि यदवच्छिन्नात्मनि भोगो जायते तद्भोगायतनम् । तथा च भोगावच्छेदकत्वं लक्षणम् । घटाद्यवच्छिन्नात्मनि सुखाद्यनुभवाभावान्नातिप्रसङ्गः ।

**End:**

एवमपि सुखत्वादावतिव्याप्तिः, अथ प्रागभावप्रतियोगित्वराहितेति । सुखं च न प्रागभावप्रतियोगित्वरहितामिति नातिव्याप्तिः । एवमपि प्रागभावप्रतियोगित्वरहिते ईश्वरप्रयत्नादौ समवेते प्रयत्नत्वादौ अतिव्याप्तिः । अतः प्रयत्नेच्छाव्यतिरिक्ते अनुमितित्वादावतिव्याप्तिवारणाय साक्षादिति . . . . . .

(*b*) निरुक्तिव्याख्या.
NIRUKTIVYĀKHYĀ.

Foll. 38*a*—63*b*.

A commentary on the passages which explain the meaning of technical words used in the Nyāya and Vaiśēṣika systems of philosophy.

Incomplete.

**Beginning:**

प्रणम्य दक्षिणामूर्तिं साम्बं संसारभेषजम् ।
निरुक्तिव्याकृतिं कुर्वे बालव्युत्पत्तिदायिनीम् ॥

अज्ञातकरणजन्यज्ञानानुवृत्तो ज्ञातकरणजन्यज्ञानव्यावृत्तो धर्मविशेषस्साक्षत्त्व-मिति निरुक्तिः। यद्यपि साक्षत्त्वजातेरखण्डतया सखण्डोपाधिवन्न निर्वचनापेक्षा, तथापि इन्द्रियत्त्वादिवन्न तच्छरीरनिर्वचनमत्र क्रियते। किन्तु साक्षत्त्वजातिः कुत्र वर्तत इत्यपेक्षायां ज्ञातकरणजन्यज्ञानेषु न वर्तते, किन्त्वज्ञातकरणजन्यज्ञानेषु वर्तत इति आश्रयप्रदर्शनं क्रियते।

* * * *

निरुक्तेरयमर्थः। अज्ञातकरणानि चक्षुरादीनि तज्जन्यज्ञानानि रूपादि-ज्ञानानि तेष्वनुवृत्तः। तत्र विद्यमानः। ज्ञातकरणानि लिङ्गादीनि तज्जन्य-ज्ञानानि अनुमित्युपमितिशाब्दज्ञानानि तेभ्यो व्यावृत्तः तत्रावर्तमानः। एवं-विधो यो धर्मविशेषः स साक्ष(त्त्व)मिति ॥

**End:**

(विशेष)गुणसमवेतसामान्यगुणसमवेतगुणत्वव्याप्यजातिरित्येव निरुक्तिः . . . . . नाम गगनसमवेतसमवेतत्वरहितसत्तासाक्षाद्व्याप्यजातिः गगनसमवेतः शब्दस्तत्र . . . . . गगनसमवेतद्रव्यत्वं न तत्र तत्त्वं नाम धर्मः।

---

R. No. **1483.**

Palm-leaf. 16¼ × 1⅜ inches. Foll. 236. Lines, 9 in a page. Grantha Injured.

Purchased in 1915-16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

माधवीयधातुवृत्तिः.

MĀDHAVĪYADHĀTUVṚTTIḤ.

A treatise on Sanskrit grammar dealing specially with the conjugation of verbs: by Sāyaṇācārya, son of Māyaṇa and brother of Mādhava and also the Prime Minister of Saṅgama, son of Kamparāja. The work has been named Mādhavīyadhātuvṛtti by the author in honour of his brother Mādhava. It has been printed in the Government Oriental Library Series, Mysore.

Incomplete. Contains up to the end of the first group of roots called Bhūvādi.

**Beginning:**

वागीशाद्यास्सुमनसः(+)तं नमामि गजाननम् ॥

जीयाद्दन्तिमुखो यस्य (लीलयाजा)ण्डखण्डने ।
कन्दाङ्कुरवदाभाति दन्ताग्रं तद्बहिर्गतम् ॥
चिदानन्दकलां वाणीं वन्दे चन्द्रकलाधराम् ।
नैर्मल्यतारतम्येन बिम्बितां चित्तभित्तिषु ॥
अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः ।
यत्कीर्तिमौक्तिकादर्शे त्रिलोक्या प्रतिबिम्ब्यते ॥
यशः क्षीराहुतीकृत्य यत्प्रतापहुताशने ।
परे यान्ति पदं दिव्यं राजानो रणदीक्षिताः ॥
तूर्णं कर्णान्तिकं प्राप्ते यत्प्रतापधनञ्जये ।
पुरो निधाय गाङ्गेयमात्मा संरक्ष्यते परैः ॥
कुर्वन् शत्रुयशांसि धूमपटलीं कूलङ्कषाज्यास्पदः
काष्ठासङ्गविवर्धितः प्रकटयन् भूतिं नवां भूयसीम् ।
आतन्वन्नितरप्रतापदहनं स्फूर्जत्स्फुलिङ्गाकृतिं
प्रायो यच्छति यत्प्रतापदहनः कस्मै न विस्मेरताम् ॥
On the locating of the five manifestations of the goddess Śakti, viz., Mūlakalpalatā, Pañcakāmēśvarī, Pārijātēśvarī, Kumārīkalpalatā and Pañcabāṇēśvarī, in the four directions and in the centre, by the repetition of the appropriate Mantras, and on the mode of their contemplation.

Complete.

**Beginning:**

मूलं महाकल्पलतेश्वरी( . . . )मूलकल्पलताम्बा श्री । मध्ये ॥

रक्तां रक्ताम्बरालेपां ध्यायेत्तां सर्वकामदाम् ।

पाशाङ्कुशधनुर्बाणपुस्तकाक्षरमालिकाम् ॥

ह्रीं क्लीं ऐं बूं श्रीं महाकल्प( . . . )पञ्चकामेश्वरी( . . . )पूर्वे.

सुधाढ्यकलशां मालां बाणपुस्तकधारिणीम् ।

शुभाङ्गरागवसनां पारिजातेश्वरीं भजे ॥

**End:**

बालार्कमण्डलाभासां नानालङ्कारशोभिताम् ।

धनुर्बाणाङ्कितां ध्यायेत् पञ्चबाणेश्वरीं शिवाम् ॥

ह्रुं ह्रीं क्लीं बूं सां महा( . . . )पञ्चबाणेश्वरी कल्पलताम्बाश्रा उत्तरे ।

**Colophon:**

इति पञ्चकल्पलतान्यासः ॥

---

(c) राजराजेश्वरीस्तोत्रम्.

RĀJARĀJĒŚVARĪSTŌTRAM.

Foll. 3*b*—7*a*.

Similar to the work described under No. 10820 of the D.C.S. MSS., Vol. XIX. Its repetition is held to be efficacious in removing consumption and in conferring prosperity and salvation.

Complete.

**Beginning:**

श्रीदेव्युवाच—

देवदेव महादेव सच्चिदानन्दविग्रह ।

पञ्चकृत्यपरेशान परमानन्ददायक ॥

श्रीराजराजराजेशी या श्रीत्रिपुरसुन्दरी ।

तस्या ध्यानं ममाचक्ष्व यदि ते करुणा मयि ॥

श्रीशिव उवाच—

लक्षवारसहस्राणि वारितापि पुनः पुनः ।

स्त्रीस्वभावान्महादेवि पुनस्त्वं परिपृच्छसि ॥

इतः पूर्वं मया नोक्तं गोप्यात् गोप्यतरं शिवे ।

येनाहमपि युद्धेषु देवासुरजयी सदा ॥

निगमागमकोटीनां सारात् सारतरं परम् ।
श्रीराजराजराजेशीध्यानं सर्वोत्तमोत्तमम् ॥
तव स्नेहात् प्रवक्ष्यामि भोगमोक्षप्रदं नृणाम् ।
क्षयरोगारिमृत्युघ्नं सर्वसौभाग्यवर्धनम् ॥

**End:**

एवं ध्यात्वा स्वहृदये राजराजेश्वरीश्वरीम् ।
पूर्वोक्तन्यासशुद्धात्मा स्वात्माभेदेन भावयेत् ॥
अन्तर्यागक्रमेणैव सिद्धिद्रव्यसमन्विताम् ।
रक्ताम्बरस्रगालेपरक्तभूषणभूषिताम् ॥
लाक्षारुणगृहे स्थित्वा पूजां कुर्यात् समाहितः ।
आवाहिन्यादिभेदाश्च नव मुद्राश्च दर्शयेत् ॥

* * * *

संपूर्णा चिन्तयेद्विद्वान् ब्रह्मरन्ध्रेऽरुणप्रभाम् ।
द्रवत्सुधाषोडशार्णान् सर्वसौभाग्यदां स्मरन् ॥
षोडशार्णमहामन्त्रं मन्त्रराजोत्तमोत्तमम् ।
सकृच्छ्रवणमात्रेण कोटिजन्माघनाशनम् ॥

* * * *

सृष्टिस्थित्युपसंहारकर्ता शिव इवापरः ॥
राजराजेश्वरीरूपो राजराजाभिवन्दितः ।
कुलकोटिं समुद्धृत्य शिवयोरैक्यमाप्नुयात् ॥

**Colophon:**

इति राजराजेश्वरीस्तोत्रं संपूर्णम् ॥

Fol. 7 contains a few miscellaneous stanzas. Fol. 8*a* contains Vidyāgōpālamantra and Sītārāmamantra.

---

## (*d*) गोपालाष्टादशाक्षरमन्त्रकल्पः.
## GŌPĀLĀṢṬĀDAŚĀKṢARAMANTRAKALPAḤ.

Foll. 8*b*—12*a*.

Similar to the work described under No. 7826 of the D.C.S. MSS., Vol. XV.

Complete.

**Beginning :**

श्रीनारद ऋषिः, गायत्री छन्दः, श्रीकृष्णो देवता । श्रीं ह्रीं क्लीं हृत । कृष्णाय शिरः । गोविन्दाय शिखा । गोपीजन कवचम् । वल्लभाय नेत्रम् । स्वाहास्त्रम् । पुनर्विद्याया अङ्गऋष्यादीन् पूर्ववत् कृत्वा ध्यानम् ।

अर्धम् ।

क्षीराम्भोनिधिमध्यसंस्थितलसद्द्वीपस्वकल्पद्रुमो-
द्यानोद्यन्मणिमण्टपान्तरुदितश्रीपीठपा . . गम् ।
दोर्दण्डैररिशङ्खवेणुसृणिसत्पाशेक्षुचापाशुगान्
बिभ्राणं कमलामहीविलसितं वन्देऽरुणाङ्गं हरिम् ॥

यन्त्रप्रकारः । अस्यार्थः—

प्रथमं त्रिकोणं विलिख्य तन्मध्ये बिन्दु विलिख्य

* * *

पुनः षट्सु दलेषु कामबीजादि गोपालाष्टादशवर्णांस्त्रिशत्(स्त्रिंशस्त्रिंशो) विलिखेत् ।

**End :**

कट्यादिपादान्तं कर्णादिकट्यन्तं शिरआदिकर्णान्तशिरआदिपादान्तं च व्याप्य पुनर्मूलमन्त्रेण शिरादि(रआदि)पादान्तं त्रिव्यांप्य गोपालमन्त्रैश्च श्रीविद्या-षडङ्गानि कृत्वा जपेत् ॥

Fol. 12 contains a few stanzas relating to Mēdhādakṣiṇāmūrti-mantra and Mōhinīmantra.

---

(*e*) श्रीचक्रन्यासः.

ŚRĪCAKRANYĀSAḤ.

Foll. 13*a*—20*a*. Fol. 20*b* is left blank.

Similar to the work described under No. 5743 of the D.C.S. MSS., Vol. XII.

Contains the Sthitinyāsa only.

**Beginning :**

. . . . न्यासानन्तरं चक्रन्यासं कुर्यात् । तत्र प्रथमं संहारक्रमः । अनन्तरं सृष्टिक्रमः । अनन्तरं स्थितिरिति शक्तविषयः । अशक्तस्य तु एक एव । एकश्चेत् स्थितिन्यास एव कर्तव्यः । इति महतां संप्र . . . . . क्तत्त्वात् स्थितिन्यासः कर्तव्यः । मेरुतन्त्रप्रकारेण लिख्यते—

अस्य श्रीचक्रन्यासमन्त्रस्य ईश्वर ऋषिः, गायत्री छन्दः, श्रीमहात्रिपुरसुन्दरी देवता । ऐं बीजम्, सौः शक्तिः, क्लीं कीलकम्, इति स्मृत्वा विन्यस्य ।

* * *

ओं ऐं ह्रीं श्रीं क ए इ ल ह्रीं नमः मूर्ध्नि ।

**End:**

पूर्ववत् कमलकर्णिकायां थादिदान्तवर्णाङ्कितां ध्यात्वा, तत्र कुण्डलिनीं चतुष्फणां विभाव्य, तेषु प्राग्वत् सादि चतुष्कं विन्यस्य, ब्रह्मरन्ध्रे अकथादिरे . . . . . द्य तत्र कुण्डलिनीं पञ्चदशफणान्वितां ध्यात्वा । तत्र समस्त-विद्यां प्राग्वत् न्यसेदिति स्थितिन्यासः ।

**Colophon:**

स्थितिन्यासस्समाप्तः ॥

Foll. 21*a*—25*b* contain Jvaranakṣatraśānti, Śaktinyāsa, Kāmakalā-nyāsa and Mantradīkṣāmāsādiniyamaprakāra. Fol. 23*b* is left blank.

---

(*f*) गणपतिमन्त्रकल्पः.

GAṆAPATIMANTRAKALPAḤ.

Foll. 26*a*—49*b*.

On certain details, such as, the Mantras to be repeated, the nature of the Yantras (mystic diagrams) to be drawn, etc., in relation to the worship of Vidyāgaṇapati. It is said to have been revealed by Śaṅkara to Pārvatī.

Complete; stated to occur as Paṭalas 71 to 81 of the Ākāśabhairava-kalpa forming part of the Mahāśaivatantra.

Contains the following Paṭalas:—

७१. विद्यागणपतिमन्त्रयन्त्रोद्धारविधानम्.

७२. विद्यागणपतिमन्त्रसाधकाचारविधानम्.

७३. विद्यागणपतिचक्राराधनक्रमसूक्ष्माविधानम्.

७४. विद्यागणपतिचक्रान्तरविधानम्.

७५. विद्यागणपतिहोमविधानम्.

७६. विद्यागणपतिचतुरावृत्तितर्पणविधानम्.

७७. विद्यागणपतिनामाष्टोत्तरशतविधानम्.

७८. विद्यागणपतिस्तोत्रविधानम्.

७९. विद्यागणपतिक्रियाभेदविधानम्.

८०. विद्यागणपतिकवचविधानम्.

८१. विद्यागणपतियन्त्रविधानम्.

**Beginning:**

श्रीदेव्युवाच—

श्रीमत्सकलकल्याणकारणायाखिलात्मने ।
प्रकाशानन्दरूपाय गुरवे ब्रह्मणे नमः ॥
नानाकल्परहस्यषु यत्नसाध्येषु सादरम् ।
कथितेषु त्वया तेषु सद्यस्सर्वार्थसाधकम् ॥
विद्यागणपतेः कल्परहस्यं सूचितं पुरा ।
सविस्तरमिह श्रोतुमिच्छाम्यार्य वदस्व मे ॥

* * * *

विद्यागणेशमन्त्रस्य ऋषिरानन्द उच्यते ।
गायत्री छन्द इत्युक्तं देवो विद्यागणाधिपः ॥
ऐं बीजं मदनाग्नेयशक्ती शक्तिस्ततः परम् ।
कीलकं चैन्दवं मायामिष्टसिद्ध्यै नियुज्यते ॥

* * * *

**Colophon:**

इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमा-महेश्वरसंवादे शङ्करेण विरचिते राज्यलक्ष्मीपीठिकायां श्रीविद्यागणपतिमन्त्रयन्त्रो-द्धारविधानं नाम एकसप्ततितमः पटलः ॥

**End:**

आलिख्य पट्टभेदेषु पूज्य जप्त्वा यथापुरा ।
द्विसन्ध्यमभिषिच्याथ सर्वाङ्गमभिमृश्य च ॥
संप . . . . . द्विजान् पूज्य यथाधनम् ।
उपविश्य फलं मन्त्री दम्पत्योर्व्रतधारणम् ॥
पञ्चमे दिवसे विप्रपूजान्ते धारयेदिदम् ।
सर्वोपद्रवशान्त्यै च सत्सन्तानाभिवृद्धये ॥

**Colophon:**

इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमा-महेश्वरसंवादे शङ्करेण विरचिते राज्यलक्ष्मीपीठिकायां विद्यागणपतियन्त्रविधानं नाम एकाशीतितमः पटलः ॥

Foll. 49*b*—50*a* contains a few sentences relating to Pradōṣabhēda-vicāra. Fol. 51 contains Mahāvārāhīmantra. Foll. 52—53 contain a list of some works. Foll. 54—55 contain some Vedic Mantras. Foll. 56—58 contain stanzas in praise of the goddess Dēvī.

---

(*g*) श्रीचक्रन्यासकवचः.

ŚRĪCAKRANYĀSAKAVACAḤ.

Foll. 59*a*—83*b*.

Similar to the work described under R. No. 1517(*e*) *ante*. Stated to be found in the 33rd Paṭala of the Rudrayāmala.

Wants the beginning; otherwise complete.

**Beginning:**

. . . प्राणायामचतुष्टयेन विराड्देहसृष्टिरित्यत्र प्रतिपत्तिविवेकः । अथ करशुद्धिं कुर्यात् । ऐं मध्यमयोः क्लीं अनामिकयोः सौः कनिष्ठिकयोः ।

* * * *

ततः श्रीचक्रराजविन्यासः । श्रीमूलषडङ्गं कृत्वा हृदये श्रीचक्रराजं सञ्चिन्त्य ।

* * * *

सुसंपूज्य तस्मिन् त्रैपुरे देहे ऐं ईं सौः इति वनिताक्षोभकरीं महाकामकलां ध्यायेत् ।

इति महाशक्तिन्यासः ।

अथाम्नायदेवताः पूजयेत् । यथा त्रैलोक्यमोहनसर्वाशापरिपूरकसर्वसंक्षोभण-का(र)के सृष्टिचक्रे ओं ह्रीं ऐं ह्रीं श्रीं ह ह्रीं स ह्रीं पूर्वाम्नायसमयविद्या निर्मला देवी श्री—इति पूर्वाम्नायपूजा.

**End:**

आपादमस्तकं देवी पातु त्रिपुरभैरवी ।
तदेतत्कवचं भद्रे रहस्यं सर्वकामदम् ॥

* * * *

यत्र योगी स्मरेदेतत्तस्मादारभ्य सर्पे(र्वे)तः ।
धरणीचक्रतां याति तावद्वादशयोजनम् ॥

**Colophon:**

इति रुद्रयामले उ(मामहेश्वरसंवा)दे श्रीचक्रन्यासकवचं नाम त्रयस्त्रिंशः पटलः ॥

---

(*h*) त्रिपुरसुन्दरीस्तवराजः.
TRIPURASUNDARĪSTAVARĀJAḤ.

Foll. 84*a*—88*a*.

Same work as that described under No. 10751 of the D.C.S. MSS., Vol. IX.

Complete.

---

(*i*) सौभाग्यकवचम्.
SAUBHĀGYAKAVACAM.

Foll. 88*a*—90*b*.

Same work as that described under No. 7595 of the D.C.S. MSS., Vol. XIV, but with a different colophon.

Complete.

**Colophon:**

इति सौभाग्यकवचं संपूर्णम् ॥

Fol. 91 contains a few sentences of Śatasthānanyāsa. Fol. 91*b* contains the Bhadrakālīmantra.

---

(*j*) महागणपतिकल्पः.
MAHĀGAṆAPATIKALPAḤ.

Foll. 92*a*—126*b*.

By Gīrvāṇēndrasarasvatī, pupil of Viśvēśvarasarasvatī who was himself the disciple of Amarēndrasarasvatī who again was the disciple of one Gīrvāṇēndra. Similar to the work described under R. No. 1517(*f*) *ante*.

Complete.

**Beginning:**

अमरेन्द्रयतिः शिष्यो गीर्वाणेन्द्रस्य योगिनः ।
तस्य विश्वेश्वरः शिष्यो गीर्वाणेन्द्रोऽहमस्य तु ॥
शिष्यो महागणेशस्य वक्ष्ये श्रीमन्त्रपद्धतिम् ।
एनां दृष्ट्वाखिल . . . . सन्ततम् ॥

प्रथमं श्रीमहागणपतेर्न्यासविधानं लिख्यते—अथ पुनराचम्य गुरुः प्राग्वदनो विष्टरोपविष्टस्सन् इत्यादिग्रन्थैरुक्तोऽर्थोऽत्र लिख्यते ।

. . . . कृत्वा सम्यक् पादतले उभे ।
ऋजुकायस्समासीत स्वस्तिकं तत् प्रचक्षते ॥

इत्युक्ते आसने उपविश्य, ओं स्वस्ति श्रीपरमशिवानन्दनाथपादाद्यशेषगुरुणा . . . क्रमेण स्वगुरुनाथपादाम्बुजं यावत्तावत् प्रणौमि ।

**End:**

यजनं संप्रवक्ष्यामि लघु सिद्ध्यै गणेशितुः ।
साधकानां च जन्तूनां सर्वसौभाग्यसिद्धिदम् ॥
विषुकाले त्वयनयोस्सङ्क्रमेषु परेषु च ॥
सोमसूर्योपरागे च पवणोः शुद्धयोस्तथा ।
सिद्धामृतादियोगेषु द्वादश्यादिव्रतेषु च ॥
चतुर्थ्यां च तथा षष्ठ्यां वासरे शुक्रसोमयोः ।
उक्तकालेषु विधिवत् गणेशं सम्यगर्चयेत् ॥

**Colophon:**

इति (श्रीमत्पर)महंसपरिव्राजकाचार्यश्रीमदमरेन्द्रसरस्वतीशिष्य श्रीविश्वेश्वर-(सरस्व)त्याः प्रियशिष्येण गीर्वाणेन्द्रसरस्वत्या विरचिता महागण . . . मासा ॥

---

(*k*) दक्षिणामूर्तिसंहिता.

DAKṢIṆĀMŪRTISAṀHITĀ.

Foll. 127*a*—147*a*.

A work containing details, such as, the Mantra, the Nyāsa, and the Hōma, etc, connected with the worship of the various forms and manifestations of the goddess Śakti including Lakṣmī. It is said to have been revealed by Parama-Śiva to Pārvatī.

Contains Paṭalas 1 to 30, the names of which are given below.

१. एकाक्षरीलक्ष्मीपूजाविधानम्.
२. महालक्ष्मीहृदयलक्ष्मीपूजाविधानम्.
३. महालक्ष्मीयजनविधानम्.
४. साम्राज्यविद्यायजनविधानम्.
५. अष्टाक्षरपरञ्ज्योतिर्विधानम्.
६. समाराधनविधानम्.
७. अजपाविधानम्.
८. मातृकाविधानम्.
९. त्रिपुरायजनविधानम्.
१०. ललितार्चाविधानम्.
११. कामेश्वरीपूजाविधानम्.
१२. रक्तनेत्रापूजाविधानम्.
१३. दक्षिणसिंहासनविधानम्.
१४. सञ्जीविनीपूजाविधानम्.
१५. सञ्जीविनीयजनविधानम्.
१६. प्रस्ताविणी(नी)पूजाविधानम्.
१७. त्रिपुरभैरवीविद्याविधिः.
१८. पश्चिमाम्नायसिंहासनविद्याविधानम्.
१९. उत्तरसिंहासनेश्वरीडामरदेवीविधानम्.
२०. अघोरभैरवीविधानम्.
२१. भैरवीविवरणम्.
२२. सुन्दरीविधानम्.
२३. कल्पलताविधानम्.
२४. अन्नपूर्णापूजाविधानम्.
२५. मातङ्गेश्वरीरक्तविद्यापूजाविधानम्.
२६. भुवनेश्वरीत्रिगुणितमन्त्रसाधनम्
२७. षड्गुणितयन्त्रविधानम्.
२८. द्वादशगुणितविधानम.
२९. श्रीविद्यामन्त्रवर्णनम्.
३०. विद्याविवरणम्.

**Beginning:**

श्रीमत् श्रीकोशहृदयं पञ्चसिंहासनात्मकम् ।
फलं कल्पलतानां च चारुरत्नस्फुरत्कलम् ॥
चतुरायतनानन्दी(न्दि)चतुरन्वयकोशगम् ।
नित्यानन्दि परं ब्रह्म धाम नौमि सुखाप्तये ॥

* * * *

एतत्सर्वात्मकं वस्तु त्रिपुरा परमेश्वरी ।
चतुर्लक्ष्मीस्सेव्यमाना तदा कामदुघा परा ॥
श्रीविद्या च तथा लक्ष्मीर्महालक्ष्मीस्तथैव च ।
. . . . . पञ्च प्रकीर्तिताः ॥

वारुणान्तं वह्निसंस्थं दीर्घनेत्रविभूषितम् ।
बिन्दुनादयुतं बीजं लक्ष्मीमन्त्र उदाहृतः ॥

* * * *

**Colophon:**

इति श्रीदक्षिणामूर्तिसंहितायामेकाक्षरा(री)लक्ष्मीपूजाविधानं नाम प्रथमः पटलः ॥

**End:**

अतस्त्रैलोक्यसाम्राज्यप्रदायिन्यात्मिका प्रिये ।
एतत्सर्वं पुरस्कृत्य वर्तते त्रिपुरा शिवा ॥
प्रपञ्चमध्ये देवेशि केवला ब्रह्मरूपिणी ।
अत एव महादेवि कला सप्तदशी भवेत् ॥
षोडशार्णस्वरूपापि नित्या षोडशिकात्मिका ।
पूजनीया महेशानि भावाभावविवर्जिता ॥

**Colophon:**

इति श्रीदक्षिणामूर्तिसंहितायां(विद्यावि)वरणं नाम[एकोन]त्रिंशः पटलः ॥

Foll. 147*a*—152*a* contain Ávaraṇapūjā, Śyāmāpūjāpaddhati and Lakṣmīyantrapūjāprayōga, etc. Fol. 152*b* contains some Upaniṣadic passages.

---

(*l*) चतुःशती.

CATUŚŚATĪ.

Foll. 153*a*—164*a*.

Same work as that described under No. 5616 of the D.C.S. MSS., Vol. XII.

Contains Paṭalas one to five complete.

Foll 164*a*—166*b* contain Śrīvidyāmantrōddhāra and Puraścaraṇa.

---

(*m*) देवीपञ्चविंशतिनामस्तोत्रम्.

DĒVĪPAÑCAVIṀŚATINĀMASTŌTRAM.

Fol. 167*a*.

Same work as that described under No. 9175 of the D.C.S. MSS., Vol. XVII.

Complete.

---

(*n*) मन्त्रपारायणप्रकारः.

MANTRAPĀRĀYAṆAPRAKĀRAḤ.

Foll 167*b*—168*a*.

Similar to the work described under No 8004 of the D.C.S. MSS., Vol. XV.

Complete.

**Beginning:**

त्रिपुरां शक्तितो जप्त्वा तदनुज्ञामवाप्य च ।
मन्त्रपारायण . . . . . ॥
. . समग्रमभ्यर्च्य संविदग्नौ यथाविधि ।
काम्यकर्मानुसोरेण तत्त . . . . ॥

* * * *

माया वाग्भवकामास्स्युः माया कुण्डलिनी क्रिया ।
माया मधुमती शुद्धा बिन्दुसर्गाद्यबिन्दुभिः ॥

**End:**

कामशक्तच्यात्मभूचक्रे ह्रैं ह्रीं ह्रामिति च क्रमात् ।
कुमारीति भवेत् बाला वक्त्रीत्येवं क्रमः क्रमात् ॥
ल . . . . स्ते मध्यमेसीति कथिते देवते अतः ।
परस्परं योजनाभिः . . . . . सङ्ग्रहम् ॥

**Colophon:**

इति मन्त्रपारायणं समाप्तम् ॥

---

(o) चतुःषष्ठ्युपचारः.

CATUSSAṢṬYUPACĀRAḤ.

Fol. 168.

Gives the 64 different kinds of respectful offerings to be made at the time of conducting the worship of the goddess Dēvī.

Complete.

**Beginning:**

अथ देव्याः चतुःषष्ठ्युपचारः—सर्वोपचारमन्त्राः कल्पयामि नम इत्यन्ताः कर्तव्याः । पाद्यं कल्पयामि नमः, अर्घ्यं कल्पयामि नमः इति . . . . वरोपणम् । गन्धतैलाभ्यङ्गं, मज्जनशालाप्रवेशनं, मज्जनमण्टपमणिपीठोपवेशनं, दिव्यस्नानीयमुष्णोदकस्नानम् ।

**End:**

निवेशनममृतासवचषकमाचमनीयं कर्पूरवीटीमधुमदोल्लासविलासहास . . . मारात्रिकच्छत्रं चामरयुगलं दर्पणं तालवृन्तं गन्धं पुष्पं धूपं दीपं नैवेद्यं कल्पयामि नमः ॥

**Colophon:**

इति चतुःषष्ठ्युपचारः ॥

Fol. 168*b* contains the Śrīvidyāmantrabhēda.

---

(*p*) सुन्दरीनामाष्टोत्तरशतस्तोत्रम्.

SUNDARĪNĀMĀSṬŌTTARAŚATASTŌTRAM.

Foll. 168*b*—169*a*.

Similar to the work described under No. 9176 of the D.C.S. MSS., Vol. XVII, the beginning being the same as that found therein while the end and colophon being somewhat different.

Complete.

**End:**

चतुर्दशारकोणस्था वसुपद्मनिवासिनी ।
स्वराब्जपत्रनिलया वृत्तत्रयनिवासिनी ॥
चतुरश्रस्वरूपा च बिन्दुस्थलसमन्विता ।
नाम्नामष्टोत्तरशतं भवेद्देव्यास्समन्त्रकम् ॥

**Colophon:**

इति सुन्दरीनामाष्टोत्तरशतं समाप्तम् ॥

Fol. 169*b* contains Śrīvidyānyāsaviśēṣa.

---

(*q*) महिम्नसङ्ग्रहः.

MAHIMNASAṄGRAHAḤ.

Foll. 170*a*—171*a*.

This is a eulogy on the greatness of Śakti and is apparently a selection of stanzas from the Śaktimahimnastōtra. It is printed in the Vāṇī Vilās Press, Srirangam, and its authorship is therein attributed to the sage Durvāsas.

Wants twenty-seven stanzas in the beginning.

**Beginning:**

. . . . मूलकोश इति ते संसारचक्रात्मकं
विख्यातं तदधिष्ठिताक्षरशिवं ज्योतिर्मयं सर्वतः ।
एतन्मन्त्रमयात्मिकाभिररुणाभिस्सुन्दरीभिर्वृतं
मध्ये बैन्दवसिंहपीठ . . . . . द्याशिवे ॥
आताम्रार्कसहस्रदीप्तिपरमासौन्दर्यसारैरलं
लोकातीतमहोदयैरुपगता सर्वोपमागोचरैः ।

नानानर्घविभूषणैरगणि . . . . . मानाग्रतः
त्वं मातस्त्रिपुरारिसुन्दरि कुरु स्वान्ते निवासं मम ॥

**End:**

एवं यः स्मरति प्रबुद्धसुमतिः श्रीमत् स्वरूपं पु(न)ः
. . . . वन्ननुदिनं स्त्रीणामनङ्गायते ।
सोऽष्टैश्वर्यातिरस्कृताखिलसुरश्रीजृम्भणैकालयः
पृथ्वीपालकिरीटकोटिवलभीपुष्पार्चिताङ्घ्रिर्भवेत् ॥

**Colophon:**

महिम्नसङ्ग्रहस्समाप्तः ॥

Fol. 171*b* contains the Aghōrāstramantra and the Pāśupatāstramantra.

---

(*r*) चतुश्शतीटिप्पणी—अर्थरत्नावली.

CATUŚŚATĪṬĪPPAṆĪ: ARTHARATNĀVALĪ.

Foll. 172*a*—180*a*. Fol. 180*b* is left blank.

By Vidyānandanātha. Same work as that described under No. 5619 of the D.C.S. MSS., Vol. XII.

Contains the first Paṭala incomplete.

Fol. 181*a* contains the Mahimnastuti. Foll. 181*b*—183*b* contain Śrīvidyāmantrabhēda and Bālāmantra. Fol. 184*a* contains Annapūrṇā and Aśvārūḍhā; fol. 184*b* the Dīpinīmantra and Bṛhatśyāmalāmantra; fol. 185*a* Svapnavārāhīmantra. Fol. 185*b*—187*a* contain Yōgapīṭhanyāsa; foll. 187*a*—189*a* contain Gōpālamantrabhēda; foll. 189*a*—190*a* Mantrōpadēśaprakāra; foll. 190*a*—192*a* Mantragrahaṇādhikārivicāraḥ; foll. 192*b*—196*b* Mantradēvatāvāhanānyāsapūjāprayōga, etc.

---

(*s*) श्यामलासौभाग्यध्यानम्.

ŚYĀMALĀSAUBHĀGYADHYĀNAM.

Foll. 197*a*—199*b*.

On the contemplation of the goddess Śyāmalā, a manifestation of Śakti, which contemplation is held to have the power to confer on one prosperity and salvation.

Complete.

**Beginning:**

देवी—

ध्यानमत्र प्रवक्ष्यामि सर्वकामार्थसिद्धये ।
ध्यायेत् दुग्धसमुद्रस्य मध्येद्वीपं समाधवम् ॥
तद्वीचीकरसंमुक्तर . . . र्य मरीचिभिः ।
नानाभोगिशिरोरत्नमयूखैश्च समन्ततः ॥

* * * *

एवं सिंहासनश्रेष्ठं मेरुसङ्काशमुन्नतम् ॥
अध्यासीनां भगवतीं परमानन्दरूपिणीम् ।
मणिमञ्जीरविद्योतपाणिपङ्केरुहद्वयाम् ॥

**End:**

सदानन्दचिदाकारां नीलोपात्तशरीरिणीम् ।
एवं सञ्चिन्तयेन्मायां मातङ्गीरूपधारिणीम् ॥
यस्तु चिन्तयते नित्यं हृदम्बुजगृहान्तरे ।

* * * *

साम्राज्यश्रियमाप्नोति ततः शिवपदं व्रजेत् ॥

**Colophon:**

इति श्रीश्यामलालक्ष्मीकल्पे सौभाग्यध्यानफलं संपूर्णम् ॥

---

(*t*) सौभाग्यलक्ष्मीकल्पम्.

SAUBHĀGYALAKṢMĪKALPAM.

Foll. 199*b*—202*a*.

The portion here deals with the Kavacamantra relating to the goddess Śyāmalā; and it is said to have been revealed by Sadāśiva to his son Subrahmaṇya with a view to enable the latter to conquer the demon Tāraka.

Contains the 80th Paṭala.

**Beginning:**

सेनापतित्वं देवानां पुरा प्राप्य षडाननः ।
सदाशिवमुपागत्य पितरं वाक्यमब्रवीत् ॥

* * * *

शृणु पुत्र महाप्राज्ञ तव रक्षां वदाम्यहम् ।
यथा त्वं तारकं युद्धे विजयिष्यस्ययत्नतः ॥
वर्मरत्नं मया सृष्टं रक्षायै जगतः पुरा ।
वर्मणां रत्नभूतत्वात् वर्मरत्नमिति स्मृतम् ॥

**End:**

मयोक्तो महिमालेशो वर्मरत्नस्य पुत्रक ।
विस्तरेण मया वक्तुं न शक्यो वर्षकोटिभि : ॥

**Colophon:**

इति सौभाग्यलक्ष्मीकल्पे चतुर्लक्षग्रन्थविस्तारे श्यामलाम्बावर्मरत्नं नाम अशीतितमः पटलः ॥

---

(*u*) श्यामलाष्टोत्तरशतनामस्तोत्रम्.

ŚYĀMALĀṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 202*a*—203*a*.

Same work as that described under No. 9209 of the D.C.S. MSS., Vol. XVII, but without the first two stanzas in the beginning.

Complete.

Fol. 203 contains Jvaramantra; fol. 203*b* Nakulīsarasvatīmantra foll. 203*b*—204*a* contain Abhayaṅkaramantra; fol. 204*a* contains Mṛtyuñjayamantra; fol. 204 Svayamvaravidyāmantra; foll. 204*b*—205*a* contain Śūlinīdurgā; fol. 205*a* contains Agnidurgā; fol. 205 Trayambaka; fol. 206*a* Nīlakaṇṭhatryakaṣarī and Dhanvantarī; fol. 206*b* Nāmatrayamantra; fol. 207*a* Tiraskariṇī and Manōbhava mantras; fol. 207*b* Antarmāṭṛkā; and fol. 208 Bahirmāṭṛkā.

---

(*v*) चिन्तामणिस्तोत्रम्.

CINTĀMAṆISTŌTRAM.

Foll. 209*a*—211*b*.

Same work as that described under R. No. 1415(*l*) *ante*.

Complete.

Foll. 211*b*—218*a* contain Nyāsavidhi relating to Mahātripurasundarī; foll. 218*b*—228*b* Dēvīpūjā, Ātmapūjā and Āvāraṇapūjā.

---

(*w*) चण्डिकासप्तातिः—सव्याख्या.

CAṆḌIKĀSAPTATIḤ WITH COMMENTARY.

Foll. 229*a*—266*b*.

By Bhaṭṭa Bāṇa. Same text as that described under R. No. 87 *ante*, but the commentary is different.

Breaks off in the last stanza. Wants the first line in the beginning.

**Beginning :**

. . . . . य केल्पत ।
. . पुरुषधुर्याणां न . . . स्तं विनायकम् ॥

इह खलु . . . . . देव साधूनां प्रवृत्तिरुपकारिणीति न्यायात् परमगुरुतरकरुणाभरभरितहृदयो भगवान् भट्टबाणनामाचार्यः सर्वलोकानुजिघृक्षया झटिति देवताप्रसादकरमहितं भवानीप्रसादकरं भवानीपदकमलसपर्यासमुपहार-रूपं स्तोत्ररत्नं सप्ततिश्लोकसङ्ग्रहरूपं समरीरचत् ।

मा भाङ्क्षीर्विभ्रमं भ्रूरधर विधुरता केयमास्यास्य रागं
पाणे प्राण्येव नायं कलयसि कलहं श्रद्धया किं त्रिशूलम् ।
इत्युद्यत्कोपहेतून् प्रकृतिमवयवान् प्रापयन्त्येव देव्या
न्यस्तो वो मूर्ध्नि मुष्यान्मरुदसुहृदसून् संहरन्नङ्घ्रिरंहः ॥

अस्य श्लोकस्यायं क्रियाकारकसम्बन्धः । श्रद्धादिप्रेरितेन मया यथाश्रवणं सङ्क्षेपेण प्रदर्श्यते । अङ्घ्रिः वः अंहः दुरितं मुष्यात् नाशयेत् । कस्या अङ्घ्रिः पाद इत्यपेक्षाया देव्या न्यस्त इति विशेषणात् देव्या एवेति सिद्धं भवति ।

**End :**

(चक्रे चक्रायुधस्य क्वणति निपतिते रोमणि ग्रावणीव
स्थाणोर्बाणस्य वेगे प्रतिहत उरुणा चर्मणा वर्मणेव ।
यस्येति क्रोधगर्भं हसितहरिहरा तस्य गीर्वाणशत्रोः
पायात्पादेन मृत्युं महिषतनुभृतः कुर्वती पार्वती वः ॥)

* * * *

क्रोधगर्भं हसितहरिहरा तस्य महिषस्य निबर्हणं श्रीपादेन कुर्वती पार्वती . . . . . यां गोविन्दपूर्वामृतदिव्यनामन् कृताकृति-र्विष्णुशिवार्चना स्यात्.

---

R. No. **1518**.

Palm leaf. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 55. Lines, 8 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

तत्त्वचिन्तामणिव्याख्या—फक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ—PHAKKIKĀ.

By Madhurānāthatarkavāgīśa. Same work as that described under No. 4027 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and end in the Śabdakhaṇḍa.

---

R. No. **1519.**

Śrītāla. $9\frac{1}{8} \times 2$ inches. Foll. 91. Lines, 11 in a page. Grantha. Slightly injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

(*a*) रामायणतात्पर्यदीपिका.

RĀMĀYAṆATĀTPARYADĪPIKĀ.

Foll. 1*a*—5*b*.

This work contains a brief summary of the Rāmāyaṇa. The portion contained in the manuscript, viz. the Uttarakāṇḍa, contains the story connected with the birth of Rāvaṇa and his brothers and sister, the chief incidents connected with them as well as the chronology of the events that occurred after Rāma's coronation till his ascent to the heaven. It is attributed to Vyāsa.

Wants the beginning.

**Beginning:**

. . . लां समाश्रित्य सत्त्वदृष्टचा महामुनेः ।
दशम्यां श्रीमुखाब्दे तु मुहूर्ते सौम्यनामनि ॥
जातो विभीषणो नाम विष्णुसेवापरायणः ।
तपसा तोषयामासुः ब्रह्माणं ते त्रयः पुरा ॥
वेला बलाबलं चायुः पञ्चाशल्लक्षवत्सरम् ।
आयुराप महाष्टम्यां दशग्रीवो दशात्मकः ॥
निद्रालुरभवत्कुम्भकर्णो लेभे वरं निशि ।
महानिशान्तिमेऽमायां प्राप्तवैधव्यसंयुतम् ॥
वरं प्राप तदा पौर्णमास्यां सत्त्वे तु सत्त्ववान् ।
नित्यत्वमनुजस्तस्य कनीयांस्तु विभीषणः ॥
द्वारपालास्तु वैकुण्ठे सनकाख्यमुनेः पुरा ।
शापतो राक्षसाश्चासन् वैरेण हरिमिच्छवः ॥

शापं प्रापुश्चैकपा(का)ले महाविष्णुस्तदन्तिमे ।
महायुगे महाविष्णुरालोच्य मुनिशापताम् ॥
विना स्त्रीमचिरादेते वध्यन्ते द्वारपालकाः ।
इति मत्वा तदा तेषां चतुर्णामेकमीश्वरः ॥
स्त्रीरूपं धारय क्षिप्रमित्युक्तास्तेषु राक्षसी ।
सह जाता भवत्वेषां सा च शूर्पणखाभिधा ॥

**End:**

पवर्गेणः षचान्तस्थैर्वर्णैः पद्ममितीरितम् ॥
ऊष्माक्षरैस्तथा शङ्खं चतवर्गौ सुदर्शनौ ।
अवर्गेण तथात्युक्ता संज्ञाक्षरमितीरितम् ॥
इति चतुर्विंशतिमूर्तिलक्षणं संपूर्णम् ।

**Colophon:**

इति श्रीमद्व्यासोदितं रामायणतात्पर्यदीपिकायामुत्तरकाण्डस्समाप्तः ॥

---

(*b*) शतकोटिरामायणसारसङ्ग्रहः.
ŚATAKŌṬIRĀMĀYAṆASĀRASAṄGRAHAḤ.

Foll. 6*a*—16*a*. Fol. 16*b* is left blank.

Similar to the above. It is stated herein that Sūta recounted to the sage Śaunaka and others the substance of the Rāmāyaṇa as it was related by Paramaśiva to the sage Durvāsas. There is a tradition that the story of the Rāmāyaṇa exists in one hundred crores of stanzas in the world of the gods.

Contains two Adhyāyas complete; said to form part of the Skāndapurāṇa.

**Beginning:**

हरिं कमलपत्राक्षं हरिं त्रिनयनं विभुम् ।
याभ्यां कृतं जगत् सर्वं जगदेतच्चराचरम् ॥
हरिणा जगदीशेन कृतं सर्वं जगद्व्रजम् ।
पाल्यते येन तस्मै श्रीहरये गुरुमूर्तये ॥
नमामि करुणासारं तमोघ्नं रघुनन्दनम् ।
अमोघज्ञानदातारं समस्तभुवनेश्वरम् ॥

दशकोटिसहस्रै(?)राशिवघ्नं शिवसंस्कृतोऽभिरामः ।
दिशतां मतिमुत्तमां विदाढचां पशुनाथासमानरा[illegible] ।
महाक्षेत्रगतास्सर्वे ऋषयस्तु तपोधनाः ।
श्रुत्वा सर्वचरित्राणि सर्वधर्मान् सनातनान् ॥
मुनयः शौनकाद्यास्तु व्यासान्तेवासिनं मुने ।
सर्वेतिहासवक्तारं सूतं ख्यातार्थकोविदम् ॥

* * *

इदानीं श्रोतुमिच्छामः शतकोटिप्रविस्तरे ।
रामायणे कथा विद्वन् सारभूतं वदस्व नः ॥

* * *

श्रीसूतः—

दुर्वासस्तपसां श्रेष्ठस्साक्षादीशाकृतिर्मुनिः ।
अलका नाम गङ्गायास्सत्यसिन्धोस्तु सङ्गमे ॥
शम्भोर्महावलाग्रे तु चचार सुमहत्तपः ।
कदाचिदागतो विप्रो मार्कण्डेयो महायुगे ॥
सारकोशं गृहीत्वा तु स्नात्वा वै तत्र सङ्गमे ।
जजाप रामचारित्रं यावच्छक्यं च तद्दिने ॥

* * * *

शम्भुः—

शतकोटिचरित्रस्य सारमुद्धृत्य भूसुर ।
तपःकृशाय वक्ष्यामि सर्वसारार्थगर्भितम् ॥

* * *

इति ज्ञात्वा मतिं तस्य चरित्रश्रवणे दृढाम् ।
अल्पग्रन्थार्थबहुलां कथां वक्तुं समारभत् ॥

**Colophon:**

इति श्रीस्कान्दे पुराणे ब्रह्मरहस्ये सूतशौनकादिशतकोटिरामायणसारसङ्क्षेपे शिवदूर्वाससंवादे प्रथमोऽध्यायः ॥

हरिणा करुणासारहृदयेन कृतं जगत् ।
तत्पालकाय देवाय हरये गुरवे नमः ॥

ऋषय ऊचुः—

आश्चर्यमेतन्मुनिराट्छ्रुतं यच्चारित्रमात्रेयमुनेर्महात्मनः ।
तपःशिवार्चाविषयस्तु नः श्रुताः पूर्वं न चास्माभिरिह प्रसादात् ॥
ज्ञात्वा शम्भुः किमकरोत् किमाह मुनये मुने ।
सर्वं विस्तरतो ब्रूहि मनांसि त्वरयन्ति नः ॥

श्रीसूतः—

अतिगूढतरः प्रश्नो ह्यसाध्यो ज्ञातुमीश्वरैः ।
कृतो ज्ञात्वा प्रसादेन वक्ष्ये रामस्य सत्कथाः ॥

श्रीऋषयः—

भानोस्तु मण्डलं वृत्तं षट्त्रिंशद्योजनात्मकम् ।
सितासितहरित्पीतारुणताम्रहिरण्मयैः ॥
आवृतं मेखलावृत्तैः द्वादशावरणावृतम् ।

End :

महात्मनास्माकमतः प्रयच्छ चरित्रभिक्षा रघुनायकस्य ।
याचामहे त्वां जगदुद्धरार्थं कृतावतारं सकलार्थविद्वरम् ॥
अतिसूक्ष्मतरं रवेश्चरित्रं श्रुतमस्माभिरहो त्वया पुरा च ।
गतिदो भव चागतिं गतानामिति तुष्टः स्तुतिभिस्तदाह विद्वान् ॥

श्रीसूतः—

अवग्रहेण भवतां महता द्विजसत्तमाः ।
मयापि ज्ञास्यते सर्वं व्यासानुग्रहभागिनाम् ॥
दुर्वाससे यथा प्राह परमात्मा महेश्वरः ।
तथा वदामि मनसा ध्यात्वा रामं महेश्वरम् ॥
इति स्तुतस्सूतमुनिर्महर्षिभिः श्रीरामकोटिं प्रजपन्नघांसि(ज़ल्लम्) ।
भक्त्या तदा द्वादशतीर्थपानरतः प्रसादं प्रतिलभ्य शम्भोः ॥
चरित्रवर्यश्रवणे कृतप्रश्रयचेतसाम् ।
मुनीनामारभद्वक्तुं कथासारं महत्तरम् ॥

**Colophon:**

इति श्रीस्कान्दे महापुराणे द्युतिरहस्ये शतकोटिरामायणसारसङ्ग्रहे सूर्यप्रभाववर्णनं नाम द्वितीयोऽध्यायः ॥

---

(*c*) सूर्याष्टोत्तरशतनामावलिः.
SŪRYĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 17*a*—19*b*.

Similar to the work described under No. 9354 of the D.C.S. MSS., Vol. XVII.

Complete.

**Beginning:**

सूर्याय नमः । अर्यम्णे नमः । भगाय नमः । त्वष्ट्रे नमः । पूष्णे नमः । अर्काय नमः । सवित्रे नमः । रवये नमः । गभस्तिमतये(ते) नमः ।

**End:**

पूजाद्वाराय नमः । मोक्षद्वाराय नमः । त्रिविष्टपाय नमः । देहकर्त्रे नमः । प्रशान्तात्मने नमः । विश्वात्मने नमः । विश्वतोमुखा(य)चराचरात्मने नमः । सूक्ष्मात्मने नमः । करुणात्मने नमः ॥

सूर्याष्टोत्तरशतनामपूजां समर्पयामि ॥

---

(*d*) उमाष्टोत्तरशतनामावलिः.
UMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 19*b*—23*b*.

Same work as that described under No. 8853 of the D.C.S. MSS., Vol. XVII.

Complete.

---

(*e*) रामाष्टोत्तरशतनामावलिः.
RĀMĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 23*b*—25*b*.

Same work as that described under No. 8986 of the D.C.S. MSS., Vol. XVII.

Complete.

(*f*) गणेशाष्टोत्तरशतनामावलिः.

GAṆĒŚĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 26*a*—28*a*.

Same work as that described under No. 8805 of the D.C.S. MSS., Vol. XVII.

Complete.

---

(*g*) रुद्राष्टोत्तरशतनामावलिः.

RUDRĀṢṬŌTTARAŚATANĀMĀVALIḤ.

Foll. 28*a*—30*a*. Fol. 30*b* is left blank.

Same work as that described under No. 9241 of the D.C.S. MSS., Vol. XVII.

Incomplete.

---

(*h*) नागप्रतिष्ठाविधिः.

NĀGAPRATIṢṬHĀVIDHIḤ.

Foll. 31*a*—36*b*.

Similar to the work described under No. 3651 of the D.C.S. MSS., Vol. VII.

Complete.

**Beginning:**

आदौ पुण्याहं कृत्वा, ब्रह्मदण्डं कृत्वा, सङ्कल्प्य, मम कुले केनचित् पुरुषेण स्त्रिया वा मया वा मम धर्मपत्न्या वा पूर्वं हतस्य नागस्य दुरितोपशान्त्यर्थं प्रेतयोनिगतस्य प्रेतत्वविमुक्तये उत्तमलोकप्राप्तये मम सन्तानाद्यन्तरायपरिहारार्थं नागबलयङ्गदाहादिकर्म करिष्ये । आचार्यं वरयित्वा, तदङ्गलोहदण्डदानं करिष्ये ।

* * * *

सर्पहत्याद्यघं यस्माच्छमयेल्लोहदण्डदानतः ।
तस्माद्दास्ये लोहदण्डं सर्पहत्यादिशान्तये ॥

* * * *

प्रियङ्गुव्रीहियवगोधूमतिलमाषनीवाराणां पिष्टानि प्रत्येकं कारयित्वा, प्रस्थद्वयपरिमितपिष्टैर्नागं कुर्यात् । पृथक्स्थितानि पिष्टानि मेलयित्वा, पञ्चगव्येन सह नागं कृत्वा, नूतनशूर्पे निधाय, ब्रह्मदण्डं कृत्वा, मया वा मम धर्मपत्न्या वा कृतसर्पवधजनितदोषपरिहारार्थं सर्पसंस्काराङ्गप्राणप्रतिष्ठापनं करिष्ये । कृच्छ्रत्रयं कृत्वा, असि(सु)नीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगम् ।

**End:**

मम प्रतिबन्धकस्यानन्तशर्मणः काश्यपगोत्रस्य प्रतिबन्धकनिवारणद्वारा सत्सन्तानसकलसौभाग्यसिद्ध्यर्थं सर्पाद्यष्टसर्पान्तर्गतनृसिंहप्रीत्यर्थं ब्राह्मणसमाराधनं करिष्ये । नमोऽस्त्वित्यादिमन्त्रैरर्घ्यादीनि पूजां कुर्यात् । ब्राह्मणभोजनानन्तरमाशीर्वादं गृह्णीयात् । नमस्कारं कृत्वा, नागप्रतिष्ठां कुर्यात् । प्रतिबन्धकनिवृत्तिद्वारा पुत्रवान् भवति ॥

**Colophon:**

इति नागबलिविधिः समाप्तः ॥

---

(*i*) नागप्रतिष्ठाविधिः.

NĀGAPRATIṢHṬĀVIDHIḤ.

Foll. 37*a*—45*a*. Fol. 45*b* is left blank.

Same work as that described under No. 3651 of the D.C.S. MSS., Vol. VII, but with the additional stanzas in the beginning as given below.

Complete.

**Beginning:**

अथ नागप्रतिष्ठां च वक्ष्ये सर्वहितावहाम् ।
सा चोदगयने शुक्लपक्षे नागतिथिर्यदा ॥
तस्मिन् दिने पराह्णे च अहरेव सुलग्नके ।
श्रावणे कार्तिकद्वन्द्वे माघफाल्गुनसंज्ञिके ॥
वैशाखद्वितये चैव प्रतिष्ठा फलदायिनी ।
आर्द्रादिपञ्चके मैत्रे रोहिण्यादिद्वये तथा ॥

* * * *

एवंप्रकारेण नागबिम्बस्य शुद्धिं कृत्वा प्रतिष्ठास्थले निक्षिपेत् । तत्र प्रतिष्ठानात् पूर्वेद्युः प्राक् दन्तधावनपूर्वकं नद्यादौ स्नात्वा, नित्यकर्माणि निर्वर्त्य, अपराह्णे, पुण्याहवाचनं नान्दीदेवताह्वानं च कुर्यात् ।

---

(*j*) गायत्रीसहस्रनामस्तोत्रम.

GĀYATRĪSAHASRANĀMASTOTRAM.

Foll. 46*a*—58*b*.

Same work as that described under No. 8823 of the D.C.S. MSS., Vol. XVII.

Complete.

---

(*k*) गायत्र्यष्टोत्तरशतनामस्तोत्रम्.

GĀYATRYAṢṬŌTTARAŚATANĀMASTŌTRAM.

Foll. 59*a*—61*a*.

Same work as that described under No. 8828 of the D.C.S. MSS., Vol. XVII, but with a slight difference in the beginning and in the colophon.

Complete; stated to be found in the Viśvāmitrasaṁhitā.

**Beginning:**

श्रीरामचन्द्र उवाच—

विश्वामित्र महाप्राज्ञ गायत्रीमन्त्रपारग ।
श्रोतुमिच्छामि यत्नेन गायत्र्यष्टोत्तरं शतम् ॥

विश्वामित्र उवाच—

सम्यक् [स]पृष्टं त्वया राज(न्)रघुवंशसमुद्भव ।
गायत्र्याश्चैव सावित्र्याः(सरस्वत्या)स्तवं शुभम् ॥
शृणु वक्ष्यामि तत्त्वेन नाम्नामष्टोत्तरं शतम् ।
पठतां पातकहरमज्ञानतिमिरापहम् ॥

**Colophon:**

इति विश्वामित्रसंहितायां गायत्र्यष्टोत्तरशतदिव्यनामामृतस्तोत्रं संपूर्णम् ॥

---

(*l*) गायत्रीभुजङ्गः.

GĀYATRĪBHUJAṄGAḤ.

Foll. 61*b*—63*a*.

Same work as that described under No. 9414 of the D.C.S. MSS., Vol. XVIII, but with a different colophon.

Complete.

**Colophon:**

इति श्रीब्रह्मतान्त्रिके गायत्रीभुजङ्गं संपूर्णम् ॥

Fol. 63 contains Bālātryakṣarīstōtra.

(*m*) गायत्रीहृदयम्.

GĀYATRĪHṚDAYAM.

Foll. 64*a*—71*a*.

Same work as that described under No. 6222 of the D.C.S. MSS., Vol. XII, but with difference in the Ṛṣi, Chandas, Dēvatā and Viniyōga.

Complete.

---

(*n*) गायत्रीकवचः.

GĀYATRĪKAVACAḤ.

Foll. 71*b*—73*a*.

Same work as that described under No. 6177 of the D.C.S. MSS., Vol. XII, but the Ṛṣi, Chandas, Bīja, etc., mentioned herein are different.

Complete.

**Colophon:**

गायत्रीकवचं सम्पूर्णम् ।

---

(*o*) गायत्रीपञ्जरम्.

GĀYATRĪPAÑJARAM.

Foll. 73*a*—80*a*. Fol. 80*b* is left blank.

Same work as that described under No. 6198 of the D.C.S. MSS., Vol XII, for the beginning.

Complete.

**End:**

इदं ते कवचं(थितं)दिव्यमस्माभिर्ब्रह्मपञ्जरम् ।
धारयेद् द्विजवर्यो यः श्रावयेद्वा पठेद्यदि ॥
संस्मरेत्प्रत्यहं भक्त्या जपकाले विशेषतः ।

* * * *

करस्थं ब्रह्मसायुज्यं शीघ्रमाप्नोत्यसंशयम् ।
साक्षाद् देवीकटाक्षेण ब्रह्मसायुज्यमाप्नुयात् ॥

**Colophon:**

इति मन्त्रराजकल्पे आत्मविद्यासारे साक्षाद्गायत्रीपञ्जरं सम्पूर्णम् ॥

Foll. 81*a*—83*b* contain a few stanzas of Śātātapasmṛti; fol. 84 contains a few lines of Vandanamantra; foll. 85—88 contain the Hanūmatpūjāyantra; foll. 89—91 Gāyatrīyantra.

## R. No. 1520.

Palm-leaf. 15⅓ × 1½ inches. Foll. 124. Lines, 8 in a page. Grantha. Injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

कणादसिद्धान्तचन्द्रिकाव्याख्या--प्रसादः.

KAṆĀDASIDDHĀNTACANDRIKĀVYĀKHYĀ: PRASĀDAḤ.

A commentary on the Kaṇādasiddhāntacandrikā which has been described under R. No. 5 *ante*, and is identical with that described under No. 4332 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Karmanirūpaṇa, but wants the beginning in the Pratyakṣakhaṇḍa.

**Beginning:**

सामान्यमुखव्याप्त्या दृष्टान्ते गृहीतया पक्षधर्मतासहकारेण पक्षीभूतघटकर्मत्वादिपदार्थानां तात्पर्यविषयाराय(श्रय)भावादिसंसर्गसिद्धिः ।

* * * *

तदानुभवस्य स्ववासनामात्रकल्पितत्वमनुपादेयम् । अधिकं किरणावली-प्रकाशादौ द्रष्टव्यमिति संक्षेपः ।

* * * *

नन्वेवमस्य ग्रन्थस्य वैशेषिकसिद्धान्तानुसारितया कथमनुभूतिचातुर्विध्यस्यापादनमत्रेत्यत आह—वयं त्विति । तथाच बालव्युत्पत्तये विषयपरिशोधनाय तावन्मात्रे अस्य ग्रन्थस्य न्यायमतानुरोधान्नोक्तदोष इति भावः ।

* * * *

किं च काष्ठैः पचतीत्यादिवाक्ये तृतीयया काष्ठानां करणत्वं प्रतिपाद्यते । तत्रैव तद्विधानात् ; न च त्वदुक्तं कारणत्वं काष्ठानां सम्भवतीत्यधिकं कारकविचारे विवेचयिष्यते ।

* * * *

शिवादित्यास्तु करणत्वादिकं करणाद्याकारानुगतप्रत्ययेनाखण्डोपाधिरूपमित्याहुः ।

* * * *

ज्ञानस्य विशेषादतो विषयतादि पदार्थान्तरमेवेति ॥

Colophon:

इति प्रत्यक्षनिरूपणम् ॥

क्रमप्राप्तामनुमितिं निरूपयितुमुपक्रमते—अथेति । तल्लक्षणमाह—अनुमितित्वेति । अनुमितित्वजातौ प्रमाणमाह—अनुमितित्वं चेति ।

* * * *

घटाभावादेरेव लक्षणघटकतया तत्प्रतियोगितानवच्छेदकत्वाद्वह्नित्वस्य नोक्तदोष इत्यलं पल्लवेन । अत्रास्मद्गुरुचरणा धूमत्ववह्नित्वादिघटितव्याप्तौ धूमस्यैव लक्ष्यतया एतद्वृक्षत्वादेरलक्ष्यत्वेन तत्रोक्तलक्षणासत्त्वेऽपि क्षतिविरहात् ।

End:

ननु प्रत्यभिज्ञायास्तज्जातीयत्वविषयत्वं न क्वापि द्रष्टव्यमित्यत आह (त)देवेति । तत्र भुक्तौषधव्यक्त(क्तच)भेदविषयत्वासम्भवेन भुक्तौषधजातीयत्वविषयताया आवश्यकत्वादिति भावः ॥

Colophon:

इति गुणनिरूपणम् ॥

इदानीं क्रमप्राप्तं कर्मनिरूपणमारभते—अथेति । गुणनिरूपणानन्तरमित्यर्थः । अस्य च धात्वर्थे निरूपणे अन्वयः ।

* * * *

अन्ये तु कर्मणः क्षणत्रयावस्थायित्वं प्रायिकम् । तथाहि—प्रथमे क्रिया, ततो विभागः, तत उत्तरसंयोगः, ततः कर्मनाश इति पूर्वसंयोगस्योत्तरसंयोगे अप्रतिबन्धकत्वेऽपि तत्र विभागस्य हेतुत्वेनैव परमाणोर्युगपत्पूर्वापरदेशवृत्ति(त्व)प्रसङ्गदोषानुपपत्तेः ।

* * * *

तन्त्वाकाशसंयोगनाशः प - - - - - - - - - -

बन्धक्षणवृत्त्यभावेन पञ्च ।

---

R. No. **1521.**

Palm-leaf. 18¾ × 1⅝ inches. Foll. 134. Lines, 8, in a page. Grantha. Much injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

कृष्णीयव्याख्यानम्—होरातन्त्रम्.

KṚṢṆĪYAVYĀKHYĀNAM: HŌRĀTANTRAM.

A commentary on the Kṛṣṇīya, which is a work on horoscopy in astrology.

Contains Adhyāyas two and three complete and the fourth incomplete, but wants the beginning in the second Adhyāya.

**Beginning:**

क्रूरा रविकुजसौरास्सौम्या गुर्वसुरपूज्यशशितनयाः ।
क्षीणश्शशी च पापो बुधोऽनुवर्तीति भाषन्ते ॥

रविकुजसौरा यथोत्तरं क्रूराः । क्रूरत्वं क्रूरक्रूरफलरिषा(निष्पाद)कत्वम् । गुर्वसुरपूज्यशशितनयानां यथापूर्ववत्सौम्यत्वम् । इन्दोस्तु शुक्लपक्षपञ्चमीप्रभृति कृष्ण(पक्ष)पञ्चमीं यावत् सौम्यत्वम्। बुधस्य पापशुभराश्यंशगतौ दृढत्वे च पापत्वम्।

* * * *

इहोक्तनष्टजातके तेषां दर्शनानां नष्टजातके निर्देश इति प्राप्नोति तदर्थमाह—भूयिष्ठेति श्लोकद्वयम् । अनेन सर्वचिन्ता वक्तव्या ॥

**Colophon:**

इति होरातन्त्रे कृष्णीयशास्त्रव्याख्याने नष्टजातकविधिर्द्वितीयोऽध्यायः ॥

* * * *

अतः परत्वमाह—सुवर्णस्येति । एवं सुवर्णादिलोहादयो वर्गतास्त्रिविधनिर्देशेन पञ्चविधः पञ्चविंशो रूपः । विंशो गुणः लोहाः पञ्च । अतः पञ्चविंशेति निर्देशः । एवं धातुयोनिरुक्ता ॥

**Colophon:**

इति कृष्णीयव्याख्याने धातुयोनिभेदो नाम तृतीयोऽध्यायः ॥

**End:**

अथ बुधलक्षणमाह—

दूर्वाकाण्डश्यामो मध्याकारस्सिरातनुो हृष्टः ।
मिश्रप्रकृतिस्सौम्यस्त्वक्सारश्लिष्टवाक् चापि ॥

इह काण्डशब्दो दलपर्यायः सिराभिरभिव्याप्तः श्लिष्टवाक् सहतभाषी मिश्रप्रकृतिः त्रिदोषप्रधान इत्यर्थः ।

* * * *

दोषाध्यायादुष्टां तिथ्यृक्षवारानथ विषघटिका कृष्णपक्षापराह्णं धूमादीन् पञ्च सौराङ्गुल.

---

R. No. **1522.**

Palm-leaf. $16\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 223. Lines, 8 in a page. Grantha. Very much injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

चतुर्वर्गचिन्तामणिः.

CATURVARGACINTĀMAṆIḤ.

By Hēmādri. Same work as that described under No. 2744 of the D.C.S. MSS., Vol. V.

Contains the Vratakhaṇḍa only. From the end of the Dvitīyātithi to Dvādaśīvrata which is incomplete.

---

R. No. **1523.**

Palm-leaf. $12\frac{1}{4} \times 1\frac{1}{8}$ inches. Foll. 267. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1915–16 from M.R.Ry. Rāmanātha Śāstrigaḷ of Kṛṣṇarāyapuram, Trichinopoly district.

(*a*) उपाकर्मनिर्णयः.

UPĀKARMANIRṆAYAḤ.

Foll. 1*a*—5*a*.

Similar to the work described under No. 3100 of the D.C.S. MSS., Vol. VI.

Complete.

**Beginning:**

. . . . . अत्र विशेषमाह—सङ्ग्रहकारः—

अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ।

. . , . . . रवौ राश्यन्तरं गते ॥

उपाकर्म तथोत्सर्गं न कुर्युरपि नैत्यकम् ।

यदि मोहात्कृतं तत्र परत्रापि पुनः क्रिया ॥

यदि मत्या कृतं कार्यमवकीर्णी व्रतं पुनः ।

भाद्रेऽप्यशुद्ध आषाढे कार्या चोपाकृतिक्रिया ॥

मासत्रयेऽपि दोषश्चेच्छ्रावणे मासि तद्भवेत् ।
नित्यत्वात् कर्म न त्याज्यं गुर्वस्तादिर्न दोषकृत् ॥
सोमो धेनुमिति द्वाभ्यां हुत्वैवोपाकृतिं नयेत् ।

**End:**

श्रावणस्य तु नित्यत्वात्कर्तव्यं नित्यकर्मवत् ।
तस्मात्सर्वप्रयत्नेन कर्तव्यं वेदपारगैः ॥
अधीतवेदविद्यानां कर्तव्यं स्याद् द्विजन्मनाम् ।
अध्यायानामिदं नित्यमिति होवाच भार्गवः ॥

---

(*b*) परिषद्विधायकप्रायश्चित्तम्— सानुक्रमम्.

PARIṢADVIDHĀYAKAPRĀYAŚCITTAM WITH ANUKRAMA.

Foll. 5*a*—18*b*.

Similar to the work described under R. No. 65(*p*) *ante* but with slight difference in the beginning and end and with Anukramaṇikā.

Complete.

**Beginning:**

तत्रादौ जलस्नानमनन्तरं महासङ्कल्पः, मृत्तिकास्नानं, सभार्चनं, विज्ञापनाप्रकारः, सभया स्मृतिमार्गेण प्रायश्चित्तनिर्णयः, विधायकवरणमनुवादकवरणम् ।

* * * *

ब्रह्मार्पणं ब्राह्मणभोजनमिति क्रमः । स्नानद्रव्याण्यादाय प्रायश्चित्तसभां व्रजेत् । सभा च यथाशास्त्रं विधेया ।

आदौ कारयितारं कारयितृत्वविचक्षणं ब्राह्मणं वृत्वा दश द्वादश वा विप्रान् परिषदो विनियोजयेत्। सर्वप्रायश्चित्तमहं करिष्यमाणो मदीयं पापजातं परिषत्सन्निधौ निवेदयितुकामो मलापकर्षणस्नानं करिष्ये।

**End:**

मयाचरितप्रायश्चित्तसाद्गुण्यार्थं नामत्रयकृष्णस्मरणं च करिष्ये—इति सङ्कल्प्य, प्रायश्चित्तान्यशेषाणि इति जपित्वा यस्य स्मृत्येत्युक्त्वा, यद्यत्कृतं मया देव परिपूर्णं तदस्तु मे । अनेन मयाचरितेन सर्वप्रायश्चित्तेन सर्वात्मकः श्रीमहाविष्णुः प्रीयताम् । ओंतत्सद्ब्रह्मार्पणमस्तु ॥

Foll. 19 and 20 contain a portion of Sarvaprayāścittaprayōga.

(*c*) यल्लाजीयम्.

YALLĀJĪYAM.

Foll. 21*a*—45*b*

Same work as that described under No. 3768 of the D.C.S. MSS., Vol. VII, by Yallāji, son of Yallubhaṭṭa of Talmuḍuppi family.

Complete.

---

(*d*) पैतृमेधिकविधिः.

PAITṚMĒDHIKAVIDHIḤ.

Foll. 45*b*—53*a*.

Similar to the work described under No. 3702 of the D.C.S. MSS., Vol. VII; but as there is a break in the subject-matter, some leaves appear to be wanting in the middle.

Complete.

**Beginning:**

अनाहिताग्नेः पितृमेधप्रयोगो वक्ष्यते ।

यस्य कस्य चित्पुरुषस्य मरणसंशये यथोक्तं सर्वप्रायश्चित्तं कृत्वा विच्छिन्नैापासनाग्नेश्च अग्निसन्धानं कुर्यात् । शुचौ देशे गोमयेनोपलिप्य साग्रान् दर्भान्नास्तीर्य तिलानवकीर्य तेषु दक्षिणाशिरसं निधाय पुत्रादिः प्राणानायम्य पितुर्गोत्रस्य शर्मणः सुखेन प्राणोत्क्रमणसिद्ध्यर्थमुत्क्रान्तिसं.

**End:**

अप उपस्पृश्य उद्वयं तमसस्परीत्यादित्यमुपतिष्ठन्ते दहनदेशमनवेक्षमाणा जलाशयं गच्छेयुः । वपनोदकदानादिकं पश्चाद्वक्ष्यामः.

---

(*e*) ब्रह्ममेधप्रयोगः.

BRAHMAMĒDHAPRAYŌGAḤ.

Foll. 53*a*—76*a*.

On the performance of the ceremonies and rites in relation to a householder who has duly maintained the sacred fire and who is in imminent danger of death.

Complete.

**Beginning :**

इदानीं ब्रह्ममेधप्रयोग उच्यते ।

मरणसंशये एव मुमूर्षोः कर्तव्यानि स्नानं सर्वप्रायश्चित्तं सर्वाङ्गेषु तुलसीमृद्धारणं विष्णोस्समर्पिततुलसीमालिकाधारणं सालग्रामतीर्थपानं तीर्थाभ्युक्षणमुत्क्रान्तितिलपात्रदानवितरणे दश दानानि च अग्निहोत्रदर्शपूर्णमासादीनि पूर्वोक्तप्रकारेण कृत्वा औपासनाग्नौ कर्तव्यानि स्मार्तानि च कृत्वा ब्रह्मविदामोति परं, भृगुर्वै वारुणिरित्येतावनुवाकौ ब्रह्मविदो दक्षिणे कर्णे जपति ।

**End :**

द्वाभ्यामादित्यमुपतिष्ठन्ते । दहनदेशमनवेक्षमाणा जलाशयं गच्छेयुः । स्नानकाले धाता पुनातु सविता पुनातु अग्नेस्तेजसा सूर्यस्य वर्चसा

* * * *

ब्रह्ममेधो ब्रह्मविद एव कर्तव्यः साधारण(व)त्सर्वेषां न प्रयुज्यते ब्रह्मविदेऽप्याचार्याय कुर्यात् । अस्मिन् कृते साक्षान्नारायणप्राप्तिर्भवति ॥

---

(*J*) अन्वारोहणविधिः.

ANVĀRŌHAṆAVIDHIḤ.

Foll. 76*a*—78*a*.

Similar to the work described under No. 3522 of the D.C.S. MSS., Vol. VII.

Complete.

**Beginning :**

पत्न्य(त्न्या अ)ग्नौ यद्यनुगमनेच्छास्ति, तदा सर्वदा अनुगमनं कार्यम् ; अनुगमने कृते फलमाह—

पराशरः—

तिस्रः कोट्यर्धकोटी(ट्यः) च यानि रोमाणि मानुषे ।
तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति ॥

शातातपः—

मृतं यानुगता नारी सा तेन सहपिण्डताम् ।
अर्हति स्वर्गवासेऽपि यावदाभूतसम्भ(म्प्ल)वम् ॥

* * * *

न च पत्न्यर्थं मन्त्रावृत्तिः, भर्तृसंस्कारेणैव चरितार्थत्वात् सहैव प्रेते सहैव पितृमेध इत्यत्र सहैव उभयोर्युगपत् प्रमादमरणे अविकारैर्मन्त्रैः सहैव पितृमेधः कर्तव्य इति कपर्दिस्वामिनोक्तम् ।

**End:**

यद्यसौ ब्रह्ममेधी स्यात्तेनैव विधिना दहेत् ।
तैरग्निभिर्दहेत्तस्य भार्यामविधवामपि ॥ इति ॥

अतो ब्रह्ममेध्यनुगमनं युक्तमेव वपनोदकदानादिकं पश्चाद्वक्ष्यामः ॥

---

(*g*) अपरप्रयोगः.
APARAPRAYÔGAḤ.

Foll. 78*a*—261*b*.

Similar to the work described under No. 3547 of the D.C.S. MSS., Vol. VII.

Incomplete.

**Beginning:**

काष्ठैरूर्ध्वमुखं दह्यान्न नग्नं तु यथा हविः ।
ना . . . न्न नग्नं च दाहयेन्मलदूषितम् ॥
वस्त्रं परित्यजेदर्धमर्धं तु परिधापयेत् ।
न नग्नं तु दहेद्वस्त्रं किंचिद्वस्त्रं परित्यजेत् ॥

अर्धं तु श्मशानवासिने दद्यादित्यर्थः ।
ब्रह्ममेधविधिं वक्ष्ये सर्वं तु पितृमेधवत् ।
विशेषो वक्ष्यते हुत्वा परे युवांसमित्यथ ॥

**End:**

अत्र विशेषमाह पुलस्त्यः—

सुमृतो दुर्मृतो वापि पिता यद्यप्यसंस्कृतः ।
कालान्तरे मृता माता तस्या दाहादिकाः क्रियाः ॥
पत्या सहैकचित्यां तु दहेदौपासनादुभौ ।

संवर्तः—

पिता यदि मृतो यस्य चिरकालमसंस्कृतः ।
माता प्रमीता यदि हि तयोर्दाहादिकं सह ॥

उदकं पिण्डदानं च नवश्राद्धं सपिण्डनम् ।
पित्रोः पुत्रेण कर्तव्यमेष धर्मस्सनातनः ॥

* * * *

जातकर्मप्रभृतिसर्वसंस्कारा आवर्तेरन् एतस्मिन्नेवाग्नौ । अथ वा यः पश्चात्तस्यौपासनेनेति.

Foll. 262*a*—267*b* contain the table of contents of this MS.

---

R. No. **1524.**

Palm-leaf. 17½ × 1½ inches. Foll. 144. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

तत्त्वचिन्तामणिव्याख्या—तुरीयमणिफक्किका.

TATTVACINTĀMAṆIVYĀKHYĀ: TURĪYAMAṆIPHAKKIKĀ.

By Madhurānāthatarkavāgīśa. Same work as that described under Nos. 4027 and 4028 of the D.C.S. MSS., Vol. VIII.

Contains the end of Utsannapracchannavādarahasya.

---

R. No. **1525.**

Palm-leaf. 17⅛ × 1⅜ inches. Foll. 84. Lines, 6 in a page. Telugu. Fair.

Presented in 1915-16 by M.R.Ry. Muḍumbai Varāhanarasiṁhācāryar of Tuni, Gōdāvari district.

(*a*) भागवतम्.

BHĀGAVATAM.

Foll. 1*a*—22*b*.

Same work as that described under No. 2161 of the D.C.S. MSS, Vol. IV, Part I.

Contains the second Skandha only complete.

---

(*b*) भागवतार्थतत्त्वदीपिका.

BHĀGAVATĀRTHATATTVADĪPIKĀ.

Foll. 23*a*—84*a*. Fol. 84*b* is left blank.

A commentary on the Śrī-Bhāgavata : by Bhāṣyakārasūri of Kauṇḍinyagōtra.

Contains the second Skandha only.

**Beginning :**

अथ राज्ञः प्रश्नस्योत्तरं वक्तुमादौ प्रश्नमभिनन्दति वरीयानिति । हे नृपते त्वया श्रोतव्यादिषु परः श्रोतव्यमन्तव्यानिदिध्यासितव्यार्थतत्त्वविषयो यः प्रश्नः कृतः एषः व(री)यान्, अत्यन्तश्रेष्ठः । यतः लोकहितः मोक्षहेतुत्वात् । अत एवात्मविदां ब्रह्मविदां संमतः । लोकहितमिति पाठे लोकहितं प्रतिकृत इत्यन्वयः । यच्छ्रोतव्यमित्यादिप्रश्न(स्यो)त्तरं वक्तुं प्रथमं तावत् ब्रूहि । यद्वा विपर्यय इत्यस्योत्तरमाह, श्रोतव्यादीनीत्यादिभिस्त्रिभिः ।

**End :**

राज्ञेति । महामुनिः श्रीशुकः राज्ञा पृष्टस्सन् राज्ञः प्रश्नानुसारतः यत् पुराणमवोचत् तदेवाहं वोऽभिधास्ये, शृणुतेत्यन्वयः । अयमर्थः । यद्यूयं मां पृच्छथ तदेव राजापि शुकं पृष्टवान् । शुकोऽपि विदुरमैत्रेयसंवादं पुरस्कृत्य पूर्वं राज्ञा ये प्रश्नाः कृताः, तदनुसारेण सर्वं पुराणार्थमाह । तमेवाहमर्थं युष्माकमभिधास्यामि, तथैव शृणुतेति ॥

**Colophon :**

इति श्रीकौण्डिन्यकुलोद्भवेनश्रीभाष्यकारसूरिणा विरचितायां श्रीमद्भागवतव्याख्यायां भागवतार्थतत्त्वदीपिकायां द्वितीयस्कन्धे दशमोऽध्यायः ॥

द्वितीयस्कन्धव्याख्या समाप्ता ॥

---

R. No. **1526.**

Paper. $8\frac{3}{8} \times 7\frac{1}{4}$ inches. Foll. 14. Lines, 26 in a page. Telugu. Very much injured.

Presented in 1915–16 by M.R.Ry. Pendyāla Subrahmaṇya Śāstrigāru of Cocanada.

**जातकराजीयम्.**

**JĀTAKARĀJĪYAM.**

A treatise on horoscopy describing the results, good or bad, due to the influence of planets and of the twelve Bhāvas : by Alaśiṅgarācārya.

Wants the beginning and end.

**Beginning:**

. . . . . बाह्यमीरितम् ॥
विभजेन(न्न)वधा द्वारं लग्ने तस्य नवांशतः ।
बाह्यराशिनिवेशश्च तस्मिन् पापे मृतिं वदेत् ।
प्रस्तुतायुर्लग्नदशा तद्द्वारं परिकीर्तितम् ।
तद्द्वितीयं बाह्यमेतद्दशायां द्वारमेव तत् ॥

* * * *

व्ययभावगते केतौ चञ्चलः क्षुद्रसेवकः ।
शय्याभोजनसौख्येन रहितः . . . शभाक् ॥

**Colophon:**

इत्यलशिङ्गराचार्यकृतौ जातकरागजीये भावफलनियक्ता(र्णयो)ऽष्टोत्तरशत-श्लोकैस्सम्पूर्णः ॥

रविभार्गवयोर्मध्ये बलवान् पितृकारकः ।
कुजचन्द्रमसोर्मध्ये बलवान्मातृकारकः ॥

**End:**

बहुमणिधनयुक्तो लोहताम्रादिपूर्तो(र्णो)
भवति स गृहवासी सर्व . . . . . ॥
. . . . भाग्यराज्येशास्तनं(?)चन्द्रस्तदीश्वराः ।
सम्बन्धो योगमात्रेण निधनान्तं . . . . ॥

संयोगकृतम्.

---

## R. No. 1527.

Palm-leaf. 16¾ × 1½ inches. Foll. 14. Lines, 6 in a page. Telugu Good.

Presented in 1915-16 by M.R.Ry. Rānasvāmi Avadhānulu of Mānēpalli, Razole taluk, in the Gōdāvari district.

(*a*) विकृतिवल्ली.
VIKṚTIVALLĪ.

Foll. 1*a*—2*b*.

By Vyāli. Same work as that described under No. 958 of the D.C.S. MSS., Vol. II.

Complete.

**End:**

श्रोत्रिया ब्राह्मणाश्चाद्धे पङ्क्तिपावनतत्पराः ॥
प्रातिशाख्यादिशास्त्रज्ञस्सर्वशिक्षाविशारदः ।
बुद्धियुक्तिसमेतो यस्स जटां वक्तुमर्हति ॥
प्रातिशाख्यव्याकरणशिक्षासु(स)मर्थस्सूक्ष्मबुद्धिमान् जटायामधिकारीत्यर्थः ॥

---

(*b*) विकृतिवल्लीव्याख्या—विकृतिकौमुदी.

VIKṚTIVALLĪVYĀKHYĀ : VIKṚTIKAUMUDĪ.

Foll. 2*b*—14*b*.

By Gaṅgādharācārya. Same work as that described under No. 959 of the D.C.S. MSS., Vol. II, but with the additional stanza in the beginning as given below.

Contains the first Paṭala only.

अभिक्रमव्युत्क्रमसङ्क्रमाद्यतो जटा भवेदार्षजसंहित(ा)स्वरात् ।
विलोक्य शिक्षादिकमादरात्ततः प्रकाश्य(ते) सा विदुषां मुदे मया ॥

---

R. No. **1528.**

Palm-leaf. 18¾ × 1⅛ inches. Foll. 71. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. A. Śiṅgarācārya of Cirutapūḍi, Razole taluk.

प्रमाणसङ्ग्रहः

[illegible]ĀṆASAṄGRAHAḤ.

Similar to the work described under R. No. 749 *ante* and 5316 of the D.C.S. MSS., Vol. XI.

Wants the beginning and end.

**Beginning:**

. . . . . स्थितौ पाति सनातनः ।
हन्ति चैवान्तकाले च रजस्सत्त्वादिसंश्रितः ॥
चतुर्विभागसृष्टौ तु चतुर्धा संस्थितस्थितौ ।
प्रलयं च करोत्यन्ते चतुर्भेदो जनार्दनः ॥
एकेनांशेन ब्रह्मासौ भवत्यव्यक्तमूर्तिमान् ।

**End:**

देवः—

नारायणात्परं तत्त्वं नास्ति नास्ति नृपात्मज ।
इदं सत्यमिदं सत्यं सत्येनैव वदाम्यहम् ॥ भार्गवपुराणे ।
भक्षितं हि विषं हन्ति प्राकृतं केवलं वपुः ।
मन्त्रौषधवशं तत्तु भवत्येव न संशयः ॥
दर्शनस्पर्शनश्लेषविश्लेषश्रवणादपि ।
अप्रतिक्रियमात्मीयं हन्यते विषयं दृढम् ॥

---

## R. No. 1529.

Palm-leaf. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 144. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. A. Śiṅgarācārya of Cirutapūḍi, Razole taluk.

प्रमाणसङ्ग्रहः.

PRAMĀṆASAṄGRAHAḤ.

Foll. 1*a*—61*b*. The remaining foll. are left blank.

By Saumyajāmātṛmuni. Slightly different from the work described under No. 5316 of the D.C.S. MSS., Vol. XI.

Incomplete.

**Beginning:**

परतत्त्वप्रधानेषु प्रमातव्येषु सर्वशः ।
प्रमाणानि प्रदर्श्यन्ते प्रबन्धेऽस्मिन् यथाश्रुतम् ॥
वर्षार्थमष्टौ प्रयते त(च)मासान्निश्यर्थमर्धं दिवसं यते च ।
वार्धक्यहेतोर्वयसा नवेन परत्र हेतोरिह जन्मना च ॥

इति कस्य चिन्महायोगिनो वचने चतुर्थपादतात्पर्यार्थो निरूप्यते—चतुर्थपादतात्पर्यं तु कारणं ध्येय इति जगत्कारणवस्तुभक्तिरेवापुनरावृत्तिलक्षण—मोक्षहेतुप्राप्तिरिति । प्रथमं तावत् श्रियः पतिर्नारायण एव सर्वस्मात्पर इति ।

**End:**

सर्वलक्षणसम्पन्ना सर्वाभरणभूषिता ।
सुधाब्धिफेनसङ्काशदिव्यवस्त्रेण संवृता ॥
सुस्निग्धनीलकुटिलकेशभारसु.

R. No. **1530.**

Palm-leaf. 18½ × 1⅝ inches. Foll. 55. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyuḍugārulu of Peramma Agrahāram, Amalapuram taluk.

Foll. 21—23, 35, 40 and 47 are left blank.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYA: PRAYŌGA-RATNAMĀLĀ.

By Viṣṇubhaṭṭa, a disciple of Vijñānaguru. Similar to the work described under R. No. 795 *ante*.

Contains the sixth Praśna, entitled the Agnihōtrapraśna, complete.

This manuscript is said to have been copied by Vaḍlamāni Lakṣmīpati Sōmayāji

**Beginning:**

उत्तराभिमुखा भक्ता यस्य वाचस्पतावपि ।
स्मरामि भागधेयं तत् प्रसन्नं दक्षिणामुखम् ॥

यो वेदवपुराचारावयवो दर्शनेन्द्रियः ।
मामीरयन्नन्तरास्ते तं विज्ञानगुरुं भजे ॥

कर्मब्रह्माध्वनीनस्य कृतिर्भूपतिभूपतेः ।
व्याख्याग्निहोत्रप्रश्नस्य विष्णुभट्टेन तन्यते ॥

अग्न्याधेयानन्तरमग्निहोत्रं व्याचिख्यासुरधिकारं दर्शयति—अग्निहोत्रं व्याख्यास्यामः । अग्निहोत्रशब्दः कर्मनामधेयम् । अग्निर्होत्रमस्मिन्निति प्रथमं देवतासम्बन्धात् । यथोक्तं ब्राह्मणे—

* * * *

**Colophon:**

इत्यापस्तम्बीयाध्वरतन्त्रव्याख्यायां प्रयोगरत्नमालायां षष्ठप्रश्ने प्रथमः पटलः ॥

**End:**

दर्शपूर्णमासाभ्यामेव तद्विकाराश्च व्याख्याताः । वर्षासु श्या(माकैर्य)जेत शरविद्री(दि व्रीहि)भिर्वसन्ते यवैर्यथर्तु वेणुयवैरिति विज्ञायत इति विज्ञायते ।

यदि नानातन्त्रा श्यामाकेष्टिः तदानया वर्षासु यजेत ततश्शरदि केवलैर्व्रीहिभि स्समानतन्त्रे तूभयोश्शरदि (ततो) वसन्ते यवैर्वैगुयवैस्तु यथर्तु यजेत ते ह्यनियतकालवृत्तयो यस्मिन्नेव तान् निष्पद्यन्ते तस्मिन्नेव यजेतेत्यर्थः ॥

इत्याग्रयणतन्त्रोक्तिमन्त्रव्याख्यासुगन्धिभिः ।
सूक्तिप्र(सूनैः)पुष्णातु पुमर्थान् पुरुषोत्तमः ॥
अग्निहोत्रप्रयोगाद्य आग्रायणसमुज्ज्वलः ।
षष्ठप्रश्नो व्याकृतोऽयमग्निहोत्राभिधानवान् ॥

**Colophon :**

इत्यापस्तम्बीयाध्वरतन्त्रव्याख्यायां प्रयोगरत्नमालायां षष्ठप्रश्नेऽष्टमः पटलः ॥

समाप्तश्च षष्ठः प्रश्नः ॥

---

R. No. **1531.**

Palm-leaf. $17\frac{1}{2} \times 1\frac{1}{2}$ and $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 96. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ: PRAYŌGA-RATNAMĀLĀ.

Foll. 37*b* and 96*b* are left blank.

Same work as the above.

Contains the sixth Praśna complete.

---

R. No. **1532.**

Palm-leaf. $18 \times 1\frac{3}{8}$ inches. Foll. 84. Lines, 10 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

Foll. 34*b*, 80*b* and 81—84 are left blank.

न्यायसुधाव्याख्या—राणकोज्जीविनी.

NYĀYASUDHĀVYĀKHYĀ: RĀṆAKŌJJĪVINĪ.

A commentary on the Nyāyasudhā, also known as Rāṇaka or Rāṇakaphakkika, of Bhaṭṭasōmēśvara, which work has been described

under No. 4415 of the D.C.S. MSS., Vol. IX; by Annambhaṭṭa, son of Tirumalācārya of Rāghava Sōmayāji family.

Contains from the first Adhyāya to the end of the eighth Sūtra of the first Pāda of the second Adhyāya

**Beginning:**

शिवयोश्शाश्वतैकत्वं तनोतु शुभसन्ततिम् ।
निदर्शयितुमद्वैत भजतारि(मि)व सङ्गतिम् ॥
वाणीं गुरून् गणेशं च प्रणम्य तदनुग्रहात् ।
व्याख्यास्ये फक्किकां गूढां राणकस्य क्वचित्क्वचित् ॥

कृत्स्नशास्त्रप्रसादेनेति गुरुप्रसादेन . . . . . सर्वप्रसादेन वा कृत्स्नशः साकल्येन सूत्रभाष्यसहितं वार्त्तिकमिति यावत् । कृत्स्नशास्त्रप्रसादेनेति पाठे आचार्यकृतटीकापञ्चकसम्यगभ्यासलब्धज्ञानातिशयेन । कृत्स्नशास्त्रशब्देन सकलदर्शनानि वोच्यन्ते । स्थापितत्वादिति । तथा च पौनरुक्त्यमित्येका शङ्का । तदतिरिक्तानां प्रभावनाप्रतिपादकातिरिक्तानाम्' आदिना मन्त्रनामधेयग्रहणम् । अत्रोदाहरणभाष्ये । उदाह्रियेतन्ने(त्रि)ति । अनुदाहरणान्यूनतेति द्वितीया शङ्का ।

* * * *

आकृतिपक्षेऽपीत्यपिशब्दसूचितमर्थमाह — साक्षादीति। गोत्र(त्व)मात्रस्येति मात्रशब्देन व्यक्तिनिरासः । साङ्केतिकगोत्वशब्दार्थस्यावृत्त्यर्थं साक्षाद्येकार्थसम्बन्धित्वं गोत्वविशेषणम् । तर्कपादप्रतिपादितन्यायेनैव जातिवाचित्वसिद्धावाशङ्कासमाधानमात्रमाक्रियत इत्यर्थः ॥

**Colophon:**

इति श्रीमदद्वैतविद्याचार्यमहोपाध्याय श्रीराघवसोमयाजिकुलावतंस श्रीतिरुमलाचार्यवर्यसूनोरन्नम्भट्टस्य कृतौ राणकोज्जीविन्यां प्रथमाध्यायस्य तृतीयः पादः समाप्तः ॥

**End:**

यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयते तस्य द्रव्यप्रधानत्वात् ।
अग्नीनामुत्पाद्यकर्मत्वमुपपादयति—अग्निमिति । स्वमतेनेति ।

* * * *

त्रयाणामेवेति । उद्देश्यसङ्ख्याया अविवक्षितत्वात्सिद्धान्ते निरूपणं सर्वे-

षामवघातः स्यात्, पूर्वपक्षे उपादेयतया सङ्कुचाया विवक्षितत्वात्कापिञ्जलाधिकरणन्यायेन बहुत्वस्य त्रित्वपर्यवसानात्त्रयाणामेव व्रीहीणामवघातस्स्यादित्यर्थः ।

---

R. No. **1533.**

Palm-leaf. $10\frac{5}{8} \times 1\frac{1}{2}$ inches. Foll. 51. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

अद्वैतदीपिकाविवरणम्.

ADVAITADĪPIKĀVIVARAṆAM.

This appears to be the same work as that described under No. 4519 of the D.C.S. MSS., Vol. IX. By Nārāyaṇāśarma.

Contains only the fourth Pariccheda entitled the Ānandadīpa.

**Beginning:**

स्रष्टृश्रीशमहेशकालपवनेनेन्द्विन्द्रवह्न्यादिभिः
स्रष्ट्राद्यैरनिशं कृतैस्स्वविहितैरुद्विग्नचित्तैर्भृशम् ।
सत्यज्ञानसुखामृताभयवपुस्तत्त्वं परं प्रार्थितं
नूनं नो गुरुरूपमेत्य जनतामुक्तयै परं चेष्टते ॥

परिच्छेदान्तरमारभमाणः परदेवताप्रार्थनव्याजेन वक्ष्यमाणार्थं संक्षिप्य दर्शयति—यस्मिन्निति । अस्तो निरस्तो मोहमहिमा मायाया विकासात्मकोऽनर्थो यस्मिन् तेन स्वानन्देन मन्दीकृतो हेयतया विगमितो हिरण्यगर्भस्यानन्दमहार्णवो येन तत्तथोक्तं तस्मिन् हिरण्यगर्भानन्दस्य मानुषानन्दापेक्षया भूयस्त्वादर्णवत्वोक्तिः । तथापि तस्य भयादिश्रवणात्तदानन्दस्यानर्थसंभिन्नत्वाच्च नरहरिपदोपलक्षितपरब्रह्मानन्दापेक्षया निकृष्टत्वाद्धेयतेत्यर्थः ।

**End:**

नानावादिमतनिराकरणेन स्वमतनिष्कर्षहेतोर्ग्रन्थस्य गुर्वनुग्रहादेव समाप्तत्वादुरूनपि पूजयति—कियदपीति । ईषदपीत्यर्थः । तदपि न श्रद्धया, किं तु निमित्तान्तरादित्याह—प्रसङ्गादिति । यदम्भः परिपीतमेतच्छमयतीत्यन्वयः । अन्येषां किमित्येतादृशगुर्वनुग्रहो नेति शङ्कां निराकुर्वन् तस्येश्वरप्रसादलब्धतया अतिदुर्लभतामाह—अहमिति ।

यस्सर्वबोधसुखपूर्णनिजस्वभावः कूटस्थबोधबलबाधितसर्वबन्धः ।
आत्मासमोऽपि शमवान् प्रतितोऽभितो यैः तानेव देशिकवरान् सततं नमामि ॥
वेदान्तार्थस्य तत्त्वं ये बोधयन्ति नयैः क्वचित् ।
तत्पादपद्मपांसुभ्यो नमस्यां कुर्महेऽन्वहम् ॥

Colophon:

इति श्रीमन्नारायणाश्रमविरचिते अद्वैतदीपिकाविवरणे आनन्ददीपाख्यश्चतुर्थः परिच्छेदः ॥

---

R. No. **1534.**

Palm-leaf. $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 21. Lines, 7 in a page. Telugu. Much injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

**मन्त्रकल्पसूत्रम्.**

MANTRAKALPASŪTRAM.

Same work as that described under No. 7996 of the D.C.S. MSS., Vol. XV. It is also called Paraśurāmasūtram.

---

R. No. **1535.**

Palm-leaf. $15\frac{3}{8} \times 1\frac{1}{4}$ inches. Foll. 60. Lines, 6 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

**सन्ध्यावन्दनमन्त्रभाष्यम्.**

SANDHYĀVANDANAMANTRABHĀṢYAM.

By Kṛṣṇapaṇḍita. Same work as that described under No. 2885 of the D.C.S. MSS., Vol. V.

Wants the third to the seventh stanza in the beginning and the last stanza and the colophon at the end; otherwise complete.

---

R. No. **1536.**

Palm-leaf. $18\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 87. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

तत्त्वचिन्तामण्यालोकव्याख्यानम्—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀNAM : SIDDHĀÑJANAM.

A commentary on the Ālōka, for which work see under R. No. 1539 *ante* and No. 3998 of the D.C.S. MSS., Vol. VIII : by Aunambhaṭṭa, son of Tirumalācārya or Timmayārya of Rāghava Sōmayāji family and the younger brother of Sarvadēva. The author says he has consulted the works of Mēgha, Mahēśa, Madhusūdana, Mādhava and Raghunāthaśirōmaṇi in writing this commentary.

Contains up to the end of Maṅgalaprakaraṇa in the Pratyakṣakhaṇḍa.

**Beginning :**

शिवयोश्शाश्वतैकत्वं तनोतु शुभसन्ततिम् ।
निदर्शयितुमद्वैतं भजतामिव सङ्गतम् ॥
यदनुग्रहलेशेन मूकोऽपि विबुधाग्रणीः ।
करुणापूर्णहृदयां वाग्देवीं प्रणमामि ताम् ॥
(श्रीम)द्राघवसोमयाजिकुलजः श्रीतिम्मयार्यस्सुधीः
तर्के व्यासमते च जैमिनिमते पातञ्जले कापिले ।
सिद्धान्ते हरिदश्वसोमरचिते शैवादिनानागमे
यस्सारं विविनक्ति धर्मभरते तातं तमीडे मम ॥
यस्य जिह्वाङ्गणे नित्यं नृत्यन्तीव सरस्वती ।
तं वन्देऽन्वर्थनामानं सर्वदेवं ममाग्रजम् ॥
मैधीं महेशमधुसूदनमाधवादेः
व्याख्यां शिरोमणिगिरामवसाय सारम् ।
सिद्धाञ्जनं मणिविलोकनलालसाना-
मालोकमार्गगमिनामहमातनिष्ये ॥
आलोकं धायमाना ये मणिदर्शनभीरवः ।
सिद्धाञ्जनमिदं लब्ध्वा मणिं गृह्णन्तु ते सुखम् ॥

वक्ष्माणीति । गिरीशः पुनातु विघ्नाभावं सम्पादयत्वित्यर्थः । यद्वा मामिति शेषः । पुनातु कृतिप्रतिबन्धकदुरितभावयुक्तं मां करोत्वित्यर्थः । अथ वा चेतनमात्रस्य कर्मत्वं गम्यमानत्वाच्चाप्रयोगः । चेतनमात्रं पुनात्वित्याशास्यते ।

* * * *

कीर्त्यर्थं स्वनामग्रहणपूर्वकं चिकीर्षितमाह — अधीत्येति । अधीत्येति सम्प्रदायशुद्धिरुक्ता । पितृव्यत इति स्वकुले परम्परायां विद्यानुवृत्तिः सूचिता । हरिमिश्रादिति वृद्धानुस्मरणं मङ्गलं सूचितम् । इत्थं वक्ष्यमाणप्रकारेण आलोक्यते सम्यग्विचार्यत इत्यालोकस्तात्पर्यविषयो(यी)भूतोऽर्थः अयं बुद्धि(स्थः) प्रकाश्यते तत्प्रतिपादकशब्दैः प्रतिपाद्यते ।

**End:**

अन्धपरम्परात्वशङ्कानिरासाय तदित्युत्सन्नशाखायां वक्ष्यत इत्यर्थः । तत्र दूषणे समाधानमिति शेषः ॥

**Colophon:**

इति श्रीमहोपाध्यायश्रीमदद्वैत (विद्याचार्यश्रीमद्राघवसोमयाजि) कुलावतंस-श्रीतिरुमलाचार्यवर्यसूनोरन्नम्भट्टस्य कृतौ प्रत्यक्षालोकसिद्धाञ्जने मङ्गलप्रकरणं सम्पूर्णम् ॥

मङ्गलवादः ॥

---

R. No. **1537.**

Palm-leaf. 16½ × 1⅝ inches. Foll. 142. Lines, 8 in a page. Telugu. Silghtly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

तत्त्वचिन्तामण्यालोकव्याख्यानम्—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀNAM : SIDDHĀÑ-JANAM.

Foll. 1*a*—139*b*. Foll. 140*a*—141*a* contain again the initial portion of Prāmāṇyavāda. Foll. 141*b*—142*b* are left blank.

Same work as the above, of which this contains the further portion. Contains up to the end of Jñāptinirūpaṇa.

**Beginning:**

ननु प्रामाण्यज्ञानोपायकथनेन शास्त्रस्य प्रमाणादितत्त्वप्रतिपादनद्वारा निश्श्रेयससम्बन्धसिद्धेरतदुत्पत्तिनिरूपणमसङ्गतमत आह— प्रसङ्गादिति । ईश्वर-

सिद्ध्युपयोगित्वेनोपेक्षानर्हत्वादिति भावः । क्वचिदिति । यत्र यथार्थपरामर्शत्वेन कारणत्वाभावेऽपि यथार्थतज्जन्यत्वग्रहसम्भवान्न तत्रोपयोग इति असार्वत्रिकत्वमस्वरसबीजमिति महेशोक्तिरयुक्ता सङ्गतौ कादाचित्कत्वस्यादोषत्वात् । ईश्वरसिद्ध्युपयोगित्वेन स(स्व)त एवाभ्यर्हितत्वाज्ज्ञपकत्वे तात्पर्यकल्पने गौरवमित्यस्वरसबीजमिति मधुसूदनः । अत्रापि ईश्वरे अनेकप्रमाणसम्भवाद्यथार्थयोग्यताज्ञानस्य गुणत्वसम्भवात्क्वचिदुपयोगसम्भवेऽपि प्रत्यक्षादावनुपयोगान्नात्यन्ताभ्यर्हितत्वमिति चिन्त्यम् ।

End:

झटिति प्रवृत्तिमात्रेण अयोग्यस्य प्रामाण्यस्य नानुव्यवसायगम्यत्वमित्यत्र कुसुमाञ्जलिकृदुक्तमतिप्रसङ्गमाह—तदुक्तमिति । परमते अतीन्द्रिया शक्तिः कारणत्वं तस्यातीन्द्रियत्वेऽपि तज्ज्ञानाद्यथा झटिति प्रवृत्तिः तद्वत्प्रामाण्यज्ञानादपीत्यर्थः । सिद्धान्ते तु कारणतातिरिक्तशक्तेरनङ्गीकारान्नियतपूर्ववर्तितावच्छेदकं जलत्वमेव शक्तिरिति सा प्रत्यक्षैवेति ध्येयम् ॥

**Colophon:**

इति श्रीमहोपाध्यायान्नम्भट्टविरचिते प्रत्यक्षालोकसिद्धाञ्जने ज्ञप्तिनिरूपणम् ॥

---

R. No. **1538.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Foll. 68. Lines, 7 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

तत्त्वचिन्तामण्यालोकव्याख्यानम्—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀNAM: SIDDHĀÑJANAM.

Contains the further portion of the work described above and up to the end of Anyathākhyātivāda.

Wants the 16th leaf.

**Beginning:**

उपोद्घातसङ्गतिमाह—मूले नन्विति । तद्वतीत्यादिरिति प्रमालक्षणे व्यावर्त्यप्रसिद्धिरिति मूलपाठानुसारेण शेषपूरणम् । प्रमालक्षणे विशेषणव्यावर्त्यप्रसिद्धिरिति पाठे समासात् षष्ठ्यन्ततया विशेषणस्येति गृहीत्वा तस्यार्थकथन-

मिति ज्ञेयम् । सिद्ध्यसिद्धिव्याघातं परिहरति—ज्ञानस्येति । इच्छायां तत्प्रसिद्धमिति भावः ।

**End:**

न च तादात्म्यद्वयस्य भेदाग्रहात्तथा व्यवहारो न त्वखण्डतादात्म्यग्रहादिति वाच्यम् ; अन्यथाख्यात्युच्छेदापत्तेः, भेदाग्रहादेव प्रवृत्त्याद्युपपत्तेः । अतो भ्रमेऽसद्भावमन्यथाख्यातिवादिनां दुर्वारं तच्च न सम्भवति इदं रजतं चक्षुषा पश्यामीति तादात्म्यांशे चाक्षुषत्वानुव्यवसायादधिकस्य चक्षुर्जन्यज्ञानविषयत्वासम्भवात्सदुपरागेण असतोऽपि भानमित्यस्य परिभाषामात्रत्वात् । अतोऽनुभवानुसाराद्युक्तियुक्तत्वाच्चानिर्वचनीयरजतोत्पत्तिपक्ष एव सम्यगिति ध्येयम् ॥

**Colophon:**

इति श्रीराघवसोमयाजिकुलावतंसश्रीमहोपाध्यायान्नम्भट्टविरचिते प्रत्यक्षालोकसिद्धाञ्जने अन्यथाख्यातिवादस्समाप्तः ॥

Fol. 68*b* is left blank.

---

R. No. **1539.**

Palm-leaf. $16\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 123. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

तत्त्वचिन्तामणिव्याख्यानम्—आलोकः.

TATTVACINTĀMAṆIVYĀKHYĀNAM : ĀLŌKAḤ.

Foll. 1*a*—120*b*. Foll. 121—123 are left blank.

By Jayadēva. Same work as that described under No. 3998 of the D.C.S. MSS., Vol. VIII. See also No. 1927 on page 628 of the India Office Library Catalogue.

Contains only the Śabdakhaṇḍa complete.

**Beginning:**

न जाने श्रीजाने विचरितुमिह(ग्रन्थगहने)
समर्था नैवार्थानधिगमयितुं निर्मितिरपि ।
तथाप्येतावत्यामपि किल विगत्यामहमिह
प्रवृत्तो यत्तस्मिंस्तव चरणसेवैव शरणम् ॥

अथेति । इहाथशब्दस्यानन्तर्यवचनत्वेन तत्रावधित्वेनोपस्थितस्योपमान-निरूपणस्यैव प्राप्तत्वात्तस्य च सिद्धत्वोपस्थितौ वर्तमानतार्थकलट्प्रत्ययान्तत्वेन साध्यतयोपस्थिते शब्दनिरूपणे सिद्धसाध्यसमभिव्याहार(बल)लभ्यस्य हेतुहेतु-मद्भावस्योपमाननिरूपणानन्तरं प्रतिबन्धकजिज्ञासापगमे अवसरस्य वा सङ्गतित्वं सूच्यते ।

**End:**

यदेव विभक्तिसमभिव्याहारसहकारितावच्छेदकमुक्तं तदेव विभाजकोपाधि-त्वेनोच्यतामतो न विभागव्याघात इत्यपि निरस्तम् । सति प्रमाणभेदे अनुगम-गवेषणादिति ॥

**Colophon:**

इति श्रीमन्महामहोपाध्यायसन्मिश्रजयदेवविरचितश्शब्दखण्ड(मण्यालोक)-स्सम्पूर्णः ॥

---

R. No. **1540.**

Palm-leaf. $17\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 120. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

Foll. 1—3 are left blank.

**तत्त्वचिन्तामण्यालोकटिप्पणी.**

TATTVACINTĀMAṆYĀLŌKAṬIPPAṆĪ.

Foll. 4*a*—115*b*. Foll. 116*a*—120*b* are left blank.

A commentary on the Ālōka, for which work see under R. No. 1539 *ante*: by Madhurānātha Tarkavāgīśa.

Contains up to the end of Utsannapracchannaśākhāvāda in the Śabdakhaṇḍa.

**Beginning:**

कुञ्चिताधरपुटेन पूरयन्वंशिकां प्रचलदङ्गुलिपङ्क्तिः ।
मोहयन्नखिलवामलोचनाः पातु कोऽपि नवनीरदच्छविः ॥
श्रीमता मधुरानाथतर्कवागीशधीमता ।
शब्दमान(मणिशब्द)परिच्छेदालोको व्याख्यायते स्फुटम् ॥

निर्विघ्नप्रारिप्सितग्रन्थसमाप्तिकामनया कृतं भगवत्स्तुतिरूपं मङ्गलं शिष्यशिक्षायै आदौ निबध्नाति—न जान इति । हे श्रीजाने हे श्रीकृष्ण । श्रीर्लक्ष्मीः सरस्वती वा जाया यस्येति व्युत्पत्तौ बहुव्रीहौ जायाया जानिरिनङ् इ)त्यनेन जायाशब्दस्य जान्या(निङा)देशात् । अहम् इह शब्दपरिच्छेदे । विचरितुम् अर्थान् विवेचयितुम् ।

**End:**

विपक्षस्य कुतस्तावद्धेतोर्गमनिकाबिलम् इति . . . स्खण्डनोक्तन्यायादित्यर्थः । विपक्षस्य वादिनो हेतोः गमनिकाबिलं कण्ठ इत्यर्थः । शङ्कास्वदनं(स्कन्दनं)किञ्चिदिति । शङ्कास्वदं(स्कन्दनं)निमित्तं किंचिदित्यर्थः । शङ्कास्व(स्क)न्दनाये(ति)पाठस्तु सुगम एव । अन्यथा तादृशशङ्काप्रतिबन्धकनियामकाभावे । चार्वाकैरिति । सर्वत्र योग्योपाधिशङ्कया व्यभिचारसंशयादनुमानाप्रामाण्यवादिभिश्चार्वाकैरित्यर्थः । नियमशङ्कायां नियामकप्रश्ने ॥

**Colophon:**

इति श्रीमहामहोपाध्यायश्रीमधुरानाथभट्टाचार्यविरचितायां शब्दालोकटिप्पण्यामुत्सन्नप्रच्छन्नशाखावादरहस्यं सम्पूर्णम् ॥

---

R. No. **1541.**

Palm-leaf. 15⅝ × 1¼ inches. Foll. 59. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

**किरणावलीप्रकाशविवरणम्.**

KIRAṆĀVALĪPRAKĀŚAVIVARAṆAM.

An explanatory commentary by Rucidatta on Vardhamāna's Kiraṇāvalīprakāśa which is itself a commentary on Udayanācārya's Kiraṇāvalī: *vide* No. 1963 on page 284 of Dr. Rājēndra Lāl Mitra's Catalogue; Vol. V. It is also called Dravyakiraṇāvalīprakāśavivaraṇa as it contains up to the end of Dravyanirūpaṇa.

**Beginning:**

गण्डाभोगविलोलषट्पदघटासंवारणव्याजतः
शुण्डाग(द)ण्डविघट्टनेन परितो विघ्नं विनिघ्नन्निव ।
निर्गच्छन्मदवारिपिच्छिलतले धून्वन् मुहः प्रस्खल-
न्नारम्भो मम जायतामिह करालम्बाय लम्बोदरः ॥

जयदेवगुरोस्सम्यगधीत्य मतमद्भुतम् ।
द्रव्यप्रकाशविवृतौ रुचिदत्तः प्रवर्तते ॥

मिलदिति । विश्वस्य बीजं महादेवः तस्य अङ्कुरप्रख्यामङ्कुरसमामित्यर्थः । अन्यत्रान्यदपि बीजं जलसम्बन्धेनाङ्कुरतीति ध्वनिः । मणिकारमतेनाह——कर्तव्येति । ननु रविनमस्कारमित्ययुक्तं रवेरत्रानुल्लेखादिति स्वोक्तमुपपादयति——यदिति । विद्याविद्ययोरिति । ननु विद्यैव या सन्ध्येति व्याख्यानात्सन्ध्यारजन्योरेव रूप्यत्वं नतु विद्याविद्ययोरिति चेत् अत्र विद्याविद्ययोरिति विभक्तिविपरिणामः । तेन सन्ध्यारजन्योर्विद्याविद्याभ्यां रूपणादित्यर्थपर्यवसानादित्येके । रूप्यते अनेनेति व्युत्पत्त्या रूपणं रूप्यरूपकभावस्सम्बन्धः ।

**End :**

केचित्तु क्षेत्रं(जानातीति)क्षेत्रज्ञ आत्मा तदुभयान्यस्मिन् यो मूर्तसंयोगः इति योज्यं; तेन शरीरसंयोगेनार्थान्तरवारणाय मूर्तेति । शरीरात्मसंगोगस्य निमित्तकारणतयार्थान्तरवारणायासद्दमिति संयोगविशेषणम् । विभ्विति । स्नेहव्यभिचारवरणाय । विश्वेति . . . . . रवारणाय विशेषपदम् । उक्तविपक्षे बाधकसम्भवेऽपि सद्युक्तमेव प्रमाणं तदसम्भवे नेदमपीति किमनेनेत्यरुचिं भावयति अपीति । शेषं सुवचम् ॥

**Colophon :**

इति श्रीमहामहोपाध्यायश्रीरुचिदत्तविरचिते द्रव्यकिरणावलीप्रकाशविवरणे द्रव्यपदार्थस्सम्पूर्णः ॥

---

R. No. **1542.**

Palm-leaf. $14\frac{3}{4} \times 1\frac{1}{8}$ inches. Foll. 116. Lines, 6 in a page. Telugu. Much injured.

Presented in 1915-16 by M.R Ry. Pappu Subbārāyuḍugārulu of Peramma Agrahāram, Amalapuram taluk.

तत्त्वचिन्तामण्युपन्यासः.

TATTVACINTĀMAṆYUPANYĀSAḤ.

Foll. 1*a*—108*b*.

An exposition of the various points dealt with in the Tattvacintāmaṇi of Gaṅgēśōpādhyāya, which work is described under No. 39: 2 of the D.C.S. MSS., Vol. VII. The author is Yallubhaṭṭa of Kaṇṭhi family.

Contains the Pratyakṣakhaṇḍa only.

**Beginning:**

अत्र स्वीकृतवेदप्रामाण्या(देव)वेदनिषिद्धाकर्तृस्वरूपशिष्टकर्तृकबलवदनिष्टाननुबन्धित्वविशिष्टेष्टसाधनत्वप्रमाविषयालौकिकविषयावैदिकनिषेधाविषयाचारविषयतया वेदमूलतयाविगीतं प्रारिप्सितविघ्नध्वंसकामनया स्वयं कृतं मङ्गलं नमस्कारलक्षणमशेषहृदयानुभवसाक्षिकजातिविशेषं शिष्यशिक्षार्थं ग्रन्थादौ ग्रथयति—

निस्त्रैगुण्यगुणत्रयाधिकरणं निर्विघ्नकामश्शिवो
निष्कामः परिहृत्य देहमपि भोगादृष्टनं(सं)ज्ञाटि(नि)तम् ।
लीलास्वीकृताचित्रतादृशमहादेहत्रयानुग्रहात्
पायात् सर्वहितः पुराहितकरः कश्चिन्महाविभवः ॥ (?)

मङ्गलाचरणवैयर्थ्यप्रतिपिपादयिषया तद्वैयर्थ्यहेतून् सङ्गृह्य पूर्वपक्षयति—

व्यर्थं मङ्गलमन्तरा परिसमाप्तेर्द्वारसन्देहतः
किं चालौकिकभावतोऽन्त्यविधिनानुष्ठेयतादर्शनात् ।
तत्कालाद्यननुष्ठितेरकलुषं वैयर्थ्यतः कुत्रचित्
कार्यासम्भवतः श्रुतेरनुमितेर्बाधा दा(त्प्रधा)नच्युतेः ॥

* * * *

ननु पुरुषार्थपरमपुरुषमननजिज्ञासनार्थं प्रवृत्तमिदं शास्त्रम् । मननादिप्रवृत्तिश्चाल्पायाससाध्यलौकिकक्रियाप्रवृत्तिवत्प्रामाण्यावधारणं विना न सम्भवति ; प्रामाण्यसन्देहादिदमिष्टमेवेत्यर्थावधारणानुदयेन झटिति निश्शङ्कप्रवृत्त्यनुपपत्तेः । तस्मात्प्रामाण्यावधारणेन भवितव्यं तच्च स्वतः परतो वेति वि(व)क्षायां संशयार्हप्रामाण्यस्वरूपमाह—

सर्वव्यक्तिगतप्रमात्वमिह नष्टं पक्षकोटौ मया
सामग्र्या सकलप्रमानियतया तद्ग्राह्यतासम्भवात् ।
किं तर्ह्यभ्रमसंशयात्मकमसत्यार्थप्रमाणाश्रिता
प्रत्येकं घटिता विशिष्टघटिताकारात्मकज्ञानता ॥

**End:**

न चैवं सर्वस्मृतेरयाथार्थ्यम् ; प्रमुषिततत्तांशस्मृतिष्वविद्यमानधर्मसंभेदानवभासादिति ॥

**Colophon:**

इति श्रीम(त्कण्ठी)वंशमहार्णवसुधाकरेण यज्ञभट्टेन विद्वद्व्रजकेसरिणा सकललोकावरणतमोनिराकरणानन्तमणिकिरणगणप्रकाशगुणाभरणेन विरचिते तत्त्वचिन्तामण्युपन्यासे प्रत्यक्षपरिच्छेदः समाप्तः ॥

Foll. 108*b*—116*b* contain some miscellaneous stanzas.

R. No. **1543.**

Palm-leaf. 16 × 1¼ inches. Foll. 51. Lines, 18 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peranma Agrahāram, Amalapuram taluk.

वेदान्तसारटीका.
VĒDĀNTASĀRATĪKĀ.

A commentary on the Vēdāntasāra of Sadānanda which work has been described under No. 4746 of the D.C.S. MSS., Vol. IX.

It is stated that this manuscript originally belonged to Pappu Candraśēkhara Śāstrigaḷ.

Incomplete.

**Beginning:**

सत्यं ज्ञानमयं तं परिपूर्णानन्दविग्रहं (देवम्)।
. . . . मसृतविश्वसृष्टिस्थित्यव्ययं वन्दे ॥

. . . . . नमस्कृत्य ।
वेदान्तसारटीकां कुर्वे श्रद्धावशाद्यथाबुद्धि ॥

चिकीर्षितस्य ग्रन्थस्याविघ्नपरिसमाप्तिप्रचययगमनशिष्टाचारपरिप्राप्त . . . . . श्रुतिबोधितकर्तव्यताकं स्वाभिमतदेवतातत्त्वानुसन्धानात्मकं मङ्गलमाचरति—अखण्डेत्याद्यश्लोकेन । आत्मानमाश्रय इत्यन्वयः ।

* * * *

गुर्वाराधनोक्तिपूर्वकं स्वचिकीर्षितं प्रतिजानीते—अथत इति श्लोकेनावेदान्तो वक्ष्यामाणलक्षणः तस्य सारो मथितार्थस्तं वक्ष्ये तच्च यथामति स्वमत्यनुसारेण अनन्तशाखाप्रविततस्यातिगम्भीरार्थस्य वेदान्तस्यावाग्बुद्धिभिरपरिच्छेदात् ।

**End:**

नन्वसौ जीवन्मुक्त इति कथमन्यैर्ज्ञायते—

इति तदाह—अस्य ज्ञानात्पूर्वमिति । अशुभवासना . . . . . त्यर्थः । ननु शास्त्रविहितं शुभमेवाचरतो न साधकाद्भेद इत्यपरितुष्यन्निवाह—शुभाशुभयोरौदा(सी)न्यं वेति औदासी.

## R. No. 1544.

Palm-leaf. $17\frac{1}{4} \times 1\frac{3}{5}$ inches. Foll. 31. Lines, 8 in a page. Telugu. Much injured.

Presented in 1915-16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalāpuram taluk.

तर्कभाषाप्रकाशिकाव्याख्या—तर्कसारः.

TARKABHĀṢĀPRAKĀŚIKĀVYĀKHYĀ: TARKASĀRAḤ.

By Kompella Vēṅkaṭabudha. Same work as that described under No. 4188 of the D.C.S. MSS., Vol. VIII.

Wants both the beginning and some portion in the middle.

---

## R. No. 1545.

Palm-leaf. $17 \times 1\frac{1}{2}$ inches. Foll. 45. Lines, 10 in a page. Telugu. Injured.

Presented in 1915-16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

न्यायशास्त्रार्थदीपव्याख्या—प्रभा.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ: PRABHĀ.

By Bhiṣagrāṭ. Same work as that described under No. 4208 of the D.C.S. MSS, Vol VIII.

Begins in the Maṅgalavāda and breaks off in the course of the Manōṇutvavāda.

Foll. 6*b* and 34 are left blank.

---

## R. No. 1546.

Palm-leaf. $17 \times 1\frac{1}{4}$ inches. Foll. 22. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agraharam, Amalapuram taluk.

न्यायशास्त्रार्थदीपव्याख्या—प्रभा.

NYĀYAŚĀSTRĀRTHADĪPAVYĀKHYĀ: PRABHĀ.

Foll. 1*a*—21*b*. Fol. 22 contains a few passage of the Anumāna-khaṇḍa.

Same work as that described under No. 4208 of the D.C.S. MSS., Vol. VIII.

Contains the Andhakāravāda and the Kāraṇatāvāda only.

## R. No. 1547.

Palm-leaf. 16 × 1¼ inches. Foll. 16. Lines, 6 in a page. Telugu. Much injured.

Presented in 1915–16 by M.R.Ry. Pappu Subbārāyaḍugārulu of Peramma Agrahāram, Amalapuram taluk.

तत्त्वचिन्तामणिव्याख्या--आलोकः.

TATTVACINTĀMAṆIVYĀKHYĀ: ĀLŌKAḤ.

By Jayadēva. Same work as that described under No. 3998 of the D.C.S. MSS., Vol. VIII.

Wants beginning and end in the Prāmāṇyavāda.

---

## R. No. 1548.

Palm-leaf. 17 × 1½ inches. Foll. 105. Lines, 7 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. Ayyagāri Sītārama Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

तत्त्वचिन्तामणिसारः.

TATTVACINTĀMAṆISĀRAḤ.

By Gōpīnātha, son of Bhavanātha of Khāḍasatu family and born in Mithilā. Same work as that described under No. 4030 of the D.C.S. MSS., Vol. VIII, with the addition of the stanzas at the end as given below. The author refers to his two other works Maṇibhūṣaṇa and Ālōkabhūṣaṇa and respectfully mentions his brother Pītāmbara.

Foll. 25*b* and 36*b* are left blank.

Wants the beginning; otherwise the Śabdakhaṇḍa is complete.

**End:**

अनुमानमणिसारे अनुमानालोकभूषणे प्रत्यक्षमणिसा(रे) प्रत्यक्षालोकभूषणे च प्रतिपादितत्वादिति दिक् ॥

मणिसारहारभाजा मणिभूषणभूषितास्सुधियः ।
आलोकमणिरहस्यं बुद्ध्वा प्रतिपक्षमक्षमं कुरुत ॥
मणिभूषणमणिसारौ तनयावेतौ समुत्पाद्य ।
निजकुलकमलविकासे गोपीनाथेति मार्तण्डः ॥
खाडसतुकुलसम्भूतभवनाथसुतः सुधीः श्रीमान् ।
गोपीनाथोऽरचयत् मिथिलाजातो मणिसारे (णेस्सारम्) ॥

या गङ्गेव सतां सदाप्यभिमता धर्मे गृहव्यावृतौ
लक्ष्मीः सर्वजनानुरञ्जनविधौ सूक्तिः परातो भुवि ।
तस्यायं भवनाथपाण्डितकविः पुत्रं पवित्रं च यो
गोपीनाथमवाप तेन महतो यत्नादिदं निर्ममे ॥
पीताम्बरो जगत्ख्यातो यः पाण्डित्यनिकेतनम् ।
तदग्रजन्यसामर्थ्यपदे तन्न तदद्भुतम् ॥
सहृदयेषु बुधेषु नतो मुहुः किमपि गोचरयामि कृताञ्जलिः ।
मम वचःप्रचये करुणामयीं कुरुत दृष्टिमतोऽस्त्वयमर्थवान् ॥

**Colophon:**

. . . . . कुलसमुद्भूतमहामहोपाध्यायश्रीभ[ग]वनाथवक्तृ-सुतगोपी(ना)थविरचितश्शब्दमणिसारः समाप्तः ॥

---

R. No. **1549.**

Palm-leaf. $15\frac{3}{8} \times 1\frac{3}{4}$ inches. Foll. 130. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

न्यायसुधाव्याख्या—राणकोज्जीविनी.

NYĀYASUDHĀVYĀKHYĀ : RĀṆAKOJJĪVINĪ.

Same work as that described under R. No. 1532 *ante*.

Contains the first Adhyāya only, but wants the beginning.

---

R. No. **1550.**

Palm-leaf. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 202. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

न्यायसुधाव्याख्या—राणकोज्जीविनी.

NYĀYASUDHĀVYĀKHYĀ : RĀṆAKOJJĪVINĪ.

Foll. 15*a*—202*b*. Fourteen leaves are left blank in the beginning

Same work as that described under R. No. 1532 *ante*.

Contains the first Adhyāya complete. Wants the beginning.

The scribe adds—

मुक्कामलजगन्नाथशास्त्रिणा लिखिता शुभा ।
राणकोज्जीविनी नाम कृतिर्विद्वन्मनोहरा ॥

---

R. No. **1551.**

Palm-leaf. 17¼ × 1½ inches. Foll. 289. Lines, 8 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

**तत्त्वचिन्तामण्यालोकव्याख्यानम्—सिद्धाञ्जनम्.**

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀNAM: SIDDHĀÑJANAM.

Foll. 8*a*—289*b*. Foll. 1—3 are left blank. Foll. 4—7 contain a portion of Āśvamēdhikaparvan of the Mahābhārata.

Same work as that described under R. No. 1536 *ante*.

Wants 80 pages in the beginning. Up to the end of Anyathākhyātivāda.

This manuscript is said to have been copied by Vīrēśvan for the use of his elder brother Gōpālaśāstri, son of Ayyagāri Kṛṣnasōmayāji.

---

R. No. **1552.**

Palm-leaf. 18 × 1½ inches. Foll. 330. Lines, 10 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

**मीमांसानयविवेकदीपिका.**

MĪMĀṂSĀNAYAVIVĒKADĪPIKĀ.

A commentary on the Mīmāṁsānayavivēka of Bhavanāthamiśra, which work has been described under No. 4457 of the D.C.S. MSS., Vol. IX; by Varadarāja, son of Raṅganātha of Ātrēyagōtra and disciple of Sudarśanācārya.

Wants beginning to the end of the third Adhyāya.

**Beginning:**

. . . . दिष्ट्युक्तवाक्यविषये स्तुतिपरतया न शब्दपरत्वाज्ञानं भिन्नवाक्यविषयेऽन्व(प्य)र्थस्व(स्य)ग्राहकान्वययोग्यतया न शब्दपरताज्ञानम् ;

किं तु अर्थपरमेव । मन्त्रवाक्यार्थस्य तु न ग्राहकावस्थायामन्वययोग्यता अनुष्ठानावस्थावगतस्यैवार्थस्य मन्त्राच्छ्रुतितो बर्हिर्देवसदनं दामीतिवत्

* * * *

मन्त्राणां कार्यपरतेति द्वितीयसूत्रे मन्त्राणां कार्यपरतोक्तिरिति भावः । ननु कथमेवंविधकार्यार्थपरत्वनिवृत्त्या पूर्वपक्ष इत्यत्राह—सा चेति । सा च कार्यार्थपरता मन्त्राणां तदर्थशास्त्रादिभिः करणैः

* * * *

अभ्युच्चयहेतुसमर्थनं तु भाट्टमतमिति नेहोच्यत इति भावः ॥

**Colophon:**

इत्यात्रेयस्य श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोः वरदराजस्य कृतौ नयविवेकदीपिकायां प्रथमस्याध्यायस्य द्वितीयः पादः ॥

धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात्.

**End:**

युक्तमित्यत्राह—पुरोडाशेति । सवनीयशब्दोऽपि सवनीयपुरोडाशमुपस्थाप्य तद्द्वारा असवनीयमपि पुरोडाशं दन्तिवल्लक्षयितुं युक्त . . . यात् ॥

**Colophon:**

इति श्रीसुदर्शनाचार्यशिष्यस्य श्रीरङ्गनाथसूनोर्वरदराजस्य कृतौ मीमांसानयविवेकदीपिकायां तृतीयस्याध्यायस्याष्टमः पादः ॥

---

R. No. **1553.**

Palm-leaf. 16½ × 1¼ inches. Foll. 182. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

(*a*) **पदार्थधर्मसङ्ग्रहः.**

PADĀRTHADHARMASAṄGRAHAḤ.

Foll. 1*a*—2*b*.

Same work as that described under No. 2059 on page 661 of the India Office Library Catalogue. Also see Dr. Rājēndra Lal Mitra's Catalogue No. 1961, Vol. V.

By Praśastapāda.

Incomplete.

**Beginning :**

प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः ।
पदार्थधर्मसङ्ग्रहः प्रवक्ष्यते महोदयः ॥

द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानं निःश्रेयसहेतुः तच्चेश्वरचोदनाभिव्यक्ताद्धर्मादेव । अथ के द्रव्यादयः पदार्थाः ? किं च तेषां साधर्म्यं वैधर्म्यं चेति । तत्र द्रव्याणि— पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि सामान्यविशेषसंज्ञोक्तानि नवैव ।

**End :**

ऊर्ध्वज्वलनस्वभावकं वर्चः स्वेदादिसमर्थं दिव्यमबिन्धनं सौरविद्युदादि । भुक्तस्याहारस्य रसादिपरिणामनिमित्तकमु(मौ)दर्यम् . . . . . संयुक्तसमवायाद्रसाद्युपलब्धिरिति ।

वायुत्वाभिनन्दा वायुर्वायुरप.

---

(*b*) पदार्थधर्मसङ्ग्रहव्याख्या—किरणावली.

PADĀRTHADHARMASAṄGRAHAVYĀKHYĀ : KIRAṆĀVALĪ.

Foll. 3*a*—22*a*. Fol. 22*b* is left blank.

A commentary on the work noticed above : by Udayana. Same work as that described under No. 1968 of Dr. Rājēndra Lal Mitra's Notices of Sanskrit MSS., Vol. V.

Incomplete.

**Beginning :**

विद्यासन्ध्योदयोद्रेकादविद्यारजनीक्षये ।
यदुदेति नमस्तस्मै कस्मैचिद्विश्वतस्त्विषे ॥
यतो द्रव्यं गुणाः कर्म तथा जातिः परापरा ।
विशेषास्समवायो वा तमीश्वरमुपास्महे ॥
अर्थानां प्रविवेचनाय जगतामन्तस्तमश्शान्तये
सन्मार्गस्य विलोकनाय गतये लोकस्य यात्रार्थिनः ।
तत्तत्तामसभूतभीतय इमां विद्यावतां प्रीतये
व्यातेने किरणावलीमुदयनस्सत्तर्कतेजोमयीम् ॥

अतिविरसमसारं मानवार्ताविहीनं प्रविततबहुवेलप्रक्रियाजालदुस्थम् ।
उदधिसममतन्त्रं तत्त्वमेतद्वदन्ति प्रबलजडधियो ये तेऽनुकम्पन्त एव ॥

शास्त्रारम्भसदाचारप्राप्ततया कायवाङ्मनोभिः कृतं परापरगुरुनमस्कारं शिष्यान् शिक्षयितुमादौ निबध्नाति प्रणम्येति । कर्तव्यापेक्षया पूर्वकालत्वात्प्रणामस्य प्रणम्येति क्त्वानिर्देशः । भक्तिश्रद्धातिशयलक्षणः प्रकर्षः प्रशब्देन द्योत्यते ।

**End:**

अत्रैवं प्रयोगः—प्रतिहन्यमानाद्वायोः प्रतिहन्ता वायुरन्यः तत्प्रतिहन्तृत्वात् देवदत्ताद्यङ्गदत्तवत् अभेदे प्रतिघातानुपपत्तिः संयोगस्य द्विष्ठत्वात् प्रतिहन्यते चायं वायुः तिर्यग्गमनस्वभावस्य प्रयत्नाद्यसम्भवेन.

---

(*c*) द्रव्यकिरणावलीव्याख्या—प्रकाशः.
DRAVYAKIRAṆĀVALĪVYĀKHYĀ : PRAKĀŚAḤ.

Foll. 23*a*—78*b*. Foll. 66, 67, 79—85 are left blank.

By Vardhamāna, son of Gaṅgēśvara. Same work as that described under No. 1963 of Dr. Rājēndra Lal Mitra's Notices of Sanskrit MSS., Vol. V.

Incomplete

**Beginning :**

मिलन्मन्दाकिनीमल्लीमालां मूर्ध्नि पुरद्विषः ।
विश्वबीजाङ्कुरप्रख्यामैन्दवीं तां कलां नुमः ॥

कर्तव्यविघ्नविघातकं रविनमस्कारं निबध्नाति—विद्येति । यदिति सामान्यतोऽपि कर्तृनिर्देशे विद्याविद्ययोस्सन्ध्यारजनीभ्यां निरूपणाद्रविरुदितो लभ्यते । विद्यैव या पूर्वसन्ध्या तदुदयोद्रेकादुत्पत्त्याधिक्यादविद्यैव रजनी तत्क्षये सति यदुदेति उदयगिरिशिखरमधिरोहति । सन्ध्या च न रात्रेर्भागविशेषः ।

**End:**

एतदजन्यत्वस्योपाधित्वात् नाप्यात्मत्वं निर्विशेषवद्वृत्ति पाकजानधिकरणविशेषगुणवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातित्वात् अप्त्ववदिति मूर्तवृत्तित्वस्योपाधित्वात । उच्यते—अदृष्टद्वारकोपादानगोचरजन्यप्रय.

(*d*) किरणावलीप्रकाशविवरणम्.

KIRAṆĀVALĪPRAKĀŚAVIVARAṆAM.

Foll. 86*a*—143*b*. Foll. 97*b* and 98 are left blank.

By Rucidatta. Same work as that described under R. No. 1541 *ante*.

Incomplete.

---

(*e*) कुसुमाञ्जलिप्रकाशः.

KUSUMĀÑJALIPRAKAŚAḤ.

Foll. 144*a*—173*b*. Foll. 174—182 are left blank, excepting fol. 180 which contains a few lines of Rucidattānumānavicāra.

A commentary by Vardhamāna, son and disciple of Gaṅgēśvara, on the Kusumāñjali of Udayanācārya, which is a treatise in Nyāya.

Breaks off in the second Stabaka.

**Beginning:**

भक्तानां कामदस्तुष्टो रुषा कामं दहन्नपि ।
अपि ज्ञानमयः स्थाणुर्यस्तमीशं स्तुवीमहि ॥
यतः प्रकाशते ज्योतिरपि वाचामगोचरम् ।
कायेन मनसा वाचा परां वाचं नमामि ताम् ॥
न्यायाम्भोजपतङ्गाय मीमांसापारदृश्वने ।
गङ्गेश्वराय गुरवे पित्रेऽत्रभवते नमः ॥

सदाचारानुमितश्रुतिबोधितकर्तव्यताकं प्रारिप्सितप्रतिबन्धकविघ्नविघातकमिष्टदेवताकीर्तनरूपं सच्छब्दप्रयोगरूपं च मङ्गलमाचरन्नेव प्रयोजनाभिधेयसम्बन्धानाह—सत्पक्षेति । एषोऽनघो वाक्यदोषरहितः । विषयाशुद्धेः पूर्वार्धेनैव परिहृतत्वात् । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति न्यायः समस्तरूपोपेतलिङ्गबोधकवाक्यजातं स एवाह्लादकतया प्रसूनं तदेवावान्तरवाक्यघटितत्वात् अञ्जलिः । मे चेतोऽविघ्नं यथा स्यादेवं रमयतु दुःखसामग्रीरहितं करोतु ईशस्य पदयुगे रमयतु ।

* * * *

**Colophon:**

इति श्रीमहोपाध्यायवर्धमानविरचिते कुसुमाञ्जलिप्रकाशे प्रथमः स्तबकस्समाप्तः ॥

द्वितीय[य]यां विप्रति(पत्ति)मुद्बोधयितुं भूमिकामारचयति—तदेवमिति । तस्य च जन्यतया तत्कारणयागादि(दर्शी कश्चित् स्वीकर्तव्य इत्यर्थः । नचेति । यागादि)स्वर्गसाधनत्वस्यातीन्द्रियत्वादित्यर्थः ।

**End:**

न चाप्रमायां दोषजन्यत्वात्तथा । दोषस्य पित्तादेः स्वविषयप्रमायामपि हेतुत्वात् । अनि(त्य)प्रमा[या]स्वविरोध्यनुभवप्रतिबन्धकजन्या अनित्यानुभवत्वात् (अप्रमावत्) यद्वा (अनित्य)प्रमा अप्रमाप्रमान्यतरम्.

---

R. No. **1554.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Foll. 109. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

**तन्त्रवार्त्तिकम्.**

**TANTRAVĀRTTIKAM.**

This is the well-known treatise in Mīmāṁsā by Kumārila Bhaṭṭa in the form of a commentary, in a mixed style of alternating prose and verse, on the Bhāṣya of Śabarasvāmin. A commentary on it is described under No. 4415 of the D.C.S. MSS., Vol. IX.

Begins with the first Pāda of the second Adhyāya and breaks off in the twenty-eighth Sūtra of the second Pāda of the second Adhyāya.

**Beginning:**

सर्वज्ञं सकलबुधैरुपास्यमानं विश्वेशं विमलधिया विभावयन्तम् ।
संसारे पतितजनान् पवित्रयन्तं वन्देऽहं[ श्री ]हरिहरभारतीयतीन्द्रम् ॥

भावार्थः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते । सम्बन्धं तावल्लक्षणद्वयस्य करोति । तत्र प्रमाणलक्षणं वृत्तमित्युक्तम् । तदयुक्तम् ; कुतः ?

नैव हि प्रथमेऽध्याये सूत्रकारेण किं चन ।
लक्षणेन प्रमाणादेः स्वरूपमुपवर्णितम् ॥

* * * *

**Colophon:**

इति भट्टकुमारिलस्वामिविरचिते मीमांसाभाष्यवार्त्तिके द्वितीयस्याध्यायस्य प्रथमः पादः ॥

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ।
उपोद्घातप्रसक्तानुप्रसक्तानुगतेऽधुना ।
शब्दान्तरादिभिर्भेदो लक्षणार्थो निरूप्यते ॥

तत्र शब्दान्तरं तावद्विस्पष्टत्वात्प्रथममुदाह्रियते—एकाख्यातप्रत्ययसम्बन्धात्सर्वे धातवो यजति, ददाति, गृह्णाति, निर्वपति and स्तौति इत्यादय उदाहरणम् भाष्यकारेण तु ।

**End:**

एकस्यापि इति स्थानभेदप्राप्तिः । न च यत्सौभराङ्गभूतस्य हि षट्स्थानं तदेव पुरुषार्थस्यापीत्यवधारणं शक्यम् ; प्रासङ्गिकसौभरसाधनत्वादिति चेन्न तस्यैव स्थानविशेषलाभात्प्रागसि.

---

R. No. **1555.**

Palm-leaf. 18 × 1½ inches. Foll. 241. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

तन्त्रवार्त्तिकटीका—सुबोधिनी.

TANTRAVĀRTTIKAṬĪKĀ : SUBŌDHINĪ.

Foll. 184—191 are wanting in the middle.

A commentary on the Tantravārttika described above : by Annambhaṭṭa, son of Tirumalārya of Rāghavasōmayāji family.

Contains the first three Pādas of the third Adhyāya and breaks off in the course of the fourth Pāda thereof.

**Beginning:**

विश्वेशं हृदि सततं निधाय दुर्गामादित्यं गणपतिमादरादुपास्य ।
मीमांसागुरुमपरं च . . . . व्याख्यास्ये विबुधमुदे तृतीयतन्त्रम् ॥

. . . . . अथातश्शेषलक्षणम् ।

शेषशब्दस्याङ्गत्वप्रतिपादकत्वादग्रिमसूत्रे तन्मात्रपरत्वाच्चाङ्गत्वप्रतिज्ञामात्रविकल्पेनावभासमानं सूत्रमवशिष्टसकललक्षणार्थप्रतिज्ञापरत्वेन व्याचष्टे— द्विलक्षण्या इति । सूत्रे सकलशब्दोऽवशिष्टपरः । आद्यसूत्रप्रतिज्ञातेषु धर्मस्वरूपप्रमाणादि लक्षणद्वये स्वरूपप्रमाणनिरूपणपर्यवसानेऽधुना दशलक्षणीप्रतिपाद्यमवशिष्टमङ्गत्वादिप्रतिपादनं क्रियते इति ।

* * * *

Colophon:

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यस्य सूनोरन्नम्भट्टस्य कृतौ तन्त्रवार्त्तिकटीकायां सुबोधिन्यां तृतीयाध्यायस्य प्रथमः पादः ॥

अर्थाभिधानसामाध्या(मर्थ्या)न्मन्त्रेषु शेषभावः स्यात्तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यं संयोगात् ।

End:

पूर्वपक्ष्युक्तलिङ्गत्वं निरस्तमित्याह—तस्मादिति । विधित्वेनानुवादत्वाभावान्नेम(न्निय)मदुष्टत्वं देवताभागलिङ्गं न भ(व)तीत्यर्थः । अधिकरणार्थमुपसंहरति—तस्मादिति । एकदेवत्यविषयत्वं वि(शे)षणविधिरित्यर्थः ॥

Colophon:

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यसूनोरन्नम्भट्टस्य कृतौ तन्त्रवार्त्तिकटीकायां सुबोधिन्यां तृतीयस्याध्यायस्य तृतीयः पादः ॥

. . . . . निवीतवत्प्राचीनावीते शुद्धमनुष्यधर्मत्वादिपक्षासम्भवान्नोदाहृतमित्यभिप्रायेणाह—तत्रेति । निवीतविचारस्य कर्तव्यत्वे सति ।

* * * *

एकार्थप्रतिपादकत्वं सामानाधिकरण्यं न सम्भवति । . . . . प्रतिपादकत्वे नैकार्थप्रतिपादकत्वाभाव.

## R. No. 1556.

Palm-leaf. 16 × 1¼ inches. Foll. 160. Lines, 6 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

(*a*) तत्त्वचिन्तामण्यालोककण्टकोद्धारः.

TATTVACINTĀMAṆYĀLŌKAKAṆṬAKŌDDHĀRAḤ.

Foll. 1*a*—97*b*.

An explanatory commentary on the Ālōka, which is itself a commentary by Jayadēva on the Tattvacintāmaṇi. See No. 1909 of Dr. Rājēndra Lāl Mitra's Notices of Sanskrit MSS., Vol. V. By Madhusūdana.

Contains only the Śabdakhaṇḍa.

**Beginning:**

मधुसूदनसद्युक्तिसमुत्सारितकण्टकाः ।
आलोकव्यक्तमार्गेण मणिं गृह्णन्तु धीधनाः ॥

अथशब्दसूचनीयं(यां)सङ्गतिं व्युत्पादयति—इहेति । वर्तमानेति । तत्सामीप्येत्यर्थः । प्रत्य[क्षा]यान्तत्वेन तदन्तपदोपस्थाप्यत्वेनेत्यर्थः . . . . ज्ञविषयत्वस्यैव साध्यत्वरूपत्वात् तदाक्षेपकत्वाद्वेति भावः । सिद्धेति । मलिनं ते वपुः स्नाया इत्यादौ वपुर्मालिन्यादिना स्नानादिहेतुत्वावगमस्य सर्वलोकसिद्धत्वात् तदा व्युत्पत्तिस्थैर्यादिति भावः ।

**End:**

जातेष्टिगयाश्राद्धयोः काम्यत्वेन ब्रह्मलोकावाप्तिहेतुत्वाभावान्न कर्मत्वमपि कर्तृफलहेतुतानियतमित्यर्थः । एकदेशित्वे बीजमाह—ननु जातिष्विति । इत्यर्थः तात्पर्यार्थः । यदि तु कर्तृगामिफलजनकत्वे व्यभिचारस्फुटत्वादुपेक्षान्यदाह—अत्र ब्रूम इति इति पाठः तदा सुगमः ॥

**Colophon:**

इति श्रीमधुसूदनकृतावपूर्वकण्टकोद्धारः ॥
शब्दखण्डपक्षधरव्याख्यानं मधुसूदनमिश्रीयम् ॥

---

(*b*) तत्त्वचिन्तामणिटीका.

TATTVACINTĀMAṆIṬĪKĀ.

Foll. 98*a*—159*b*. Fol. 160 is left blank.

By Vāsudēva Miśra, a disciple of Jayadēva. Same work as that described under No. 1939 on page 631 of the India Office Library Catalogue.

Contains the Anumānakhaṇḍa incomplete.

**Beginning:**

हृत्कौस्तुभे निजतनुप्रतिबिम्बितेन सद्यो विरोधिवनिताभ्रमिवासितायाम् ॥
लक्ष्म्यामवन्तु रतिसावधिमन्दरायां सोत्तालिका मधुरिपोः परिहासवाचः ॥

जयदेवगुरोर्वाचि ये केचिद्दोषदर्शिनः ।
प्रबोधाय मया तेषां दीप्तिर्भूयोऽभिदीप्यते ॥

तर्कमधीते सर्वः कति न भवन्तीह पण्डितंमन्याः ।
वाचां विचारदक्षा विरळाः पुनरत्र विद्वांसः ॥

व्याप्तीति । अत्र द्वन्द्वसमासः । पदार्थतावच्छेदकभेदेऽपि तस्य साधुत्वेन सत्यपरामर्शेऽपि व्याप्तिविशिष्टपक्षधर्म(त)येरभेदेऽपि तदुपपत्तेः प्रयोगस्योभयत्र दर्शनात् प्रयोगमूलत्वादेव पाणिनीयस्मृतेः । साधर्म्यवैधर्म्याभ्यामिति प्रयोग-दर्शनात् । अत्र च साधर्म्यवैधर्म्याभ्यामिति प्रकारे तृतीयेति व्याख्यातं वर्धमान-पादैः । अत एव च सर्वपदार्थप्रधानो द्वन्द्वसमासः सिद्धान्ततः ।

**End:**

अत्र च नाव्याप्तिशङ्कापीति । अत्र शङ्क्यते . . . . व्यभि-चारित्वमपि न प्रतिबन्धकतावच्छेदकं परामर्शोत्तरं व्यभिचारज्ञानस्याप्रतिबन्ध-कत्वात्.

---

R. No. **1557.**

Palm-leaf. 17½ × 1⅜ inches. Foll. 78. Lines, 7 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

The first fol. is left blank.

मीमांसाकौस्तुभः.

MĪMĀṂSĀKAUSTUBHAḤ.

Foll. 2*a*—75*a*. Foll. 75*b*—78*b* are left blank.

By Khaṇḍadēva, son of Rudradēva. Same work as that described under No. 4445 of the D.C.S. MSS., Vol. IX.

Contains from the first Sūtra of the fourth Pāda in the first Adhyāya and breaks off in the 21st Sūtra of the same Pāda in the same Adhyāya.

---

## R. No. 1558.

Palm-leaf. 16¾×1½ inches. Foll. 177. Lines, 9 in a page. Telugu. Much injured.

Presented in 1915–16 by M.R.Ry. Ayyagāri Sītārāma Śāstrulugāru of Rāvipāḍu Agrahāram, Razole taluk.

### (*a*) सङ्क्षेपशारीरकम्.

SAṄKṢĒPAŚĀRĪRAKAM.

Foll. 1*a*—54*b*.

A work in four Adhyāyas explaining briefly the principles of the Advaita-Vēdānta as expounded in the Śārīrakabhāṣya of Śaṅkarācārya by Śrī-Sarvajñātman, disciple of Dēvēśvara. For detailed description see page 742 under Nos. 2319 and 2320 in the India Office Library Catalogue, Part IV.

Complete.

**Beginnin :**

अनृतजडविरोधिरूपमन्तत्रयमलबन्धनदुःखताविरुद्धम् ।
अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमि ॥
स्वाज्ञानकल्पितजगत्परमेश्वरत्वजीवत्वभेदकलुषीकृतभूमभावा ।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा प्रत्यक्चितिर्विजयते भुवनैकयोनिः ॥

* * * *

वाग्वस्तरा यस्य बृहत्तरङ्गा वेलातटं वस्तुनि तत्त्वबोधः ।
रत्नानि तर्कप्रसरप्रकाराः पुनात्वसौ व्यासपयोनिधिर्नः ॥
वक्त्रारमासाद्य यमेव नित्या सरस्वती स्वार्थसमन्वितासीत् ।
निरस्तदुस्तर्ककलङ्कपङ्का नमामि तं शङ्करमर्चिताङ्घ्रिम् ॥
यदीयसम्पर्कमवाप्य केवलं वयं कृतार्था निरवद्यकीर्तयः ।
जगत्सु ते तारितशिष्यपङ्क्तयो जयन्ति देवेश्वरपादरेणवः ॥
गुरुचरणसरोजसन्निधानादपि वयमस्य गुणैकलेशभाजः ।
अपि महति जलार्णवे निमग्नास्सलिलमुपाददते मितं हि मीनाः ॥

शक्तो गुरोश्चरणयोर्निकटे निवासान्नारायणस्मरणतश्च निरन्तरायः ।
शारीरकार्थविषयावगतिप्रधानं सङ्क्षेपतः प्रकरणं करवाणि हृष्यन् ॥

* * * *

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्देवेश्वरपूज्यपादशिष्यस्य श्रीसर्वज्ञात्मनो महामुनेः कृतौ सङ्क्षेपशारीरके प्रथमोऽध्यायः ॥

**End :**

त्वत्पादपङ्कजसमाश्रयणं विना मे सन्नप्यसन्निव परः पुरुषः पुरासीत् ।
त्वत्पादपद्मयुगलाश्रयणादिदानीं नासीन्न चास्ति न भविष्यति भेदबुद्धिः ॥
यस्मात्कृपापरवशो मम दुश्चिकित्सं संसाररोगमपनेतुमसि प्रवृत्तः ।
त्वत्पादपङ्कजरजः शिरसा दधानस्त्वामाशरी(र)पतनादहमप्युपासे ॥
सङ्क्षेपशारीरकमेवमेतत्कृतं परिव्राजकमुक्तिहेतोः ।
गुरुप्रसादात्परिलभ्य तत्त्वं त्रयीशिरस्तत्त्वनिवेदनाय ॥
अविरलपदपङ्क्तिः पद्मनाभस्य पुण्या चरणकमलधूलीग्राहिणी भारतीयम् ।
घनतरमुपघातं श्रेयसे श्रोतृसङ्घात्सुरसरिदिव सद्यो मार्ष्टु माङ्गल्यहेतुः ॥
श्रीदेवेश्वरपादपङ्कजरजस्सम्पर्कपूताशयः
सर्वज्ञात्मगिराङ्कितो मुनिवरस्सङ्क्षेपशारीरकम् ।
चक्रे सज्जनबुद्धिवर्धनमिदं राजन्यवंश्ये नृपे
श्रीमत्यक्षतशासने मनुकुलादित्ये भुवं शासति ॥
भुजङ्गमाङ्गशायिने विहङ्गमाङ्गगामिने ।
तुरङ्गमाङ्गभेदिने नमो रथाङ्गधारिणे ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीदेवेश्वरपूज्यपादशिष्यस्य श्रीसर्वा(र्व)ज्ञात्मनो महामुनेः कृतौ सङ्क्षेपशारीरके फललक्षणश्चतुर्थोऽध्यायः ॥ समाप्तश्च ग्रन्थः ॥

---

(*b*) सङ्क्षेपशारीरकव्याख्यानम्—सिद्धान्तदीपः.
SAṄKṢĒPAŚĀRĪRAKAVYĀKHYĀNAM : SIDDHĀNTA-DĪPAḤ.
Foll. 55*a*—177*b*.

A commentary on the above work : by Viśvavēda, disciple of Ānanda-vēda.

Complete.

**Beginning :**

श्रीमच्छारीरकार्थाविष्करणाय ग्रन्थमारिप्सुराचार्यः इष्टदेवतातत्त्वानुस्मरणं मङ्गलमाचरंस्तद्विषयग्रन्थारम्भं प्रतिजानीते —

अत्र मुरारिर्विष्णुः जगदुपद्रवकारिमुराद्यसुरसंहरणाज्जगत्पालयिता सत्त्व-प्रधानमायायां प्रतिबिम्बितं परं ब्रह्मान्तर्याम्याख्यं तस्य परमं पदं तदेव ब्रह्म मायासम्बन्धरहितं बिम्बाख्यं परमत्वं तस्य मायासम्बन्धराहित्यम् । पद्यते गम्यते ज्ञायते च मुमुक्षुभिरिति पदम् । अथवा पदं स्थानमास्पदं सोपाधिकतया विक्रिय-माणमपि यदास्पदतया वर्तते स्वरूपं न त्यजति . . . . . तत्स्वरूपं दर्शयितुमनृतजडविरोधिरूपमित्यादीनि विशेषणानि ।

* * * *

अधीतवेदस्य हि व्युत्पन्नस्यानेकानि विज्ञानानि विरुद्धार्थविषयाणि तत्रा-द्वितीयप्रत्यग्विषयं विज्ञानं वाक्यस्वारस्योक्तमन्यानि तु सामान्यतोऽदृष्टनिबन्धना-नीति निर्णयस्समन्वयनिरूपणफलमित्यर्थः ॥

**Colophon :**

इत्यानन्दवेदशिष्यविश्ववेदाविरचिते सङ्क्षेपशारीरकव्याख्याने सिद्धान्तदीपे प्रथमोऽध्यायः ॥

**End :**

अन्तेऽपि भगवन्नमस्कारलक्षणं मङ्गलमाचरति—भुजङ्गमाङ्गेति ।

सर्वज्ञात्सर्वशक्तेर्यत इदमखिलं नैकधाभूदभूतं
. . . . . डम्बरे सम्प्रशान्ते ।
वेद्यं यद्द्वैतसारप्राणिहितमनसां शान्तमायाविलासं
पूर्णं तं सच्चिदात्माद्वयसुखवपुषं माधवं संश्रयेम ॥
यदीयपादाब्जसमाश्रया . . . . . उपे(दे)ति बोधः ।
सच्चित्सुखं मुक्तिपदं प्रयातास्तेऽद्यापि मच्चित्ततलं पुनन्तु ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमदानन्दवेदशिष्यविश्ववेदविरचिते सङ्क्षेपशारीरकव्याख्याने सिद्धान्तदीपे चतुर्थोऽध्यायः ॥

---

R. No. **1559.**

Palm-leaf. 17 × 1½ inches. Foll. 94 Lines, 7 in a page. Telugu.

Slightly injured.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Kottivāri Agrahāram, Amalāpuram taluk.

तत्त्वचिन्तामणिदीधितिव्याख्यानम्.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀNAM.

A commentary on the Tattvacintāmaṇidīdhiti of Raghunāthaśirōmaṇi which work has been described under No. 4002 of the D.C.S. MSS., Vol. VIII. The commentary appears to be different from Jāgadīśī as well as from Bhavānandīya though it is stated in the front leaf that it is Bhavānandīya. The MS. is said to have belonged to Purandi Rāmasvāmi.

Incomplete.

Foll. numbered 1 to 54, 56 to 70, 84, 89, 93, 95, 106, 111, 113, 139 to 141 and 148 to 150 are wanting. There are 2 foll. numbered 94.

**Beginning:**

रूपसामान्यभाववान् वायुत्वादित्यादौ रूपाभावाभावस्य यावद्रूपस्याधिकरणाप्रसिद्धेश्च । न च नानाव्यक्तिसाध्यकमात्रे नाव्याप्तिः ।

* * * *

सार्वभौममतमाह—केचित्त्विति । हेतुतावच्छेदकेति । हेतुतावच्छेदकसम्बन्धेन यद्धेत्वधिकरणं तदवच्छेदे(दके)नेत्यर्थः । अवच्छेदकत्वस्य सप्तम्यर्थत्वात् । इदं चाभावान्वयि । तेनैवेति । हेतुतावच्छेदकसम्बन्धेनेत्यर्थः ।

**End:**

सार्वभौमलक्षणमाह—अन्ये त्विति । समुदायेति । कूटेत्यर्थः । वह्निमान् धूमादित्यादौ साध्याभावकूटाधिकरणवृत्तित्वाभावस्य यावत एव धूमादौ सत्त्वान्नातिप्रसङ्गः ।

* * * *

न च साध्यहेतुभेदेन व्याप्तिभेदात्कथं सर्वसाधारण्यम् ? प्रत्युत केवलान्वयिनि साधनपदादिप्रवेशे गौरवमेवेति वाच्यम् ; सर्वत्रैव साध्ये केवलान्वयित्वव्यतिरेकित्वाग्रहदशायामनुमित्युत्पादात् । सवत्रैव व्याप्तिद्वयप्रयोज.

## R. No. 1560.

Palm-leaf. $15\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 82. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Bulusu Subrahmaṇyagāru of Koṭṭivāri Agrahāram, Amalāpuram taluk.

### सामान्यनिरुक्तिक्रोडपत्रम्.

### SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Similar to the work described under No. 4320 of the D.C.S. MSS., Vol. VIII. Here, as in all Krōḍapatras, questions are raised regarding the necessity for the use of certain expressions in a standard work and then these are answered.

In the last stanza, it is stated that this work was written by one Lakṣmīnṛsiṁha on Monday, the 10th day of the month of Kārtika in the year Jaya. It is surmised that Lakṣmīnṛsiṁha may be the author.

**Beginning:**

प्रणम्य शारदादेवीं केषांचित्सुलभां सताम् ।
गदाधरीयसामान्यनिरुक्तिं विशदीक्रियाम् ॥

तज्ज्ञानजन्यजिज्ञासाधीनत्वं पञ्चम्यर्थ इति । तज्ज्ञानं हेत्वाभासत्वज्ञानं तदेव सङ्गतिज्ञानं भवति; कुतः? हेत्वाभासानां स्वनिष्ठव्याप्तिपक्षधर्मतावि[रह]-वत्त्वसम्बन्धेन सद्धेतुसम्बन्धित्वेन पूर्वं ज्ञातत्वात् सद्धेतुनिरूपणे

* * * *

यद्विषयकत्वेन यादृशविशिष्टविषयकत्वेनेत्यर्थ इति दीधितिकृतोक्तं तदुपरि यद्रूपावच्छिन्नविषयकत्वेनेति गदाधरेणोक्तम् ।

**End:**

अत्र वह्न्यभाववद्ह्रिसाध्यकस्थले वह्न्यभाववद्ह्रह्न्यभाववद्ध्रदरूपे बाधे अ-व्याप्तिः; अत्र साध्यतावच्छेदकीभूतबह्न्यभावनिष्ठविषयतानिरूपितप्रतियोगित्व-सम्बन्धावच्छिन्नसाध्यनिष्ठविषयतानिरूपितवह्न्यभावनिष्ठविषयतामादाय बाधज्ञा-नस्यासङ्ग्रहो दोषो बोध्यः ॥

जयवत्सरकार्तिक्यां दशम्यामिन्दुवासरे ।
लक्ष्मीनृसिंहाविबुध इदं क्रोडमलीलिखत् ॥

R. No. **1561.**

Palm-leaf. 17 × 1½ inches. Foll. 66. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭavāri Agrahāram, Gōdāvari district.

Fol. 41*b* is left blank.

अद्वैतदीपिका.

ADVAITADĪPIKĀ.

A treatise in four Parricchēdas criticising the Dvaita school of the Vēdānta and supporting the Advaita school: by Nṛsiṁhāśrama, pupil of Jagannāthāśrama. This work is evidently the same as that described under Nos. 1970 to 1972 of Dr. Rājēndra Lāl Mitra's Notices of Sanskrit MSS., Vol. V, which contain from the second to the fourth Paricchēda

Contains the third and the fourth Paricchēdas complete, but wants the beginning in the third Paricchēda.

**Beginning:**

श्रुतिमूलानां तेषां यथाश्रुत्युपपत्तेः । श्रुतिश्चोपासनापरा । वस्तुतत्त्वपरा वेति न गुणपरा गुणानामन्यत उपलब्धत्वात् । तस्मात्सत्यज्ञानानन्दात्मकं निर्गुणमुदासीनं ब्रह्म वेदान्तार्थसिद्धम् ।

सत्यज्ञानसुखस्वरूपममृतं शुद्धाद्वितीयं परं
वेदान्तैकविनिश्चयं हरिहरब्रह्मादिसंशब्दितम् ।
ब्रह्माम्नायवचोविचारविदितं यद्रूपमन्यादृशं
तद्देव्या विभवः परं मरुपयस्तुल्यो दुरूहो हरेः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीजगन्नाथाश्रमपूज्यपादाशिष्यनृसिंहाश्रमकृतावद्वैतदीपिकायामौपनिषददीपिकाख्यस्तृतीयः परिच्छेदः ।

यस्मिन्नस्तसमस्तमोहमहिमस्वानन्दमन्दीकृत-
ब्रह्मानन्दमहार्णवे महति न प्राचीनवाचामपि ।
शक्तिस्सत्यचिदात्मके नरहरौ मोहामरारे रवौ
तन्मे तापनिवृत्तये श्रुतिगतं भूयादखण्डं महः ॥

जगन्नाथाश्रय(म)गुरो(:)कृपाराकासुधाकरः ।
स्फुटीकरोतु मे त्व(स्पष्टं) मार्गं ब्रह्मसुखावहम् ॥

अथ वाक्यार्थो ब्रह्म निरूप्यते—तत्र वादिनां विप्रतिपत्तेः। तदर्थं वाक्यार्थे ब्रह्मणि पदानां शक्तिरास्ति न वेति चिन्त्यते। अत्र नवीनः—न ब्रह्म सर्वशब्दावाच्यम् अवाच्यपदेनैवाभिधानात्। न च तेनापि लक्ष्यमवाच्यरूपमुख्यार्थस्याभावात्।

**End:**

तस्मादहमनुभवगोचरातिरिक्तमकर्तृभोक्तृस्वरूपभावं स्वप्रकाशात्मकमविद्यया विभक्तमिव प्रतीयमानं त्वम्पदलक्ष्यमुद्दिश्यैापनिषदस्य मायया जगदुपादाननिमित्तभूतस्य वस्तुतो निर्विशेषस्य सत्यज्ञानानन्तानन्दात्मनस्तत्पदलक्ष्यस्य स्वरूपमात्राभेदो महावाक्येन प्रतिपाद्यत इति सिद्धम् ॥

श्रुतिरयमिति वक्तुं यन्न शक्नोति यस्मिन् वटतरुतलवासी मौनमास्ते महीयान्।
अतुलनिजविभूतेस्तस्य देवस्य भूयात् नरमृगवपुषोऽयं प्रीतयेऽद्वैतदीपः ॥

कृतिरियममरेन्द्रोन्निद्रमौलिप्रभौघप्रमुदितपदपीठे श्रीपतेरेव विष्णोः।
न मम निजनिमेषेऽप्यप्रभोरक्षतास्तु स्फुटबहुविकृतिर्वा नात्र मे किंचिदेनः॥

कियदपि परिपीतं यत्कदाचित्प्रसङ्गाद्विमलपदसरोजक्षालनाम्भोगुरोर्नः।
न(श)मयति हृदि तापं वर्धयत्यात्मविद्याजलनिधिमपि विष्णौ भक्तिमेतद्विधत्ते॥

अहं कियानेष गुरोः प्रसादः क्व वामरेन्द्रैर्मनसाप्यलभ्यः।
प्रसादिते देववरे मुरारौ न किं चिदप्राप्यमिहेति मन्ये ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमज्जगन्नाथाश्रमश्रीचरणशिष्यश्रीनृसिंहाश्रमकृतावद्वैतदीपिकायामानन्ददीपिकाख्यः चतुर्थः परिच्छेदः। समाप्तश्च ग्रन्थः ॥

---

## R. No. 1562.

Palm-leaf. 17 × 1¼ inches. Foll. 145. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Godavari district.

(*a*) काणादसङ्ग्रहः.

KĀṆĀDASAṄGRAHAḤ.

Foll. 1*a*—13*b*.

A brief treatise by Lakṣmaṇasūri explaining the nature of the Padārthas, *i.e.*, the fundamental categories of things in the universe in accordance with the Vaiśēṣika system of Philosophy, a knowledge of which is considered useful for the realization of the soul.

Contains only the Dravyapadārthanirūpaṇa.

**Beginning:**

प्रणम्य जानकीनाथचरणाम्बुरुहद्वयम् ।
आत्मविज्ञानसिद्ध्यर्थं वक्ष्ये काणादसङ्ग्रहम् ॥

आत्मज्ञानं तावन्निःश्रेयसहेतुत्वात्पुरुषार्थः । तस्य च सङ्ग्रहः कारणं तथा हि—सङ्ग्रहात्पदार्थतत्त्वज्ञानं तस्माच्च हेयोपादेयवस्तुविवेकः तत उपादेयभूतात्मोपासना ततस्तज्जनितधर्मादात्मसाक्षात्कार इति । अत्यन्तविप्रकृष्टतया बहिरङ्गमेतदात्मज्ञानस्येति चेत् अस्तु तथाप्युपादेयमेव श्रुतिसिद्धत्वात् ।

* * * *

स्वरूपमात्रमेवात्र लिख्यते न प्रपञ्च्यते ।
शास्त्रे करतलस्थेऽपि बालव्युत्पत्तिमिच्छता ॥

अभिधेयः पदार्थः । स द्विविधः—भावाभावभेदात् । विधिप्रत्ययविषयो भावः नञर्थानुल्लिखितविधिविषयो वा स षड्विधः—द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् ।

**End:**

तमस्त्वं स्पर्शवदवृत्तिवेगवद्वृत्तिजात्यन्यत् जातित्वात् सत्तावदित्यतिप्रसङ्गलक्षणप्रतिकूलतर्कपराहतं गगनं भूतामूर्तान्यत् वस्तुत्वादिति साधयितुं शक्यत्वादित्यलमतिप्रसङ्गेन । सुवर्णशब्दयोस्तु द्रव्यान्तरत्वं निराकृतं तस्मान्नवैव द्रव्याणि ॥

**Colophon:**

इति श्रीमद्रघुकुलक(ज)चरणकमलोपजीविनिखिलविद्वज्जनमनोहरश्रीमल्लक्ष्मणसूरिविरचिते काणादसङ्ग्रहे द्रव्यपदार्थस्समाप्तः ॥

(*b*) काणादसङ्ग्रहव्याख्यानम्- –न्यायरत्नाकरः.

KĀṆĀDASAṄGRAHAVYAKHYĀNAM : NYĀYARATNĀKARAḤ.

Foll. 14*a*—64*a*. Fol. 64*b* is left blank.

A commentary on the above ; by Tallayārya, disciple of Avimuktatīrtha and son of the maternal uncle of Lakṣmaṇasūri, the author of the text. See also R. No. 1468 *ante*

Breaks off in the Tamaḥprakaraṇa.

**Beginning :**

लाक्षारागातिरिक्तामलचरणसरस्सम्भवोद्भिन्नकान्त्या
कामं शोणीकृतेन्द्रप्रमुखसुरशिरस्स्वर्णकोटीर[कोटीर]कोटिम् ।
विद्यामाद्यामनाद्यामनवरतमिमामद्वयानन्दहेतुं
वन्दे वन्दारुवृन्दं नववरनिकरैस्सादरं वर्धयन्तीम् ॥
अज्ञाततर्कसमयोऽप्यविमुक्ततीर्थश्रीपूज्यपादकरुणाविषयत्वगर्वात् ।
मत्तातपादभगिनीसुतलक्ष्मणार्यकाणादसङ्ग्रहमहं विवृणोमि गाढम् ॥
आलोच्यौदयनान् ग्रन्थानन्यानपि समासतः ।
क्रियते तल्लयार्येण न्यायरत्नाकरोऽमलः ॥

अधिगतसकलार्थास्तत्त्वतो विद्वदार्यानपि कृतसुनिबन्धान्न प्रशंसन्ति लोके ।
त इह पुनरसन्तो मां प्रशंसन्तु मा वा विगतविविधरागद्वेषरोषाश्च सन्तिः ॥

चिकीर्षितस्य ग्रन्थस्य निरन्तरायपरिसमाप्तिप्र[गुरित]चयगमनपरिपन्थिदुरितनिर्हरणायाभिमतदेवतानमस्कारलक्षणं मङ्गलमादावाच[ा]रत्नाभिधेयं तत्प्रयोजनं च दर्शयति—प्रणम्ये(ति) । प्रारब्धस्य निरन्तरायपरिसमाप्तिपरिपन्थिदुरितनिर्हरणायाभिमतदेवतानमस्कारस्य कर्तव्यतायां शिष्टाचारः प्रमाणम् । आचारस्य तु परम्परया मूलभूतश्रुत्यनुमापकत्वेन प्रामाण्यमुपपद्यते । न(हि)शिष्टा(चा)रस्य तत्त्वेन श्रुत्यनुमापकत्वं ; शिष्टकृतकटिकण्डूयनादेरपि तथात्वप्रसङ्गात् किन्तु धर्म्यत्वे सति शिष्टाचारत्वेन, तथा च सति परस्पराश्रयः धर्म्यत्वेन वेदमूलतावगमः वेदमूलतावगमेन धर्म्यत्वमिति न वाच्यम् । विगानविरहादेव धर्म्यत्वनिश्चयोपपत्तेः वेदमूलतावगमस्याप्रयोजकत्वात् ।

* * * *

**Colophon :**

मनःप्रकरणं समाप्तम् ।
मनो निरूपितम् ॥

**End:**

किं च मन्दप्रदीपे वेश्मनि अन्धकारालोकयोश्चिरकालं सहैवावस्थानाद्वध्यघातुकभावोऽनुपपन्नः अमन्दालोकान्धकारयोर्वध्यघातुकभावदर्शनान्मन्दालोकान्धकारयोरपि तथात्वं निश्चीयते आलोकव्यक्त्यनुपचये न तु निश्शेषतोऽनवघातः क इति वक्तुमयुक्तम्.

---

(*c*) कारिकावली.

KĀRIKĀVALĪ.

Foll. 65*a*—70*a*. Foll. 70*b*, 82 and 145*b* are left blank.

By Viśvanāthapañcānana. Same work as that described under No. 3928 of the D.C.S. MSS., Vol. VIII.

Complete.

---

(*d*) कारिकावलीव्याख्या—मुक्तावली.

KĀRIKĀVALĪVYĀKHYĀ : MUKTĀVALĪ.

Foll. 71*a*—90*b*.

By Viśvanāthapañcānana. Same work as that described No. 3939 of the D.C.S. MSS., Vol. VIII.

Breaks off in the Pratyakṣakhaṇḍa

---

(*e*) तर्कभाषाव्याख्या—भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ : BHĀVĀRTHADĪPIKĀ.

Foll. 91*a*—145*a*.

By Gaurīkānta. Same work as that described under No. 4134 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and end.

---

R. No **1563.**

Palm-leaf. 17½ × 1¼ inches. Foll. 220. Lines, 6 in a page. Telugu. Fair.

Presented in 1915–16 by M.R Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

प्रक्रियाकौमुदीटीका.

PRAKRIYAKAUMUDĪṬĪKĀ.

Foll. 2*a*—219*b*. Foll. 1 and 220 are left blank.

A commentary on the Prakriyākaumudī of Rāmacandrācārya, which work is described under No. 1337 of the D.C.S. MSS., Vol. III: by

Kṛṣṇa, son of Śēṣanṛsiṁha. It is stated herein that the author wrote this commentary at the command of King Vīravara, by way of giving instruction to his son Kalyāṇa, whose genealogy is given thus:—

Rūpadhara
|
Gaṅgādāsa
|
Vīravara
|
Kalyāṇa.

Breaks off in the Avyayībhāvasamāsa

**Beginning:**

अलिकुलमण्डितगण्डं प्रत्यूहव्यूहतिमिरमार्ताण्डम् ।
सिन्दूरारुणशुण्डं देवं वेतण्डतुण्डमवलम्बे ॥
बृन्दारण्यमहीपुवंशनिनदा मन्दानिलास्वादनात्
निष्पन्दालिदुधुक्षयेव सुरभीबृन्दालिसन्धानयन् ।
मन्दारद्रुमवीथिकासु विहरन् वन्दारुबृन्दारक-
द्वन्द्वस्तुत्यभिनन्दितोऽस्तु जगदानन्दाय नन्दात्मजः ॥

* * * *

आस्ते तस्मिन्नमरनगरीगर्वसर्वस्वहारी
हारीभूतामलसुरसरित्पत्रपुञ्जाभिधानः ।
ग्रामः स्वस्त्रीजनविषमयीभूतरामाभिरामः
कामक्रीडाभवनम(व)नौ कश्चिदाश्चर्यरूपः ॥

* * * *

तत्र ब्राह्मणमण्डलेऽतिविपुले सत्कर्मभिर्निर्मले
वाल्मीकिप्रतिवेशवासवशतो विज्ञातसर्वागमे ।
आसीद्रूपधरः परं स्मरहरः स(श्रो)त्रियाणां वरः
शौर्यौदार्यविवेकधैर्यनिलयो भूपालभूषामणिः ॥

* * * *

तस्मादाविरभूत्प्रभूतविभवो गाङ्गेयमेयोर्जितो
गङ्गादास इति प्रसिद्धमहिमा गङ्गां समाराध्य यः ।
स्वामाख्यामकृतार्थयन् जगदलं चक्रेऽन्यचक्रेश्वरान्
अक्लेशादजयज्जयैकनिलयश्शक्रेऽप्यवज्ञावरः ॥

* * * *

नानाजन्मशतार्जितेन तपसा गङ्गाधराराधनैः
यः श्रीमाननभाभिधानसुभरे पातिव्रते ज्योतिषि ।
लेभे वीरवरं सुतं द्विजवरं प्रह्लादभीष्मार्जुन-
प्राया(न्) भागवतानयं तुलयितुं ब्रह्मर्षयो वाक्षमाः ॥
तद्वंशे भूवतंसे समजनि रजनीजानिलज्जानिदान-
स्फूर्जद्दानापदानप्रथितमृदुयशोधोरणीधौतविश्वः ।
सर्वोर्वीचक्रचक्रक्रमनमितशिरःकोटिकोटीरकोटि-
प्रोदश्चद्रत्नरोचिःपरिचरितलसत्पादपङ्केरुहश्रीः ॥
कामो वामदृशां निधिर्नयजुषां कालानलो विद्विषां
स्वश्शाखी विदुषां गुरुर्गुणवतां पार्थो धनुर्धारिणाम् ।
लीलावासगृहं कलाकुलरुचां कर्णस्सुवर्णार्थिनां
श्रीमान् वीरवरः क्षितीश्वरवरो वर्वर्ति सर्वोपरि ॥

* * * *

सोऽयं काव्यकलाविलासभवनं श्रीपारसीकेश्वर-
प्राणानामधिदैवतं गुणगणश्रेणीमणीरोहणम् ।
विद्यानां निकषोपलः कुलगृहं केलीकुरङ्गीदृशां
शश्वत्पण्डितमण्डलीपरिवृतो विद्याविनोदं व्यधात् ॥
तस्यास्ति सर्वजनलोचनलोभनीयसौन्दर्यसारसविलासनिवासभूमिः ।
विद्याविनोदपरिमोदितभूरिसूरिः कल्याण इत्यभिधया तनयो नयज्ञः ॥

* * * *

कल्याणस्य तनूद्भवस्य नृ(प)तिः कल्याणमूर्तेस्ततः
कल्याणीं मतिमाकलय्य विषमग्रन्थार्थसंवित्तये ।
कृष्णं शेषनृसिंहसूरितनयं श्रीप्रक्रियाकौमुदी-
टीकां कर्तुमसौ विशेषविदुषां प्रीत्यै समाजिज्ञपत् ॥
अस्फुटभावा प्रस्फुटदोषाभिहितापसिद्धान्ता ।
असमर्षकपट(द)बन्धा नैवापरदा विभावयत्यर्थम् ॥
तस्माद्वीरवरान्महीशमुकुटालङ्कारचूडामणेः
प्राप्याज्ञां सुचिरं विभाव्य च हृदि ज्योतिर्नृसिंहाभिधम् ।

सन्तोषाय विशिष्य भाष्यविदुषां बोधाय दुर्मेधसां
व्याख्याम्याकरसाक्षिकं सुविशदं तां प्रक्रियाकौमुदीम् ॥

* * * *

विघ्नविघाताय कृतं मङ्गलमादौ निबध्नन् शिष्यावधानाय चिकीर्षितं प्रतिजानीते—श्रीमदिति । वयं प्रक्रियाकौमुदीं कुर्म इत्यन्वयः । कुर्म इति सम्बन्धाद्वयमिति कर्ता लभ्यते । अस्मद्युत्तम इत्युक्तेः । वयमिति अस्मदो द्वयोश्चेति एकत्वेऽपि बहुवचनं वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यत्यपि लट्, न तु वर्तमाने । मङ्गलानुबन्धप्रतिज्ञोपनिबन्धकस्यास्य श्लोकस्य प्रक्रियापदवाच्यशब्दान्वाख्यानेऽनन्तर्भावात् प्रतिज्ञातस्य चाद्याप्यनारब्धत्वात् । इष्टदेवताप्रणामे प्राप्ते गुरुतमगुरुतरगुरुक्रमेण देवताप्रणामः कर्तव्य इति शिक्षयन् विष्णुं तावन्नमस्यति—श्रीमद्विट्ठलमानम्येति । पुण्डरीकाश्रमे प्रतिष्ठितं विष्णुं विट्ठल इति रूढेन नाम्ना तद्वाचिना व्यपदिशन्ति ।

End:

एवं द्वियमुनमित्यपि । नदीभिश्चेति प्रतिपदोक्तस्य नदीसमासस्य ग्रहणात् उपगङ्गे तिष्ठति इत्यत्र विकल्प एव । वंश्यान्तात् एकविंशतिभारद्वाजमिति । समृद्धाविति । ऋद्धेराधिक्यं समृद्धिः । मद्राणां समृद्धिरिति । एतेनैतदुक्तं भवति । यदाव्ययार्थः समृद्धिः प्रधानत्वान्मद्रैर्विशिष्यते तदैवाव्ययीभावः यदा तु समृद्ध्या मद्रा विशेष्यन्ते तदा कुगतिप्रादयः इति तत्पुरुषे समृद्धा मद्रास्सुमद्रा इति भवति । दुर्यवनमिति । यवनानां व्यृद्धिः वि.

---

R. No. **1564.**

Palm-leaf. 16 × 1½ inches. Foll. 103. Lines, 7 in a page. Telugu. Fair.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

**मीमांसासूत्रदीपिका.**

MĪMĀṂSĀSŪTRADĪPIKĀ.

A commentary on the Mīmāṃsāsūtras of Jaimini: by Yallubhaṭṭa, son of Darbha Vallubhaṭṭa, who was the disciple of Annambhaṭṭa.

Begins in the fourth Adhyāya and breaks off in the fourth Pāda of the sixth Adhyāya.

This manuscript is dated Friday, the 10th day of the dark fortnight of the Puṣya month, and it was probably written by Gōpā Vajjala Gōpāladu for the use of Kāmēśvara Sōmayāji.

**Beginning:**

प्रणम्य जानकीनाथं शारदां च गणेश्वरम् ।
जैमिन्यादीन् गुरून् कुर्वे जैमिनेस्सूत्रदीपिकाम् ॥

अथातश्शब्दौ तृतीयचतुर्थलक्षणयोर्हेतुतालक्षणसङ्गतिं कथयन् श्रोतृजनमनस्समाधानार्थं चतुर्थासाधारणविषयमनुजानाति—अथातः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा । अथशब्दोऽयं वृत्तानन्तर्यार्थको लोके दृष्टः । शेषलक्षणं चेह वृत्तम् । अतश्शब्दश्च वृत्तस्यापदेशको हेत्व . . . . . यथा क्षेमसुभिक्षितोऽयमतोऽस्मिन् देशे प्रतिवसामीति । एवं विचारितश्शेषशेषिभावः प्रयोजकत्वाप्रयोजकत्वजिज्ञासायां हेतुर्ज्ञातः ; न ह्यविचारितशेषशेषिभावेन प्रयोजकत्वाप्रयोजकत्वे विचारयितुं शक्येते । अतः एतस्मात् कारणात् । अनन्तरं प्रयोजकत्वाप्रयोजकत्वे जिज्ञासितव्ये इति ।

* * * *

**Colophon:**

इति श्रीमदन्नंभट्टमहोपाध्यायशिष्यस्य दर्भवल्लुभट्टस्य सूनोर्यल्लुभट्टस्य कृतौ सूत्रदीपिकायां चतुर्थस्य प्रथमः पादः ॥

**End:**

नैवारः स्यात्पुरोडाशः शेषकार्यानुरोधतः ।
प्रधानगुणसङ्कोचायुक्तेर्व्रीहिसमाश्रयः ॥

**Colophon:**

इति श्रीमत्सर्वतन्त्रस्वतन्त्रस्य दर्भयल्लुभट्टस्य कृतौ सूत्रदीपिकायां षष्ठस्य तृतीयः ॥

शेषाद्व्यवदाननाशे स्यात्तदर्थत्वात् । तृतीयपादे यथ । शिष्टानुष्ठानगतो विचारो वृत्तः

* * * *

पञ्चशरावस्तु द्रव्यश्रुतेः प्रतिनिधिस्स्यात् ।

## R. No. 1565.

Palm-leaf. $16\frac{1}{2} \times 1\frac{3}{8}$ inches. Foll. 78. Lines, 7 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

तत्त्वचिन्तामणिदीधितिव्याख्या—भवानन्दीया.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ: BHAVĀNANDĪYĀ.

Same work as that described under Nos. 4092, 4095 of the D.C.S. MSS., Vol VIII

Begins in the Pañcalakṣaṇī and breaks off in the Vyadhikaraṇadharmāvacchinnābhāvakhaṇḍana in the Anumānakhaṇḍa.

---

## R. No. 1566.

Palm-leaf. $17\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 27. Lines, 7 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

(*a*) तर्कसङ्ग्रहः.

TARKASAṄGRAHAḤ.

Foll. 1*a*—4*b*.

By Annambhaṭṭa. Same work as that described under No. 4143 of the D.C.S. MSS., Vol. VIII.

Complete.

---

(*b*) तर्कसङ्ग्रहव्याख्या—दीपिका.

TARKASAṄGRAHAVYĀKHYĀ: DĪPIKĀ.

Foll. 4*b*–27*b*.

By Annambhaṭṭa. Same work as that described under No. 4154 of the D.C.S. MSS., Vol. VIII.

Complete.

---

## R. No. 1567.

Palm-leaf. $15 \times 1\frac{1}{4}$ inches. Foll. 89. Lines, 6 in a page. Telugu. Injured.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

वेदान्तदीपिका.

VĒDĀNTADĪPIKĀ.

A treatise explaining the principles of the Advaita school of the Vēdānta. The author salutes Vāsudēvēndra, Viśvarupēndra and Bhagavatpāda.

Incomplete.

**Beginning :**

श्रीकृष्णं रुक्मिणीनाथं गोपिकानायकोत्सवम्।
अतसीपुष्पसङ्काशं कुण्डलालङ्कृताननम् ॥

* * * *

श्रीवासुदेवेन्द्रपदारविन्दसंसेवनालब्धपरात्मबोधम् ।
श्रीविश्वरूपेन्द्रगुरुं . . . . . प्रदान् सङ्कलयामि चित्ते ॥

* * * *

यस्य प्रसादलेशेन सूतोऽपि गुरुतां गतः ।
मुनीनां पुण्डरीकाक्षं वेदव्यासमहं भजे ॥
वाणी येन जिता मनोज्ञवचनैर्दुर्भेद्यसद्युक्तिभिः
प्राप्ता य . . . . जमुखाश्शिष्यत्वमेवादरात् ।
सूत्रं वेदविरुद्धवादमलिनं संशोधितं ज्ञानदं
तस्मै वन्द्यशिवावतारभगवत्पादाय तुभ्यं नमः ॥
. . . . नत्वा श्रितपानां च भक्तितः ।
गौरीं लक्ष्मीं तथा वाणीं कुर्वे वेदान्तदीपिकाम् ॥

ननु मङ्गलस्य समाप्तिसाधनत्वं नास्ति मङ्गले कृतेऽपि श्रुत्य . . . . विराचितपञ्चपादिकायां समाप्त्यदर्शनात् भगवत्पादैरकृतेऽपि मङ्गले सूत्रभाष्यस्य समाप्तिदर्शनात् अन्वयव्यतिरेकव्यभिचारात् इति चेदत्र ब्रूमः—विघ्नबाहुल्याद्विघ्नसमसङ्ख्याकमङ्गलानाचरणात्पञ्चपादिकायास्समाप्त्यभावः । भगवत्पादैर्ग्रन्थाद्बहिरेव मङ्गलं कृतम् ।

**End :**

तद्गोचरत्वं तु अन्तःकरणेन एकीभूताचिदात्मनः अन्तःकरणस्य सावयव . . . . . दहंवृत्त्याश्रयत्वयोग्यत्वं स्वतः अहंवृत्तिगोचरत्वयोग्यत्वमहङ्कारस्य नास्तीत्युपपादितमतोऽन्तःकरणविशिष्ट . . . . गोचर.

## R. No. 1568.

Palm-leaf. 14¼ × 1¼ inches. Foll. 28. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

जागदीशीसिद्धान्तलक्षणपत्रम्.

JĀGADĪŚĪSIDDHĀNTALAKṢAṆAPATRAM.

Similar to the work described under No. 4333 of the D.C.S. MSS., Vol. VIII.

Incomplete.

The twenty-eighth leaf contains certain portions omitted in the second leaf.

**Beginning:**

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदका-वच्छिन्नभिन्नत्वनिवेशे तत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिरतोऽनवच्छेदक-गर्भता तत्र चावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य रूपवान् पृथिवीत्वादित्यत्राव्याप्तिवारणायावश्यकतया कथं तत्तद्व्यक्तित्वावच्छिन्ना-भावस्य लक्षणघटकता ।

**End:**

ननु कम्बुग्रीवादिमत्त्वं कम्बुग्रीवादिव्यक्तिरेव सा च प्रत्येकं हेतुमन्निष्ठाभाव-प्रतियोगितावच्छेदकेति जागदीशी । अत्र तत्तावैशिष्ट्यं कम्बुग्रीवांदेमदंशे यद्युच्यते तदा तादृशप्रतियोगिता न तादृशसाध्यतावच्छेदकतादितरोभयानवच्छिन्ना । यदि च तत्तावैशिष्ट्यं कम्बुग्रीवायां तन्निष्ठावच्छेदक.

---

## R. No. 1569.

Palm-leaf. 16¾ × 1¼ inches. Foll. 68. Lines, 7 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

The first fol. is left blank.

जागदीशीव्याप्तिपत्रम्.

JĀGADĪŚĪVYĀPTIPATRAM.

Foll. 2*a*—28*a*. Fol. 28*b* is left blank.

By Kālīśaṅkara. This tract relating to the Vyāpti in Jagadīśa's commentary on the Tattvacintāmaṇi is similar to the work described under No. 4289 of the D.C.S. MSS., Vol. VIII.

Contains the Vyadhikaraṇadharmāvacchinnābhāvaprakaraṇa only. Wants the beginning and end.

This manuscript is said to have been transcribed by Bulusu Kṛṣṇa Śāstri, the transcription having been completed on Wednesday, the 30th day of the dark fortnight of the Mārgaśira month in the year Piṅgala.

**Beginning:**

अप्रसिद्धिदोषस्यैव सत्त्वान्मूले प्रतियोग्यवृत्तिश्चेति दोषान्तरं किमुपात्तमतस्त-दवतारार्थं शङ्कते—नन्विति । अव्यभिचरितत्वमिति । अथेदं वाच्यं ज्ञेयत्वा-दित्यादिग्रन्थाभिप्रेतमिति शेषः । तथा च न चैवं घ(ट) इत्यादिमूलस्य केवलान्व-यिनो व्यभिचारित्वे सालक्ष्यताप्रदर्शनपरत्वान्न पूर्वमूलासङ्गतिरिति ध्येयमिति जागदीशी ।

न चैवं तर्हि तादृशसामानाधिकरण्याभावो व्याप्तिरिति मूलासङ्गतिः ; अथेदं वाच्यं ज्ञेयत्वादित्यादिग्रन्थस्य पारिभाषिकाव्यभिचरितत्वाभिप्रायकत्वे तादृशवृत्ति-त्वसामान्याभावस्य व्याप्तित्वाभिधानस्यानुपयुक्तत्वात् इति वाच्यम् ; प्रथमं पारि-भाषिकाव्याभिचरितत्वाभिप्राय एव अथेत्यादिग्रन्थः ।

**End:**

एवं च तद्घटभिन्नं घटत्वादित्यादौ तद्घटभिन्नत्वाभावस्य भावभिन्नत्वाभावेन लक्षणाघटकत्वाद्घटत्वेन तद्घटभिन्नत्वाभावमादायातिव्याप्तिर्दौर्व्यमिति जगदीश-निर्गलिततात्पर्यम् ॥

---

R. No. **1570.**

Palm-leaf. 16⅝ × 1¼ inches. Foll. 110. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivāri Agrahāram, Gōdāvari district.

काव्यप्रकाशविवरणम्—काव्यकौमुदी.

KĀVYAPRAKĀŚĀVIVARAṆAM: KĀVYAKAUMUDĪ.

This is a commentary on the Kāvyaprakāśa of Mammaṭa, which work is described under R. No. 820(*a*) *ante*. By Dēvapañcānana.

Breaks off in the ninth Ullāsa.

**Beginning :**

मातस्त्वं शिववल्लभासि जगतामानन्दमूलं शिवे
दीनोऽहं नगनाथनन्दिनि वचस्तन्मामकीनं शृणु ।
मय्येकान्तपराङ्मुखे कुरु तथा कारुण्यमापाततो
येन त्वच्चरणाम्बुजे मम मनस्स्थेमानमालम्बते ॥
य एष कुरुते मया विपदि गौरवीणां गिरां
सवासन इवाम्बरे हरिणलाञ्छनं वाञ्छति ।
विलङ्घयति सिंहिका . . . . . ॥

ननु ग्रन्थारम्भे प्रयोजनाभिधेयसम्बन्धो वक्तुमुचितो न तु देवतास्तुत्यादीत्यतोऽविगीताशिष्टाचारानुमितकर्तव्यताकमङ्गलाचरणपरां कारिकामवतारयन्नाह ग्रन्थारम्भइति वचनरचनाविशेषो महावाक्यमिति केचित् । महत्त्वं च विशेषार्थबोधने परानाकाङ्क्षत्वम् । आरम्भे आरम्भप्राक्काले । आरम्भनिमित्तं वा । तत्रापि सप्तम्यनुशासनात् चर्मणि द्वीपिनमितिवत् ।

* * * *

**Colophon :**

इति श्रीमहोपाध्यायदेवविरचितकाव्यकौमुद्यां प्रथम उल्लासः ।

**End :**

विच्छेदे अभिनयसौकुमार्यादिति भावः । मुक्तकादिष्व(पि)दिशति——एवमिति । ऐक्यादस्मिन् पद्ये वाच्यपर्याप्तिर्मुक्तकं द्वयोस्सन्धानितकम्, त्रिषु विशेषकम्, चतुर्षु कलापकम् । ततः परं चतुर्दशपर्यन्तं कुलकं तेषु रसा(नु)गुण्यमावहन्तीति भावः ॥

**Colophon :**

इति महामहोपाध्यायतर्कपञ्चाननश्रीदेवनाथकृते काव्यप्रकाशविवरणे काव्यकौमुद्यामष्टम उल्लासः ॥

शब्दालङ्कारानिति सामान्यलक्षणं गुणविवेचनावसरपदोक्तं शब्दार्थालङ्कारादिविशेषणं चार्थलभ्यमिति तदवान्तरलक्षणं वक्तव्यम् ।

* * * *

करिश्रेष्ठः रुधिररक्तं रुधिरेण रक्तं तेजोधाम तेजोगृहं सहसा पृथुमनसामिन्द्र ईश्वरः इदि परमैश्वर्ये धातुः तदनुसारात्। हरिः पुरन्दरः जिष्णुः जयी शति(शास्ति) इत्यर्थकानि पदानि । अत्रैकतनुकं.

R. No. **1571.**

Palm-leaf. $16\frac{3}{8} \times 1\frac{1}{2}$ inches. Foll. 32. Lines, 8 in a page. Telugu. Much injured.

Presented in 1915–16 by M.R.Ry. Bulusu Subrahmaṇyamgāru of Koṭṭivari Agrahāram, Gōdāvari district.

तर्कभाषाव्याख्या —तत्त्वप्रबोधिनी.

TARKABHĀṢĀVYĀKHYĀ: TATTVAPRABŌDHINĪ.

A commentary on the Tarkabhāṣā: by Gaṇēśadīkṣita, son of Gōvindadīkṣita.

Same work as that described under No. 4119 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and end.

---

R. No. **1572.**

Palm-leaf. 17 × 1 inches. Foll. 90. Lines, 5 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Kandāḍai Ṭirumalācāriyar of Vāḍapalli, Razole taluk

भागवतव्याख्या —भागवतार्थतत्त्वदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀGAVATĀRTHATATTVA-DĪPIKĀ

A commentary on the Bhāgavata: by Bhāṣyakarasūri, a disciple of Vēṅkaṭācārya of Kauṇḍinyagōtra.

Contains the eighth Skandha only.

Complete.

**Beginning:**

एवं तावत् स्वायंभुवमन्वन्तरे भगवतानन्तकल्याणगुणेवर्णनात् संभूतहर्षा महाभागवतः परीक्षित् सकलमन्वन्तरास्थितिं पृच्छति स्वायंभुवस्य चेत्यादित्रिभिः। यत्र वंशे विश्वसृजां सर्गः मरीच्यादीनां मनुकन्यासु पुत्रपौत्रादिसर्गश्चोच्यत इत्यर्थः। ततः किमत आह। मनूनिति। नोऽस्माकं वदस्व ब्रूहि। एतदेव प्रपञ्चयति यत्रेति। यत्रयत्र यस्मिन् यस्मिन् मन्वन्तरे। महीयसः अतिशयेन महान्तः। महतो महीयानिति श्रुतेः। हरेः जन्मकर्माणि च गायन्ति तानि मन्वन्तराणि नोऽस्माकं वद। यस्मिन्नेति। हे ब्रह्मन् हे श्रीशुक ॥

**Colophon:**

इत्यष्टमस्कन्धव्याख्याने भागवतार्थतत्त्वदीपिकासमाख्याने प्रथमोऽध्यायः ॥

**End:**

सत्यव्रतस्येति। मायया सङ्कल्पेन मत्स्यस्य आश्चर्यमत्स्यस्येति वा। संवादं संवादरूपम्। अवतारमिति। योऽयं हरेरवतारस्तमवतारं यो नरः कीर्तयति। तस्य नरस्य। प्रलयपयसीति। धातुः ब्रह्मणो मुखेभ्यः। अपनीतं अपहृतम्। हयग्रीवेणेति शेषः। सत्यव्रतानां सत्यव्रतस्य ऋषीणां च। छत्रिणो गच्छन्तीति-वल्लिङ्गसमवायात् बहुवचनम्। ब्रह्म ज्ञानम्। जिह्ममीनं कपटमत्स्यम्। तं हरिम्॥

**Colophon:**

इति श्रीकौण्डिन्यकुलोदधिपूर्णचन्द्रवेङ्कटाचार्यप्रसादप्राप्तपाण्डित्येन भगवद्भाष्यकारसूरिणा विरचितायां भागवतार्थतत्त्वदीपिकासमाख्यायामष्टमस्कन्धव्याख्यायां चतुर्विंशोऽध्यायः॥ पूर्णा चेयमष्टमस्कन्धव्याख्या॥

---

## R. No. 1573.

Palm-leaf. 13⅞ × 1¼ inches. Foll. 156. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Kandāḍai Tirumalācāriyar of Vāḍapalli, Razole taluk.

### रामायणतत्त्वदर्पणम् सव्याख्यानम्.

### RĀMĀYAṆATATTVADARPAṆAM WITH COMMENTARY.

This work is intended to bring out the inner truths and significance of the Vālmiki Rāmāyaṇa.

The author is probably one Nārāyaṇayati who also adds a commentary of his own.

This manuscript contains 1 to 15 Prakāśas the names of which are given below. Foll. 77, 154 to 159 and 164 are wanting.

१. गायत्रीस्वरूपत्वादिकथनम्.
२. वेदस्वरूपत्वादिकथनम्.
३. विभीषणशरणागत्यादिनिरूपणम्.
४. रामस्य परब्रह्मत्वादिकथनम्.
५. रामस्य नारायणस्वरूपत्वादिकथनम्.
६. रामस्य सर्वमुक्तिप्रदातृत्वादिकथनम्
७. रामस्य मनुष्यत्वनिराकरणम्.
८. नियोज्यत्वादिनिरासनिरूपणम्.
९. परमपवित्रत्वकथनम्.
१०. अनन्तकल्याणगुणस्वरूपवर्णनम्.
११. उपासनाकथनम्.
१२. सर्वविधभक्तिस्वरूपादिकथनम्.
१३. अवतारनिरूपणम्.
१४. अनेकश्रीसमेतत्वकथनम्.
१५. श्रीरामतत्त्वज्ञातृस्वरूपनिरूपणम्.

**Beginning:**

श्रीरामामरभूरुहस्सकलदः सीतालतालिङ्गितो
व्याप्ताण्डो गुणमूर्तिनिर्जरगणस्कन्धोपशाखः स्वभूः।
नानालोककुलायगात्मपतगः . . . . . वल्कः कथा-
गन्धः सद्गुणपुष्पवान् विजयते मुक्ताध्वनीनाश्रितः ॥
ज्ञातं परेशं मुनिभिर्जनार्थदं शुचिं गुणाधारमजं सशक्तिकम् ।
प्रणम्य रामं सदुपास्यविग्रहं करोमि रामायणतत्त्वदर्पणम् ॥
यथा गृही(तरत्न)वानपीह रत्नशेवधिर्महोदधिर्गृहीतसत्पदार्थमप्यलं बुधैः।
न भूतसारमेव राम ते चरित्रमागमस्वरूपतोऽखिलेप्सितार्थदं ममापि
[तद्भवेत् ॥
विद्वद्वाग्भ्योऽपि मन्मुग्धवाग्ग्रामस्य सतां मुदे ।
कपिक्षिप्ताद्रिताराब्धौ गोधाक्षिप्तरजो यथा ॥

इह खलु सुखदुःखलाभलोपयोरन्यतरस्य पुरुषार्थत्वेनानादिसञ्चितानन्तनानाविधकर्मपरम्परापरिचीयमानानिस्सारसंसारकान्तारपर्यटनपरिश्रान्तानामत्यन्तदुरन्तचिन्तानलज्वालामालानितान्ततान्तान्तःकरणानां तदुभयस्याप्यनुपलम्भात् सुखेन तत्संभवाय भगवान् परमकारुणिकः परमेष्ठी प्राचेतसरूपेणावतीर्य ब्रह्मलोके श्रुतशतकोटिप्रविस्तरश्रीरामायणरहस्यवित् भगवदवताररूपनारदोपदेशानुसारेण मनुष्योपयोगितया सर्ववेदावताररूपगायत्र्यर्थैकगोचरं तदक्षरसंमितचतुर्विंशत्स-(तिस)हस्रात्मकं श्रीरामायणाख्यं काव्यमचीकरत्। तच्च प्राचीनाचार्यैर्बहुधा व्याख्यातम्। तथापि स्वमनीषोपरितोषाय यथामति परब्रह्मपरतयोपपादितुमुपक्रम्यते—ज्ञातमित्यादिना।

* * * *

रामशब्देन सत्यज्ञानानन्दप्रत्यगभिन्नब्रह्मस्वरूपत्वादिकमस्योपवर्ण्यते। सदुपास्यविग्रह . . . . पासनार्थं श्रीमूर्तिलक्षणादिकं वक्ष्यते। रामायणशब्देन श्रीरामायणतत्त्वं निर्धार्यते। रामायणतत्त्वदर्पणशब्देन ग्रन्थनामोच्यत इति संक्षेपः।

* * * *

सर्वसाक्षी सर्वहेतुस्सद्गुणस्स्वप्रकाशकः।
ध्येयो नियन्ता शरणं राम इत्युच्यते ध्रुवम् ॥
एवं गायत्रीस्वरूपत्वेन श्रीरामायणं परतत्त्वपरामिति निश्चितम् ॥

**Colophon :**

इति श्रीमद्रामायणतत्त्वदर्पणे श्रीरामायणस्य गायत्रीस्वरूपत्वादिकथनं नाम प्रथमः प्रकाशः ॥

**End :**

अतस्ते सुखदुःखादिभाजो बद्धा भवन्ति । न च रावणादीनामपि तपोऽस्तीति वाच्यम्; तस्य कामनारूपत्वेनासाधकत्वात् । तस्मादेतादृशभेदसद्भावे नास्त्येव तेषामेतेषां च महान् विशेष इत्य[म]लमतिप्रसङ्गेन ॥

**Colophon :**

इति श्रीमद्रामायणतत्त्वदर्पणे श्रीरामतत्त्वज्ञातृस्वरूपानिरूपणं नाम पञ्चदशप्रकाशः ॥

अथ साधनानि कथ्यन्ते—धर्माधर्मभेदेन तानि द्विप्रकाराणि । तत्र धर्म उपादेयत्वेन साधनम् । अधर्मस्तु हेयत्वेन साधनम् । तस्य त्रीणि करणानि—

कायेन कुरुते पापं मनसा सम्प्रधार्य च ।
अनृतं जिह्वया वक्ति त्रिविधं कर्म पातकम् ॥

इत्युक्तत्वात् ।

* * * *

बाणावपातांस्त्वमिहाद्य धीमन्मया सहाव्यग्रमनास्सहस्वेति श्रीरामेणोक्तम् ।

मा भैष्ट नास्त्यत्र विषादकालो यदार्यपुत्रौ ह्यवशौ निषण्णौ ।
स्वयम्भुवो वाक्यम्.

---

R. No. **1574.**

Palm-leaf. $17\frac{1}{8} \times 1\frac{5}{8}$ inches. Foll. 26. Lines, 9 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Kandāḍai Tirumalācāriyar of Vāḍapalli, Razole taluk.

**वासवदत्ताविवरणम्.**

VĀSAVADATTĀVIVARAṆAM.

Same work as that described under R. No. 821(*b*) *ante*.

Complete.

The date of transcription and the name of the scribe are given thus:

वासवदत्ताकाव्यव्याख्यां परवस्तुपट्टराभिरानन्ववायोत्थः ।
तिरुमलदेशिकधीमानलिखद्वर्षेऽक्षये(कटके) * ॥

---

R. No. **1575.**

Palm-leaf. 17⅞ × 1½ inches. Foll. 36. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by M.R.Ry. Kandāḍai Tirumalācāriyar of Vāḍapalli, Razole taluk.

The scribe adds—

वात्स्यश्रीपरवस्तुपट्टरभिरान्वंशाब्धिराकासुधा-
धामश्रीशठकोपदेशिकमणेर्यैं ज्यैष्ठिनेयं विदुः ।
स्वस्रेयं च सुधीमणेस्तिरुमलाचार्यस्य सोऽयं व्यधात्
रङ्गार्यस्समुपक्रमं विलिखितुं श्रीमाडभूष्यन्वयः ॥
कार्तिकासितसप्तम्यां चित्रभानुशरद्यलम् ।
मालतीमाधवव्याख्यां स्वपरार्थमुपाक्रमत ॥

**मालतीमाधवटीका.**

MĀLATĪMĀDHAVAṬĪKA.

A commentary on the Mālatīmādhava, a well-known drama of Bhavabhūti, which work is described under R. No. 821(*d*) *ante*. It is called Vibudharatnāvalī and is written by Nānyadēva, disciple of Tripurāri and son of Haricandra of Śilāhabhaṭṭaya family, to please Śabarasvāmin. The drama with the commentaries of Tripurāri for the first seven Acts and with that of Nānyadēva for the remaining three Acts, viz., eight to ten, has been printed in Bombay.

This manuscript contains the commentary on the first Act complete, and the second incomplete.

**Beginning:**

प्रणिपत्य जगत्सृतिस्थितिलयहेतुं पुरातनं पुरुषम् ।
भवभूतिरूपकार्णवतरी(रि)मकरोद्व्याकृतिं नान्यः ॥
अतिगभीरगिरस्सुकवेः कृता विवृतिकृत्सुकृती मतितोऽधिकः ।
निधिकृतो मतिरुद्धरतोऽधिका तदुपयोगमुचः फलभोगिनः ॥

---

* (कटकेऽक्षये पक्षे) इति पाठान्तरम्.

प्राच्यव्याकृतिसारस्य विचारे कोऽहमल्पकः ।
किन्तु व्याख्यान्तरे हेतुरूह्यः स ह्यपरोन्नतेः ॥
अविचार्येयमारब्धा विचारकृतिदुर्जने ।
व्याख्यां(ख्या)विख्यातु लोकेऽत्र मालतीमाधवे मया ॥

तत् किं बहुना ।

व्याख्येयं सुमनोभिरत्र भणितौ श्रीकण्ठनाम्नः कवेः
दृष्टा किं कथनीयमस्ति भवतः प्रज्ञाप्रकर्षोऽद्भुतः ।
किन्त्वस्ति प्रथितैव सभ्यविदुषष्टीकात्र सैवेक्षिता
सस्मेरं करतालिकामिति विधो दास्यन्ति कर्णेजपाः ॥

तथापि च—

शबरस्वामिप्रीत्या प्रकरणरत्नाकरेऽत्र भवभूतेः ।
सारोद्धारे मन्दरमकृत कृती व्याकृतिं नान्यः ॥

अत्र नाटकादौ मुखसन्धिभूताशीरादिरूपा चतुरश्रतालानुसारिपूर्वरङ्गद्वयाभिप्रायेण यथाक्रममष्टद्वादशादिपदा नान्दी कर्तव्या ।

सूत्रधारः पठेत्तत्र मध्यमं स्वरमाश्रितः ।
नान्दीं पदैर्द्वादशभिरष्टभिर्वाप्यलंकृताम् ॥

इति पञ्चमाध्याये वक्ष्यमाणत्वात् ।

* * * *

अथ वा ज्वलति तन्मयत्वं च दत्त इति तस्यामप्यनिष्टाशङ्काभासहेतुरिति । एवं सत्यसाध्यज्वरलक्षणमुक्तम् । यदाह—औत्सुक्यमोहरतिकृदृष्टरिष्टोऽक्षनाशः अनुपक्रम एव । आस्यं स्थितोऽत्यन्तविपर्यय इत्यादि.

प्राच्यप्या(व्या)कारसारस्य विचारेणाहमल्पकः ।
किन्तु व्याख्यान्तरे हेतुरूह्यस्स ह्यपरोन्नतेः ॥
शबरस्वामिप्रीत्या प्रकरणरत्नाकरेऽत्र भवभूतेः ।
सारोद्धारे मन्दरमकृत कृतिव्याकृतिं नान्यः ॥

**Colophon:**

इति शिलाहभट्टयश्रीहरिसूनुत्रिपुरारिपदाम्बुजचञ्चरीकनान्यदेवविरचिता प्रथमाङ्कटीका समाप्ता ॥

भारतीभारतीभारस्मरसूत्राध्वगोऽधुना ।
प्रथमाङ्काङ्कविश्रान्तः पुनरुत्थाप्यते मया ॥

किन्तु—

संस्कृतं प्राकृतेर्वाचः प्रकृत्यैव विभञ्जनम् ।
सर्वव्याख्यातुल्यं तत् कर्तुर्मे न (हि) चोरता ॥

अथ प्राप्तकेसरकुसुमस्रक् लवङ्गिका कदाचिदायातीति तद्वर्त्मनिहितदृष्टि-र्मालती स्थिता। मकरन्दश्च(भ)गवति नः शरणमिति कृत्वा माद्य अवस्थादिकं निवेदितवान्। अस्मिन्नवसरे नास्माच्चित्तस्य प्रवेशोऽस्तीति प्रधानपात्रप्रवेशाय प्रवेशाङ्काख्योऽङ्कस्यावयवविशेष आरभ्यते ।

**End:**

उभे मालतीलवाङ्गिके । वन्दामीति भिक्षुक्युचिता नमस्क्रिया। जन्मवत्ते—त्वामिति(त्यति)शायने मतुप्प्रत्ययः प्रकृष्टजन्मवत्ताया अनुमाप(क)फलस्येत्यर्थः ।

लवं—सुविहितमासनम्। सुविहितम् उचितम् । अत्रोपविशतु भगवति ।

मालती—कुशलं भगवत्यै.

कामं निश्वस्येति निश्वसितेनाधिमादे(वे)द्य कुशलमिव यथा कथंचिज्ज्प्यते । तावती वस्तुवृत्त्या तन(व)कुशलम् । असंपूर्णम्.

---

R. No. **1576.**

Palm-leaf. 17¼ × 1½ inches. Foll. 95. Lines, 10 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Kaṇḍādai Tirumalācāriyar of Vāḍapalli, Razole taluk.

(*a*) **प्रतापरुद्रीयम्.**

PRATĀPARUDRĪYAM.

Foll. 1*a*—76*a*. Fol. 76*b* contains a few lines taken from miscellaneous works.

Same work as that described under R. No. 241 *ante*.

This manuscript work is said to have been studied by Tirukkaḍalmallai Gōmaṭham Śrīnivāsācārya in the month of Kārtikai of the year Citrabhānu.

The scribe adds—

वात्स्यश्रीपरवस्तुपट्टरभिरान्वंशाब्धिराकासुधा-
धामश्रीशठकोपदेशिकतनूजातः कविग्रामणीः ।
श्रीमान् तिरुमलदेशिको वृषशरद्वैशाखमासेऽलिखत्
प्राज्ञार्थं तु प्रतापरुद्रचरितालङ्कारशास्त्रं इ(द्व)तम् ॥

(*b*) विलासभूषणभाणः.

VILĀSABHŪṢAṆABHĀṆAḤ.

Foll. 77*a*—93*b*. Fol. 94*a* contains some Telugu passages. Foll. 94*b*—96 are left blank.

A kind of dramatic composition descriptive of the sentiment of love. This work describes the marriage of Sītā and Rāma, a form of Viṣṇu, worshipped in the sacred shrine at Bhadrāchalam in the Gōdāvari district : by Vēṅkaṭakṛṣṇa of Bhāradvājagōtra.

The name of the scribe and the date of transcription are thus given :

वात्स्यश्रीपरवस्तुपट्टरभिरान्वंशाब्धिराकासुधा-
धामश्रीशठकोपदेशिकतनूजातः कविग्रामणीः ।
आरम्भं लिखितुं यथा तिरुमलाचार्यः परार्थं परं
ध्यात्वा ब्रह्म विलासभूषणमिदं भाणं सपल्लालयम् ॥
स्वभानुसंवर्तभाद्रपदाविशदपक्षता ।
मध्यन्दिने विलिखितुं वाडप्पल्यामुपाक्रमत् ॥

**Beginning :**

श्रीवेङ्कटाचलपते शिवताते जगत्पते ।
श्रियःपते दीनगते लसद्भूते नमोऽस्तु ते ॥
यस्योत्सङ्गनिवासशीलमहिषीविश्लेषबुद्ध्या ध्रुवं
गाढालिङ्गनतत्परः चिरतरं कारुण्यवारां निधिः ।
भद्रे भद्रमहीध्रचारुशिखरे भद्रासनेऽधिष्ठित-
स्सस्यादुत्तममत्तवारणनिभः चित्ते मदीये सदा ॥
यस्याज्ञया हरिगिरीशचतुर्मुखाद्याः वक्षोऽर्धगात्रवदनादिधृतस्वदाराः ।
सोऽयं समस्तजनहृत्सु लसत्स्वमूर्तिः पुष्पायुधो जयतु सुन्दर-
[चक्रवर्ती ॥

नान्द्यन्ते सूत्रधारः । सर्वतोऽवलोक्य सपरितोषम् । अहो फलितमस्मद्भागधेयेन ।

* * * *

भद्रमहीध्रशिखरावतंसस्य भगवतो रामभद्रस्य परिणयमहोत्सवसेवाप्रसङ्गेन ।
कर्णाटकाम्भोजकलिङ्गवङ्गकाश्मीरमुख्याखिलदेशवासाः ॥
सङ्गीतसाहित्यकलावतंसास्समागतास्संप्रति विद्वदग्र्याः ॥

कर्णं दत्वा, किं ब्रूथ—

यदि सुजनमनोऽब्जोन्मेषणं भूषणं ते विविधरसवदुक्तिग्रन्थसन्दर्भमान्यम् ।
कलितगुणमनोज्ञं गद्यपद्याभिरामं किमपि रुचिरबन्धं रूपकं रूपणीयम् ॥

इति ॥

श्रुत्वा सहर्षोल्लासम्, स्मृतिमभिनीय,

अस्ति खलु समस्तविबुधकर्णपारणानुकूलवाग्विलासमाधुरीकधुरीणो वेङ्कट-कृष्णनामा कविः ।

यत्तातोऽखिलविद्वदुक्तिशरणं यत्ततातो महान्
नित्यं श्रीनिगमान्तशीलनलसच्चित्ताधिको भूतले ।
यस्यान्तःकरणं रघूत्तमकथां वि . . . . त्यादरा-
द्यत्सूक्तिः कवितारमाकरमिलत्कञ्जातकोशायते ॥
सोऽयं भरद्वाजकुलाब्धिसोमः श्रीरामसंसेवनपूर्णकामः ।
चकार सुव्यक्तपदाभिधेयं विलासभूषाख्यमिलार्यतोषम् ॥

**End:**

कर्णं दत्वा सर्वे सामाजिकाः किं ब्रूथ । सन्तुष्टा वयं साधयाम इति । सपरितोषं तर्हि भर्तव्येयं भरताशीः ।

ललितगुणसमेता रामचन्द्राभ्युपेता सरसगिरिशगीता सत्यसङ्कल्पपूता ।
जनकनृपतिजाता जन्मदोषाद्यपेता जयमुरु दिशतां नस्सर्वलोकैकमाता ॥

अपिच ।

निखिलभुवनशेषी नित्यभूजातपोषी निरसितघनरोषी निर्जितानन्ददोषी ।
मृदुलमधुरभाषी मूर्तिमत्कामवेषी मुदमतिदिशतां नो मुग्धभद्राद्रितोषी ॥

इति निष्क्रान्तास्सर्वे ।

रघूत्तमकुलाम्भोधिराकापूर्णनिशाकरः ।
ग्रन्थस्यास्य घनोद्योगी वक्ता वाचयिता हरिः ॥

**Colophon:**

समाप्तमभूद्विलासभूषणाभिधेयं भाणम् ॥

The scribe adds—

आस्वभानुशरद्भाद्रपदशुद्धदशम्युषः ।
अलीलिखत्तिरुमलाचार्यस्स्वार्थपरार्थधीः ॥

## R. No. 1577.

Palm-leaf. $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 164. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Kandāḍai Tirumalācāriyar of Vāḍapalli, Razole taluk.

On fol. 1*b*, the name of the scribe and the date of transcription are thus given :

शोभकृदब्दश्रावणबहुळदशम्यर्किवासरे व्युष्टम् ।
विलिखितुमारेभे यत् तिरुमलगुरुरार्यसत्कृपापात्रम् ॥

वि(स)जयतु परवस्तुपट्टरभिरान् शठरिपुगुरुरार्यसंमानितः ।
तिरुमलगुरुतातपादस्सुधीः स्थितजनसकलेष्टकल्पद्रुमः ॥

(*a*) विष्णुपुराणव्याख्यानम्—पुराणरत्नरञ्जनम्.

VIṢṆUPURĀṆAVYĀKHYĀNAM : PURĀṆARATNARAÑJANAM.

Foll. 1*a*—12*a*. Fol. 12*b* is left blank.

Similar to the work described under No. 2282 of the D.C.S. MSS., Vol. IV, Part 1. A commentary on the Viṣṇupurāṇa : by Bhāṣyakāra, son of Vēṅkaṭārya of Kauṇḍinyagōtra and the pupil of his maternal uncle Vēṅkaṭadēśika, son of Sampatkumāra of Vānācala family.

**Beginning :**

शुभगुणनिलयं वन्दे कमलानिलयं विनष्टहेयमयम् ।
श्रुतिशिखरवेद्यमाद्यं जगतां वन्द्यं हरिं परं शुभदम् ॥

यत्स . . . जगतो जन्मादि कृतवान् स्वयम् ।
आदिमध्यान्तरहितं भगवन्तं नमामि तम् ॥

अधीतवानहं यस्मात्पुराणं वैष्णवं परम् ।
गुरुं मत्पितरं वन्द्यं वेङ्कटार्यं नमामि तम् ॥

वन्देऽस्मन्मातुलं साक्षाद्गुरुं विद्याप्रदं बुधम् ।
श्रीमत्सम्पत्कुमारस्य पुत्रं वेङ्कटदेशिकम् ॥

श्रीमद्वानाचलकुले जातं वेङ्कटदेशिकम् ।
वात्सल्यादिगुणावासं वन्दे विद्याप्रदं गुरुम्

अज्ञांस्तारयितुं लोके कारुण्याद्यो महामुनिः ।
पुराणं वैष्णवं चक्रे तं नतोऽस्मि पराशरम् ॥
सर्वे विघ्नाः प्रणश्यन्ति यस्य स्मरणमात्रतः ।
यच्छासनवशं विश्वं विष्वक्सेनं नमामि तम् ॥
आचार्यानुग्रहं लब्ध्वा व्याख्याकरणसाधनम् ।
श्रीमद्विष्णुपुराणस्य व्याख्यानं करवाण्यहम् ॥

वेदोपबृंहणानि पुराणान्यष्टादश । तेषु पुराणेषु षट पुराणानि सात्त्विकानि, षट् तामसानि, षट् राजसानि । तथा पद्मपुराणे—

वैष्णवं नारदीयं तु तथा भागवतं शुभम् ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥
सात्त्विकानि पुराणानि विज्ञेयानि निबोध मे ।
ब्रह्माण्डं ब्रह्मकैवर्तं मार्कण्डेयं तथैव च ॥
भविष्यद्वामनं ब्राह्मं राजसानि निबोध मे ।
मात्स्यं कौर्मं तथा लैङ्गं शैवं स्कान्दं तथैव चं ॥
आग्नेयं च षडेतानि तामसानि निबोध मे ।

इति । तत्र सात्त्विकपुराणेष्वपि वैष्णवं सात्त्विकतमं पुराणरत्नमिति च कीर्त्यते । तस्मिन् पुराणरत्ने जीवप्रकृतिपरमात्मतत्स्वभावभोगमोक्षतदुपायगतीस्तत्त्वेन श्रीपराशरस्तत्र तत्र षडंशेषु प्रायशो दर्शयामास ।

तत्त्वेन यश्चिदचिदीश्वरतत्स्वभावभोगापवर्गतदुपायगतीरुदारः ।
सन्दर्शयन्निरमिमीत पुराणरत्नं तस्मै नमो मुनिवराय पराशराय ॥

इति श्रीमद्यामुनाचार्योक्तेः ।

पुराणरत्नं तदिदं यथामति यथाश्रुतम् ।
व्याख्यास्यामोऽधुनाचार्यकटाक्षेण विशेषतः ॥

अथ भगवान् पराशरः श्रीमैत्रेयाय सकलहितार्थं श्रीविष्णुपुराणं प्रणेष्यन् प्रणिपातादिभिरुपसन्नाय सच्छिष्याय सदाचारवता तत्पृष्टेन गुरुणा स्वधर्मानुष्ठानाविरुद्धे मनःप्रसादकरे समये पुराणं व्याख्येयमिति शास्त्रार्थदर्शनात् पुराणप्रस्तावकं मैत्रेयप्रश्नं निबध्नाति, पराशरमिति श्लोकेन । परासुः वसिष्ठः, गर्भस्थेन येन स्थापितस्स पराशरः ।

तदुक्तमादिपर्वणि—

परासुस्थापितस्तेन वसिष्ठः परितस्तथा ।
गर्भस्थेन ततो लोके पराशर इति स्मृतः ॥

* * * *

यद्वा श्रुतिस्मृत्यादिभिर्नियमनं संयमः । तत्रैव च स्थितं स्थितिसंयमयोः कर्तेति च कारणस्वरूपं प्रश्नोत्तरमेव । इति स्यादिति । सर्वपुराणानामादिभूते ब्रह्माण्डाख्ये महापुराणे उद्धृतायां पाराशर्यसंहितायामिति प्रथमोऽध्याय इत्यन्वयः ॥

**Colophon:**

इति कौण्डिन्यकुलतिलकवेङ्कटाचार्यसूनुभगवद्भाष्यकारविरचिते श्रीविष्णुपुराणव्याख्याने पुराणरत्नाञ्जनसमाख्याने प्रथमांशव्याख्याने प्रथमोऽध्यायः ॥

तदेवं सङ्क्षेपत उक्तानां प्रश्नप्रतिवचनानामनुक्तानां प्रतिवचनानां च विवरणतया अवतार्यमाणस्य पुराणस्यारम्भमविकारायेत्यादिभिर्नवभिः श्लोकैः पुराणप्रतिपाद्यस्वाभिमतदेवतानमस्कारपूर्वकं प्रतिजानीते । तत्र कारणत्वाभिधानतः प्रसक्तं विकारित्वं निरस्यति—अविकारायेति ।

**End:**

अण्डभोक्ता चतुर्मुख एव तत् कथं विष्णोः स्थानमित्युच्यते तत्राह । तत्र स्वरूपशब्दो रूपवचनः अव्यक्तं प्रधानं तद्रूपः व्यक्तं महदादि तद्रूपोऽसौ विष्णुः स्वयमेव प्रधानः अधिकृतपुरुषापदेशेन तत्राण्डे व्यवस्थितः.

---

(*b*) ब्रह्मसूत्रभाष्यव्याख्या—श्रुतप्रकाशिका.

BRAHMASŪTRABHĀṢYAVYĀKHYĀ : ŚRUTAPRAKĀŚIKĀ.

Foll. 13*a*—164*b*. Foll. 160*b* and 165 are left blank.

By Sudarśanasūri. Same work as that described under No. 4963 of the D.C.S. MSS., Vol. X.

Begins in the second Sūtra and breaks off in the seventeenth Sūtra of the first Pāda of the first Adhyāya.

R. No. **1578.**

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 139. Lines, 7 in a page. Telugu Injured.

Presented in 1915-16 by M.R.Ry. Kandāḍai Tirumalācāriyar of Vāḍapalli, Razole taluk.

**बालभारतम्.**

BÂLABHÂRATAM.

Foll. 1—138*a*. Fol. 138*b* contains some witty stanzas. Fol. 139 is left blank.

A poem in twenty Sargas narrating the story of the Mahābhārata and intended to be read by beginners: said to be by Agastya.

In the beginning and at the end of each Sarga the scribe gives particulars regarding the place and the time, *i.e.*, the date, the month and the year, when he began its transcription and completed it, respectively.

Complete.

The scribe gives thus in the first page before beginnig the work:—

वृषशरदूर्जकृष्णनवमीशनिवारविभा तमतनि बालभारतमुपक्रमणं स्वकृते ।
तिरुमलदेशिकेन लिखितुं तनयेन तरीपुरिपरवस्तुपट्टरभिरान्शठकोपगुरोः ॥

**Beginning:**

अस्त्यत्रिनेत्रप्रभवः कलात्मा शशीति नक्षत्रगणस्य नाथः ।
यं वारिजश्रीपरमाप्तवाचो वामं हरेर्लोचनमामनन्ति ॥
सेव्यस्सुराणां हिमवर्षिपादस्संभावनीयश्शिरसा शिवेन ।
महीध्रभर्तेव तमोपहन्त्री यः कौमुदीं दिव्यनदीं प्रसूते ॥
न जाह्नवीयैश्च न यामुनैश्च नचापरासां सरितां पयोभिः ।
यस्योदयेनेव सुजातधान्नो बह्वीयसीं वृद्धिमुपैति वार्धिः ॥

* * * *

वस्वौकसारामरावतीं च श्रीचारुताभ्यामतिवर्तमानम् ।
यक्षामरेशाभ्यधिकेन येन चक्रे पुरं हस्तिननामधेयम् ॥
कुले कुरुस्तस्य पतिर्धरित्र्याः कुलादिसारः किल जन्म लेभे ।
असंयुतैश्वर्यवतो विचित्रं यस्यातपत्रं सितमेकमेव ॥
तत्सन्ततौ शन्तनुरूर्जितश्रीरुच्छ्रायवत्यामुदपादि राजा ।
धातुर्यतस्स्वास्थ्यमियाय नित्यं प्रत्यर्थिनां संहृतिरर्थिनां च ॥

* * * *

तदनु विधिवलेन राजयक्ष्मा व्यसनिनमभ्यधिकं विचित्रवीर्यम् ।
प्रतिदिनमुपजायमानशोषं व्यधित गिरेरिव निर्झरं निदाघः ॥

**Colophon:**

इत्यगस्त्यकृतौ बालभारते महाकाव्ये प्रथमस्सर्गः ॥

The scribe adds—

कार्तिकबहुलदशम्यामादौ यामे दिवादिमस्सर्गः ।
लिखितस्तिरुमलगुरुणा कारुण्याद्वाडपल्लचधीशस्य ॥
द्वैतीयीकं सर्गं लिखितुंव[ा]डपल्लिपट्टणे सद्यः ।
तिरुमलगुरुणाऽऽरेभे ध्यात्वा श्रीवेङ्कटाद्रिनाथाङ्घ्रिम् ॥

**End:**

पाञ्चाल्या सममुत्थितैर्निरयतः कर्णादिभिर्भ्रातृभिः
स्वं स्वं धाम गतैरभिष्टुतयशोदिव्यैश्च तैर्बन्धुभिः ।
सिन्धोर्दिग्गजदानदिग्धपयसि त्यक्त्वा वपुर्मानुषं
सर्वेषां दिविषद्दृशां स विदधे शर्माणि धर्माकृतिः ॥

**Colophon:**

इत्यगस्त्यकृतौ बालभारते महाकाव्ये विंशतिस्सर्गः ॥

The scribe adds—

श्रीवेङ्कटाचलपतिं सालमेलमङ्गमच्युतम् ।
प्रणम्य व्यलिखद्बालभारतं विदुषां कृते ॥

वृषशरदूर्जकृष्णनवमीशनिवासरतः प्रभृति तदाग्रहायणिकशुद्धरतीशतिथेः ।
तिरुमलदेशिकस्सुतमणिः शठकोपगुरोः * तरिपुरि बालभारतमलीलिख-
[दार्यकृते ॥

---

## R. No. 1579.

Palm-leaf. 12 × 1½ inches. Foll. 112. Lines, 5 in a page. Dēvanāgarī. Slightly injured.

Presented in 1915–16 by M.R.Ry. Kandāḍai Tirumalācāriyar of Vāḍapalli, Razole taluk.

**तत्त्वदीपः.**

TATTVADĪPAḤ.

---

* वाडपल्लचाम.

By Saumyajāmātṛmuni. Same work as that described under No. 5250 of the D.C.S. MSS., Vol. XI.

Wants the beginning ; otherwise complete.

---

## R. No. 1580.

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 52. Lines, 8 in a page. Telugu. Fair.

Presented in 1915-16 by M.R.Ry. Jaṭāvallabhula Kṛṣṇasōmayājulu of Ātrēyapuram.

Fol. 1 is left blank.

### प्रसङ्गाभरणम्.
### PRASAṄGĀBHARAṆAM.

Foll. 2*a*—48*a*.

A collection of select stanzas taken from the works of different authors and arranged under suitable headings, which are given below :

१. सभाप्रशंसा.
२. गुणपद्धतिः.
३. विद्वत्पद्धतिः.
४. कविपद्धतिः.
५. कवितापद्धतिः.
६. कुकविनिन्दा.
७. विद्याप्रशंसा.
८. अनार्जवप्रयत्नपद्धतिः.
९. अन्यापदेशश्लोकपद्धतिः.
१०. उच्छ्वासपञ्चकम्.
११. कुरङ्गीपञ्चकम्.
१२. आशापद्धतिः.
१३. कर्मपद्धतिः.

These headings or titles indicate the nature of the subjects dealt with therein.

**Beginning :**

आश्चर्यादभयप्रदानसमयादार्तार्तिनिर्वापणा-
दौदार्यादघशोषणादगणितश्रेयःपदप्रापणात् ।
सेव्यस्सोऽच्युत एष एव जगतामेते पुनस्साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः ॥
नाभीपद्मभुवस्समस्तजगतामासीन्निदानं विधि-
र्वाणीशः पदपद्मजाम(रसरिद्वि)श्वेशमौलिस्थिता ।

लक्ष्मीरञ्चितसंपदुन्नतपदापाङ्गप्रियामन्मथ-
स्सूनुस्तल्पमहीश्वरः खगपतिः पत्रं हरेः पातु वः ॥
यन्नाभीसरसीरुहान्तरपुटे भृङ्गायमाणो विधिः
यद्वक्षः कमलाविलाससदनं यच्चक्षुषी चेन्द्विनौ ।
यत्पादाब्जविनिस्सृता सुरसरिच्छम्भोश्शिरोभूषणं
यन्नामस्मरणं धुनोति दुरितं पायात्स वः केशवः ॥

**End:**

मनीषिणं वा मूर्खं वा जडं वा कार्यपेशलम् ।
अप्यात्मना कृतं कर्म प्राप्नोति जगदीश्वरम् ॥
विपत्तौ किं विषादेन सम्पत्तौ विस्मयेन किम् ।
भवितव्यं भवत्येव नालिकेरफलाम्बुवत् ॥

The name of the scribe and the date of transcription are thus given :

नलवर्षपुष्यबहुलचतुर्थी बुधवारं जटावल्लभवीरेश्वरसोमयाजिलिखितं प्रसङ्गाभरणम् ॥

Foll. 48*a*—51*b* contain a few Antarlāpi stanzas, and fol. 52 is left blank.

---

## R. No. 1581.

Paper. 6½ × 1¼ inches. Foll. 17. Lines, 10 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

### चतुर्दशलक्षणीक्रोडपत्रम्.

### CATURDAŚALAKṢAṆĪKRŌḌAPATRAM.

Similar to the work described under No. 4240 of the D.C.S. MSS., Vol. VIII.

Contains the Prathamasva-lakṣaṇa incomplete.

Wants the 3rd fol.

**Beginning:**

यत्समानाधिकरणेति । अत्र यत्समानाधिकरणेत्यनुक्तौ अयमात्मा ज्ञानादित्यादौ तादृशयावदन्तर्गतस्यात्मत्वसामान्याभावस्य व्यापकताघटकसमवायसम्ब-

न्धेन प्रतियोग्यधिकरणे अवर्तमानत्वात् । नच प्रतियोग्यधिकरणसम्बन्धित्व-निवेशेनैवाव्याप्तिवारणसंभवे यत्समानाधिकरणादिति व्यर्थमिति वाच्यम् ।

* * * *

अत एवोक्तं जगदीशेन विशिष्टाभावस्तावदतिरिच्यतां (मा)वा द्रव्ये द्रव्या-न्यत्वविशिष्टसत्ता नास्तीति बलात् प्रतियोगित्वं पुनस्सत्तायामावश्यकमिति ।

**End:**

घटत्वाभाववान् द्रव्यत्वादित्यादौ व्यभिचारिणि घटत्वाभावाभावस्य, (अ)-व्यभिचारिणि तु घटत्वाभावस्य पटत्वेन रूपेन योऽभावः तस्य विशेषणताविशेष-सम्बन्धावच्छिन्नाधेयतावच्छेदकीभूततादृशाभावत्वात् ।

---

R. No. **1582.**

Paper. $8\frac{3}{8} \times 3\frac{3}{8}$ inches. Foll. 10. Lines, 11 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

**पञ्चलक्षणीक्रोडपत्रम्.**

PAÑCALAKṢAṆĪKRŌḌAPATRAM.

A critical supplement to the Pañcalakṣaṇī of Madhurānātha: probably by Kālīśaṅkara.

Incomplete.

**Beginning:**

(साध्याभाववद)वृत्तित्वमिति मूलम् । ननु वह्निमान् धूमादित्यादौ सद्धे-तावव्याप्तिः । हेत्वधिकरणताया अपि सा(ध्याभाववत्त्वेन त)न्निरूपितत्वस्य हेतु-निष्ठायामाधेयतायां सत्त्वात् । अधिकरणनिरूपितत्ववत् अधिकरणतानिरू(पि-तत्वस्याप्याधेयता)यां सर्वसंमतत्वात् ।

**End:**

घटत्ववान् घटपटोभयत्वादित्यादौ पर्याप्त्याख्यस्वरूपसम्बन्धेन हेतोरवृत्तेर-तिव्याप्तिरित्याशङ्क्य साध्यसमानाधिकरणत्वेन विशेषणीय इत्युक्तं मधुरानाथेन ।

* * * *

अतस्साध्याभाववन्मात्रवृत्तिधर्मावच्छिन्ननिरूपकताकवृत्तित्वाभावो विवक्ष-णीयः । प्रमेयत्वावच्छिन्नवृत्तिता च न ह्रदमात्रवृत्तिधर्मावच्छिन्ननिरूपकताका ह्रदत्वादेस्तादृशनिरूपकतानू(न्यू)नवृत्तित्वेन निरुक्तनिरूपकतानवच्छे.

## R.No. 1583.

Paper. 8⅛ × 4½ inches. Foll. 8. Lines, 13 in a page. Telugu. Good.

Presented in 1915-16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalapuram taluk.

(*a*) पञ्चलक्षणीविवेचनी.

PAÑCALAKṢAṆĪVIVĒCANĪ.

Foll. 1*a*—6*b*.

A treatise explaining the use as well as the significance of certain expressions occurring in the Pañcalakṣaṇī. The author is probably Gōlōkanyāyaratna.

Incomplete.

**Beginning :**

साध्याभाववदवृत्तित्वमिति मूलस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्ननिरूपकतानिरूपिता या अधिकरणता तन्निरूपितवृत्तित्वाभावो व्याप्तिरिति पर्यवसितोऽर्थः । (यत्र)विषयतासम्बन्धेन वह्निविषयकज्ञानस्य साध्यता, समवायेन वह्नित्वस्य हेतुता, तत्र साध्यतावच्छेदकसम्बन्धनिष्ठा या आधेयता तन्निरूपिता या समवायसम्बन्धावच्छिन्नज्ञानत्वावच्छिन्नप्रतियोगिताकाभावाधिकरण(ता तन्निरूपित)वृत्तित्वस्यैव हेतौ सत्त्वादव्याप्तिः । अतः साध्यतावच्छेदकसम्बन्धनिष्ठावच्छेदकतापदम् ।

**End :**

अभावपदोपादाने च साध्यनिष्ठप्रतियोगितानिरूपकाभावत्वावच्छिन्ननिरूपकताकाधिकरणत्वस्य पर्वते विरहात् ह्रदनिरूपितवृत्तित्वाभावस्य हेतौ सत्त्वेन नाव्याप्तिरिति ।

---

(*b*) गोलोकन्यायरत्नीयम्.

GŌLŌKANYĀYARATNĪYAM.

Foll. 7*a*—8*b*.

A discussion by Gōlōkanyāyaratna of certain grammatical points which come for investigation in the course of explaining the Pañcalakṣaṇī and Simhavyāghrī. The author quotes Madhuranātha in support of his view.

Incomplete.

**Beginning :**

तदसत् न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर इत्यनुशासनविरोधात् तत्र कर्मधारयपदस्य बहुव्रीहीतरसमासपरत्वादिति मथुरानाथेनोक्तम् ।

अत्रेयमाशङ्का—

ननु समासपरत्वादित्येव वक्तुमुचितं किं बहुव्रीहीतरपदेन ? बहुव्रीह्युत्तर-मत्वर्थीयार्थस्य बहुव्रीहेः प्रतिपत्तिकरत्वाभावात् । बहुव्रीह्युत्तरं मत्वर्थीयप्रत्यय-स्यानुपपत्त्यभावात् बहूव्रीहावधिकविशिष्टार्थबोधादिति चेन्न ।

**End :**

तत्र नञ्पदस्येवान्वयितावच्छेदकधर्मावच्छिन्नप्रतियोगिताकाभावत्वविशिष्ट-बोधकत्वात् । नञ्पदस्य तादृशव्युत्पत्तिस्वीकारे पुनः घटवत्यपि घटो नास्तीति प्रत्ययापत्तिः । तत्र घट.

---

R. No. **1584.**

Paper. 13⅝ × 4½ inches. Foll. 10. Lines, 13 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

**दिनकरीयव्याख्या —तरङ्गिणी.**

DINAKARĪYAVYĀKHYĀ : TARAṄGIṆĪ.

Foll. 2*b*—10*b*. Foll. 1*a* to 2*b* contain a small portion of Śabda-khaṇḍakrōḍapatra.

By Rāmarudrabhaṭṭa. Same work as that described under Nos. 3965 and 3966 of the D.C.S. MSS., Vol. VIII.

Contains the Śabdakhaṇḍa without the beginning and end.

---

R. No. **1585.**

Paper. 13¼ × 4¾ inches. Foll. 13. Lines, 17 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

Fol. 4*b* is left blank.

**तत्त्वचिन्तामणिदीधितिप्रकाशिका.**

TATTVACINTĀMAṆIDĪDHITIPRAKAŚIKĀ.

By Gadādharabhaṭṭācārya. Same work as that described under No. 4050 of the D.C.S. MSS., Vol. VIII.

Contains the Savyabhicārasāmānyanirukti without the beginning and the end.

## R. No. 1586.

Paper. $13\frac{1}{4} \times 4\frac{3}{4}$ inches. Foll. 23. Lines, 12 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

चतुर्दशलक्षणीपत्रम्.

CATURDAŚALAKṢAṆĪPATRAM.

A critical supplement to the Caturdaśalakṣaṇi of Jagadīśa. Similar to the work described under R. No. 1581 *ante*.

Incomplete. Breaks off in the Kūṭaghaṭitalakṣaṇa.

**Beginning :**

यत्समानाधिकरण—इत्यस्यानुगमप्रकारः—

हेतुसमानाधिकरणा(त्यन्ताभावप्रतियोगि)ताविशिष्टाभावत्वव्यापकप्रतियोगिताकत्वमेव यत्समानाधिकरण—इत्यादि समुदितलक्षणार्थः । अभावे प्रतियोगितावैशिष्ट्यं (स्वानवच्छेदकधर्मावच्छिन्न प्रतियोगिताकत्व,) स्वावच्छेदकसम्बन्धावच्छिन्नसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वोभयसम्बन्धेन ।

* * * *

अथ जातिसामान्याभावाद्यभावमादायासंभववारणायाभावादिति । भावभिन्ना इति च तदर्थः इत्यभिप्रायिका जागदीशी । ननु जातित्ववान् घटत्वत्वादित्यादौ लक्षणसमन्वयात् कथमसंभव इतिचेन्न ।

**End :**

अभावभिन्नभेदघटितपृथिव्यादिनवद्रव्याणां प्रत्येकभेदकूटाधिकरणसामान्यादिकमादाय तन्निरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्नवृत्तित्वाप्रसिद्ध्याऽतिव्याप्तिवारणात् । नच घटीय.

---

## R. No. 1587.

Paper. $13\frac{1}{4} \times 4\frac{3}{8}$ inches. Foll. 6. Lines, 15 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

जगदीशीयसिद्धान्तलक्षणविवेचनम्.

JAGADĪŚĪYASIDDHĀNTALAKṢAṆAVIVĒCANAM.

Similar to the work described under No. 4333 of the D.C.S. MSS., Vol. VIII.

Incomplete.

**Beginning:**

प्रतियोग्यसमानाधिकरणयत्समानाधिकरणात्यन्ताभाव

* * * *

तस्य सामानाधिकरण्यं व्याप्तिरिति मूलम्। वह्नित्वावच्छिन्नस्य सर्वस्यैव वह्नेः धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्व्यक्तित्वावच्छिन्नत्वादित्युक्तं जग. दीशेन। वह्नित्वावच्छिन्नवान् धूमादित्यादौ अव्याप्तिसूचनाय वह्नित्वावच्छिन्न-पदम्।

**End:**

पर्याप्तिसम्बन्धेन प्रतियोगितात्वावच्छिन्नाभावविवक्षणेनैव सम्यक्त्वे कृतं साध्य-तावच्छेदकतदितरत्वादिना। यदि व्यासज्यवृत्तिसाध्यतावच्छेदकत्वादेः व्याप्ति-संरोधेन प्रामाणिकता, अत एवावच्छेदकत्वनिरुक्तौ एकत्ववह्नित्वादेः पर्याप्तिसम्बन्धे मानाभावादित्युक्तं जगदीशेन तथा(दा)नैतादृशरीतिरसंभवतीत्यतस्साध्यतावच्छेद-कत्वादि निवेशितमिति ध्येयम्।

---

R. No. **1588.**

Paper. $11\frac{7}{8} \times 4$ inches. Foll. 58. Lines, 10 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

Fol. 20*b* is left blank.

मुक्तावलीव्याख्या—दिनकरीया.

MUKTĀVALĪVYĀKHYĀ: DINAKARĪYĀ.

Same work as that described under No. 3955 of the D.C.S. MSS., Vol. VIII.

Contains the Guṇapariccheda complete.

---

R. No. **1589.**

Paper. $10\frac{7}{8} \times 4\frac{3}{8}$ inches. Foll. 6. Lines, 12 in a page. Dēvanāgarī. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

तत्त्वविवेकः.

TATTVAVIVĒKAḤ.

By Nṛsiṁhāśramamuni. Same work as that described under No. 4587 of the D.C.S. MSS., Vol. IX.

Contains the first Pariccheda complete.

## R. No. 1590.

Paper. $10\frac{7}{8} \times 4\frac{1}{4}$ inches. Foll. 100. Lines, 9 in a page. Dēvanāgarī and Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalapuram taluk.

(*a*) मुक्तावलीव्याख्या—दिनकरीया.

MUKTĀVALĪVYĀKHYĀ: DINAKARĪYĀ.

Foll. 1*a*—73*b*. Foll. 7*a* and 58*a* are left blank.

By Dinakarabhaṭṭācārya. Same work as that described under No. 3955 of the D.C.S. MSS., Vol. VIII.

Contains the Pratyakṣakhaṇḍa without the beginning and the end, the Anumānakhaṇḍa without the end, the whole of the Upamānakhaṇḍa and the Śabdakhaṇḍa without the end.

---

(*b*) तत्त्वचिन्तामणिः—सदीधितिः.

TATTVACINTĀMAṆIḤ WITH DĪDHITI.

Foll. 74*a*—100*a*. Foll. 74*b*, 81*b*, 82*a* and 100*b* are left blank.

Same text and commentary as those described under Nos. 3983 and 4002 of the D.C.S. MSS., Vol. VIII.

Contains the Anumānakhaṇḍa incomplete.

---

## R. No. 1591.

Paper. $10\frac{1}{4} \times 4\frac{1}{4}$ inches. Foll. 31. Lines, 12 in a page. Telugu. Good.

Presented in 1915–16 by M.R.Ry. Vaṅka Jagannātha Śāstri of Indupalli, Amalāpuram taluk.

सामान्यनिरुक्तिटिप्पणी.

SĀMĀNYANIRUKTIṬIPPAṆĪ.

Foll. 1*a*—30*b*. Fol. 31 contains a few lines relating to Sāmānyanirukti and Savyabhicāra.

A brief commentary on the Sāmānyanirukti, a portion of the Tattvacintāmaṇidīdhitiprakāśikā of Gadādharabhaṭṭa.

Incomplete.

**Beginning:**

प्रणम्य शारदां देवीं केषांचित्सुलभां सताम् ।
गदाधरीयसामान्यनिरुक्तिं विशदीक्रियाम् ॥

तज्ज्ञानजन्यजिज्ञासाधीनत्वं पञ्चम्यर्थ इति भट्टाचार्येणोक्तम्। तज्ज्ञानं हेत्वाभासत्वज्ञानम्। तदेव सङ्गतिज्ञानं भवति, कुतः ? हेत्वाभासानां स्वनिष्ठव्याप्तिपक्षधर्मताविरहत्वसम्बन्धेन सद्धेतुसम्बन्धित्वेन पूर्वं ज्ञातत्वात्।

* * * *

आश्रयासिद्धिघटकव्यापकतापेक्षया बाधघटकव्यापकताया भिन्नत्वेनाश्रयासिद्धे निरुक्तबाधघटितत्वं नास्तीति गदाधराशयः। जगदीशपरिष्कृतलक्षणमाह --

एतेन स्वावाच्छिन्ननिरूपितविषयित्वावाच्छिन्नयत्किञ्चित्प्रतिबन्धकतावच्छेदकविषयिताकविशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूप्यताकधर्मवत्वं समुदितार्थ इति।

**End:**

स्वावच्छिन्ननिरूपितविषयतानवच्छिन्नप्रतिबन्धकतावच्छेदकस्वावच्छिन्नविषयताको यो धर्मः तद्वत्त्वमिति मधुरानाथकल्पः। अत्र स्वपदद्वन्द्वं लक्ष्यतावच्छेदकीभूतवह्न्यभाववद्भूदत्वपरम्। अनवच्छिन्नत्वमव्यापकत्वम्।

* * * *

परन्तुसत्तावृत्तिद्रव्यत्वाभाववद्वृत्तित्वगतसमुदायत्वमादाय द्रव्यत्वाभाववद्वृत्तिसत्तारूपव्यभिचारे लक्षणसमन्वयो बोध्य इति दुरूहः पन्थाः। एवमसिद्धत्वादिकं च परिष्कृत्य निवेशनीयम्॥

**Colophon:**

स्वसजातीयविशिष्टान्तरघटितत्वकल्पोपरि पत्रिका समाप्ता॥

The scribe adds—

सीतारामेण लिखिता स्वार्थं परार्थं च।

---

R. No. **1592.**

Paper. $11\frac{1}{4} \times 5\frac{3}{4}$ inches. Foll. 88. Lines, 13 in a page. Dēvanāgarī. Good.

Purchased in 1915–16 from M.R.Ry. E. Śrīnivāsarāghavācāriyar of Conjeeveram.

**जातकपारिजातः.**

JĀTAKAPĀRIJĀTAḤ.

A rather comprehensive treatise on horoscopy in astrology. The author says that he has consulted the astrological works of Garga and Parāśara and also the Sārāvalītantra and has condensed them in this work. The subjects dealt with in this work are apparent from the

names of the Adhyāyas given below. By Vaidyanātha, son of a famous astrologer named Vēṅkaṭādri of Bhāradvājagōtra.

Contains Adhyāyas one to seventeen complete, and the eighteenth incomplete.

१. राशिशीलाध्यायः.
२. ग्रहस्वरूपगुणाध्यायः.
३. आधानजन्माध्यायः.
४. बालारिष्टाध्यायः.
५. आयुर्दायाध्यायः.
६. जातकभङ्गाध्यायः.
७. राजयोगादियोगाध्यायः.
८. ग्रहाश्रयफलाध्यायः.
९. संवत्सरादिजातफलाध्यायः.
१०. अष्टवर्गाध्यायः.
११ to १५. द्वादशभावफलाध्यायः.
१६ स्त्रीजातकफलाध्यायः.
१७. कालचक्रफलानिरूपणम्.
१८. दशान्तर्दशाफलनिर्णयः.

**Beginning:**

श्रीकान्ताजशिवस्वरूपममरज्योतिर्गणस्वामिनं
मायातीतमशेषजीवजगतामीशं दिनेशं रविम् ।
नत्वा गर्गपराशरादिरचितं सङ्गृह्य होराफलं
वक्ष्ये जातकपारिजातमखिलज्योतिर्विदां प्रीतये ॥
भारद्वाजकुलोद्भवस्य विदुषश्श्रीवेङ्कटाद्रेरिह
ज्योतिश्शास्त्रविशारदस्य तनयश्श्रीवैद्यनाथस्सुधीः ।
होरासारसुधारसज्ञविबुधश्रेणीमनःप्रीतये
राशिस्थाननिरूपणादि सकलं वक्ष्ये यथानुक्रमात् ॥
प्रणम्य वन्दारुजनाभिवन्द्यपदारविन्दं रघुनायकस्य ।
सङ्गृह्य सारावलिमुख्यतन्त्रं करोम्यहं जातकपारिजातम् ॥
मेषाजविश्वक्रियतुम्बुराद्या वृषोक्षगोतावु(रि)गोकुलानि ।
द्वन्द्वं नृयुग्मं जु (जि) तुमं यमं च युगं तृतीयं मिथुनं वदन्ति ॥

* * * *

**Colophon:**

इति श्रीनवग्रहकृपया वैद्यनाथविरचितजातकपारिजाते राशिशीलाध्यायः प्रथमः ।

**End:**

ग्रहवत्सरवासराहृतं परमायुष्यमभो(हो)मितं ध्रुवम् ।
निजवर्षगुणा स्वपाकदा इति पाकेष्वखिलेषु चिन्तयेत् ॥

**Colophon:**

इति नवग्रहकृपया वैद्यनाथविरचिते सप्तदशोऽध्यायः ॥

अथ दशाफलम्—

दशानुसारेण फलं वदन्ति मुनीश्वरा जातशुभाशुभं यत् ।
सारं समुद्धृत्य तथैव वक्ष्ये भेदं यथा विस्तरतो दशायाम् ॥
बलानुसारेण यथाहि योगो योगानुसारेण दशामुपैति ।
दशाफलैस्सर्वफलं नराणां वर्णानुसारेण यथा विभागः ॥
आदित्यचन्द्रकुजराहुसुरेशमन्त्रि-
मन्दज्ञकेतुभृगुजा नव कृत्तिकाद्याः ।
तेनोनयस्सिनदयातटधन्यसेव्य
सेनानरा दिनकरादिदशाब्दसङ्ख्याः ॥
आरोहवीर्याधिकभावतुल्यविंशाधिकः कर्मभवोदयस्थाः ।
तुङ्गादिवर्गोपगतानभोगाः षट् वीर्यवन्तश्च शुभप्रदास्स्युः ॥

* * *

उच्चराशिगतश्शुक्रो नीचांशकसमन्वितः ।
स्वपाके धननाशं च कुर्वीत पदविच्युतिम् ॥

---

R. No. **1593.**

Palm-leaf. 15⅝ × 1⅛ inches. Foll. 85. Lines, 6 in a page. Grantha. Slightly injured. Five leaves are lost.

Purchased in 1915-16 from M.R.Ry. E. Śrīnivāsarāghavācāriyar of Conjeeveram.

**सच्चरित्रसुधानिधिः.**

SACCARITRASUDHĀNIDHIḤ.

Same work as that described under No. 2863 of the D.C.S. MSS., Vol. V. Some authoritative stanzas relating to Puṇḍradhāraṇa are found added on in foll. 84*a* to 85*b*.

Complete.

The scribe adds—

रौद्र्यब्दे मासि धनुषि चर्तुदश्यां स्थिरे दिने ।
श्रीनिवासाख्यवरदपदाब्जन्यस्तचेतसा ॥
वीरराघवदासेन सच्चरित्रसुधानिधिः ।
लिखितोऽयं मया सम्यक् द्रष्टव्यं सूक्ष्मदर्शिभिः ॥

प्रमाणं केवलाचारं सुधियामपि पश्यताम् ।
प्रमाणहीनास्स्मृतिषु प्रोच्यन्ते कतिचिन्मया ॥
शुक्लाम्बरधरं यस्य द्विरदाद्यादिकीर्तनम् ।
श्रीकेशवाय नम इति उक्तिस्सन्ध्यात्रयेऽपि च ॥
द्वादशाङ्गेषु तर्जन्या निर्देशः पुण्ड्धारणे ।

* * * *

**Colophon :**

सच्चरित्रसुधानिधिस्समाप्ता(प्तः) ॥

---

R. No. **1594.**

Palm-leaf. 15⅞ × 1¼ inches. Foll. 109. Lines, 7 in a page Grantha. Fair.

Presented in 1915–16 by M.R.Ry. E. Śrīnivāsarāghavācāriyar of Conjeeveram.

(*a*) कालविधानपद्धतिः—द्राविडटीकासहिता.

KĀLAVIDHĀNAPADDHATIḤ WITH TAMIL MEANING.

Foll. 1*a*—96*a*. Foll. 96*b* and 97 are left blank.

A treatise regarding the determination of proper or auspicious times for the performance of various religious ceremonies. It is apparently wrongly stated at the end that this work is called Kālāmṛta.

The manuscript is said to have been copied by Vīrāsvāmi, son of Avaḷūr Gōmaṭham Periyanārāyaṇa Ayyaṅgār, the copying having been completed on Sunday, the 18th day of the month of Māśi in the year Śarvajit.

Complete.

**Beginning :**

श्रियः करारोपितरत्नमुद्रिकामरीचिबालातपलोहिनीकृतः(म्) ।
सतामुपास्यं सुरशेखरीकृतं करोतु शं भो(वो)हरिपादपङ्कजम् ॥

* * * *

प्रणम्य कालात्मकमेकमक्षयं भवं भवानीसखमिन्दुभूषणम् ।
विदग्धमौहूर्तिककीर्तिवृद्धये करोम्यहं कालविधानपद्धतिम् ॥

* * * *

वेदागमोक्तसमये रुचिर[ः]प्रदेशवाजीकृतेन जितरोषभयेन पुंसाम् ।
मन्त्रौषधप्रवरतीर्थजलोज्ज्वलेषु कान्ताजनेष्वथ निषेकविधिर्विधेया ॥

**End :**

दम्पत्योरेकनक्षत्रे नवभिर्गुणितं भजेत् ।
द्वादश्यभागे शेषाणि अल्पशेषं विनश्यति ॥

* * *

शस्त्राङ्कुलस्त्रिगुणितं पुनश्च नवसंयुतम् ।
अष्टाभिश्च हरेच्छेषं तच्छेषं हलमुच्यते ॥
ध्वजे कृतार्थे(र्थो)मरणं च धूम्रे सिंहे जयो श्वानमनन्तरोगम् ।
वृषे षु(तु)राज्यं खरदुःखभाजनं गजे जयः पा(वा)यसनिष्फलं च ॥
ध्वजवृषभवृणं मूले गजसिंहे तु मध्यमे ।
खरधूम्रे वृणान्ते च काकश्वानं वृणं भवेत् ॥
भानुभौमभृगुविष्णुभनन्दापातवैधृतियुगादिपर्वसु ।
आह(रे)त तुलसीमपराह्णद्वादशीरज(नि)तिसृ(षु)सन्धिषु ॥

---

(*b*) लम्पाकः.

LAMPĀKAḤ.

Foll. 98*a*—103*a*. Foll. 103*b* and 104 are left blank. Fol. 105 contains some astrological information. Foll. 106—109 contain Māsaphala, Varṣaphaṇicakra, etc.

Similar to the work described under R. No. 981(*f*) *ante*.

Incomplete.

**Beginning:**

अध्यासीनं महादेवं महापद्मे द्विषट्दले ।
विघ्नराजं नमस्कृत्य वक्ष्ये लम्पाकमुत्तमम् ॥
नमस्ते शूलहस्ताय चन्द्रार्धकृतशेखर ।
त्वत्प्रसादात् प्रवक्ष्यामि लम्पाकं लोकभूषणम् ॥
मण्डलं चतुरश्रं वा लिखित्वान्तः प्रकल्पयेत् ।
चतुर्दिक्षु चतुस्सूत्रं विश्रुतद्वेदमालिखेत्(?) ॥
मेषो वृषो नृयुग्मश्च कर्कटस्सिंहयोषितौ ।
तुलावृश्चिकचापश्च मकरः कुम्भमीनकौ ॥
सपर्याय इमे शब्दाः द्वादशानां दलात्मनाम्
नामधेयानि विद्वद्भिः कथितं पूर्ववित्तमैः ॥

**End:**

रवेस्सप्तमराशिस्थस्सदा चन्द्रोऽपि वर्तते ।
एवं रात्रावपि ज्ञेते शक्रमिन्द्विनराहुजम् ॥

ग्रहणप्रश्नवेलायामिनेन्द्वोर्यदि राहुणा ।
क्षणिकेनैव संयोगस्तथा ग्रहणमादिशेत् ॥
ईषश्शु(च्छु)क्लश्च शुक्लश्च रक्तश्यामोऽधिपीतकः ।
अतिशुक्लश्च कृष्णश्च महाकृष्णस्त्विनादयः ॥
देशतः कालतश्चैते भावयाम्युत्तरोत्तरम् ।

---

R. No. **1595.**

Palm-leaf. $12\frac{3}{4} \times 1\frac{1}{4}$ inches. Foll. 27. Lines, 9 in a page. Grantha and Telugu. Fair.

Presented in 1915–16 by M.R.Ry. E. Śrīnivāsarāghavācāriyar of Conjeeveram.

(*a*) लक्ष्मीहृदयस्तोत्रमन्त्रः.

LAKṢMĪHṚDAYASTŌTRAMANTRAḤ.

Foll. 1*a*—5*a*. Foll. 5*b*—8*b* are left blank.

Similar to the work described under No. 7122 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning :**

आद्यादिश्रीमहालक्ष्मीस्तोत्रमहामन्त्रस्य भार्गव ऋषिः, अनुष्टुप् छन्दः, श्रीमहालक्ष्मीसमेतश्रीमन्नारायणो मे देवता । ओं श्रीं बीजम् । ओं ह्रीं शक्तिः । ओं यं कीलकम् । महालक्ष्मीप्रसादसिद्ध्यर्थे जपे विनियोगः । श्रामित्यादि षडङ्गन्यासः ।

* * * *

ध्यानम्—

हस्तद्वये च कमले धारयन्ती च लीलया ।
हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिन्तयेत् ॥
कौशेयरत्नवसनामरविन्दनेत्रां पाशाङ्कुशाभयवरोद्यतपद्महस्ताम् ।
बालार्ककोटिसदृशीं परमासनस्थां ध्यायेद्विधीशनतपादयुगाब्जनेत्रीम् ॥

**End :**

अथ हृदयबीजम्—

ओं आं कृं घ्रों फट् कुरु कुरु स्वाहा ।

आद्यादिलक्ष्मी भव सुप्रसन्ने विशुद्धविज्ञानसुखैकदोग्ध्री ।
अज्ञानहन्त्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्ना ॥
अशेषवाग्जाड्यमलातिहारिणी नवं नवं सृष्टसुवाक्यदायिनी ।
ममैव जिह्वाङ्गणरङ्गनर्तकी भव प्रसन्ना वदने च म(मे)श्रीः ॥
समस्तसम्पत्सुविराजमाना समस्ततेजश्च भया समाना ।
विष्णुप्रिये त्वं भवदीयमाना वाग्देवता मे नयने प्रसन्ना ॥

---

(*b*) शूलिनीविश्वरूपस्तोत्रम्.
ŚŪLINĪVIŚVARŪPASTŌTRAM.

Foll. 9*a*—11*a*.

Same work as that described under No. 10833 of the D.C.S. MSS., Vol. XIX, but with a different colophon.

Complete.

**Colophon:**

इति महाशैवतन्त्रे विश्वरूपस्तुतिर्नाम षष्ठोपदेशः ॥

---

(*c*) शूलिनीसुमुखीकरणस्तोत्रम्.
ŚŪLINĪSUMUKHĪKARAṆASTŌTRAM.

Foll. 11*a*—12*b*.

Same work as that described under No. 10834 of the D.C.S. MSS., Vol. XIX, but with a different colophon as given below.

Complete.

**Colophon:**

इति महाशैवतन्त्रे सुमुखीकरणस्तुतिर्नाम सप्तमोपदेशः ॥

---

(*d*) प्रतिक्रियाशूलिनीस्तोत्रम्.
PRATIKRIYĀŚŪLINĪSTŌTRAM.

Foll. 12*b*—14*b*.

Same work as that described under No. 10783 of the D.C.S. MSS., Vol. XIX, but with a slight difference both in the beginning and in the colophon which are given below. It is said to have been taken from the 33rd Adhyāya of the Śarabhaśālvapakṣirājakalpa, which forms part of the Ākāśabhairavakalpa of the Mahāśaivatantra.

Complete.

**Beginning:**

अध्यारूढां मृगेन्द्रं सजलजलधरश्यामलां हस्तपद्मैः
शूलं बाणं कृपाणन्त्वरिजलजगदाचापपाशान् वहन्तीम् ।
चन्द्रो(न्द्रा)चूडां त्रिणेत्रां चतसृभि(र)सिरा(ना)खेटकं बिभ्रतीभिः
(चेटीभिः) सेव्यमानां प्रतिभटभयदां शूलिनीं भावयामि ॥

* * * *

प्रतिक्रियास्तोत्रमन्त्रं प्रवदस्व दयानिधे ।

**Colophon:**

इति श्रीमहाशैवतन्त्रे अतिरहस्ये आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमा-महेश्वरसंवादे शङ्करेण विरचिते शरभसालवपक्षिराजकल्पे प्रतिक्रियास्तोत्रं त्रम(त्रय)स्त्रिंशोऽध्यायः ॥

---

(*e*) शूलिनीदिग्बन्धनमन्त्रः.

ŚŪLINĪDIGBANDHANAMANTRAḤ.

Foll. 15*a*–17*a*.

Similar to the work described under No. 7419 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

अस्य श्रीशूलिनीदिग्बन्धनमहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, शूलिनी दुर्गाम्बा देवता, ओं बीजं, स्वाहा शक्तिः, दिग्बन्धनार्थे भूतनिग्रहार्थे जपे विनियोगः ।

* * * *

ओं नमो भगवति असिताङ्गभैरवसहिताय ब्राह्मीश्वरी इन्द्रदिशं बन्ध बन्ध मां रक्ष रक्ष सर्वग्रहोच्चाटनं कुरु कुरु स्वाहा ।

**End:**

आकर्षय महाभूतान् योजनानां शतैरपि ॥
मुक्तये भूतबेतालकूष्माण्डकृत्रिमग्रहाः ।
नाशये नात्र सन्देहो मेऽवमायुधदर्शनात् ॥

Fol. 17*b* contains the Rāmagāyatrī.

(*f*) रामम्मालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Fol. 18.

Similar to the work described under No. 7053 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

अस्य श्रीराममालामन्त्रस्य वसिष्ठमहाऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता, रां बीजं, स्वां शक्तिः, मां कीलकं, श्रीराममन्त्रे विनियोगः।

ओं नमो भगवते श्रीरामायापरिमितवीर्यबलपराक्रमाय रणोग्रभयङ्कराय कोदण्डदीक्षागुरवे दशरथराजनन्दनाय ।

**End:**

कौसल्यापुत्राय सीतामनोनायकाय प्रणतार्तिहराय ओं क्ष्रीं श्रीं रामाय हुं फट् स्वाहा ॥

---

(*g*) त्रैलोक्यमोहनवज्रपञ्जररामकवचम्.

TRAILŌKYAMŌHANAVAJRAPAÑJARARĀMAKAVACAM.

Foll. 19*a*—20*b*.

Similar to the work described under No. 6348 of the D.C.S. MSS., Vol. XIII; stated to be found in the Brahmāṇḍapurāṇa.

Complete.

**Beginning:**

अस्य श्रीत्रैलोक्यमोहनवज्रपञ्जरकवचस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्रीरामचन्द्रो देवता। रां बीजम्, रीं शक्तिः, रूं कीलकम्। मम समस्तप्रारब्धपरिहारद्वारा श्रीरामचन्द्रप्रीत्यर्थे जपे विनियोगः। रामित्यादि षडङ्गन्यासः।

* * * *

प्रणवो मे शिरः पातु तारकं ब्रह्मरूपधृक् ।
अनन्तोऽग्निसहस्रेन्दुर्नासां पातु रघोः पतिः ॥
रां रामाय नमस्तुभ्यं षड्वर्णे भुक्तिमुक्तिदः ।
फालं पायान्नेत्रयुग्मं रामो द्व्यक्षरसंज्ञकः ॥

**End:**

त्रैलोक्यमोहनं जप्त्वा न मन्त्रासिद्धिसाधकः ॥
सशस्त्रं घातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् ।
तस्मात् सर्वप्रयत्नेन कवचं धारयेत् बुधः ॥

**Colophon:**

इति ब्रह्माण्डपुराणे पार्वतीश्वरसंवादे त्रैलोक्यमोहनं नाम दिव्यमन्त्रकवचं संपूर्णम् ॥

वाङ्मनश्चक्षुश्रोत्रजिह्वाघ्राणप्राणापानव्यानोदानसमाना इह यन्त्रदेवीमागत्य सुखचिरं तिष्ठन्तु स्वाहा ॥

---

(*h*) रामषडक्षरीमन्त्रः.

RĀMAṢAḌAKṢARĪMANTRAḤ.

Fol. 20*b*.

Slightly different from the work described under No. 7072 of the the D.C.S. MSS., Vol. XIV, in the end.

Complete.

**End:**

लामित्यादि पञ्चपूजा । मूलमन्त्रः—

ह्रीं क्लीं श्रीं रामाय । पुनश्चाङ्गन्यासः पुनश्च पञ्चपूजा ।

---

(*i*) राममालामन्त्रः.

RĀMAMĀLĀMANTRAḤ.

Fol. 21.

The repetition of this Mantra is held to be efficacious in destroying one's enemies, in driving off evil spirits, in counteracting the effects of hostile Mantras and Tantras, in removing the worst kinds of fever and in acting as an antidote to serpent-poison.

Similar to the work described under No. 7053 of the D.C.S. MSS., Vol. XIV.

Complete.

**Beginning:**

अस्य श्रीराममालामहामन्त्रस्य ब्रह्मा ऋषिः, गायत्री छन्दः, श्री वीररामो देवता । ह्रां बीजम्, ह्रीं शक्तिः, ह्रूं कीलकम्, ओं भूतप्रेतपिशाचभयङ्कर-शाकिनीडाकिनीकूष्माण्डयक्षराक्षसब्रह्मराक्षसभेतालादीनां दुष्टसर्पादीनां दुष्टज्वरा-दीनां निवारणार्थे श्रीराममालामन्त्रजपे विनियोगः ।

**End:**

पातालस्थानामष्टकुलनागानां विषं हर हर आप्यायय आप्यायय परमन्त्रपर-यन्त्रपरतन्त्रपरकृत्रिमादीन् छेदय छेदय प्रबोधय प्रबोधय भञ्जय भञ्जय मोहय

मोहय तापय तापय ताडय ताडय उच्चाटय उच्चाटय मारय मारय एहि एहि सर्वारिष्टनिग्रहस्वामिन् मां रक्ष रक्ष. हां हीं हूं हें हैं हों हौं हं हः हुं फट् ओं सौः श्रीं क्लीं ह्रीं श्रीं रां रामाय नमः स्वाहा ॥

---

(*j*) रामाष्टोत्तरशतदिव्यनामस्तोत्रम्.
RĀMĀṢṬŌTTARAŚATADIVYANĀMASTŌTRAM.

Foll. 21*b*—22*b*.

Similar to the work described under No. 8973 of the D.C.S. MSS., Vol. XIV.

Complete ; said to be found in the Hiraṇyasaṁhitā of the Brahmāṇḍapurāṇa.

**Beginning:**

अस्य श्रीरामदिव्यनामाष्टोत्तरशतदिव्यस्तोत्रमहामन्त्रस्य ब्रह्मा ऋषिः, अनुष्टुप् छन्दः, श्रीपरमात्मा देवता। श्रीरामचन्द्रप्रसादसिद्ध्यर्थे जपे विनियोगः।

ध्यानम्—

ओं नमो भगवते तुभ्यं रामाय परमात्मने ।
नमो वेदान्तवेद्याय पञ्चाशद्वर्णरूपिणे ॥
नमो विद्याधिराजाय ज्योतिषां पतये नमः ।
क्षीराब्धिमध्यसंस्थाय नमो नारायणाय ते ॥

**End:**

पुण्यकालेषु सर्वेषु यः पठेदुत्तमं स्तवम् ।
सर्वदेवेषु तीर्थेषु दानेषु च तपस्सु च ॥
यत् फलं मुनिभिः प्रोक्तं तत्फलं स मवा(वा)प्नुयात् ॥
नाम्नामष्टशतं पठन्ति सततं यो रामचन्द्रस्य ते
भोगान् सर्वजनप्रियाभिलषितान् भुक्त्वा मलानन्वितान् ।
भित्त्वा सन्ततबन्धनानि कुशलं स्मृत्वा परं तारकं
ब्रह्म ब्रह्मपदं प्रयन्ति सततं मध्ये गतं शाश्वतम् ॥

**Colophon:**

इति ब्रह्माण्डपुराणे हिरण्यसंहितायां परमरहस्ये श्रीरामदिव्यनामाष्टोत्तरशतं संपूर्णम् ॥

(*k*) राममानसिकपूजा.

RĀMAMĀNASIKAPŪJĀ.

Foll. 23*a*—25*b*.

Same work as that described under No. 8680, but with difference in the end, which is given below.

Complete.

**End:**

एवं यः कुरुते पूजां बहिर्वा हृदयेऽपि वा ॥
सकृत् पूजनमात्रेण राम एव भवेन्नरः ।
किं पुनस्सततं कुर्यात् ब्रह्मण्येव स्वयं भवेत् ॥
यदक्षरपदभ्रष्टं मात्राहीनं तु यद्भवेत् ।
तत्सर्वं क्षम्यतां देव नारायण नमोऽस्तु ते ॥

**Colophon:**

श्रीराममानसिकं संपूर्णम् ॥

---

(*l*) रामकवचम्.

RĀMAKAVACAM.

Foll. 25*b*—27*b*.

Same work as that described under No. 7008 of the D.C.S. MSS., Vol. XIV, but with a slight difference in Bīja, Śakti and Viniyōga. The colophon is also different and so it is given below.

Complete.

**Colophon:**

इति विश्वामित्रमुनिप्रणीतं रामकवचस्तोत्रं संपूर्णम् ॥

---

(*m*) रामषडक्षरी.

RĀMAṢAḌAKṢARĪ.

Fol. 27*b*.

Same work as that described under No. 7066 of the D.C.S. MSS., Vol. XIV, but with a slight difference in the end, which is given below.

Complete.

**End:**

ओं नमो रघुनन्दनाय रक्षोघ्नविशारदाय अमिततेजसे बलाय मधुरप्रसन्नवदनाय रामाय विष्णवे नमः ।

ओं नमो रामायेति मन्त्रः ॥

R. No. 1596.

Palm-leaf. 15 × 1¼ inches. Foll. 89. Lines, 7 in a page. Grantha. Slightly injured.

Presented in 1915–16 by M.R.Ry. E. Śrīnivāsarāghavācāriyar of Conjeeveram.

(*a*) प्रयोगचन्द्रिका.

PRAYŌGACANDRIKĀ.

Foll. 1*a*—33*b*. Foll. 26*b* and 34 are left blank. Fol. 35 contains Sapiṇḍīkaraṇaśrāddhasaṅkalpa. Foll. 36—38 are left blank.

Same work as that described under No. 3713 of the D.C.S. MSS., Vol. VI. Avaḷūr Vīrāsvāmi Ayyaṅgār is said to have copied this work and completed it on the 3rd day of the Tai month in the year Vyaya.

Complete.

---

(*b*) प्रयोगदर्पणम्.

PRAYŌGADARPAṆAM.

Foll. 39*a*—82*a*. Fol. 82*b* is left blank. Foll. 83—89 contain a few lines of Prētakṛtyaprayōga. Fol. 84*b* is left blank.

Same work as that described under No. 3719 of the D.C.S. MSS., Vol. VI, but with additional sentences in the beginning. Vīrāsvāmi, son of Avaḷūr Periya Nāraṇa Ayyaṅgar, is said to have copied this work and completed it on the 15th Āḍi in the year Vyaya.

Complete.

**Beginning:**

अथात उत्तरमेधिकं व्याख्यास्यामो यं ब्रह्ममेध इत्याचक्षते। अथाप्युदाहरन्ति।

द्विजातीनामपवर्गो व्यर्थत(:)तत्त्वदर्शिभिः।
ऋषिभिस्तपसो योगात् द्वेष्टिंतुं पुरुषोत्तमम्॥
हो(हौ)त्रं च पितृमेधं च सन्त्यज्य विधिरुत्तरः।

* * * *

प्रथमापोशनात् पूर्वं स्वधावचनमिष्यते।

---

R. No. 1597.

Palm-leaf. 16 × 1⅛ inches. Foll. 66. Lines, 6 in a page. Grantha. Slightly injured.

Presented in 1915–16 by M.R.Ry. E. Śrīnivāsarāghavācāriyar of Conjeeveram.

Foll. 1 to 14 contain a description of the earth in accordance with the Sūryasiddhānta and a portion of the astrological treatise commonly known as Varṣādinūl.

शान्तिकल्पः.

ŚĀNTIKALPAḤ.

On details connected with the procedure relating to the performance of various propitiatory rites prescribed for averting different kinds of evil.

Complete.

Contains the following subjects :—

| Foll. | | Foll. | |
|---|---|---|---|
| 15. | अशनिपातशान्तिः. | 32*b*-37*b* | दानविधिः. |
| 15*b*-16*a*. | अर्कविवाहविधिः. | 37*b*-38*b*. | शनिशान्तिः. |
| 16*a*-17*a*. | कदलीविवाहविधिः. | 39*a*-40*b*. | नालवेष्टनशान्तिः. |
| 17. | प्रजार्थिहोमः. | 40*b*-42*a* | ऋतुशान्तिः. |
| 17*b*-19*a*. | अश्वत्थोपनयनम्. | 42*b*-50*b*. | सर्वप्रायश्चित्तम्. |
| 19*a*-20*a*. | अश्वत्थविवाहः. | 50*b*-53*b*. | नागप्रतिष्ठा. |
| 20*a*-21*a*. | अश्वत्थच्छायास्नानविधिः. | 54*a*-58*a*. | कुहूशान्तिः. |
| 21*a*-22*a*. | अपां प्रतिष्ठा. | 58*b*-59*a*. | अर्कविवाहः. |
| 22*a*-23*b*. | समुद्रस्नानविधिः. | 59. | कदलीविवाहः. |
| 23*b*-24*a*. | सर्वप्रायश्चित्तम्. | 60*a*-61*a*. | श्येनशान्तिः. |
| 25*a*-26*a*. | विष्णुसंप्रोक्षणविधिः. | 61*b*. | Left blank. |
| 26. | नारायणबलिः. | 62*a*-63*b*. | कुहूशान्तिः. |
| 27. | कृकलासशान्तिः. | 64*a*-65*a*. | प्राणप्रतिष्ठामन्त्रः. |
| 27*b*-32*b*. | मूलाश्लेषानक्षत्रजननशान्तिः | 65*b*-66. | Left blank. |

---

## R. No. 1598.

Paper. $11\frac{1}{8} \times 8\frac{7}{8}$ inches. Foll. 196. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākam, Chingleput district.

ऐन्द्रध्वजपूजाविधानम्.

AINDRADHVAJAPŪJĀVIDHĀNAM.

Gives the mode of conducting the worship of the Indradhvaja or Indra's flag in the various Jina temples as conducted by Indra who, as

a preliminary act, set up a flag in each of those shrines and worshipped it both before and after the regular worship of Jina. In the end, the procedure relating to the worship of twenty Tīrthaṅkaras is described. By Viśvabhūṣaṇa, son of Viśālakīrti.

Complete.

**Beginning:**

मङ्गलं भगवानर्हन्मङ्गलं भगवान् जिनः ।
मङ्गलं प्रथमाचार्यो मङ्गलं वृषभेश्वरः ॥

नमः श्रीवर्धमानाय निर्धूतकलिलात्मने ।
सालोकानां त्रिलोकानां यद्विद्या दर्पणायते ॥

* * * *

शतक्रतुमहापूजास्तोत्रं पूतप्रभाषितम् ।
विश्वभूषणयोगीन्द्रैः भव्यानां सुखवर्धनम् ॥

इति वृषभनाथस्तोत्रमङ्गलाचरणम् ॥

श्रीकौरवंशेषु शिखामणिं वै कामेश्वरं कामहरं त्रिरूपम् ।
ऐरासवित्रीतनयं प्रसिद्धमेणाङ्कितं क्षायक(शाश्वत)भोगसक्तम् ॥

शान्तिं प्रवन्देऽमरनाथपूजितं चामीकराभं हतमोहमल्लम् ।
त्रिपञ्चदेहोच्छ्रितकं पुनीतं स्फुरन्महाकेवलज्ञानबोधम् ॥

श्रीवर्धमानं प्रणमामि नित्यं सिंहाङ्कितं कर्मवनानि(लि)वह्निम् ।
सिद्धार्थसूनुं शतशक्रवन्द्यं रत्नत्रया(यी)भूषणभूषिताङ्गम् ॥

* * * *

वन्दिता शारदा येन मिथ्यावादीभकेसरिम् ।
पञ्चाचाररतं नूनं स्तुवे तं पद्मनन्दिनम् ॥

जिनेन्द्रधर्मोद्धरितं पुरा तं स्तुवे सदाहं कविराजपूज्यम् ।
निराकृतो नास्तिकसिंहयूथः षण्मासवादार्थचपेटघातैः ॥

भट्टाकलङ्कश्रुतसारबोधं संपूर्णतर्कागमसिन्धुनाथम् ।
विनिर्मितं सत्त्वपरीक्षवादं चतुर्भुजायाकृत वादशान्तिम् ॥

जगद्भूषणाख्यं स्तुवेऽहं त्रिभक्त्या महावादविद्याविलाद्ध . कोशम् ।
महाकीर्तिकान्तिश्रिया शान्तरूपं त्रिधाकाण्डदण्डाश्रितं मूलसङ्घे ॥

* * * *

इन्द्रध्वजविधिं वक्ष्ये भव्यानां सुखसिद्धये ।
महा(हतां)पातकाद्रीणां भञ्जनैकसुवज्रकम् ॥

* * * *

वसुवानाद्यचैत्येषु संज्ञार्थं स्थापयेद् ध्वजम् ।
कौशेयचित्रसंयुक्तं यथा पूर्वं सुरैः कृतम् ॥
क्व मे ज्ञानलवो धीमान् क्वापीन्द्रध्वजा(जसं)विधिः ।
नाकनागेशचक्राद्यैः वर्णितं(तुं) न समर्थकम् ॥
विद्वज्जनसभामध्ये भविष्ये हास्यधामकम् ।
कथा पङ्गोर्हना(ङ्गुर्नगा)रोहं कश(न चा)पि मनसा व्रजेत् ॥
तथापि भक्तिभारेण वक्ष्ये इ(चै)न्द्रध्वजं विधिम् ।
मन्दोऽहं बोधनिर्विण्णः शतक्रतुपुरस्कृतः ॥
नन्दीश्वराष्टमे द्वीपे सव्यसा(सेवना)र्थं शतक्रतुः ।
गतो यात्रार्थपूजायां तुर्यकायावृतैः सुरैः ॥
सुरेन्द्रेण कृता पूजा अकृत्रिमजिनालये ।

* * * *

यत्र यत्र कृताः पूजास्तत्र तत्र बिडौजसा ।
ध्वजाः प्रस्थापिता नित्यं तस्मिन्निन्द्रध्वजाः स्मृताः ॥
पूजान्तेऽपि कृतो नित्यः सुरेन्द्रेण यथाविधि ।
तथात्र(हं) वर्णयाम्याहं(म्यत्र) रसभावरसाप्लुतैः ॥

* * * *

**Colophon :**

इति श्रीविशालकीर्त्यात्मजभट्टारकश्रीविश्वभूषणविरचिते इन्द्रध्वजपीठिका समाप्तः(प्ता) ॥

**End :**

माङ्गल्यावलिदायका जिनवरा मुक्त्यङ्गनानायका
विध्वस्तस्मरसायकाः सुमनसां सन्मानसं(सा)प्यायकाः ।
जम्बूधातकिपुष्करैरवतजा नित्योल्लसत्कीर्तयो
विद्य(श्वा)भूषणसूरिणा श्रुतिपदं(थं) नीत्वा(ता) जयन्त्वञ्जसा ॥

ओं ह्रीं श्रीं क्लीं परमेष्ठिभ्यो(भ्यः) श्री(सी)मन्धरबाहुसुबाहुसंजातस्वयंप्रभऋषभानन्तवीर्यवीरप्रभविशालप्रभवज्रधरचन्द्राननचन्द्रबाहुभुजङ्गप्रभेश्वरनेमप्रभवीरसेनमहाभद्रजयदेवाजितवीर्यजिनदेवेभ्यो दिव्यमहार्घ्यं निर्वपामि स्वाहा ॥ सलीलमलयजशतककुसुमसंन्यायप्रदीपधूपफलस्तबकशान्तिधाराद्यष्टमङ्गलद्रव्यैराराधयामि स्वाहा ॥

**Colophon:**

इति विंशतितीर्थंकरपूजा समाप्ता ॥

ऐन्द्रध्वजं नन्दीश्वरं सीमन्धरविधानं संपूर्णम् ॥

ऐन्द्रध्वजपूजाविधानं संपूर्णम् ॥

---

R. No. **1599.**

Paper. 11 × 9½ inches. Foll. 134. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākam, Chingleput district.

**न्यायपरिशुद्धिव्याख्या—निकषा.**

NYĀYAPARIŚUDDHIVYĀKHYĀ : NIKAṢĀ.

By Śrīnivāsa Śaṭhakōpayati. Same work as that described under Nos. 4912 and 4913 of the D.C.S. MSS., Vol. X.

Contains the Śabdādhyāya and the Smṛtyadhyāya complete and breaks off in the second Âhnika of the Pramēyādhyāya.

---

R. No. **1600.**

Paper. 11 × 9½ inches. Foll. 156. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Tiru Śrīnivāsavarada Tātācāriyar of Villiyambākam, Chingleput district.

**श्रुतप्रकाशिकासंग्रहः.**

ŚRUTAPRAKĀŚIKĀSAṄGRAHAḤ.

A summary of the Śrutaprakāśikā of Sudarśanasūri, which work has been described under No. 4963: by Śrīnivāsasūri, son of Tātadēśika of Śrī-śailapūrṇa family.

Contains the first Adhyāya complete and breaks off in the first Pāda of the second Adhyāya.

**Beginning:**

वरदं द्विरदाद्रीशं श्रीनिधिं करुणानिधिम् ।
शरण्यं शरणं यामि प्रणतार्तिहरं हरम् ॥
बहिरन्तस्तमश्छेदि ज्योतिर्वन्दे सुदर्शनम् ।
येनाव्याहतसंकल्पं वस्तु लक्ष्मीधरं विदुः ॥
सम्यङ्न्यायकलापेन महता भारतेन च ।
उपबृंहितवेदाय नमो व्यासाय विष्णवे ॥
तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणामन्तर्ज्वरमशीशमत् ॥

* * * *

सर्वेषां पुरुषाणां प्रमाणाधीनप्रमेयनिश्चयानामुपादित्सितजिहासितेष्टानिष्ट-तत्साधनानामलौकिकपुरुषार्थतत्साधनरूपे वस्तुनि शब्दैकसमधिगम्ये.

* * * *

अनन्यपरेण नारायणानुवाकेन सर्वविद्यासु उपास्यो नारायण एवेति निर्णीतत्वात् इन्द्राद्युपासनेऽपि तदन्तर्यामिनारायण एवोपास्य इति भावः ॥

**Colophon:**

इति श्रीशैलपूर्णकुलतिलकावतारतातदेशिकसूनुना श्रीनिवाससूरिणा लिखिते श्रुतप्रकाशिकासंग्रहे प्रथमः पादः ॥

**End:**

व्याख्यातशब्दस्य समासेनैकपद्ये सति सर्ववाक्यविशेषाणां व्याख्यातत्व-मुक्तं न स्यादिति तद्व्युदासार्थमभ्यस्ततया पृथक्पदत्वं ज्ञापयन्नभ्यासस्य प्रयो-जनमाह—व्याख्याता इति ॥

**Colophon:**

इति श्रीशैलपूर्णकुलतिलकावतारतातदेशिकसूनुना श्रीनिवाससूरिणा लिखिते श्रुतप्रकाशिकासग्रहे प्रथमस्याध्यायस्य चतुर्थः पादः ॥

* * * *

अर्शआद्यजन्तत्वात् पुंलिङ्गता । अत्राक्षरत्वावस्थाप्यर्थसिद्धा महानव्यक्ते लीयते अव्यक्तलक्षणे(मक्षरे) लीयते अक्षरं तमसि लीयते इति हि पूर्वम.

## R. No. 1601.

Paper. $11\frac{3}{4} \times 9\frac{1}{8}$ inches. Foll. 140. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Tiru Śrīnivāsa-varada Tātācāriyar of Villiyambākam, Chingleput district.

### विश्वामित्रसंहिता.

### VIŚVĀMITRASAṂHITĀ.

One of the Saṁhitās of the Pāñcarātrāgama, so called because it is said to have been revealed by Viśvāmitra to Kāśyapa as taught by Brahman to the former. The subjects dealt with in the work will be clear from the names of the Adhyāyas given below.

Contains one to twenty-six Adhyāyas :

१. उपोद्घाताध्यायः.
२. पाञ्चरात्रमाहात्म्यम्.
३. गुरुलक्षणम्.
४. सृष्ट्यध्यायः.
५. सृष्टिलयाध्यायः.
६. प्रणवाद्युद्धारः.
७. द्वादशाक्षरविधिः.
८ वर्णनामानि.
९. दीक्षाविधिः.
१०. आराधनविधिः.
११. होमविधिः.
१२. नित्योत्सवविधिः.
१३. मुद्राध्यायः.
१४. प्रतिष्ठाविधिः.
१५. मण्डलविधानम्.
१६. विशेषदिवसयजनम्.
१७. उत्सवविधानम्.
१८. Do.
१९. स्नपनविधानम्.
२०. सहस्रकलशस्नपनविधिः.
२१. देवालयनिर्माणम्.
२२. बिम्बलक्षणम्.
२३. जीर्णोद्धारविधानम्.
२४. पवित्रोत्सवविधिः.
२५. कल्हारोत्सवविधिः.
२६. दमनोत्सवविधिः.

**Beginning :**

अव्यक्तायाप्रमेयाय विशुद्धज्ञानहेतवे ।
श्रीमते श्रेयसां धाम्ने नमः पुंसे परात्मने ॥
सिद्धाश्रमे श्रमहरे सिद्धसङ्घनिषेविते ।
आम्नायघोषैरानिशं मुनीनां मुखरीकृते ॥

* * *

गाधिसूनुं महात्मानं विश्वामित्रं तपोधनम् ।
अभ्येत्य काश्यपो नाम कदाचिदृषिसत्तमः ॥
प्रणम्योपान्तिके तस्थौ शिरस्याधाय चाञ्जलिम् ।
ततस्तं भगवान् दृष्ट्वा विश्वामित्रः समागतम् ।
विनयावनतं विप्रं वाक्यमेतदुवाच ह ॥

* * * *

पञ्चरात्राह्वयं ज्ञानं दिदेश मनसादरम् ॥
दत्वा पुनर्वाक्यमेतदुवाच कमलासनः ।
अतः परं त्वयोक्तत्वात् भूमौ त्वन्नामधेयतः ॥
विश्वामित्रीयमित्येव तन्त्रं तात भविष्यति ।
इत्युक्त्वान्तर्दधे देवो ब्रह्मा लोकपितामहः ॥
तदाप्रभृति तज्ज्ञेयं हृदये मम वर्तते ।
सत्पात्रदर्शनाद्धृष्टं भवानद्य समागतः ॥
इदानीं भक्तियुक्ताय विनीताय च काश्यप ।
तुभ्यं ददामि तत्तन्त्रं श्रूयतामपि धार्यताम् ॥

**Colophon:**

इति पाञ्चरात्रे महोपनिषदि विश्वामित्रसंहितायां प्रथमोऽध्यायः । उपोद्घाताधिकारः ।

**End:**

कारयेत् प्रतिवर्षं यो दमनीपत्रपूजनम् ।
देवस्य वासुदेवस्य श्रद्धया परया युतः ॥
तस्य सिध्यन्ति सकलाः संपदस्तत्प्रसादतः ।
इह प्राप्य परामृद्धिं पितॄनुत्तार्य सर्वतः ॥
पूर्वानप्यवरान् सप्त स्वदेहस्य समन्ततः ॥
प्राप्नुयाद्वैष्णवं धाम सर्वयोगीन्द्रदुर्लभम् ॥

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि विश्वामित्रसंहितायां दमनारोपणविधिर्नाम षड्विंशोऽध्यायः ॥

R. No. **1602.**

Paper. 11 × 9½ inches. Foll. 16. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry Sampatkumāra Varada Vēṅkaṭa Raṅgācārya Ayyavārayyangārlu of Tuni.

नक्षत्रमालाव्याख्या—सौरभी.

NAKṢATRAMĀLĀVYĀKHYĀ: SAURABHĪ.

A commentary on the Nakṣatramālā, which is a hymn in praise of Śaṭhakōpa or Nammāḻvār by Abhirāmavara or Saumyavara, grandson of Saumyajāmātṛmuni, and which has been described under R. No. 173(*n*) *ante*: by Jagannātha, who was the son of Kṛṣṇamācārya of Śaṭhakōpa family and Śāṇḍilyagōtra, and who was the disciple of Naraharidēśika of Śrīśaila family. The author is said to have acquired his knowledge of the Vēdānta in the Sanskrit and in the Tamil languages by the grace of one Vēdāntadēśika and of Anantārya.

Complete.

**Beginning:**

श्रीरङ्गनायकं देवं प्रणम्य शठवैरिणम् ।
रामानुजं नृसिंहार्यं विवृणोम्युडुमालिकाम् ॥
शाण्डिल्यान्वयजातेन जगन्नाथाख्यसूरिणा ।
नक्षत्रमालिकाव्याख्या यथामति विरच्यते ॥

अथ तत्रभवान् रम्यजामातृमुनीन्द्रपूर्वाश्रमपौत्रसौम्यवराधिपाभिधानो गुरुः प्रथमगुरोराकस्मिकभगवत्कृपालब्धपरिशुद्धज्ञानस्य दिव्यप्रबन्धमुखेन सकलजगज्जनोपकारकस्य श्रीमच्छठकोपमुनीन्द्रस्य दिव्यविग्रहचेष्टितगुणादीननुभूयानुभवजनितप्रीतिप्रेरितः तुष्टूषुः आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति शास्त्रात् ग्रन्थादौ कर्तव्यमाशीर्वादमादौ प्रयुङ्क्ते—श्रीमानिति । श्रीरस्यास्तीति श्रीमान्; तदस्यास्त्यस्मिन्निति मतुप् । अत्र श्रीशब्देन भगवद्भक्तिरूपसंपदुच्यते, तस्या एव स्थिरसंपत्तित्वात् । अत एव ग्राहग्रस्तस्य गजेन्द्रस्य स तु नागवरः श्रीमानिति श्रीमच्चमुक्तम् । तथा लङ्कां विहाय रामसमीपं गन्तुमुपक्रान्ते विभीषणे अन्तरिक्षगतः श्रीमानिति श्रीमच्छब्दः प्रयुक्तः । अत्र मतुप्प्रत्ययो भूमवाचकः ।

**End:**

नक्षत्रमालिकारूपी(पिणी)यं स्तुतिः पराङ्कुशपदाब्जसमर्पणेन अलंकृतेत्यर्थः । अस्याः स्तुतेः मालिकारूपत्वेऽपि तत्पदाब्जमेव भूषणम् ) न त्वियं तस्य । अत एव सर्वजनहृद्यत्वमिति भावः ॥

शाण्डिल्यान्वय(संभुवा) जगदधीशांशे(शाह्व)न सख्यावता
संप्राप्तो(प्यो)भयवेदशीर्षविवृतिं वेदान्तगुर्वादिकात् ।
पादद्वन्द्वसमाश्रितेन नृहरेर्व्याख्या भमालास्तुतेः
सौरभ्याह्वयभागशौ(का)रि सुगुणश्रीकृष्णसंभूतिना ॥

**Colophon:**

इति शाण्डिल्यगोत्रकलशपारावारसुधाकरेण श्रीमच्छ्रीशैलवंश्यनरहरिदेशिकेन्द्रशिष्येण वेदान्तदेशिकानन्तार्यकृपालब्धोभयवेदान्तेन शठकोपवंश्यकृष्णमाचार्यसूनुना जगन्नाथाख्यावता सौरभ्याख्या नक्षत्रमालिका[रव्या]व्याख्या समाप्ता ॥

---

## R. No. 1603.

Paper. 10¾ × 8½ inches. Foll. 26. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākam, Chingleput district.

### (*a*) अविद्याखण्डनम्.

### AVIDYĀKHAṆḌANAM.

Foll. 1*a*—4*a*.

By Varadācārya, also known as Nayinārācārya, son of Vēdāntadēśika. Same work as that described under R. No. 608(*c*) *ante*, but without the initial stanza and with the colophon given below.

Complete.

इति निखिलकवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथ(सुत)स्य (कुमार)वेदान्ताचार्यस्य कृतिषु अविद्याखण्डनं संपूर्णम् ॥

---

### (*b*) व्यावहारिकखण्डनम्.

### VYĀVAHĀRIKAKHAṆḌANAM.

Foll. 4*a*—11*a*.

By the same author as that of the last. Same work as that described under R. No. 608(*b*) *ante*, but with the end and the colophon as given below.

**End:**

सामान्यतो निर्देशे प्रागुक्तैरेव दूषणैः परिस्फुटदूषितोऽयं पक्ष इति अलमतिदूषणप्रयासेनेति सर्वं समञ्जसम् ॥

**Colophon:**

इति श्री(कुमार)वेदान्ताचार्यस्य कृतिषु व्यावहारिकखण्डनं समाप्तम् ॥

---

(*c*) प्रपञ्चमिथ्यात्वखण्डनम्.

PRAPAÑCAMITHYĀTVAKHAṆḌANAM.

Foll. 11*a*—20*a*.

By the same author as that of the last. Same work as that described under R. No. 1364(*b*) *ante*, but with a different end as given below.

तस्मात् व्यावर्तमानत्वानुमानस्य सोपाधिकत्वात् न साधकत्वम्। अतः केनापि प्रपञ्चस्य मिथ्यात्वं वक्तुं न शक्यत इति समञ्जसम् ॥

**Colophon:**

इति श्री(कुमार)वेदान्ताचार्यस्य कृतिषु प्रपञ्चमिथ्यात्वानुमानखण्डनं समाप्तम् ॥

---

(*d*) वादित्रयखण्डनम्.

VĀDITRAYAKHAṆḌANAM.

Foll. 20*a*—26*a*. Fol. 26*b* is left blank.

By Vēdāntadēśika. Same work as that described under No. 4992 of the D.C.S MSS., Vol. X.

Almost complete.

---

R. No. **1604.**

Paper. 11 × 9½ inches. Foll. 33. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Gorti Vēṅkaṭakṛṣṇa Śāstrigaḷ of Indupalli.

कृष्णविजयचम्पूः.

KṚṢṆAVIJAYACAMPŪḤ.

Fol. 33*b* is left blank.

A work in verse and prose describing the defeat of Bāṇāsura by Kṛṣṇa as the former imprisoned the latter's grandson Aniruddha for having secretly married Uṣā, the daughter of Bāṇāsura. The combat between Kṛṣṇa and Śiva who guarded the gates of Bāṇa's fort and the two kinds of fever emanating from them are also described herein.

By Vīrēśvara, son of Bhavānīśaṅkara and Lakṣmī of Bhāradvājagōtra and disciple of Gaṇṭi Kāśīpati.

Complete in three Vilāsas.

**Beginning:**

श्रीपतिरतमः(स्मानवतात्)पीनोरसि भाति यस्य मणिरुदितः ।
द्युमणिर्नाभीसरसीजातसरोजातविकसनायेव ॥
गौरीपतिरवतान्नः कोटीरे चाकशीति यस्येन्दुः ।
गङ्गाजठरे निवसन् सागरसूनुत्वसूचनायेव ॥

* * * *

अथ श्रीमन्नन्दनन्दनकथासुधारसमाधुरीपानसाधुरीतिकजनमेजयनामधेय-वसुंधराधौरेयसंलपितेन, इतरद्विजदुर्गमनिगमान्तप्रतिपाद्यमानार्थसमालपनचतुरेण, भागवतप्रसङ्गमयदिव्यपञ्जरनिवासनिबद्धादरेण, तेजोमयबिम्बफलरसानुभवनानन्द-मानमानसेन, श्रीशुकेन

* * * *

श्रीकृष्णस्य कथा महती कथितुमवक्रारम्भं प्राक्रम्यत ।

अस्ति हि समस्तप्रशस्तनृपमस्तकविन्यस्तमणिस्तबकमहस्ततचरणारविन्दः, अशेषमनीषिजनयथामनीषितार्थविशेषविश्राणनवृन्दारकनगो नगोत्तमधीरः

* * * *

विरोचनतनयो विशेषतो विज्ञातनयः ।

* * * *

शतं सुताः सन्ति बलेर्महौजसस्तदग्रजन्मास्ति महोग्रवीर्यवान् ।
भुवि प्रसिद्धं खलु बाणलक्षणं द्विषन्मनः शल्यमुखो जगाम यः ॥

**End:**

भवन्तं नैव जानामि महान्तममहानहम् ।
नारायणं महाज्ञेयमिति श्रुत्यश्चलोदितम् ॥
इति स्तुतो रमापतिः स्तवेन तुष्टमानसो
न ते भयं ज्वरान्ममेत्युदीर्य भूय ऊचिवान् ।
पठन्ति ये मम स्तवं समस्तकामदोहनं
समस्तु नास्ति तैरिह प्रशस्तता कुतस्ततः ॥

इत्युक्तवति भक्तजनवत्सलतया मन्दे गोविन्दे लसदानन्दसंदोहतुन्दिल-हृदयो दयारत्नाकरं

* * * *

पुण्डरीकाक्षं दक्षिणं प्रदक्षिणत्रयपुरःसरमदक्षिणो दाक्षायणीपतिज्वरो वरोत्तमाङ्ग-त्रयकृतसाष्टाङ्गप्रणामः संपूर्णकामः सन् यथाकाममनन्तरं जगाम ॥

**Colophon:**

इति श्रीमदमलविज्ञानधीप्रज्ञानिधीकृतजडसमाजभरद्वाजमहर्षिगोत्रपवित्रतरार्षेयसोमयाज्यभिख्याविख्यातसंतानपयःसरित्कान्तानन्यसदृशसंतानतरूभवद्भवानीशङ्करसंतानफलमध्यमणिना संमोदिताखिलगुणिना श्रीमल्लक्ष्मीगर्भरत्नाकरमध्यहीरेण हृद्यतमविद्योपदेशप्रकाशमतेः श्रीगण्ट्यकाशीपतेः प्रसादचन्द्रिकाचकोरेण श्रीवीरेश्वरेण विरचिते श्रीमद्बालालीलकटाक्षवीक्षणसुधाधारासंवर्धमानकवितालतास्तवकभव्ये श्रीकृष्णविजयचम्पूसंज्ञितमहाकाव्ये तृतीयो विलासः सम्पूर्णः ॥

---

R. No. **1605.**

Paper. $10\frac{1}{8} \times 9\frac{1}{2}$ inches. Foll. 196. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. P. Nārāyaṇacāri of Sākurru, Amalāpuram taluk.

**वैखानससूत्राणि.**

VAIKHĀNASASŪTRĀṆI.

The present MS. contains 32 Praśnas, of which—

Praśnas 1 to 7 form the Gṛhyasūtras; 8 to 10 form the Dharmasūtras; 11 forms the Pravarasūtras; and 12 to 32 form the Śrautasūtras.

For extracts from the Gṛhyasūtras, the Dharmasūtras and the Pravarasūtras, see M. Seshagiri Sastri's Report on a Search for Sanskrit and Tamil MSS., for the year 1893–94, No. 2, page 155.

For extracts from the Śrautasūtras, see R. No. 1336 *ante*, the MS. described under it breaking off in the 15th Khaṇḍa of the last Praśna which contains eighteen Khaṇḍas.

**End:**

दारुमयमाहवनीये प्रहरेत् । ध्यायन् नारायणं यत् प्रायश्चित्तमभिदद्यात्या नर्थक्यात् तत्रसङ्गे तत्कुर्यादापत्सु तद्धनं तद्धनमित्याह विखनाः ॥

**Colophon:**

इति द्वात्रिंशति(शे)प्रश्ने अष्टादशखण्डः ॥
अथ सौम्यानि, आपो मुञ्चामि, प्रातरनुवाके, पशौ यदि,

* * * *

अग्ने वाजस्य गोमत इत्यष्टादश ॥
इति वैखानस[गृह्य]सूत्रे द्वात्रिंशति(शः)प्रश्नः ॥

---

## R. No. **1606.**

Paper. 10⅞ × 9½ inches. Foll. 115. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. P. Nārāyaṇācāri of Sākurru, Amalāpuram taluk.

### (*a*) वैखानसश्रौतसूत्रव्याख्या.

### VAIKHĀNASAŚRAUTASŪTRAVYĀKHYĀ.

Foll. 1*a*—106*b*. Foll. 78*b* to 83*b* are left blank and hence the portion beginning from VIII Praśna, 14th Khaṇḍa to IX Praśna, 4th Khaṇḍa is wanting.

A commentary by Śrīnivāsadīkṣita or Vēṅkaṭēśa of Kāśyapagōtra, on the Vaikhānasaśrautasūtra which is described under R. No. 1336 *ante*. The author is said to have received the title Cakrāyudha by the grace of Cakrapāṇi (probably his teacher) and to have been the chief worshipping priest of the Tirupati temple.

Contains one to ten Praśnas.

**Beginning:**

वन्दे विखनसं साक्षाद्ब्रह्मवेद्यं मुनीश्वरम् ।
श्रुतिस्मृतीतिहासाद्यैः ऋषिभिः समभिष्टुतम् ॥
शब्दब्रह्मकृतोऽभियोगविभवाः साक्षात्कृतात्मेश्वराः
श्रीवैखानसधर्मशास्त्रनिपुणा ये नैमिशीयालयाः ।
ये तत्त्वप्रतिपादकाः कृतधियो ये विप्रनारायणाः
प्रख्याताः परिषत्सु वेदविदुषां तेभ्यो नमस्कुर्महे ॥
प्रारिप्सितस्य ग्रन्थस्य निर्विघ्नेन समाप्तये ।
वन्दे सूत्रवतीनाथं विष्वक्सेनमहं सदा ॥

* * * *

वेदिश्रोणिभवाब्जनाद्यधिपतेः पादद्वयीपूजकः
कश्चित्काश्यपगोत्रकीर्तिजनकः श्रीवेङ्कटेशाभिधः ।

पश्चादुद्रणचक्रपाणिकृपया चक्रायुधाख्यां दधत्
सूत्रं स्वं सह सूरिभिर्बहुबुधैर्व्याख्याति वैखानसम् ॥

श्रोत्रियाणां कृताद(तदा)राणामनधीना[नाम]खिलार्थानामप्यखिलाङ्गोपसंहाराशक्तानां वा समस्तानि कर्माणि कर्तव्यानि अन्धपङ्ग्वादीनामत्र(प्र)वर्तनमाज्यावेक्षणविष्णुक्रमाद्यशक्तत्वात् । अनिवृत्तिर्वा नित्यत्वात् ।

* * * *

अग्न्याधेयमिति । अथशब्दो मङ्गलार्थः । ओंकारश्चाथशब्दश्च मङ्गलार्थाविति कीर्तितौ इति शिक्षावचनात् । मङ्गलादीनि शास्त्राणि प्रथन्ते । प्रथमं त्वेतस्यर्तुनक्षत्रतिथीनाह—वसन्त इत्यादिना ।

**End:**

आपस्तम्बमतात् गोमतीजपान्ते यूपोपस्थानम् । ततः प्राजहितं समारोप्यायतनेऽग्निं प्रतिष्ठाप्योपावरोहयति । शतं ब्राह्मणान् भोजयेदित्याह भगवान् विखनाः ॥

**Colophon:**

इति दशमप्रश्नविंशतिखण्डव्याख्या ॥

इति श्रीवैखानसे(स) श्रौतसूत्रव्याख्याने श्रीनिवासदीक्षितविरचिते दशमप्रश्नः ॥

Foll. 107 and 108 are left blank.

---

(*b*) अर्चनाखण्डः.

ARCANĀKHAṆḌAḤ.

Foll. 109*a*—115*a*. Fol. 115*b* is left blank.

On the conduct of the daily worship of consecrated images of God Viṣṇu as laid down by Kaśyapa.

Complete in seven Khaṇḍas.

**Beginning:**

अथ विष्णोर्नित्यार्चनविधिं व्याख्यास्यामो नित्यकर्माणि च कृत्वा पद्माक्षततुलसीदामानि धारयन् केशवादिद्वादशनामभिरूर्ध्वपुण्ड्रं द्वादशधा कुर्वन् सोत्तरीयोष्णीषाङ्गुलीयकोभयपवित्रं धारयन् प्र तद्विष्णुस्तपत इति देवालयं प्रदक्षिणं प्रणामं च कृत्वा द्वारस्य दक्षिणभागे मणिकं प्रपद्ये इति द्वारपालकं प्रणम्य,

* * * *

तस्माद् द्वारदेशे तिरस्करिणीं करोतीति विज्ञायते ॥

**Colophon :**

इति प्रथमखण्डः ॥

अथ द्वितीयखण्डः—

अथ शाम्यन्तु घोराणीति स्वपाणिना पार्णि त्रिः संताड्य भगवतो बलेनेति देवं प्रणम्य अवधूतमिति देवं(प्र)बोध्य ।

**End :**

सत्यलोके प्रतिष्ठितमनादिजगद्बीजमशेषविशेषं नित्यानन्दममृतरसपानवत् सर्वदा तृप्तिकरं पुनरावृत्तिरहितं शाश्वतं परं ज्योतिः सर्वप्रवेशकमि(ति)विज्ञायते ॥

**Colophon :**

इति सप्तमखण्डः ॥ इति कश्यपर्षिविरचितोऽर्चनाखण्डः ॥

---

## R. No. **1607.**

Paper. 11 × 9½ inches. Foll. 27. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. P. Nārāyaṇācāri of Sākṟṟu, Amalāpuram taluk.

### अर्चनानवनीतम्.

### ARCANĀNAVANĪTAM.

This is a treatise in the form of a digest dealing with details in the conduct of worship of consecrated images of God Viṣṇu. It is based on the Arcanā-Khaṇḍa described under the last number and treats of the different subjects in the order in which they are found in it. The fifth Khaṇḍa herein contains the subjects dealt with in the fifth to seventh Khaṇḍas of the work referred to above. The author of this treatise is Kēśavācārya who quotes also from the Pāñcarātrāgama. He also refers to Nṛsiṁhavājapēyin in the introduction.

Contains the first five Khaṇḍas.

A list of the subjects contained in the work is given below:—

1*a*. अर्चावतारविशेषः.

1*b* स्वयंव्यक्तादिस्थानपञ्चकविवरणम्

2*a*. सदाचारक्रमः.

7*a*. विमानादिच्छायालङ्घनीनिषेधः.

7*a*. नित्यदीपविधिः.

7*b*. तिरस्करणविधानम्.

7*b*. षट्कालपूजा.

II खण्डः.

8*a*. ध्रुवार्चनविधिः.

8*a*, घण्टाताडनविधिः.

8a. पतद्गृहोद्धरण्यादिलक्षणम्.
8b. तिरुमञ्जनविधिः.
9a. अर्चकलक्षणम्.
9b. अमन्त्रार्चनलक्षणम्.
9b. पञ्चपात्रेषु प्रक्षेपणीयद्रव्याणि.
10a. वाद्यघोषकालः.

III. खण्डः.

10b. पीठार्चनम्.
10b. कूर्मासनलक्षणम्.
11a. स्वस्तिकासनलक्षणम्.
11a. प्राणायामलक्षणम्.
12a. पञ्चोपनिषन्न्यासः.
15a. भगवतः शङ्खादिधारणफलम्.
15a. संहारन्यासः.
15b. पुष्पन्यासः.

IV. खण्डः.

16a. आवाहनविधिः.
16b. उपचारविधिः.
17a. देव्यर्चनकालः.
17b. सांनिध्ययाचनम्.
17b. षोडशोपचाराः.
18a. त्रयोदशोपचाराः.
18a. षडुपचाराः.
18a. चतुरुपचाराः.
18b. ताम्बूलसमर्पणम्.
18b. दन्तधावनादिविधिः.
19a. प्लोतवस्त्रसमर्पणम्.
19a. तुलसीरहितमालानिषेधः.
19a. पुष्पभोगप्रमाणम्.
19b. मालिकालक्षणम्.
19b. परिवारार्चनम्.

V. खण्डः.

19b. धूपद्रव्याणि.
19b. दीपलक्षणम्.
20a. नीराजने त्रिर्भ्रमणम्.
20a. सप्तवाहनानि.
20a. स्नानान्तदर्पणम्.
20b. मात्रादानम्.
20b. मधुपर्कदानम्.
20b. षड्विधहविर्विधानम्.
21a. निवेदनरहस्यम्.
21b. नित्यहोमः.
22a बलिविधिः.
22b. विमानपालाः.
23a. द्वारदेवताः.
23b. वर्षादौ बलिक्षेपः.
23b. अर्चनपञ्चकम्.
24a. सेवाप्रकरणम्.
24b अष्टाङ्गनमस्कारः.
25b. शूद्रोच्छिष्टप्रायश्चित्तम्.
26a. पञ्चतीर्थानि.
26a शठकोपादिप्रशंसा.
27a. क्षमामन्त्रः.
27a. द्वात्रिंशदुपचाराः.

**Beginning :**

वन्दे वैकुण्ठसेनान्यं देवं सूत्रवतीसखम् ।
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम् ॥

श्रीवैखानसदुग्धाब्धौ मथि(थि)तं मतिमन्दरात् ।
अर्चनानवनीताख्यं केशवेनामृतं यथा ॥

श्रीवैखानसभृग्वत्रिकश्यपाङ्गिरसादिभिः ।
नृसिंहवाजपेयाख्या(येन) यथायोग्यं प्रकाश्यते ॥

सौकर्याय प्रयोक्तृणां शङ्कितस्योत्तरार्थकम् ।

अथ विष्णोर्नित्यार्चनविधिं व्याख्यास्यामो नित्यकर्माणि च कृत्वेत्यत्र अथ शब्दो मङ्गलार्थः । ओंकारश्चाथशब्दश्च मङ्गलार्थाविति स्मृतौ । विश्वव्यापक(न)-शीलत्वात् विष्णुरित्यभिधीयते । यस्माद्व्याप्तं जगद्येन तस्माद्विष्णुरिति स्मृतः । अर्चनाप्रशंसा—

आराधनानां सर्वेषां विष्णोराराधनं परम् ।
येन केन प्रकारेण विष्णोरर्चनमुत्तमम् ॥

आत्मार्थं वा परार्थं वा गृहे देवालयेऽपि वा ।
अर्चनं वासुदेवस्य लक्षकोटिगुणं भवेत् ॥

* * *

**Colophon :**

इति केशवाचार्यविरचितेऽर्चनानवनीते प्रथमखण्डविवरणं समाप्तमासीत् ॥

द्वितीयखण्डः.

अतः परं ध्रुवार्चनविधिं व्याख्यास्यामः ।

त्रिः संप्रहार्य पाणिभ्यां शाम्यन्त्विति समुच्चरन् ।
शब्दब्रह्ममयं(यी) घण्टा सर्वरक्षोविनाशिनी ॥

**End:**

पृष्ठीकृतासनं चैव परेषामभिवादनम् ।
ताम्बूलचर्वणं छत्रमकाले देवदर्शनम् ॥

खण्डवस्त्रयुतं चैव द्वात्रिंशदपचारकाः ।
अपचारांश्च विविधान् हरेर्यत्नेन वर्जयेत् ॥

**Colophon :**

इति केशवाचार्यविरचिते अचनानवनीते पञ्चमखण्डविवरणम् ॥

अर्चनानवनीतं समाप्तम् ॥

R. No. **1608.**

Paper. 11 × 9½ inches. Foll. 35. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. P. Nārāyaṇācāri of Sākurru Amalāpuram taluk.

(*a*) अर्चनाखण्डव्याख्या.

ARCANĀKHAṆḌAVYĀKHYĀ.

Foll. 1*a*—22*a*. Foll. 22*b* and 23 are left blank.

This is a commentary on the Arcanākhaṇḍa described under R. No. 1606(*b*) *ante*. It gives in full all the Mantras referred to in the text and explains very briefly the difficult words and passages of the same. The name of the commentator is not known.

Complete.

**Beginning:**

अथ विष्णोर्नित्यार्चनविधिं व्याख्यास्यामः। नित्यकर्माणि च कृत्वा पद्माक्षत-तुलसीदामानि धारयन् केशवादिद्वादशनामभिरूर्ध्वपुण्ड्रं द्वादशधा कुर्याच्चोत्त-रीयोष्णीषाङ्गुलीयकोभयपावित्रं धारयन् प्र तद्विष्णुस्तपत इति देवालयं प्रदक्षिणं प्रणामं च कृत्वा। प्र तद्विष्णुस्तपते वीर्याय। मृगो न भीमः कुचरो गिरिष्ठाः। यस्योरुषु त्रिषु विक्रमणेषु अधि क्षियन्ति भुवनानि विश्वा। मणिकं प्रपद्ये इति द्वारपालकं प्रणम्य। मणिकं प्रपद्ये महाबलं प्रपद्ये विमलं प्रपद्ये द्वारपालकं प्रपद्ये। यन्त्रिकां निरस्तं रक्षेत्यादाय। निरस्तं रक्षो निरस्ताघशंसो निरस्ता अरातयः।

**End:**

सत्यलोके प्रतिष्ठितमनादिजगद्बीजमशेषं नित्यानन्दममृतरसपानवत् सर्वदा तृप्तिकरं संसारभयमोचनं पुनरावृत्तिरहितं शाश्वतं परं ज्योतिः प्रविशतीति विज्ञा—यते॥

**Colophon:**

इति श्रीवैखानसः कश्यपप्रोक्तोऽर्चनासारसंग्रहो . . भट्टीयः समाप्तः॥

---

(*b*) वैखानससंग्रहस्मृतिमीमांसा.

VAIKHĀNASASAṄGRAHASMṚTIMĪMĀṂSĀ.

Foll. 24*a*—35*a*. Fol. 35*b* is left blank.

This work is intended to be a reply to those who deride the Brahmans of the Vaikhānasasūtra as being image-worshippers and

temple priests. It establishes the greatness of the consecrated images of God Viṣṇu and the importance and eminence of the priests employed in the worship of such images by quoting authorities largely from the Vaikhānasa Āgamas, the Vēdas, the Smṛtis, the Itihāsas and the Purāṇas in support of the arguments adduced in the work. The author is Śiṅgarācārya, son of Jagganārya of Bhārgavagōtra. He states that he was a worshipper of God Nṛsiṁha, that he was taught the Dvayamantra (vide No. 7318 of the D.C.S. MSS., Vol XIV) in a dream and that he was well-known as Narahari in the royal household of a king who ruled in the country lying to the north of the river Kṛṣṇā. The author mentions the following Vaikhānasa works as having been consulted by him in writing this treatise :—

(1) Sūtrabhāṣya (Vaikhānasakalpasūtrabhāṣya) by Nṛsiṁhavājapēyin; (2) Prāyaścitta by Bhāskarabhaṭṭa (3) (Vaikhānasa) Gṛhyaprayōgavṛtti by Sundararāja; (4) Tattvaprakāśikā by Narasiṁhācārya; (5) Dīpaka by Anantārya alias Baka who was an astronomer; (6) Pāñcarātranirākara by Vasantayājin.

**Beginning :**

इदानीं देवायतनसंबद्धत्वेन वैखानसानामसहिष्णवो देवलकत्वापादनात्। तेषां सुबोधार्थं देवलकनिर्णयः क्रियते। तत्रादावर्चां प्रतिपाद्य तदनन्तरमर्चकं प्रतिपादयति। प्र वः पान्तमन्धसो धिया यसे(तेम) हे शूराय विष्णवे चार्चत।

* * * *

स्मृतिश्च—

अतः परं प्रवक्ष्यामि दैवतं हि समूर्तकम् ॥
सर्वव्यूहं च विभवमर्चामन्तःस्वरूपिणम्।
नारायणं वासुदेवं विष्णुं सर्वात्मकं हरिम् ॥
तस्यार्चा द्विविधा प्रोक्ता वैदिकं तान्त्रिकं यतः।
पूर्वं वैखानसं प्रोक्तमपरं पाञ्चरात्रकम् ॥

इत्युत्तरपुरातन्त्रे भृगुः।

**End :**

अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥

* * * *

वैखानसानां पूर्वेषां ग्रन्थानालोक्य चाकरोत्।
स्मृतिवाक्यानि संगृह्य मीमांसान्यायनिर्णतः(यम्)॥

नृसिंहवाजपेयेन सूत्रभाष्यं करोति हि(च कारितम्) ॥
तथा भास्करभट्टेन प्रायश्चित्तं च कारक(रितं)म् ।
गृह्यप्रयोगवृत्तिंच(श्च) सुन्दराख्येन कारित(ता) ।
तत्त्वप्रकाशिकाख्यं च ग्रन्थविन्मद(त्तु सु)धीमणिः ॥
नरसिंहार्यनाम्नासौ प्रसिद्धः सर्वशास्त्रवित् ।
चतुर्वाट्टुकपूर्वं तु अनन्तार्य इति श्रुतः ॥
बकाख्येन पुनर्नाम्ना आर्यः कालविभागकृत् ।
कृतं तेन महाग्रन्थं दृष्टं दीपकनाम च ॥
वसन्तयाजिना प्रोक्तं पाञ्चरात्रनिराकरम् ।
एते वैखानसानां हि ग्रन्थाः सर्वार्थसाधकाः ॥
एतान् ग्रन्थान् समालोच्य तात्पर्यं नि(व)र्णितं मया ।
श्रुतिस्मृतीतिहासाद्यैः पुराणैर्बहुविस्तरैः ॥
तेषामपि क्वचिज्ज्ञात्वा ग्रन्थनिर्णीतसादरम् ।
श्रीमान् भार्गवगोत्रजो वरकविः सिंहासनोपासकः
स्वप्ने मन्त्रमुपेयिवान् द्वयमिति त्रैलोक्यदीपाङ्कुरम् ।
तन्मन्त्रेण विवक्षितस्स(स्य) चरणाम्भोजद्वयैकाश्रयः
श्रीवैखानससूत्रभावमकरोत्तात्पर्यसिद्ध्यै नृणाम् ॥
काश्चिद्राजनिकेतनो(नः) स्ववनिभृच्छ्रीकृष्णवेण्यो(ण्यु)त्तरे
तस्मिन्नुग्रतनुर्महानरगि(ह)रिर्नाम्ना प्रसिद्धश्च सः ।
पुंनाम्ना गृहनामवान् सुधनरः श्रीजग्गनार्यात्मजः
तेनेदं स्मृतिसंग्रहं विरचितं श्रीजग्गना(शिङ्गरा)र्येण हि ॥
स्वीकुर्वन्तु सुधीजनाः स्मृतिमिमां त्रैविद्यवृद्धाः पुनः
सद्वृत्ता गतमत्सराः सुमनसः संत्यक्तगर्वादिकाः ।
ते सर्वे मम वा कृतं कुकवितं शब्दादिपादाक्षरं
तत्सर्वं सफलं करोतु कृपया भोः शब्दशुद्धिं विना ॥

**Colophon:**

इति जग्गनार्यपुत्राशिङ्गराचार्यविरचिता श्रीवै ानससंग्रहस्मृतिमीमांसा ॥

## R. No. 1609.

Paper. 11×9½ inches. Foll. 155. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. P. Nārāyaṇācāri of Sākuṟṟu, Amalāpuram taluk.

### वैखानससूत्रव्याख्या.

### VAIKHĀNASASŪTRAVYĀKHYĀ.

A commentary on the seven Praśnas of the Vaikhānasagṛhyasūtra and on two of the three Praśnas of the Dharmasūtra : by Nṛsimhavājapēyin, son of Mādhavācārya.

Contains one to nine Praśnas complete.

**Beginning :**

अथ निषेकादिसंस्कारान् व्याख्यास्याम इत्यत्राथशब्दो मङ्गलार्थः, अत्र सूत्रस्यानुष्टि(ष्ठा)तारः अध्येतारः श्रोतारश्चायुष्मन्ता भवेयुरिति । रेतसा भार्याया योनिः निषिच्यते संसिच्यतेऽस्मिन्निति निषेकः, सः आदिः प्रथमो येषां ते च ते संस्काराः, संस्क्रियते पुमानेभिरिति संस्काराः ; सुडागमः, तान् निषेकादिसंस्कारान् वि–आ–ख्यास्यामः, विशब्दो विशेषे विस्तारे वा । आङ् अभिव्याप्तौ । ख्या प्रकथने ; चक्षिङः ख्याञ् इति ख्याञादेशो वा । स्यतासी लृलुटोरिति स्यप्रत्ययः । अतो दीर्घो यञीति दीर्घः । तिप्तस्झीति मस्प्रत्ययः । एवं व्याख्यास्याम इति सिद्धम् । अथैते किंनामानः कियन्तश्चेत्यत आह—ऋतुसंगमनेति । ऋतौ ऋतुकाले संगम्यते भार्यानेनेत्यृतुसंगमनम् । गर्भ आधीयते अनेन अस्यामिति गर्भाधानम् । पुमान् सूयत इति पुंसवनम् ।

* * * *

**Colophon :**

इति प्रथमप्रश्नैकविंश[ति]खण्डभाष्यः(म्) ॥

इति प्रथमप्रश्नभाष्यम् ॥

माधवाचार्यपुत्रेण नृसिंहाग्निचिता कृतौ(ते) ।
वाजपेयकृता भाष्ये प्रश्नोऽयं प्रथमो गतः ॥

**End :**

नित्यमन्वहं श्रुतिर्वेदः स्मृतिर्मन्वादिस्ताभ्यामुदितमुक्तं श्रुतिस्मृत्युदितं स्मार्तकर्म कुर्वद्भिरिति मानसेन कर्मणा हिंसादिचिन्त(न्ता) रहितेन भगवच्चिन्तनेन वाक्करणं वेदस्तोत्रपठनेन कायकर्मणा योगादिभिर्देवतार्चनकरणादिकं तेन काय-

कर्मणा । एवं नित्यं मनोवाक्कायकर्मभिः शनैः शनैः क्रमक्रमेण धर्म्यं सदाचार समाचरति सम्यगाचरति । इत्येवं प्रकारेण भगवान् मुनिः विखना आहोक्तवान् ॥

**Colophon :**

इति नवमप्रश्नपञ्चदशखण्डभाष्यः (म्) ॥

माधवाचार्यपुत्रेण नृसिंहाग्निचिता कृतौ(ते) ।
वाजपेयकृता भाष्ये प्रश्नोऽयं नवमो गतः ॥

---

R. No. **1610.**

Paper. 11 × 9½ inches. Foll. 61. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. P. Nārāyaṇācāri of Sākurru, Amalāpuram taluk.

**वैखानसगृह्यप्रयोगवृत्तिः.**

VAIKHĀNASAGṚHYAPRAYŌGAVṚTTIḤ.

This is an explanatory manual of the procedure relating to the various rites dealt with in the Vaikhānasagṛhyasūtra. By Sundararāja, son of Nārāyaṇārya of Maudgalagōtra and Vaikhānasasūtra. He is said to have been a worshipper of God Sundarēśa and mentions Vasantarāja as a commentator of the Vaikhānasasūtra. The subjects dealt with herein are—


3*a*. स्नानप्रयोगः.
5*a*. प्रातःसन्ध्यावन्दनप्रयोगः.
7*a*. माध्यंदिनप्रयोगः.
7*a*. ब्रह्मयज्ञक्रमः.
7*b*. पश्चिमसन्ध्यावन्दनप्रयोगः.
8*a*. पुण्याहप्रयोगः.
9*a*. अङ्कुरार्पणप्रयोगः.
10*a*. स्थण्डिललक्षणादि.
12*b*. आधारप्रयोगः.
15*b*. आधारप्रायश्चित्तप्रयोगः.
16*a*. सामान्यमन्त्राः.
16*b*. अन्तहोमप्रयोगः.
17*a*. नान्दीमुखप्रयोगः.
19*a*. निषेकादिसंस्कारप्रयोगः.
21*a*. जातकर्म.
21*b*. नामकरणम्.
22*a* अन्नप्राशनम्.
22*a*. चौलम्.
23*a*. उपनयनम्.
29*a*. उपाकर्म.
29*a*. समावर्तनम्.
32*a*. प्राणाग्निहोत्रविधिः.

34a. विवाहविधिः.
35a. कन्यापरीक्षा.
36a. विवाहक्रमः.
39a. आग्नेयस्थालीपाकः.
39b. औपासनम्.
39b. वैश्वदेवप्रयोगः.
42a. अग्निद्वयसंसर्गप्रयोगः.
43b. अग्निविभागक्रमः.
43b. समावर्तनप्रयोगः.
44b. औपासनप्रायश्चित्तम्.
46b. पुनराधानप्रयोगः.
46b. वैश्वदेवप्रायश्चित्तम्.
47a. कन्यकानां जातकर्मादि.
47b. वास्तुसवनप्रयोगः.
48a. शताभिषेकविधिः.
49a. सप्तविधपाकयज्ञप्रयोगः.
56a. गृहार्चनप्रयोगः.
58b. ग्रहशान्तिप्रायश्चित्तम्.

Complete.

**Beginning:**

ग्रामोत्तुङ्गनिरन्तमङ्गलनिधिः श्रीसुन्दरेशाचैनः
श्रीवैखानससूत्रमुद्गलकुलो नारायणार्यात्मजः ।
नाम्ना सुन्दरराज इत्यभिमतः शिष्टानुचारः परं
धीमानुत्तममातनोदभिनवं गृह्यप्रयोगक्रमम् ॥
वैखानसस्य सूत्रस्य यजुर्वेदानुसारिणः ।
वसन्तराजप्रमुखैः कृता व्याख्या सुविस्तरा ॥
तत्र गृह्यक्रमं वक्ष्ये संक्षिप्यैव यथामात ।
सौकर्याय प्रयोक्तृणां भीरूणां ग्रन्थगौरवात् ॥
गूढार्थसूत्रतात्पर्यमस्मत्प्रज्ञाभिमानतः ।
क्रियते सुष्ठ्वनुष्ठाननियमो वृद्धसेवया ॥
यदत्राग्राह्यमुत्सृज्य तद्ग्राह्यं गृह्यवेदिनः ।
सन्तः स्वीकुर्वन्तु(कर्तु)मर्हन्ति हंसाः क्षीरमिवाम्भसि ॥
एतद्धि सूत्रं शारीरमाज्ञया च कृतं मम ।
तदध्येतृजना ये वै ते मां यूयं समर्चत ॥

* * * *

श्रुतिशतप्रतिपादितभगवत्समाराधनरूपसमूर्तयज्ञप्रयोगप्रतिपादनपरायणैः भृग्वत्रिकश्यपमरीचिभिः प्रणीतानां भार्गवात्रिकाश्यपमरीच्याख्यानां ग्रन्थानां विषयतयापि मूलभूतं पुण्यमेकं श्रीवैखानससूत्रमित्यवगन्तव्यम् । तेन वैखानससूत्रेण निषेकादिसंस्कारसंस्कृतस्य द्विजन्मनः अत एव वैखानसाख्यां

भजते(तः) अस्मिन् सूत्रे त्रैवर्णिकोद्देशेन स्वीकरणक्रिया विधीयमानाः, बोधायनापस्तम्बादिवत् । एवं निषेकाद्याः संस्कारा अन्यैरपि धर्मशास्त्रकारैः विधीयन्ते ।

* * * *

**Colophon:**

इति सुन्दरराजीये वैखानसगृह्यप्रयोगवृतौ प्रथमखण्डाभिप्रायः ॥

ब्रह्मचर्याद्याश्रमिणां चतुर्णां स्नानप्रयोगः । सोऽपि नैमित्तिकक्रियामलापकर्षण(णादि)भेदेन पञ्चविधः ।

**End:**

अनलः शुचिरपां नाथो गुहः शेषः प्रजापतेः ।
पुरन्दरो विष्णुयमौ आवाह्या मध्यतः क्रमात् ॥
अल्पं ग्रन्थमनल्पार्थं व्याख्याकारं समाश्रितम् ।
प्रोक्तं सुन्दरराजेन मौद्गल्यान्वयजन्मना ॥

**Colophon:**

इति सुन्दरराजीये वैखानसगृह्यप्रयोगवृतौ ग्रहशान्तिप्रयोगः ॥

---

R. No. **1611.**

Paper. 10⅝ × 9⅝ inches. Foll. 70. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. D. V. Prakāśa Raogāru of Cocanāda.

(*a*) सुजनमनःकुमुदचन्द्रिका.
SUJANAMANAḤKUMUDACANDRIKĀ.

Foll. 1*a*—45*b*. Fol. 46 is left blank.

This is a prose work by Timmakavi, son of Kūcimañci Jagganāmātya of Kauṇḍinyagōtra and disciple of Dēvulapalli Sītārāmāntarvāṇi. The author is said to have obtained his skill in composition by the grace of Kukkuṭēśvara and to have studied the four Śāstras, Tarka (logic), Vyākaraṇa (grammar), Mīmāmsā and Vēdānta. The plot of the work is a story related by Indra to Mahābhāga of the Kaliṅga country in which Karāḷavaktra, a king of the Kēraḷa country, falls in love with a forest girl in the course of an hunting expedition and marries her. The story goes on saying that while attempting to catch a parrot required by her in a Śiva temple, he fell down and died muttering the name of Śaṅkara and thereby obtained salvation. The author salutes his great grandfather, Jaggakavi, who is the younger brother of Sujana.

Complete.

**Beginning:**

गौरीकुचद्वन्द्वविलिप्तचन्द्रश्रीचन्दनोद्भासितचारुमध्यः ।
मह्यं ददातु प्रसृतैः कटाक्षैः श्रेयांसि राजार्धलसत्किरीटः ॥

* * * *

प्रपितामहमहम(र)हरखिलसुकविजनविनुतकवि(वयि)ता(तृ)त्वं मे ।
जग्गकवीश्वरमनुजं सुजनस्य नमामि तिम्मकविराजः ॥
इतरार्थतत्पराणां सुकृतिस्थलदूषणात्मनां तु मम ।
कविताज्योत्स्नामनसां न ददाति मुदं हि कुकविचोराणाम् ॥
गुणे गुणे दोषलवस्य दुष्टो विलोकनं काम्यति युक्तमेतत् ।
वने वने गन्धिलपुष्पगन्धे शवस्य गन्धं खलु वाञ्छति श्वा ॥

चूर्णिका—

अस्ति . . . हस्तिहस्तप्रोद्धूयमानमहीरुहकुसुमनिकरपतितमरन्द-बिन्दुसंदोहमिलितगजदानप्रवाहकर्दमिताखिलभूप्रदेशा, परस्परविरोधसंघट्ट(मा)न-महिषविषाणजर्झरितलतावलीसमाक्रान्ता, संगरोन्मुखमहोक्षखुरपुटपटलसमुत्खात-प्रोद्धूतावनीरेणुधूसरितशाखिशाखाकुला,

* * * *

आमोदितसन्मार्गप्रचारापि दुर्मार्गसहिता हेमाचलाटवी दिश्युत्तरस्याम् ॥

**End:**

शृण्वन्ति ये पुण्यकथां मयोक्तां पठन्ति तेषां सफला भवन्तु ।
कैलासनाथस्य कृपाभिवृद्धेः मनोरथा वासवभक्तियुक्ताः ॥

इति वज्रिणमुदीर्य निर्गत्य सभायाः संविलोक्य तारकाः सवितरि पूर्व-गिरिशिखरमलंकरिष्यति द्विघटिकात्रयेणेति बुद्ध्वा समासाद्य मन्दाकिनीं कृत-सन्ध्याद्यनुष्ठानकलापः क्वचित् सत्यलोकं क्वचित् वैकुण्ठं क्वचित् कैलासमवलोक-यन् दीव्यति महान् महाभागः ॥

**Colophon:**

इति श्रीमत्कुक्कुटेश्वरप्रसादलब्धकवितासंपादितयशःसान्द्रेण निखिलमन्त्रि-कुलचन्द्रेण जिततताननकौशलकलापेन समाराधनमुदितकुमुदहितकलापेन कौण्डिन्यगोत्रपवित्रेण कूचिमञ्चिजग्गनामात्यपुत्रेण देवुलपल्लिकुलपयोनिधिराका-सुधाकरस्य सकलविद्याकरस्य परमपवित्रविचित्रतरबाणेः सीतारामान्तर्वाणेः त्रेणछा

समभ्यासितचतुःशास्त्रेण सकलसुजनाविधेयेन तिम्मकविनामधेयेन विरचिता सुजन-मनःकुमुदचन्द्रिका नाम गद्यकाव्यं समाप्तम् ॥

---

(*b*) सोमवल्लीयोगानन्दम्.

SŌMAVALLĪYŌGĀNANDAM.

Foll. 47*a*—70*a*. Fol. 70*b* is left blank.

This is a drama in one Act written in the form of Prahasana, which is one of the ten kinds of Rūpakas, and is intended to produce the sentiment of mirth or humour in the minds of the audience. The plot consists of overtures of love between an ascetic and an unchaste married woman. The author is Aruṇagirinātha, son of Rājanātha and grandson of Kaviprabhu who belonged to the Śāmavēdaśākhins and who was a source of terror to Nāgana, a poet, and also to the poets of the kingdom of Ballālarāya and who lived in the village of Parēndrāgrahāra (Parēndarami? in the Chittoor district). The author was called by the title Ḍiṇḍimakavisārvabhauma and was the grandson by the daughter Abhirāmanāyikā of Ḍiṇḍimaprabhu and the nephew of Sabhāpatibhaṭṭāraka.

Complete.

**Beginning:**

पूर्वं पूरितरेतसः शिखिमुखे शर्वादभूद्यस्ततः
शौरेः स्त्रीवपुषः सरोजजनुषः पश्चात्सुताकामिनः ।
स्वाराजात्तदनन्तरं मुनिवधूजाराग्रथ(दपि) प्रोद्भत-
श्चण्डांशोर्बडबाद्दतात् स दिशतु श्रेयांसि हास्यो रसः ॥

अपिच—

कल्याणायास्तु वः कामः कारुण्याद्यस्य वासवः ।
एकं प्रयुज्याहल्यायाः पुनर्लेभे सहस्रधा ॥

किंच—

यद्यस्ति दो(रो)षो मम पादघातं स्मृत्वा दृढं ताडय मां यथेष्टम् ।
वा सुप्रसीदेति वदन्तमन्तर्हसन्मुदे कीचकमस्तु भीमः ॥

* * * *

(नान्द्यन्ते)सूत्रधारः—(परितोऽवलोक्य) ।

अत्र खलु निरङ्कुशकितवनिक्षिप्तमधूच्छिष्टयष्ट्याकृष्टबाहुमूलरोमसव्यथलज्जित-कुपितबालविधवाजनकोलाहलमुखरितादिङ्मुखे महोत्सवे

* * * *

(विमृश्य) अस्ति खलु न(प)रेन्द्राग्रहारनायकमणेः सामवेदसांयात्रिकस्याष्ट-भाषाकवितासाम्राज्याभिषिक्तस्य बल्लालरायकटककविकुलगर्वपर्वतपवेः नागनकवि-नागकेसरिणः श्रीकविप्रभोः पौत्रः पुत्रः श्रीराजनाथदेशिकस्य ब्रह्माण्डभाण्डपि-चण्डमण्डलितविजयडिण्डिमरवचण्डिम्नः श्रीकण्ठागमशिखण्डमण्डनमणेः श्री-डिण्डिमप्रभोः दौहित्रः श्रीमदभिरामनायिकाम्बास्तनंधयः सभापतिभट्टारकाचार्य-भागिनेयः श्रीडिण्डिमकविसार्वभौम इति प्रथितविरुदनामा सरस्वतीप्रसादलब्ध-कवितासनाथः श्रीमानरुणगिरिनाथः । तेन कृतेन सोमवल्लीयोगानन्दनाम्ना प्रहसनेन सभानियोगमनुतिष्ठामि ।

* * * *

अहो फलितं(नम)मलिनं कर्म—

कविः स्वयं डिण्डिमसार्वभौमः संसद्गुणैकग्रहणोन्मुखीयम् ।
अस्मिन् प्रबन्धेवि(ऽभि)नयप्रगल्भा वयं च नाट्यैककलाविदग्धाः ॥

* * * *

(परिवृत्यावलोक्य च) एष च योगानन्दनामा मस्करी.

करात्तदण्डः कलितोर्ध्वपुण्ड्रः काषायवान् कक्षविलम्बिरोमा ।
सहैव शिष्येण धृतासनेन पद्भ्यां समायाति सपादुकाभ्याम् ॥

(इति निष्क्रान्तः ।)

प्रस्तावना ॥

(ततः प्रविशति योगानन्दनामा मस्करी शिष्यश्च.)

मस्करी—

शक्यो हि सोढुं सुरतोपयोगिताम्बूलमाल्याभरणाद्यभोगः ।
नमत्सु नारायणशब्ददानादहर्निशं शीर्यति हन्त शीर्षम् ॥

(विभाव्य शिष्यं प्रति)—पूर्वेद्युरन्योन्याङ्गस्पर्शे सति शिष्यस्य च (ष्यायाः) तस्याः सोमवल्ल्याः सात्त्विकविकारो महानासीत् । वत्स किं तदा दृष्टवानसि ?

End:

राजा—अलमलमन्यादृशवाचाटनेन । योगानन्द किं ते भूयः प्रियमुप-हरामि ? ।

मस्करी—किमितः प्रियमस्ति । तथापीदमस्तु भरतवाक्यम्—

कालाम्भोदा युवानो झलझलनिनदैः पूरिताशावकाशैः
पाथोवर्षाभिजातैर्विदधतु वसुधामुल्लसत्सस्यगर्भाम् ।
. . . स्वयमुरसि मुखे व्याहरन् सामरस्यं
दीर्घायुर्देवराजोऽप्यवतु वसुमतीचक्रमाचन्द्रतारम् ॥

(इति निष्क्रान्ताः सर्वे.)

**Colophon:**

इति डिण्डिमकविविरचितं सोमवल्लीयोगानन्दं नाम प्रहसनं संपूर्णम् ॥

The scribe of the original MS. adds—

श्रीदेवल्लान्वयाम्भोनिधितुहिनकरः सुब्बरायाभिधानो
धात्रब्दे चेषमासे गरुति च बहुले द्वादशीमन्दवस्रे ।
एतत् सम्यग्विलिख्य प्रहसनमसमं डिण्डिमार्यप्रणीतं
प्रादात् कौण्डिन्यगोत्राम्बुधिहिमरुचये सुब्बरायाभिधाय ॥

---

R. No. **1612.**

Paper. 11⅛ × 8½ inches. Foll. 211. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Rāja Gurukkaḷ of Rāmēśwaram.

(*a*) कारणागमः (प्रतिष्ठातन्त्रम्).

KĀRAṆĀGAMAḤ (PRATIṢṬHĀTANTRAM).

Foll. 1*a*—199*a*. Fol. 199*b* is left blank.

This is one of the well-known twenty-eight Śaivāgamas which deal with the worship of Śiva images in temples. These Āgamas treat of the construction of temples and the making of holy images, the conduct of their worship and festivals, and the philosophic and religious basis of such worship. The names of the twenty-eight Āgamas are mentioned in the extract given below. The first ten are called Śivabhēda and the remaining eighteen are called Rudrabhēda. The Kāraṇāgama is said to contain ten million Granthas. This Āgama is said to have been taught by Rudra to Brahman and to consist of seven Saṁhitās (recensions), viz., Māhēndra, Kāraṇa, Durga, Pāvana, Bhīma, Vidvēṣa and Māraṇa. Similar particulars regarding the other twenty-seven Āgamas are also given in the first chapter.

Contains forty-two Paṭalas in the Pratiṣṭhātantra of the Kriyāpāda. The subjects dealt with herein are—


1*a*. तन्त्रावतारः.
5*b*. मन्त्रन्यासविधिः.
11*b*. आह्निकविधिः.
15*b*. नित्यपूजाविधिः.
65*b*. अर्चनाङ्गविधिः.
70*a*. मध्याह्नार्चनभोजनविधिः.
75*b*. सायंहोमादिविधिः.
86*a*. अर्धयामादिविधिः.
90*a*. प्रत्यूषार्चनविधिः.
92*b*. प्रदोषार्चनविधिः.
96*a*. गार्हपत्यादिलक्षणम्.
97*b*. मासपूजाविधिः.
113*b*. घृतस्नानविधिः.
115*b*. क्षौद्रपूजाविधिः.
117*b*. घृतकम्बलपूजाविधिः.
118*b*. फाल्गुने दधिपूजा.
120*a*. चैत्रे दमनपूजा.
123*a*. वैशाखे गन्धपूजा.
124*b* ज्येष्ठमासे फलपूजा.
125*b*. आषाढे क्षीरपूजा.
126*b*. नवोदकपूजाविधिः.
127*b*. श्रावणे शर्करापूजाविधिः.
128*a*. भाद्रपदे अपूपपूजाविधिः.
129*a*. अन्नपूजाविधिः.
130*a*. कृत्तिकादीपपूजा.
131*b*. कृत्तिकादीपनिर्णयः.
132*b*. कृत्तिकादीपोत्सवविधिः.
140*b* आर्द्राव्रतनिर्णयः.
142*b*. विघ्नेश्वरपूजा.
144*a*. भक्तोत्सवविधिः.
145*a*. पूरकर्म.
149*a* व्रतगानम्.
151*a*. दर्शनविधिः.
152*a* संक्रमोत्सवविधिः.
152*b*. संक्रमादिननिर्णयः.
154*b*. संक्रमपूजाविधिः.
158*a*. पुण्योत्सवविधिः.
161*a*. शिवरात्रिनिर्णयः.
163*b*. शिवरात्रिविधिः.
164*b*. वसन्तोत्सवविधिः.
169*b*. नित्यपूजाप्रायश्चित्तविधिः.
183*a*. सायंकालपूजाप्रायश्चित्तम्.
188*a*. लिङ्गबेरादिसङ्ग्रहविधिः


**Beginning:**

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥

शकलेन्दुशिरोमणिशोभितनुं सुरराजसुपूजितपादयुगम् ।
करुणारसपोषितभक्तगणं कलये मनसा करिराजमुखम् ॥

भूधरोर्ध्वत्रिशृङ्गेषु रत्नशृङ्गनिकेतने ।
तत्रासीनं महादेवं श्रीकण्ठं सुरवन्दितम् ॥
योगपीठस्थितं देवं वामे गौरीसमन्वितम् ।
सर्वदेवावृतं सिद्धमुनिगन्धर्वसेवितम् ॥
आदौ तं कारणोऽपृच्छत् कारणं श्रोतुमिच्छया ।

* * * *

ब्रह्मोवाच—
देवदेव महेशान स्थित्युत्पत्तिलय[:]प्रभो ॥
जगतामभिवृद्ध्यर्थं योगिनां मुक्तिहेतुकम् ।
शिवज्ञानं परं गुह्यं वद मे परमेश्वर ॥
श्रीरुद्र उवाच—
त्वया पृष्टमिदं सर्वं वक्ष्येऽहं सुखसाधनम् ।
कारणाख्यं महातन्त्रं प्रतिष्ठातन्त्रमुत्तमम् ॥
कोटचेकग्रन्थसंयुक्तं कर्षणाद्यर्चनान्तकम् ।
संक्षेपेणाधुना विप्र शृणु वक्ष्ये समाहितः ॥
तस्मादेतच्च सद्भावं मूलभेदोपभेदयुक् ।
कामिकं योगजं चिन्त्यं कारणं त्वरि(जि)तं तथा ॥
दीप्तं सूक्ष्मं सहस्रं च ह्यंशुमान् सुप्रभेदकम् ।
विजयं चैव निश्वासं स्वायंभुवमथानलम् ॥
वीरं च रौरवं चैव मकुटं विमलं तथा ।
चन्द्रज्ञानं च बिम्बं च प्रोद्गीतं ललितं तथा ॥
सिद्धं सन्तानं सर्वोक्तं पारमेश्वरमेव च ।
किरणं वातुलं चैव ह्यष्टाविंशतिसंहिताः ॥
विपुलार्थं ततोऽतीतं तत्त्वं मन्त्रार्थदर्शनम् ।
तन्त्रं तेन समाख्यातं तन्त्रसंज्ञाश्च संहिताः ॥
तेषु पूर्वं दश प्रोक्तं शिवभेदं च संज्ञकम् ।
तथापराष्टादशको रुद्रभेदमिति स्मृतम् ॥

* * * *

**Colophon:**
इति श्रीकारणे प्रतिष्ठातन्त्रे तन्त्रावतारविधिपटलः ॥

अस्मिंस्तन्त्रे समासेन मन्त्रोद्धारं शृणु द्विज ।
मन्त्रं विना क्रिया नास्ति कर्षणाद्यर्चनान्तकम् ॥
शिवः सदाशिवश्च(श्चैव) महेशो मूर्तयस्त्रिधा ।
वाच्यवाचकताशून्यो वाङ्मनोऽतीतगोचरः ॥

**End:**

देवीं विहाय देवो वा देवी वा केवला यदि ।
शत्रुभिः संगृहीतं चेत् स्थितस्यैवानुरूपतः ॥
समावाद्यान्तरस्थस्य प्रतिष्ठां च समाप्य च ।
कल्याणं कारयेत्तत्र विधिना देशिकोत्तमः ॥
स्थापनान्ते तु बेराद्यैरानीतं चेतदन्यके ।
देशं संस्थाप्य विधिना पूजयेन्नित्यमादरात् ॥

* * * *

स्थापयेत्तु क्रमेणैव शास्त्रदृष्टेन वर्त्मना ।
कल्याणं कारयेच्छम्भोः पूर्ववत् सर्वमादरात् ॥

**Colophon:**

इति कारणे प्रतिष्ठातन्त्रे सर्वागमप्रायश्चित्ते लिङ्गबेरादिसंग्रहो नाम द्विचत्वारिंशः पटलः संपूर्णः ॥

---

(*b*) शिवालयनिर्माणस्थापनदीपिका.

ŚIVĀLAYANIRMĀṆASTHĀPANADĪPIKĀ.

Foll. 200*a*—211*b*.

This is a digest of the Āgamas relating to the subject of the construction of Śiva temples and the fixing and consecration of images of God Śiva therein.

Contains the Śivaliṅgapratiṣṭhāvidhi, Śivaliṅgasthāpanavidhi complete and the Parivārasthāpanavidhi incomplete.

**Beginning:**

अथ वक्ष्ये विशेषेण लिङ्गस्थापनमुत्तमम् ।
धन्यं यशस्करं चायुर्वर्धनं पुत्रवर्धनम् ॥
भुक्तिदं मुक्तिदं चैव दानयज्ञफलप्रदम् ।

तथा सुप्रभेदे —

सर्वासेद्धिकरं पुण्यं सर्वयज्ञफलप्रदम् ।
लिङ्गसंस्थापनादन्यत् फलं किंचिन्न विद्यते ॥

तस्मात् सर्वप्रयत्नेन लिङ्गसंस्थापनेरितम् ।
सुक्षेत्रे सुतिथौ वारे सुयोगे सुमुहूर्तके ॥
तत्पूर्वे चाङ्कुरं कृत्वा पञ्चसप्तनवाहके ।
अङ्कुरादि प्रतिष्ठान्तमादि शैवेन कारयेत् ॥

* * * *

**Colophon :**

इति शिवालयनिर्माणस्थापनदीपिकायां शिवलिङ्गप्रतिष्ठाविधिः पटलः ।

**End :**

अथ परिवारस्थापनाविधिरुच्यते—

स्थापनं परिवाराणां वक्ष्ये लक्षणपूर्ववत् ।
परितो हर्म्यबाह्येषु परिवाराणि कल्पयेत् ॥
अन्तर्मण्डलके कुर्यादीशे चण्डेश्वरालयम् ।
श्रीकराख्यं विमाने तु चण्डेशं स्थापयेत्ततः ॥

* * * *

उपागमे—

श्रेष्ठा वारा गुरुज्ञेन्दुशुक्रे च (क्राणां) परिकीर्तिताः ।
पक्षच्छिद्रं च पर्वेण रिक्तां चैव विवर्जयेत् ॥
कोणाङ्गारदिनेशानामुपरागं च वर्जयेत् ।

---

R. No. **1613.**

Paper. 11 × 9½ inches. Foll. 33. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Peri Vissannagāru of Bandarulankā.

(*a*) सर्ववेदान्तसारसंग्रहः.

SARVAVĒDĀNTASĀRASAṄGRAHAḤ.

Foll. 1*a*—12*b*.

A summary of the essential teachings of the Upaniṣads in regard to the differentiation of soul and non-soul and to the realisation of the former : by Saccidānandasvāmin, a disciple of Rāmānandēndrasvāmin.

Complete.

**Beginning :**

श्रीकृष्णं परमानन्दं जगज्जन्मादिकारणम् ।
सत्यज्ञानानन्तरूपं प्रणमामि जगद्गुरुम् ॥

अस्मिन् लोके तापत्रयार्कसंतप्ताः जननमरणप्रवाहरूपसंसारे पतिताः तन्निवृत्युपायमजानन्तः दुःखानन्तरं दुःखमेव प्राप्नुवन्ति । तेषां विवेकार्थं श्रीकृष्णानुग्रहवशात् आत्मानात्मविवेकरूपं सर्ववेदान्तसारसङ्ग्रहं कथयिष्यामः——अद्य आवरणविचारः क्रियते। प्राणिनां दुःखं केन भवति ? शरीरपरिग्रहवशात् भवति। कर्म केन भवति ? रागद्वेषादिना भवति । रागद्वेषादयः केन भवन्ति ? अभिमानेन भवन्ति । अभिमानः केन भवति ? निक्षेपात्मिकयाविद्यया भवति ।

**End :**

एवं रीत्या जीवन्मुक्तः मानावमाननिन्दास्तुतिषु विकाररहितः सन् यदृच्छया प्राप्तान्नपानादिना स्वशरीरनिर्वाहं कुर्वन् प्रारब्धाधीनशरीरपातपर्यन्तं संचरन् पतितेऽस्मिन् शरीरे घटे नष्टे घटाकाशो महाकाशात्मना यथा तथा अयं ब्रह्मविदुत्तमः ब्रह्मस्वरूपेण निर्विकल्पात्मना संतिष्ठति(ते) । न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येतीति तस्य प्राणोत्क्रमणाश्रवणात् प्राणे ब्रह्मणि लीने सति स्वयं केवलात्मनाकाशवत् तिष्ठतीत्यर्थः । एवं विदेहकैवल्यसिद्धिः । नातः प्रतिपाद्यमस्ति। सर्वमनवद्यम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामानन्देन्द्रस्वामिशिष्यश्रीसच्चिदानन्दस्वामिना विरचितः सर्ववेदान्तसारसङ्ग्रहः समाप्तः ॥

---

Transcribed in 1915–16 from a MS. of M.R.Ry. Peddinṭi Yajñanārāyaṇagāru of Sākurru.

(*b*) अद्वैतपञ्चरत्नव्याख्या——किरणावली.

ADVAITAPAÑCARATNAVYĀKHYĀ: KIRAṆĀVALĪ.

Foll. 13*a*—33*b*.

A commentary on Śaṅkarācārya's Advaitapañcaratna, also called Sōpānapañcaka, which is described under R. No. 1229(*b*) *ante* : by Kṛṣṇānandasarasvatī, a disciple of Saccidānandayōgin. The author salutes also Vāsudēvēndrayōgin in the beginning.

The original of this MS. is said to have been copied by Manthā Vīrarāghava, the copying having been completed on Tuesday, the 13th

day of the bright fortnight of the Phālguna month in the year Viśvā-vasu.

Complete.

**Beginning :**

मन्दस्मितमुखाम्भोजं रमालंकृतवक्षसम् ।
वन्दारुजनमन्दारं वन्देऽहं यदुनन्दनम् ॥

पुण्डरीकाजिनधरं विलसत्फाललोचनम् ।
ज्ञानमुद्राञ्चितकरं दक्षिणामूर्तिमाश्रये ॥

* * * *

यदीयभाष्यकमलस्यन्दमानमरन्दतः ।
विद्वद्भृङ्गस्तृप्तिमेति शंकरं तमुपाश्रये ॥

यस्य प्रसादकणिकानौका तारयते नतान् ।
संसारसिन्धुं तं वन्दे सच्चिदानन्दयोगिनम् ॥

यस्योपदेशमाहात्म्याज्जडा अपि विनिर्गताः ।
संसारबन्धात् तं वन्दे वासुदेवेन्द्रयोगिनम् ॥

क्वाहं क्व भगवत्पादकृतिर्गाम्भीर्यजन्मभूः ।
तथाप्यत्रावगाहं मे काङ्क्षते खलु मानसम् ॥

* * * *

गुरुपादाम्बुजद्वन्द्वध्याननिर्मलमानसः ।
आरच्य (रचये) पञ्चरत्नस्य विवृतिं किरणावलीम् ॥

अथ खलु परमकृपालवो भगवतो (न्तो) भगवत्पादाः निखिललोकं संसार-दावानलपरिपीतमुपलभ्यात्मज्ञानामृतमेव तदुपशमनं सुखसाधनं चाहुः ।

* * * *

बालस्य चं जन्मान्तरकृतसुकृतमहिम्ना तज्जन्मकर्तव्यजिज्ञासासंभवात् तादृश-मेवावनतं शिष्यं गुरुरुपदिशति । सोपानारोहणन्यायेन पुरुषार्थसाधनानि क्रमेणो-पदिदिक्षुः वेदो नित्यमधीयतामित्यादिना बालस्यादितः कर्तव्यमुपदिशति—

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां
तेनेशस्य विधीयतामपचितिः काम्ये मतिस्त्यज्यताम् ।
पापौघः परिधूयतां भवसुखे दोषोऽनुसंधीयता
मात्मेच्छा व्यपनीयतां निजगृहात्तूर्णं विनिर्गम्यताम् ।

वेद इति । वेदः सार्थवादमन्त्रविधिकलापः ब्राह्मणस्यापि विधिरूपत्वात् । साङ्ग इति शेषः; अङ्गाध्यायनं विना ज्ञानानुपपत्तेः ।

**End:**

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां
पूर्णात्मा सुखमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम्।
प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरे श्लिप्यतां
प्रारब्धं त्विह भुज्यतामथ परब्रह्मात्मना स्थीयताम ॥ ५ ॥

एकः अन्तः पर्यवसानभूतः यस्मिन् तस्मिन्। स्वव्यतिरिक्तपुरुषरहिते देशे।

* * * *

अथ तथाभूतवत् स्थितायास्तन्निवृत्तौ स्वरूपापत्तिरेवेति न कोऽपि दोष इति संक्षेपः ॥

अज्ञातं ब्रह्मतत्त्वं ये (तु) ज्ञातुमिच्छन्ति ये नराः।
ते बुधास्समा(सं)श्रयन्तु सततं किरणावलिमादरात् ॥

मदीयकृतिमध्ये यो भूषणं दूषणं जनः।
विचार्यैव वदेत्तस्मै महते विधये नमः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्याद्वैतविद्याचार्यवर्यश्रीमत्सच्चिदानन्दयोगीन्द्रचरणकमलयुगभृङ्गायमाणमानसबालश्रीकृष्णानन्दसरस्वतीविरचिता अद्वैतपञ्चरत्नकिरणावली[स]व्याख्या संपूर्णा ॥

---

R. No. **1614.**

Paper. 10⅝ × 9½ inches. Foll. 320. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of the Adyar Library, Adyar.

The fly-leaf gives the contents of the work.

**अद्वैतसिद्धिव्याख्या—गुरुचन्द्रिका.**

ADVAITASIDDHIVYĀKHYĀ: GURUCANDRIKĀ.

A commentary on the Advaitasiddhi of Madhusūdanasarasvatī, which is described under No. 4527 of the D.C.S. MSS., Vol. IX: by Brahmānandasarasvatī, pupil of Paramānandasarasvatī. The author wrote another commentary on the same work called Laghucandrikā.

Breaks off in the Dṛgdṛśyasambandhabhaṅgaprakaraṇa.

**Beginning:**

सदनन्तचिदानन्दे जगती यत्र जायते।
रजतादीव शुक्त्यादौ तदेवाहं परा गतिः ॥

तत्त्वं वेदय वेदगं नरहरे नैषोऽधिकारीति चेत्
स्तम्भादाविरभूः कुतोऽसुरतमश्चण्डांशुतामाश्रितः।

द्रोहेणापि न तु स्मरत्ययमतो नेहानुकम्पेति चेत्
तत्किं त्वं न तदीश यच्चदनिशं स्नेहादितः स्मर्यते ॥

* * * *

श्रीनारायणतीर्थश्रीपरमानन्दपादयोः ।
ब्रह्मानन्दयतिर्नत्वा तनोत्यद्वैतचन्द्रिकाम् ॥

सारस्वतसमुद्रेकश्चन्द्रिकायाः परं फलम् ।
प्रासङ्गिकतया ध्वान्तपराभूति(:) ध्रुवा(भवेत्) ॥

कुमुद्वतीर्बोधयामि सारस्वतसरस्वतीः ।
महदामोदमोदाय चित्तचन्द्रिकयानया ॥

अनुमित्यनङ्गत्वे अनुमितिं प्रति उक्तरीत्या प्रयोजकत्वाभावे । व्युदसनीयतया विचारसाध्याभावप्रतियोगितया । विचाराङ्गत्वं विचारप्रवृत्तिप्रयोजकज्ञानविषये फले प्रतियोगितया विशेषणत्वम्; मिथ्यात्वसंशयाभावरूपफलं ज्ञात्वा तदुद्देशेन विचारे प्रवर्तत इत्यर्थः । पञ्चावयवसपरिकरन्यायरूपविचाराभावे हि मिथ्यात्वस्य निश्चयात् संशयः । ततश्च संदिग्धाद्वैततात्पर्यसंशयरूपात् दोषात् एकमेवाद्वितीयमिति वेदान्तवाक्यादपि संशय एव, न निश्चयरूपाद्वैतसिद्धिः ।

* * * *

**Colophon:**

इति गुरुचन्द्रिकायां विप्रतिपत्तिवाक्यस्य विचाराङ्गत्वनिरूपणं समाप्तम् ॥

**End:**

एतेनोक्तरूपैर्विशिष्टधीस्वरूपयोग्यत्वाभावेऽपि उक्तरूपावच्छिन्नभावादिस्वरूपमेव संबन्धं प्रतियोग्यधिकरणसंबन्धिरूपवारणायावच्छिन्नान्तमिति परास्तम् । अपि च उक्तस्वरूपयोग्यताविषयतासंबन्धेन विशिष्टबुद्धिं प्रति वाच्या । तथाच विषयितावटितविशिष्टबुद्धिस्वरूप.(?)

---

R. No. **1615.**

Paper. 10⅘ × 9½ inches. Foll. 247. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Pañcāpagēśa Śāstrival. Sanskrit College, Cochin.

न्यायरत्नाकरः.

NYĀYARATNĀKARAḤ.

Foll. 1*a*—246*b*. Foll. 202*b* and 203 are left blank.

According to the introduction, Vyāsayati denounced the tenets of the Advaita-Vēdānta and established the doctrines of the Dvaita-Vēdānta in his Nyāyāmṛta. This work was in turn criticized by Madhusūdana-sarasvatī in his Advaitasiddhi which again was denounced by Rāmācārya in his Taraṅgiṇī. This last work was refuted by Brahmānanda in his Gauḍa-Brahmānandīya. Vanamālimiśra then took up the cudgels on behalf of the Dvaita school in his work Saurabha. The work under notice is intended to support this Saurabha and condemn the Brahmānandīya. The arguments on every point in each of the above mentioned works are summed up herein before the author adds his own reasons. He mentions in the introduction the following :—(1) Ānandatīrtha, son of Madhyagēha, (2) Jayatīrtha, the author of Tattvavinirṇaya and Anuvyākhyā and three Khaṇḍanas, (3) Vyāsayati, the author of Nyāyāmṛta, Tarkatāṇḍava, Tātparyacandrikā, Bhēdōjjīvana and Mandāramañjarī, and (4) Vanamālimiśra of Vyāsa family and the author of Saurabha.

Breaks off in the Bhāvibādhakaśaṅkābhaṅga in the first Paricchēda and contains two breaks, viz., fol. 109*a*—140*b* and 142*a*—168*b*, on account of which the portion from the end of Paricchinnatvavicāra to the beginning of Pratyakṣaprābalyaprakaraṇa excepting a small portion in Ābhāsatulyatāprakaraṇa is wanting.

**Beginning :**

वन्दे मन्देतरगुणमणिग्रामविश्रामभूमिं
नित्यप्रत्यस्तमितनिखिलावद्यरूपान्धकारम् ।
गम्यं सम्यग्विरतिभजनध्यानविज्ञानयोगैः
श्रीशं व्यासं रघुयदुपतिं सत्यविश्वस्य हेतुम् ॥
छान्दोग्यादिषु देवतोत्तमतया ख्यातो जगद्देशिको
वायुर्मध्यगृहार्यविश्रुतकुले जातः स मध्वात्मना ।
गीताभाष्यमुखाः कृतीर्विरचयन् योऽद्वैतवादादिकान्
प्रत्याख्यत्तममन्दबोधभगवत्पादं प्रपद्येऽधुना ॥
यः श्रीतत्त्वविनिर्णयाभिधमनुव्याख्याभिधानीं कृतिं
तानि त्रीणि च खण्डनानि विशदं वाक्यं गुरूक्ताध्वना ।

मायावादिमताटवीं परशुना न्यायोच्चयेनाच्छिनत्
सोऽयं श्रीजयतीर्थ आदिशतु मे दुर्वादिभङ्गे मतिम् ॥
श्रीन्यायामृततर्कताण्डवकृती तात्पर्यसच्चन्द्रिका
भेदोज्जीवनमूर्जितार्थहृदयं मन्दारमञ्जर्यपि ।
येनैताः कृतयः कुशाग्रमतिना सर्वोपजीव्याः कृता-
स्तस्मै व्यासयतीश्वराय शिरसा नम्रेण कुर्वे नतिम् ॥
श्रीमद्व्यासयतीशपूज्यचरणैर्न्यायामृतं संभृतं
तल्लोकेषु तरङ्गिणीं विरचयन्नद्वैतसिद्ध्यादिकान् ।
अद्वैतिप्रतिरोपितान् विषतरूनुन्मूलयामान्य(स) यो
रामाचार्यमिमं स्मरामि मनसा व्यासान्वयाग्रेसरम् ॥
श्रीरामार्यतरङ्गिणीनिरसनप्रत्यग्रगौडादिम
ब्रह्मानन्दवचोविधूननकृते जग्रन्थ यः सौरभम् ।
सोऽयं श्रीवनमालिनैष्ठिकमणिर्व्यासान्ववायोद्भवः
श्रीकृष्णार्यवरानुगो विजयतां षड्दर्शनीवल्लभः ॥
श्रीव्यासव्रतिसार्वभौमरचितन्यायामृतास्वादने
रामाचार्यतरङ्गिणीघनपरीवाहावगाहादिषु ।
प्रौढश्रीवनमालिमिश्ररचितश्रीसौरभाघ्राणने
त्यक्त्वान्योत्कलिकं मनो मम पुनर्नित्यं समुत्कण्ठते ॥
श्रीन्यायामृतदूषणाय रचिता याद्वैतसिद्धिः पुरा
तद्भङ्गाय तरङ्गिणी प्रवहते या तामिलां स व्यधात् ।
ब्रह्मानन्दयतिर्मितंपचमतिस्तद्दूषणायाधुना
कुर्वेऽहं वनमालिसौरभदिशा श्रीन्यायरत्नाकरम् ॥

तत्र आदौ तावत् न्यायामृते—

विघ्नौघवारणं सत्याशेषविश्वस्य कारणम् ।
करुणासिन्धुमानन्दतीर्थबन्धुं हरिं भजे ॥

इत्यनेनोपक्षिप्तविश्वसत्यत्वस्थापनोपयुक्तपरपक्षप्रतिक्षेपाय ननु मिथ्यैव विश्व-मिति तदुपक्षेपः कृतः । ननु नैवं परपक्षोपक्षेपः संभवति ब्रह्मादिषु बाधा-

द्यापत्तेः इति चेत्, स्यादेवं यदि विश्वत्वावच्छिन्नं पक्षत्वेन परिगृह्यते, नैवम्, किंतु विप्रतिपत्तौ पक्षत्वेन निर्दिष्टस्यैव विश्वशब्देन ग्रहणेन नोक्तदोषावकाश इत्याशयेन ब्रह्मप्रमान्येन वा सप्रकारेण वा अबाध्यत्वे सति असद्विलक्षणत्वे सति ब्रह्मान्यत्प्रतिपन्नोपाधौ त्रैकालिकनिषेधप्रतियोगि नवेति विप्रतिपत्तिरभिहिता । अत्र ब्रह्मणि बाधासिद्धिवारणाय ब्रह्मान्यदित्युक्तम् । अत्राद्वैतसिद्धावुक्तम्—विश्वस्यैव धर्मित्वमस्तु । नचोक्तदोषः, पक्षतावच्छेदकैक्ये तस्यादूषणत्वात्, समानप्रकारकविरहज्ञानस्यैव प्रतिबन्धकतया ब्रह्मत्वावच्छेदेन साध्यहेत्वभावनिश्चयेऽपि विश्वत्वावच्छेदेन तदनिश्चयादिति ।

अत्र तरङ्गिणीकृतः—यद्यप्येवं तथापि ब्रह्मणि मिथ्यात्वदृश्यत्वज्ञाननिश्चयस्य भ्रमत्वप्राप्त्या तत्त्वनिर्णयो न स्यात् । अतो वादकथया तत्त्वनिर्णयसिद्धये ब्रह्मान्यदिति विशेषणमावश्यकमेवेत्याहुः ।

अत्र गौडब्रह्मानन्दाः यदि विश्वत्वरूपावच्छेदकावच्छेदेन मिथ्यात्वानुमितिरुद्देश्या स्यात्, तदा परं ब्रह्मतुच्छयोः साध्यहेत्वभावात् तज्ज्ञानं तत्र भ्रमः स्यादिति दूषणमुच्यते(च्येत), नैवम्, किंतु विश्वसामानाधिकरण्येनानुमितिरुद्देश्या । एवंच वियदादावेव विश्वसामानाधिकरण्येनानुमितेः प्रमात्वसंभवात् भ्रमत्ववारणमफलम् । ततो बाध्यत्वान्तमेव पक्षतावच्छेदकमस्तु इत्याहुः ।

वनमालिमिश्राचार्याः—यदि हि पक्षतावच्छेदकीभूतविश्वत्वादिकं धर्मितावच्छेदकीकृत्य बाधासिद्धौ स्यातां तदा तद्वारकं विशेषणमफलम् । यदि पुनर्विश्वत्वादिकं धर्मितावच्छेदकीकृत्य बाधासिद्धौ तदा तद्वारणाय ब्रह्मान्यदिति विशेषणमावश्यकमिति आचार्याणामाशय इति प्राहुः ।

**End:**

अत एव पीतः शङ्ख इति शङ्खत्वप्रत्यक्षेऽप्यनुवर्तते । पीतभेदप्रत्यक्षे तु नेति युक्तं भेदानवगाहिज्ञानस्याबाधकत्वमिति बाधकधीबोध्यस्य . . . . न बाध्यतेति प्राहुः ।

अत्राह गौडः—यत्तावत्प्रत्यक्ष . . . . भाविबाधकम् । न लिङ्ग . . . . प्रत्यक्षविरोधेन, लिङ्गादेरबाधकत्वात् ।

* * * *

तत्र यद्येवं शङ्कितप्रामाण्यकं बाधकं भवति, तथापि परोक्षस्यापरोक्षस्य च

शङ्कितप्रामाण्यकत्वेन निश्चितप्रामाण्यकं नास्तीत्याचार्याणामाशयः अनाशङ्कित-प्रामाण्यकबाधशङ्का निराकृता ।

Fol. 247 contains some passages unconnected with this work.

---

R. No **1616.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 66. Lines, 20 in a page. Tēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Vanka Jagannātha Śāstrigāru of Indupalli.

The fly-leaf gives the contents of the work.

तत्त्वचिन्तामणिव्याख्या—आलोकः.

TATTVACINTĀMAṆIVYĀKHYĀ: ĀLŌKAḤ.

By Jayadēva. Same work as that described under No. 3998 of the D.C.S. MSS., Vol. VIII.

Contains the Prāmāṇyavāda and the Anyathākhyātivāda complete.

**Beginning:**

मङ्गलप्रकरणं समाप्य प्रेक्षावत्प्रवृत्त्यङ्गं निःश्रेयसफलप्रदान्वीक्षकीतत्संबन्धं प्रदर्शयन्नेवानन्तर्यपरेणाथशब्देन मङ्गलाचरणपूर्वकं तदभिधेयमाह—अथ जगदेवेति । माध्यमिकः प्रत्यवतिष्ठते—ननु प्रमाणादीनामिति । ननु प्रामाण्यग्रहो न प्रवृत्तेर्हेतुः, व्यभिचारात् अन्यथासिद्धेश्चेति शङ्कते—अथेति । न च यस्येति । यद्व्यतिरेकज्ञानमात्रं यत्प्रतिबन्धकमित्यर्थः । सामान्येन नियमलाभार्थ-मुभयमुपात्तम् । प्रत्येकनियमे तु प्रथमे व्यभिचारसंशयमात्रप्रतिबध्ये व्याप्ति-ज्ञाने, द्वितीये अयोग्यतानिश्चयमात्रप्रतिबध्ये शाब्दज्ञाने व्यभिचारात् ।

**End:**

प्राञ्च इति । असद्विषयत्वं भ्रमत्वे न तन्त्रम् । अनुव्यवसायस्यापि भ्रम-त्वापत्तेरित्यत्राप्रामाण्ये व्यधिकरणप्रकारकत्वमेव तन्त्रमिति सदसद्विषयतायां विवादः । सोऽपि वृथा, विशिष्टस्यास्मन्मतेऽनतिरेके प्रथमस्यैव समीचीनत्वात् । प्राञ्चस्तु विषयतावच्छेदकं न प्रत्येकमित्यसद्विषयतामाहुः ॥

**Colophon:**

तत्त्वचिन्तामण्यालोके अन्यथाख्यातिवादः समाप्तः ॥

## R. No. 1617.

Paper. 11 × 8½ inches. Foll. 31. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1915-16 from a MS. of the Library acquired in 1911–12.

सिद्धान्तसारः.
SIDDHĀNTASĀRAḤ.

By Appagoṇḍācārya (Kandāḍa). Same work as that described under R. No. 387(*a*) *ante*.

Complete.

---

## R. No. 1618.

Paper. 10⅞ × 9¼ inches. Foll. 34. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Guntūr Sōmappa Śāstrigāru of Tuni, Gōdāvari district.

(*a*) केरलरहस्यम्.
KĒRALARAHASYAM.

Foll. 1*a*—20*b*.

A treatise on horoscopy in astrology by Śukrācārya. It is so called perhaps on account of the birth place of the author. It is also called Kēralānanda.

Contains Adhyāyas three to ten, but wants the beginning in the third Adhyāya and the final passages of the fifth to eighth and the tenth Adhyāyas.

**Beginning:**

बाधकवेधकप्रतिबन्धकवशात् ग्रहतारतम्यान्तरज्ञानधुरंधरस्य प्रयोजकत्वम् । रवे . . . श्च फलम् । ध्यानसङ्ग्रहः । राजप्रसादः । पशुलाभः । आत्मशक्त्युत्साहः ।

* * * *

नीचचन्द्रः । कष्टम् । भातृवर्गपीडा । तुङ्गकुजः । सेनाधिपत्यम् ।

* * * *

दशमस्थाने स्थितश्चेत् भ्रातृद्वेषी भवति । एकादशस्थाने स्थितश्चेत् वाहन-दौर्बल्यं किंचिद्विद्यावान् भवति । व्ययस्थाने स्थितश्चेत् पुत्रदौर्बल्यं धैर्यहीनो भवति । एवं शत्रुभावनिर्णयः ॥

**Colophon:**

इति श्रीशुक्राचार्यविरचिते केरलरहस्ये भावनिरूपणं नाम तृतीयोऽ-ध्यायः ॥

**End:**

भग्नावस्थास्थितो जीवो(वः) सर्वदा भग्नजीवनः ।
बुद्धिहैन्यं च चापल्यं कुरुते शास्त्रपाठकः ॥

**Colophon:**

इति श्रीशुक्राचार्यविरचिते केरलजातकानन्दे ग्रहावस्थाफलनिरूपणं नाम नवमोऽध्यायः ॥

सवितरि तनुसंस्थे शैशवे व्याधियुक्ते नयनगतसुदुःखी नीचसेवानुरक्तः ।
न भवति गृहमेधी धैर्ययुक्तो मनुष्यः चपलविपुलमूर्तिः पुत्रपत्नीविहीनः ॥

* * *

आषाढे मार्गशीर्षे च पुष्ये च ज्येष्ठमध्यमे । प्रजायते.

---

(*b*) उडुदशाप्रदीपिका.

UḌUDAŚĀPRADĪPIKĀ.

Foll. 21*a*—34*b*.

This is a treatise in horoscopy specially dealing with the influence exerted by planetary combinations and situations. The author refers to Parāśara's work in the introduction as having been consulted by him. The subjects treated of in the various chapters are—

१. राश्यधिपतयः.
२. राजयोगः.
३. दरिद्रयोगः.
४. शुभफलदशा.
५. शुभफलान्तर्दशा.
६. निधनहेतुदशा.
७. नवग्रहजातयः.
८. कीटराश्यंशभेदाः.
९. पक्षिराश्यंशभेदाः.
१०. मारकदशा.
११. मासदशा.
१२. राजयोगभेदाः.

Breaks off in the 12th Pariccheda.

**Beginning:**

वन्दे मन्दारमूलस्थं सीतापतिमहर्निशम् ।
ब्रह्मादिभिः सेव्यमानं भ्रातृभिः परिवेष्टितम् ॥
श्वेताम्बुजस्थिता देवी वाक्प्रदा सततं नृणाम् ।
कर्पूरवत् सिताकारा नित्यं वसतु वाचि मे ॥

* * * *

पराशरमुनिं नत्वा तद्वाक्यान् संनिरीक्ष्य च ।
वक्ष्ये ह्युडुदशामार्गं पूर्वशास्त्रानुसारतः ॥
कुजशुक्रज्ञचन्द्रार्कबुधभार्गवभूमिजाः ।
गुर्वर्कयमनेज्याः(जशनिज्ञाः)स्युर्नायकाः क्रमशोऽपि ते ॥

* * * *

दशाच्छिद्रेषु कालेषु मारको मरणप्रदः ।
अन्यस्मिन् योगद इति प्राहुरार्या मनीषिणः ॥

**Colophon:**

इत्युडुदशाप्रदीपिकायां प्रथमः परिच्छेदः ॥

**End:**

शुभयोगेक्षणाभ्यां तु नानाजातेर्धनागमः ।
पूण्यतीर्थेन लाभस्स्यात् पुराणश्रवणेऽपि वा ॥
ज्योतिःशास्त्रप्रसङ्गो वा ब्रह्मविद्भिः समागमः ।

* * * *

एवमादि दशाः प्रोक्ताः ग्रहाणां कालवित्तमैः ।
सम्यगालोच्य मतिमान् वदेत् सर्वप्रयत्नतः ॥
इति मानदशा प्रोक्ता सर्वशास्त्रार्थसंमता ।
विद्वद्भिरनुगृह्यन्तां ज्योतिःशास्त्रप्रवर्तकैः ॥

**Colophon:**

इत्युडुदशाप्रदीपिकायां मानदशा नाम एकादशः परिच्छेदः ॥

* * * *

अन्तर्दशादिनान्येव तद्दशालिखितं पुनः ।
नखेन्दुनाप्तं दिवसाः तच्छेषं घटिका भवेत् ॥

Fol. 34 contains a few Telugu passages relating to the Daśanirṇaya.

---

R. No. **1619.**

Paper. 10½ × 9½ inches. Foll. 149. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Rāmanātha Śāstriyaḷ of Kṛṣṇarājapuram, Trichinopoly district.

## बोधायनप्रयोगादर्शः.
## BŌDHĀYANAPRAYŌGĀDARŚAḤ.

Foll. 76*b*—83*b* and 149*b* are left blank.

Kanakasabhāpati, son of Vaidyanātha of Maudgalyagōtra, wrote at first a work, called Kārikāmañjarī, which is a metrical manual of procedure relating to the Bōdhāyanasūtra. He also compiled a Mantrānukramaṇi or index of the Mantras used in the rituals. He then proceeded in this work to explain them by quoting from the Sūtras and Smṛtis.

The Pūrvaprayōga breaks off in the Aupāsanaprayōga, and the Aparaprayōga breaks off in the Ūnaśrāddha.

**Beginning:**

प्रणम्य विघ्नेश्वरमम्बिकां च बौधायनं स्मार्तशुभप्रयोगम् ।
बालप्रबोधाय विचार्य सूत्रं क्रियाक्रमं च स्फुटतः प्रवक्ष्ये ॥

कनकसभापतिर्नामाहं कारिकामञ्जरीमुक्त्वा मन्त्रानुक्रमणीं चोक्त्वा अनन्तरं प्रयोगादर्शं प्रयोगक्रमेण वक्ष्ये । प्रथमं प्रयोगश्लोका वक्ष्यन्ते—

स्नानं पवनमाचामं मन्त्राचमनमुक्तवत् ।
मन्त्रप्रोक्षणपुण्याहमिति स्नानादिपञ्चकम् ॥
अग्निमु(ग्नेर्मु)खं हरि(परी)भाषां मुक्ताग्निं ग्रहयज्ञकम् ।
नान्दीमुखं प्रतिसरं यथाशक्ति तथा क्रमम् ॥
गर्भादिप्रायश्चित्तान्तमृतुसंवेशनक्रियाम् ।
गर्भादा(धा)नं पुंसवनं सीमन्तोन्नयनं ततः ॥
विष्णु(ष्णो)र्बलिर्जातकर्म ब(फ)लीकरणहोमकम् ।
जातकर्मावशेषं च तथा कन्याक्रियामथ ॥
औपासनादेकदेशग्रहणं नामकर्म च ।
उपनिष्क्रमणं मुक्तिक्रियां च कर्णवेधनम् ॥
आयुष्यनक्षत्रहोमौ चौलमक्षरधारणम् ।
उपवीतविधिं पश्चादुपनीतिं समित्क्रियाम् ॥
दण्डनीरमुपाकर्म तर्पणादिक्रियामथ ।
गायत्र्या समिदाधानं विद्यारम्भविधिं ततः ॥
ब्रह्मचर्यावृत्तचित्तं होतृव्रतविसर्जनम् ।
शुक्रियमवान्तराख्यं तयोरुत्सर्जनं क्रमात् ॥

गोदान(नं च)तदुत्सर्गमुपनिषद्व्रतं ततः ।
तदुत्सर्गमुपाकर्मोत्सर्जनं स्नानकर्म च ।

तूष्णीं स्नानमनुकूलं शकुनादिक्रियास्तथा ।
यक्षिण्योश्च बलिं तत्र विवाहारम्भमेव च ॥

कन्याप्रेषणमर्घाद्यं कन्यादानविधिं ततः ।
विवाहं च प्रयाणादि कूश्माण्डोपासनादिकम् ॥

ध्रुवारुन्धत्युपस्थानमथोपयमनव्रतम् ।
नियमं पक्कहोमं च व्रतोत्सर्गोपवेशनम् ॥

पञ्चमेऽहन्युक्तकर्म त्वाग्नेयस्थालिपाककम् ।
शयनं शकलं होमं वैश्वदेवादिहोमनम् ॥

ततो वैवाहिकश्राद्धं स्थालीपाकविधिं ततः ।
ततः पिण्डपितृयज्ञमाग्रायणमृतुक्रियाम् ॥

समित्समारोपणाख्यामात्मारोपणमन्यतः ।
अश्न्य(ग्न्य)नुगतमहुतमादशाहादतः परम् ॥

द्वादशाहादूर्ध्वचित्तं षण्मासादूर्ध्वचित्तकम् ।
आहुतिद्वयसंपर्कमुपरागमुखाहतम् ॥

विधुरौपासनं चैव विधुराद्यग्निसंभवम् ।
प्रायश्चित्तानि चान्यानि शुभकर्माणि तत्क्रियाम् ॥

अथ स्नानविधिरुच्यते—

नदीषु देवखातेषु तटाकेषु सरस्सु वा ।
पञ्चपिण्डाननुद्धृत्य न स्नायात्परवारिषु ॥

अथ संकल्पः—

मया कृतानां पापानामिह पूर्वेषु जन्मसु ।
क्षयद्वारेष्टसिद्ध्यर्थं स्नास्यामि परिशुद्धये ॥

**End** of the Pūrvaprayōga :

अथ वनस्पतिहोमः—यत्र वेत्थ वनस्पते देवानां गुह्या नामानि । तत्र हव्यानि कामये स्वाहा इति.

**Beginning** of the Aparaprayōga :

विघ्नेश्वरं महासेनं धातारं हरिमीश्वरम् ।
प्रणमामि गिरिं(रं) लक्ष्मीं पार्वतीं च मुहुर्मुहुः ॥
सर्वान् देवान् प्रणम्याथ श्रीगुरुं संप्रणम्य च ।
बोधायनमृषिं नत्वा दृष्ट्वा सूत्रादिकं ततः ॥
अशुभानां प्रयोगं तु प्रयोगाणां क्रमेण च ।
बालादिकानां स्पष्टाय प्रवक्ष्यामि विशेषतः ॥

इति बोधायनोक्तसूत्रं तत्प्रयोगं च तत्तत्कर्मयोग्यनानास्मृतिवचनानि समेत्य मौद्गलेन वैद्यनाथतनयेन कनकसभापतिना कृता कारिकामञ्जरीक्रमेण पूर्वकारिकासारं च समेत्य तेनैव प्रयोगादर्शाख्या व्याख्या वक्ष्यते—

अथ यद्याहिताग्निर्निर्मारं गच्छत्युपतप्ततया जरया वा । निर्मारं मरणसंशयं गच्छतीत्यर्थः । उपतप्तवान् ज्वरेणेत्यर्थः । इति सूत्रोक्तं किञ्चित् । अथातो द्विजातीनां दहनकल्पं व्याख्यास्यामः—

जातस्य वै मनुष्यस्य ध्रुवं मरणमिति विजानीयात् ।
तस्माज्जातं मृतं चैव संपश्यन्ति सुचेतसः ॥

तस्माज्जातस्य वै मनुष्यस्य द्वौ संस्कारावृणभूतौ भवतो जातसंस्कारो मृतसंस्कारश्चेति ।

* * * *

प्रेतकृत्ये आदौ स्नात्वा सर्वदा प्राचीनावीतं कृत्वा दक्षिणामुखः कुर्यात् । दक्षिणा प्राची नामैषा हि पितॄणां प्राची दिगिति विज्ञायते इति सूत्रन्यायेन दक्षिणाप्राच्यभिमुखः सन् एकवस्त्रयुक्तः आर्द्रवस्त्रेण सकृत् प्राणायामं कृत्वा एकपवित्रेण कृतपवित्रेण सह गोत्रं नाम चोक्त्वा ।

**End** of the Aparaprayōga :

ऊनश्राद्धविधिः—पूर्वोक्तसौरप्रकारेण दोषरहितकाले कर्तव्यम् । यद्वा वक्ष्यमाणप्रकारेण वा कुर्यात् ।

* * * *

ऊर्वं पञ्चदशाहस्तु चत्वारिंशच्छतत्रयात् ।
ऊनाब्दिकं प्रकुर्वीत मृतेऽह्नि पुनराब्दिकम् ॥

इति मौद्गल्यस्मृतौ ।

## R. No. 1620.

Paper. 11 × 9½ inches. Foll. 64. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Narasiṁhācāriyar of Villiyambākkam, Chingleput district.

### रघुवीरचरितम्.

RAGHUVĪRACARITAM.

This is a dramatic composition based on the story of Rāma: by Cakravarti Vēdāntasūri of Śrīvatsagōtra and son of Vēṅkaṭaguru of Villiyambākkam, a village near Chingleput. The author intended this drama to be staged on the occasion of the festival in the Vaiśākha month of God Varadarāja at Conjeeveram. The work is left unfinished by the author and breaks off in the fourth Act.

**Beginning:**

क्षेमाय प्रसरीसरीतु जगतः पद्मास्तनक्ष्माधर-
क्रीडां दैत्यरिपोर्ददद्भिरसकृद्दिव्यायुधैर्भूषिता ।
सैषा बाहुचतुष्टयी भगवतस्तस्यैव या संश्रिते-
ष्वष्टैश्वर्यविधौ च सौरतरवीं दीक्षां सदा रक्षति ॥

(नान्द्यन्ते) सूत्रधारः—(सबाहूत्क्षेपम्) भो भो मारिषप्रभृतयोऽस्मत्पारिषदाः, शृण्वन्त्विमं सावधानतयास्मत्संदेशम् । सशिरःप्रणामम्)—

तमःपरस्ताद्विरजं यदेतद्विश्वाधिकं शश्वदुशन्ति सन्तः ।
क्षेमाय नश्चर्मदृशामपीदं स्तम्बेरमाद्रेः शिखरे चकास्ति ॥

तस्यैव किल भगवतः परमेष्ठिकृतपरिचर्यापदानतुरगमेधसमिद्धवपापरिमलसुरभिलाधरपल्लवस्य श्रीमतो देवाधिराजस्य वैशाखमहोत्सवयात्रामधिकृत्य प्रतिष्ठमाना ब्रह्मविदः समादिशन्ति—

विभवावतारचर्यास्वेकामुत्प्रेक्ष्य नाटकारूढाम् ।
अर्चात्मनोऽस्य देवस्याग्रे विस्तारय प्रयोगेण ॥

इति । सविमर्शम् ।

* * * *

अस्ति खलु

श्रीचक्रवर्तिकुलसंभव एष धीमान् सूनुश्च वेङ्कटगुरोर्विनयप्रधानः ।
वेदान्तसूरिरिति यं कवयोऽपि सर्वे वैपश्चितीषु गणनासु समुद्गृणन्ति ॥

तेनैव स्वयं निर्माय रघुवीरचरितनामधेयं नव किमपि रूपकं प्रयोक्तव्यामित्यसकृदनुरुध्यमानैरस्माभिस्तदिदमध्यापितः परिशिक्षितश्च पात्रवर्गः ।

* * * *

सत्यमियमार्या ध्रुवा गीतिः सिद्धाश्रमयात्रायां भगवता विश्वामित्रेण प्रसाद्यमानैरस्त्रोपनिषन्निकायैराप्यायितस्य सकलरक्षोवधदीक्षितस्य सलक्ष्मणस्य रामस्य प्रवेशमप्यभिव्यनक्ति । तदेहि तद्भूमिकापरिग्रहं यथोचितं पात्रेषु प्रयुञ्जामहे ॥

(इति निष्क्रान्ताः.)

॥ प्रस्तावना ॥

(ततः प्रविशति विश्वामित्रोपदिश्यमानवर्त्मा सलक्ष्मणो रामः) रामः—(जनान्तिकम्) अहो भगवतो विश्वामित्रस्य निरवधिकोऽनुग्रहातिशयः । यतः ।

अस्त्राणि तादृशतपोविभवार्जितानि ब्रह्मर्षिरेष समुपादिशति स्म मह्यम् ।
को वात्र हेतुरथवा भगवन्त एते कस्मिन् कदाचिदभिसंपदमर्पयन्ति ॥

**End:**

वत्स लक्ष्मण, क्व तत्रभवानस्मद्गुरुर्विश्वामित्रः । किं ब्रवीति ? यजमानस्य राजर्षेरनुश्राव्यमाणान् प्रयोगानुपदिदृक्षुः भवता सह प्रस्थातुकामः शतानन्देन जनककुलपुरोधसोपचर्यमाणस्तस्यैवावसथे प्रतिवसतीति । तर्हीदमागतोऽस्मि । एहि वत्स सहैव साधयामः ।

(इति निष्क्रान्ताः सर्वे.)

**Colophon:**

इति विल्लियंपाक्काग्रहारवासिनः वात्स्यवेदान्ताचार्यस्य कृतौ रघुवीरचरिते तृतीयोऽङ्कः ॥

* * * *

मारीचः—(श्रुतिमभिनीय)

कथं नु विषहेतरां परिभवं मुनीनामपि
प्रसह्य वितनोमि किं मम धिगस्तु मारीचताम् ।
हठाच्चलति किंचिदप्यहह रामचापाञ्चले
भयेन मम वेपते त्रुटितसन्धिबन्धं मनः ॥

भवतु यावच्छक्ति प्रलोभयाम्येनं मैथिलम् । ततश्चेमानपि मुनिवटून् रघुडिम्भावष्टम्भगर्वितान् वचोविभीषिकया निवारयामि । (प्र) अयि विदेहराज यद्दच्छोपनतमपि श्रेयः सामान्यजन इव परिहरसि ।

यतः—

न स्वायंभुवशासनेऽपि गरिमा नैव प्रभो रक्षसां
तत्ताद्दङ्महनीयविक्रमकथोद्भानैश्च संतुष्यसि ।
व्यर्थं जोषमुपैषि कापुरुषवद्यद्ब्रह्मसद्मन्यपि
श्लाघन्ते चरितं तवैव बहुशो राजर्षिचर्याविदः ॥

The following stanza is added in the end.

एतावदेव रचितमेतन्नाटकमद्भुतम् ।
सर्वशास्त्रेषु विदुषा वात्स्यवेदान्तसूरिणा ॥

---

## R. No. 1621.

Paper. 11 × 9½ inches. Foll. 38. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

### चतुर्वर्णाश्रमाह्निकम्.

### CATURVARṆĀŚRAMĀHNIKAM.

On the daily routine of rituals and conduct to be observed by men of the four castes and the four orders of life: by Bhaṭṭōjidīkṣita, son of Lakṣmīdharasūri.

Complete.

**Beginning:**

नन्दीश्वर नमस्तुभ्यं साम्बानन्दप्रदायक ।
महादेवस्य सेवार्थमनुज्ञां दातुमर्हसि ॥

इति नन्दिकेश्वरं संप्रार्थ्य ।

विघ्नेश विधिमार्ताण्डचन्द्रेन्द्रोपेन्द्रवन्दित ।
नमो गणपते तुभ्यमनुज्ञां दातुमर्हसि ॥

इति गणपतिं प्रार्थयित्वा(र्थ्य) ।

* * * *

अथाह्निकं लिख्यते । तत्र माधवीये कूर्मपुराणम्—

ब्राह्मे मुहूर्त उत्थाय धर्ममर्थं च चिन्तयेत् ।
कायक्लेशतदुद्भूतं ध्यायीत परमेश्वरम् ॥

इति । तदुक्तं विष्णुपुराणम्(णे)—

'रात्रेः पश्चिमयामस्य मुहूर्तो यस्तृतीयकः।
स ब्राह्म इति विज्ञेयो विहितः सुप्रबोधने ॥'

इति। तत्र स्वापे प्रायश्चित्तमुक्तं स्मृतिचन्द्रिकायाम्—

ब्राह्मे मुहूर्ते या निद्रा सा पुण्यक्षयकारिणी।
तां करोति तु यो निद्रां पादकृच्छ्रेण शुध्यति ॥

**End:**

स्वप्नाधिपतिमन्त्रेण कालरात्रेर्नाममन्त्रेणेत्यर्थः।
गुरवे दक्षिणां दद्याद्वस्त्रहोमपशूनपि।
यद्युक्तदक्षिणाभावेऽप्यशक्तो होमकर्मणि ॥
हिरण्यं दक्षिणां दद्यात् तदानीमेव वा बुधः।
वस्त्रकुम्भादिसकलं तथात्र प्रतिपादयेत् ॥
ब्राह्मणान् भोजयेद्भक्त्या सुशीलान् वेदपारगान्।
भक्ष्यैश्च पायसाद्यैश्च रत्नानि च बहूनि च ॥
अनेन विधिना यस्तु शान्तिं कुर्वीत शक्तितः।
तस्य वर्षशतायुष्यं भवत्येव न संशयः ॥

**Colophon:**

इति पदवाक्यप्रमाणज्ञश्रीलक्ष्मीधरसूरिसूनुभट्टोजिदीक्षितविरचितचतुर्वर्णाश्रमाह्निकम् ॥

---

R. No. **1622.**

Paper. 11×9½ inches. Foll. 15. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpalakṛṣṇammagāru of Indupalli, Gōdāvari district.

Fol. 15*b* is left blank.

## कालनिर्णयसंग्रहः.

## KĀLANIRṆAYASAṄGRAHAḤ.

This is said to be an epitome of Hēmādri's work treating of the determination of proper times for the performance of various ceremonies, feasts and fasts enjoined in the Dharmaśāstra, the subjects treated of being—

1*a*. मलमासनिर्णयः.
1*b*. तिथिनिर्णयः.
2*b*. नक्तनिर्णयः.
2*b*. जन्माष्टमीनिर्णयः.

2b. एकादशीनिर्णयः.
3b. श्रवणद्वादशीनिर्णयः.
4a शिवरात्रिनिर्णयः.
4b. ग्रहणानिर्णयः.
4b उपाकर्मनिर्णयः.
5a. संक्रान्तिनिर्णयः.
6a. अमावास्यानिर्णयः.
6a. वृद्धिश्राद्धकालः.
7b. श्राद्धकालः.
8a. सपिण्डीकरणकालः.
9a. पूर्वाह्णादिविभागः.
10a वैश्वदेवादिकालः.
11a. सन्ध्यादिकालः.
12a. दन्तधावनवर्ज्यकालः.
14b. गृहारम्भकालः.

By Bhaṭṭōjidīkṣita.
Complete.

**Beginning:**

अथ हेमाद्रिकालानिर्णयसंक्षेपः। मासश्चतुर्धा—त्रिंशता दिवसैः सावनः। सूर्यस्य संक्रमादासंक्रान्तिः सौरः। पक्षद्वितयेन चान्द्रः। अश्विन्यादिरेवत्यन्तनक्षत्रपरिवर्तनेन नाक्षत्रः। दिवसोऽपि चतुर्धा—अहोरात्रः सावनः। सौरमासत्रिंशांशः सौरः। तिथ्यवच्छिन्नश्चान्द्रः। चन्द्रसंबन्धनक्षत्रावच्छिन्नो नाक्षत्रः। अब्दश्चिधा—उक्तं च ब्रह्मसिद्धान्ते—

चान्द्रसावनसौराणां मासानां तु प्रभेदतः।
चान्द्रसावनसौरास्तु त्रयः संवत्सरा अमी॥

इति। नाक्षत्रमासैस्त्वब्दो नास्ति। ऋतुर्द्विधा—सौरश्चान्द्रश्च मीनमेषौ मेषवृषभौ वा सौरो वसन्तः। चैत्रवैशाखौ चान्द्रो वसन्तः। अयनं तु सौरमेव। मकरसंक्रमणादारभ्य ऋतुत्रयमुत्तरायणम्। कर्कात्तु दक्षिणायनम्। चान्द्रमासो द्विधा—दर्शान्तः पौर्णमासान्तश्च। विन्ध्यात् दक्षिणतो दर्शान्त एव। ज्योतिर्गर्गः—

सौरो मासो विवाहादौ यज्ञादौ सावनः स्मृतः।
आब्दिके पितृकार्ये च चान्द्रो मासः प्रशस्यते॥

अथ मलमासनिर्णयः।

**End:**

अथ गृहारम्भः—

पौषश्रावणवैशाखमार्गफाल्गुनके गृहम्।

आरम्भे(भे)तेति शेषः। अथ विष्णोः स्वापकालः। भविष्यत्पुराणे—

* * * *

अर्घ्यमावाहनं चैव द्विजाङ्घ्रिस्थानिवेशनम् ।
तृप्तिप्रश्नं च विकिरं तीर्थश्राद्धे विवर्जयेत् ।

**Colophon:**

इति भट्टोजि[वि]रचितः[हेमाद्रि]कालनिर्णयसंग्रहः ।
गुणगृह्यैर्बुधैः स्वार्थमादरेण विचिन्त्यताम् ॥

---

R. No. **1623.**

Paper. 11 × 9½ inches. Foll. 16. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Yajñanārāyaṇagāru of Sākurru.

केरलीयम् (ज्यौतिषम्).

KĒRALĪYAM (JYAUTIṢAM).

Similar to the work described under R. No. 1618 *ante*.

Wants the beginning and the end.

**Beginning:**

सप्तमाधिपः तनुभावस्थितश्चेत् श्यामलदेहो दीर्घतनुः दुर्बलशरीरः स्थूलः द्वितीयकलत्रसौन्दर्यः कुष्ठिशरीरः । सप्तमाधिपगुरुदृष्टिवशात् सुवासिनीमरणम् । राहुवीक्षणत्वेन वैधव्यम् । किंचिद्राजयोगः । पञ्चमाधिपः षष्ठस्थानास्थितश्चेत् संतानहीनः ।

**End:**

व्ययस्थाने शुक्रः स्थितश्चेत् स्वर्गप्राप्तिः ॥

**Colophon:**

इति केरलीयोडुदशा संपूर्णा ॥

* * * * *

शुक्रबुधराहुसंबन्धत्वेन देवतास्थापनप्रारम्भः । सप्तमाधिपशनिराहुसंबन्धत्वेन द्विकलत्रयोगः । कलत्रकारकगुरुसंबन्धत्वेन एककलत्र.

---

R. No. **1624.**

Paper. 11 × 9½ inches. Foll. 20. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Yajñanārāyaṇagāru of Sākurru.

Fol. 20*b* is left blank.

(*a*) गुरुपङ्क्तिस्तवः.

GURUPAṄKTISTAVAH.

Fol. 1*a*.

An enumeration in the form of verses of the names of twenty-eight successive teachers of the Advaita religion from God Śiva to Padmānanda including in the series the famous Śaṅkarācārya and Vidyāraṇya. The number of teachers is wrongly stated to be thirty-one A repetition of these stanzas is advised at the time of meditation and worship.

Complete.

**Beginning** and End :

नत्वा विश्वोपदेष्टारं शिवं परमकारणम् ।
वक्ष्ये पूजाविशुद्ध्यर्थं गुरुपङ्क्तिस्तवोत्तमम् ॥
आदौ शिवस्ततो विष्णुस्ततो ब्रह्मा ततः परम् ।
वसिष्ठश्च ततः शक्तिस्ततः षष्ठः पराशरः ॥
ततो व्यासः शुकः पश्चाद्गौडपादाभिधस्तथा ।
गोविन्दाख्यगुरुः पश्चाच्छंकराचार्यसंज्ञकः ॥
तत्र श्रीविश्वरूपाख्यस्ततो बोधमनाह्वयः ।
ततो ज्ञानगुरुः श्रीमांस्ततः सिंहगिरिः स्मृतः ॥
तत ईश्वरतीर्थाख्यो नृसिंहस्तीर्थसंज्ञकः ।
विद्यातीर्थशिवस्तस्मात्तच्छिष्यो विष्णुतीर्थकः ॥
भारतीतीर्थनामाभूद्विद्यारण्याशिवः स्मृतः ।
ततः परं तु श्रीचन्द्रशेखरारण्य ईश्वरः ॥
नृसिंहभारतिश्चाथ चन्द्रशेखरभारतिः ।
पुरुषोत्तमयोगीन्द्रस्ततः शंकरभारतिः ॥
ततः परं गुरुश्रेष्ठः परमानन्ददेशिकः ।
पद्मानन्दगुरुर्लोके विख्यातो देशिकोत्तमः ॥
गुरुक्रमावलिं विद्यादेकत्रिंशत्सुसंज्ञकान् ।
जप अर्चनकालेषु तानिमान् संस्मरन् सुधीः ॥
यो गुरुः स शिवः प्रोक्तो यः शिवः स गुरुः स्मृतः ।
अतस्तयोर्न भेदोऽस्ति तस्माद्गुरुतरो भवेत् ॥

**Colophon:**

इति गुरुपङ्क्तिस्तवः ॥

---

(*b*) दीक्षाप्रयोगः.

DĪKṢĀPRAYŌGAḤ.

Foll. 1*a*—20*a*.

On the manner of performing the ceremony of initiation into the Śrī-Vidyā-mantra and the worship of Goddess Tripurasundarī.

Incomplete.

**Beginning:**

अनुत्तरमहासंविच्छ्रोत्रस्वच्छन्दचारिणे ।
श्रीविद्यानन्दनाथाय शिवाय गुरवे नमः ॥
स्वात्मानन्दसुधासिन्धौ सततं खेलनं चरन् ।
भक्तानुग्राहको यस्तं सदानन्दगुरुं भजे ॥
यत्सेवनं क्षणाद्भक्त[ः]लोकानां मुक्तिसाधनम् ।
तं गुरुं परमं पूर्णं सत्यानन्दगुरुं भजे ॥
अज्ञानध्वान्तमार्तण्डं प्रज्ञानघनविग्रहम् ।
श्रीमत्परिपूर्णानन्दं परमेष्ठिगुरुं भजे ॥

* * * *

अथ दीक्षासंकल्पः—पूर्वोक्त( . . . . . )र्थं मच्छिष्यस्य महासाम्राज्याभिषेकार्थं महादीक्षां करिष्यमाणस्य मम मच्छिष्यस्य च सकलारिष्टनिवृत्तिद्वारा सकलसाम्राज्या(भि)वृद्ध्यर्थममुकगोत्रममुकशर्माणं शिष्यं पारम्पर्यसिद्ध्यर्थं सकलपुरुषार्थसिद्ध्यर्थं दीक्षाभिषेकं विद्योपदेशं करिष्यमाणः आदौ महात्रिपुरसुन्दरीमुद्दिश्य महात्रिपुरसुन्दरीप्रीत्यर्थं सिद्धद्रव्यैः सह पूजातर्पणं करिष्यमाणः शुद्ध्यर्थं वृद्ध्यर्थमभ्युदयार्थं च जनैः सह स्वस्तिपुण्याहवाचनं करिष्ये ।

* * * *

क्लीं हः अविद्यातत्त्वेन सूक्ष्मदेहं परिशोधयामि स्वाहा । सौः सः शिवतत्त्वेन कारणदेहं परिशोधयामि स्वाहा ।

**End:**

वत्स तुभ्यं मया दत्तं पीतशेषं कुलामृतम् ।
स्वदीयशत्रून् संहृत्य सर्वाभीष्टं ददामि ते ॥

तां मपञ्चकैः संतोष्य शिष्यैः सार्धं चिदग्नौ हविःशेषं हुत्वा जुषस्व परमामृ ।

---

R. No. 1625.

Paper. 11 × 9¼ inches. Foll. 236. Lines, 20 in a page. Telugu Good.

Restored in 1915-16 from a MS. of the Library acquired in 1910-11.

महाभारतविवरणम्.

MAHĀBHĀRATAVIVARAṆAM.

By Yajñanārāyaṇa. Same work as that described under R. No. 269 *ante*.

From Ādiparvan to Āśramavāsikaparvan.

---

R. No. 1626.

Paper. 11×9¼ inches. Foll. 112. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of D.V.S. Prakāsa Rao of Cocanada.

रामायणव्याख्या.

RĀMĀYAṆAVYĀKHYĀ.

A Sanskritised version of the commentary in Tamil on those selected stanzas of the Rāmāyaṇa which have been explained by the commentators on the Dramiḍōpaniṣad or Tiruvāymoḷi: by Ahōbila of Ātrēyagōtra and a disciple of Sarvatantrasvatantra Parāṅkuśamuni who is said to have installed holy images of Bhaktas (Āḻvārs) in the temple of Nīlācala (Jagannātha).

Breaks off in the Sundarakāṇḍa.

**Beginning:**

अस्तु कल्याणदं वस्तु सीतारामात्मकं हि नः ।
यत्पादपद्मभजनाल्लब्धं सारस्वतं मया ॥
शम्पामध्यस्फुरन्नीलतोयदद्युतिविग्रहम् ।
सीतयालिङ्गितं रामं कलयेऽभीष्टसिद्धये ॥
भक्तप्रतिष्ठा नीलाद्रौ कवि(लि)ता येन सूरिणा ।
सर्वतन्त्रस्वतन्त्रं तं पराङ्कुशमुनिं भजे ॥

द्रमिडोपनिषद्व्याख्याकारैः रामायणस्य ये ।
श्लोकाः संगृह्य तान् दैव्या भाषया विवृणोम्यहम ॥
रामायणस्य श्लोकानां व्याख्यां द्राविडवाङ्मयीम् ।
करोति देववाग्रपां केरांज्यौभगवित्तमः (अहोबिलसुधीर्मुदा) ॥
तपःस्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥

अत्र तपःशब्देन चित्तप्रसादहेतुभूतं व्रतनियमोपवासकर्मोच्यते । यद्वा तप आलोचन इति धातोरुत्पन्नतपःशब्देन ब्रह्मविषयकज्ञानमुच्यते, यस्य ज्ञानमयं तप इति श्रुतेः । अथवा निदिध्यासनमुच्यते, ब्रह्म तदुपास्यैतत्तपः इति श्रुतेः ।

**End:**

प्रीतिपूर्वसंभाषणं भर्त्रादिपदप्रयोगश्च समीचीनतरः ॥

**Colophon:**

आत्रेयाहोबिलकृते प्रत्येकश्लोकविस्तरे ।
चमत्कारप्रधाने च चतुर्थः काण्ड ईरितः ॥

* * * *

इत्येवं परिपृष्टास्ते स्वं स्वं मतमतन्द्रिताः ।
सोपचारं तदा राममूचुर्हितचिकीर्षवः ॥

इत्येवमिति प्रकारवाचिना पदद्वयेनोक्तप्रकारोऽनुनयप्रकारश्चोक्तः । परिपृष्टाः परितः स्थित्वा पृष्टाः परितः पृष्टाश्च । परितः प्रश्नो नाम साक्षात् प्रश्नमकृत्वान्यापदेशेन विभीषणाङ्गीकारः भवतामपि सुग्रीवस्येवानिष्टो वा इष्टो वेत्यपृष्ट्वा सुहृदा संदेष्टुं युक्तमिति.

---

R. No. **1627.**

Paper. 11×9¼ inches. Foll. 64. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Bhamidipāṭi Acyuatarāma Sōmayajulu of Irusumanda.

तत्त्वचिन्तामण्यालोकव्याख्या—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀ : SIDDHĀÑJANAM.

By Annambhaṭṭa. Same work as that described under R. No. 1538 *ante*.

Contains the Anyathākhyātivāda.

---

R. No. **1628.**

Paper. 11 × 9¼ inches. Foll. 35. Lines, 20 in a page. Telugu. Good.

Restored in 1915–16 from a MS. of the Library acquired in 1910–11.

सनत्सुजातीयविवरणम्.

SANATSUJĀTĪYAVIVARAṆAM.

By Śaṅkarācārya. Same work as that described under No. 2093 of the D.C.S. MSS., Vol. IV, Part I.

Incomplete.

---

R. No. **1629.**

Paper. 11 × 9¼ inches. Foll. 67. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

(*a*) आपस्तम्बप्रयोगप्रदीपिका.

ĀPASTAMBAPRAYŌGAPRADĪPIKĀ.

Foll. 1*a*—4*b*.

By Tālavṛntanivāsin also known as Āṇḍapiḷḷai. Same work as that described under No. 1071 of the D.C.S. MSS., Vol. II.

Contains the Āgrayaṇaprayōga in the sixth Praśna.

---

(*b*) आयुष्कामेष्टिः.

ĀYUṢKĀMĒṢṬIḤ.

Foll. 4*b*—6*b*.

On the manner of performing the fire-offering ceremony intended to be observed by those who are desirous of long life.

Complete.

**Beginning:**

उदगयने पौर्णमास्याममावास्यां(स्यायां) वा प्रातरग्निहोत्रं हुत्वा प्राणानायम्य आयुष्कामेष्टा यक्ष्ये । विद्युदसि । अद्य यज्ञाय । इमामूर्जं पञ्चदशीम् । पिष्टं हविः । पौर्णमासं तन्त्रम् । पञ्चदश सामिधेन्यः । त्वया वेदिम् । येन केनचित् काष्ठेनोपवेषकरणम् । अलंकृत्य परिस्तरणम् । देवा देवेषु ।

**End:**

अथ स्रुचावादाय स्विष्टकृदादि आग्नेयवरुणसरस्वती ( . . . . ) चम(स)वर्जमिष्टिः समाप्यते ॥

Foll 6*b* and 7*a* contain a few lines regarding Hautraprayōga and Ārcikaprayōga.

---

(*c*) प्रयोगरत्नावली.

PRAYŌGARATNĀVALĪ.

Foll. 7*b*–67*b*.

This is a manual of ritualistic procedure in connection with the Ādhāna or Agnyādhāna, which is a preliminary ritual for the performance of all sacrifices, as based on the 5th Praśna of the Āpastambaśrautasūtrabhāṣya. By Paramānandaghanēndra, disciple of Cidānandabrahmēndra. The author mentions, among others, Bhaṭṭarudra, Āṇḍapiḷḷai, Kauśikarāma, Satyāṣāḍha, Hiraṇyakēśin, Kēśavasvāmin, Vāhinīpati, and deals with the following subjects:—

7*b*. आश्वलायनोक्ताधानकालाः.
8*a*. रिक्तितिथिषु नाधानम्.
8*b*. अधिकारिधर्माः.
8*b*. पर्वसन्धिभेदाः.
9*a*. सन्धिदिन आधाने सर्वेषां संवादः.
9*b* आधाने ब्राह्मणादीनां वसन्तादिः.
9*b*. आधाने मासविशेषाः.
10*b*. नक्षत्राद्याधाने ऋत्वादिनियमः.
11*a*. अरणीप्रमाणम्.
11*b*. सप्तपार्थिवसंभाराभरणम्
12*b*. पञ्चसंभारपक्षे विवेकः.
13*a*. नान्दीश्राद्धप्रशंसाकारिकाः.
13*a*. विश्वेदेवविनियोगः.
14*a*. नान्दीश्राद्धप्रयोगः.
15*a*. संकल्पश्राद्धविधिः.
15*b*. जीवत्पितृकविषये श्राद्धविधिः.
15*b*. नान्दीश्राद्धाङ्गमातृकापूजा.
16*b*. अग्निकरणम्.
19*a*. दर्शपूर्णमासवेदिविहरणम्.

22a. अपराह्णस्वरूपम्.
23a. ब्रह्मौदननिर्वापः.
23b. उद्धरणहोमः.
25a. यजमाननियमाः.
25b. ऋत्विजां नियमः.
26b. संभारनिवपनम्.
27b. मन्थनप्रकरणम्.
29a. गार्हपत्याधानम्.
29a. घर्मशिरोवाचनम्.
29b. शमनहोमाः.
30b. दक्षिणाग्न्याधानम्.
30b. रथचक्रपरिक्रमणम्.
31a. अश्वपदाक्रमणम्.
31b. शिवाजपः.
32a. आहवनीयाधानम्.
32b. सभ्यावसथ्याधानम्.
33a. तूष्णीमग्निहोत्रम्.
33b. पूर्णाहुतिः.
34a अविज्ञातप्रायश्चित्तानि.
34b. अग्निष्टोमः, आग्नेयेष्टिः.
36a. पूर्णहौत्रम्.
36b. दित्यौहीपदार्थः.
37a. पवमानाहुतयः.
38a. पवमानेष्टिः.
38b. ऐन्द्राग्नेष्टिः.
41b. आदित्येष्टिः.
42a. पावमानेष्टिहौत्रम्.
42b. ऐन्द्राग्निष्टोमादिहौत्रम्.
43b. अन्वाधानात् प्रागग्न्यनुगतप्रायश्चित्तम्.
44b. अग्निहोत्रारम्भकाले यजमानभार्यायां रजस्वलायाम्.
46a. अग्निहोत्रारम्भप्रयोगः.
47b. अजस्राग्निहोत्रम्.
48b दर्शपूर्णमासारम्भप्रकारः.
49b. अन्वारम्भणीयकाले मलमासादौ.
51b. अन्वारम्भणीयापस्तम्बहौत्रम्.
52a. आश्वलायनहौत्रयाज्यानुवाक्याः.
54b. आहिताग्नेर्यावज्जीवव्रतानि.
55a. विभ्रष्टेष्टिः.
56b. उत्सर्गेष्टिप्रयोगः.
59a. उत्सर्गेष्टिविषयसंवादः.
65b. आग्निवारुणेष्टिः.
67a. उत्तरारणिनाशे.

Contains the Ādhānapraśna or the fifth Praśna.

**Beginning:**

अथातः सर्वश्रौतकाण्डोपकार(क)सर्वप्रथमभाव्यग्न्याधेयं व्याख्यास्यामः—श्रुताध्ययनार्थसंपन्नः साधुचरित्रोऽन्यूनातिरिक्ताङ्गो ब्राह्मणो जातपुत्रः विद्वद्भिः ब्राह्मणैरनुज्ञातः कृच्छ्रचान्द्रायणादितपोभिः वेदपारायणप्राणायामगायत्रीजपैः कूश्माण्डगणहोमैस्तीर्थयात्रादिभिश्च संशोधितात्मा कृतसर्वजनमैत्रीकः

* * * *

यात्वा यात्वा यत्र क्वचन वासीत्यर्थः ।

आश्वलायनाचार्य आह—अग्न्याधेयं कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोरेतेषां कस्मिंश्चित् वसन्ते पर्वणि ब्राह्मण आदधीतेति । अस्यार्थमाह भट्टरुद्रः ।

End:

भट्टरुद्रस्तु अविहृतावस्थायां केवलं गार्हपत्यानुगमने सतोरप्युदयास्तमयोरनुगतिप्रायश्चित्तमनुद्धरणप्रायश्चित्तं च कृत्वाग्निहोत्रहोमः कार्य इत्याह पुनराधेयमित्याशश(श्म)रथ्योऽग्न्याधेयमित्यालेखन आलेखनः ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमच्चिदानन्दब्रह्मेन्द्रसरस्वतीपूज्यपादशिष्यपरमानन्दघनेन्द्रविरचितायां भगवदापस्तम्बसूत्रभाष्यानुसारिण्यां प्रयोगरत्नावल्यां पञ्चमप्रश्नः ॥

---

R. No. **1630.**

Paper. 11 × 9¼ inches. Foll. 74. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of V. S. Gōpālācāriyar of Villiyambākkam, Chingleput district.

**शठकोपगुणालङ्कारपरिचर्या.**

ŚAṬHAKŌPAGUṆĀLAṄKĀRAPARICARYĀ.

Fol. 74*b* is left blank.

A treatise in rhetoric describing the various figures of speech used in Sanskrit Kāvyas. The characteristics of each figure are given in the form of a verse and then briefly explained in prose passages. This explanation is followed by a stanza or stanzas illustrating the figure explained. The peculiar feature of this work is that the illustrations given throughout describe the virtues and qualities of Śaṭhakōpa, known also as Nammāḻvār, a chief saint of the Śrī-Vaiṣṇavas.

Contains the Arthālaṅkāra portion which breaks off in the Pratiṣēdhālaṅkāra.

**Beginning:**

लक्ष्मीपक्ष्मलदृक्कटाक्षलहरीसेकादिव श्यामला
धात्रीविग्रहसंगसंगत . . . . . रमम् ।
लीलान्दोलितचारुचामरमरुद्व्यालोलदिन्दीवर-
स्फाराङ्गप्रकरा तनुर्मनसि मे भूया . . . ॥

ऐश्वर्ययोगरुचिरारुणदृष्टिपातै रक्तारविन्दनयनस्य रमा स्वयं या ।
रक्तं करोति हि मनः कलुषं जनानां सा दृग्विलासविभवैः श्रियमातनोतु ॥

* * * *

श्रीमतः शठकोपस्य गुणरत्नैकसुन्दरैः ।
अलङ्कारैः सतामग्रे परिचर्यां करोम्यहम् ॥
सन्तः क्वापि विलीनमेव तु गुणं चिन्वन्ति गन्धं यथा
भृङ्गास्तस्य च दिक्षु संप्रकटनं कुर्वन्ति वाता इव ।
अन्ये दोषपदं वदन्त्वबमतिः का वा कृतेस्तावता
चन्द्रे चन्द्रिकया वितन्वति मुदं किं स्यात्कलङ्कोक्तिः ॥

अत्र सतामविशदस्यापि गुण(लेशस्या)न्वेषणं प्रतीतस्य कृ(च)तस्य बहुधा प्रकाशनं च नैसर्गिकमुक्तम् । खलास्त्वदृष्टदोषेऽपि काव्ये दोषं पश्यन्तीति नैतावतास्य संकोचः । किंतु तेषामेव यत्किंचित् दो . . . . . लोकोत्तर-नायकगुणाश्रयतया रसावहत्वादादरणीयं सत्काव्यमिति ॥

. . . . पि संधत्ते काव्यं वरगुणाश्रयम् ।
धन्वेव कर्णान्तरगं परावर्जनवैभवम् ॥

अनेन काव्यस्यानृजुभावेऽप्यत्युत्तमगुणविषयतया परावर्जनसामर्थ्यमभिहितम् । अत्र नायकोऽयं लोकोत्तरः । यथा--

सर्वज्ञः स्वयमीषदप्यतिमहद्दोषं तु नोदीक्षते
प्रायः सर्वमपि प्रदाय बहुधा लज्जाभरे मज्जति ।
निःसङ्गोऽपि विकस्वरो गुणगणो यत्रास्ति तत्रादरात्
किं जातः शठजिद्दुरापमहिमा क्ष्मामण्डलीमण्डनः ॥
सुन्दरश्रुतुरो विद्वान् गम्भीरः करुणाकरः ।
कुलीनः कीर्तिमान् दाता जीयाच्छठरिपुः सदा ॥

यथा—

आस्तामनङ्गकथनं विधुनाधुना किं पुंसां दृषत्पु(त्प)रुषमद्रवदन्तरङ्गम् ।
दृष्ट्वा यदङ्गमयमादिमपूरुषोऽपि मग्नोऽभवच्छठरिपोर्वपुरेकदेशे ॥

* * * *

अलङ्काराः पुनर्द्विविधाः—शब्दगता अर्थगताश्चेति । तत्र शब्दालङ्कारापेक्षया चारुतातिशयहेतुत्वात् प्रथममर्थालङ्काराः प्रकाश्यन्ते । तेषां मध्ये

प्रधानत्वादुपमा तावन्निरूप्यते । सा च द्विविधा—पूर्णा लुप्ता चेति । उपमानोपमेयसाधारणधर्मोपमावाचकानां चतुर्णां प्रयोगे पूर्णा । उपमानं चन्द्रादि । उपमेयं मुखादि । आह्लादकरत्वादिः साधारणधर्मः । इवादिरुपमावाचकः । तेषामन्यतमानुपादाने लुप्ता । अत्रायं लक्षणश्लोकः—

कविसंमतव्यङ्ग्यं(सादृश्यं) व्यङ्ग्यव्यापारमन्तरा ।
द्वयोः प्रकाशते स्पष्टं यत्र तत्रोपमा मता ॥

यत्र द्वयोरुपमानोपमेययोः सहृदयहृदयाह्लादित्वेन चारुतरं सादृश्यं व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमेत्यर्थः । यथा—

कृपासौशील्यसौलभ्यप्रमुखैरखिलैर्गुणैः ।
प्रकाशते शठद्वेषी किरणैरिव भानुमान् ॥

**End:**

अथ प्रतिषेधोक्तिर्निरूप्यते । अत्रेदं लक्षणम् —

निषेधस्य प्रसिद्धस्य यदि स्यादनुवर्णनम् ।
प्रतिषेधस्त्वलङ्कारः कथ्यते काव्यदर्शिभिः ॥

यत्र निर्ज्ञातो निषेधः स्वतोऽनुपयुक्तत्वादर्थान्तरं गर्भीकरोति तत्र चारुत्वा-(वहः) प्रतिषेधोऽर्थालङ्कार इति निष्कर्षः ॥

यथा—

न पूर्णचन्द्रेण न मन्मथेन न कल्पवृक्षेण च नामृतेन ।
अनिन्दितागण्यगुणाभिरामः शठारिणैवारचितः शठारिः ।

* * * *

यथा वा —

हे क्षुद्राः प्रतिपक्षिणो न कुमतिग्रन्थप्रबन्धाः पुनः
बादाः श्रीधर . . . . तिगता मर्मान्तरारुंतुदाः ।
नोदश्चत्तरुणीनिरीक्षणमिह त्रय्यन्तमध्यंदिन-
स्था(स्फा)यत्कारिकुमारभास्करदुरालोकाननं लोकनम् ॥

अत्र दिव्यसूक्तीनां (कु)मतिग्रन्थप्रबन्धत्वाभावो ज्ञात एव कीर्ति(र्त्य)मानः तेष्वेव युष्माकं वादप्रागल्भ्यम्, न श्रुतिसारभूतदिव्यसूक्तिषु लेशतोऽपि व्युत्पत्तिग्रहोऽस्ती(ति) निरस्कारं गर्भीकरोति । तथाभूततद्दिव्यदर्शनस्य श्री(स्त्री)-मुखदर्श.

## R. No. 1631.

Paper. 11×9¼ inches. Foll. 35. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS of Anappiṇḍi Śivarāmayya of Anathavaram, Gōdāvari district.

### (a) सर्वलक्षणतात्पर्यनिर्णयः.

### SARVALAKṢAṆATĀTPARYANIRṆAYAḤ

Foll 1*a*—13*a*. Foll. 13*b*—14*b* are left blank.

A work determining the characteristics of the various modes of reciting as well as repeating the Vedic texts; the various views held by previous writers on the subject are also discussed.

The original MS. from which this transcript has been made for the Library is said to have been copied by Vēṅgaṇṇa, the copying having been completed on a Friday of the dark fortnight of the month of Phālguna in the year Manmatha.

Complete.

**Beginning :**

विष्णुपादाम्बुजद्वन्द्वं नमस्कृत्य सुरार्चितम् ।
जटायाः क्रियते सम्यग्विचारो भूसुरप्रियः ॥

ननु धर्मिसत्तायां प्रमाणमस्ति चेत् तत्र विचारः कर्तुं शक्यते । तत्सद्भावे प्रमाणं न पश्यामः । तथाहि—अथ संहितायामेकप्राणभावे यथायुक्ताद्विधिः सा प्रकृतिरिति प्रकृतिसंहितास्वरूपं निरूपितम् । नानापदसंधानयोगः पदसंहितेत्यभिधीयत इति पदसंहितास्वरूपं निरूपितम् ।

* * * *

जटायाः स्वरूपं नोक्तं मूलकर्त्रा । फलश्रवणस्याप्यभावात् मूलग्रन्थे कथं तद्विचारो युक्तः? सति धर्मिणि धर्माश्चिन्त्यन्त इति न्यायादिति चेन्न, मूलशास्त्र एव जटाव्यवस्थापकानामनेकेषां सूत्राणां जटास्वरूपप्रतिपादकजटाध्ययनफलव्यवस्थापकशिक्षावचनानां च विद्यमानत्वात् । कानि पुनस्तानीति चेदुच्यन्ते ।

**End :**

तस्मात् पदसंहितायां यो विधिर्भवति लोपालोपरूपः स विधिः जटायामपि भवतीत्यर्थः ।

* * * *

यो जटामात्रविद्ब्रह्मा सन्धिज्ञो विष्णुरुच्यते ।
ईश्वरः स्वरसन्धिज्ञ इत्येवर्षिभिरीरितः ।

य इच्छति जटां वक्तुं स विप्रो वेदवित्तमः ।
तस्य कीर्तिर्विवर्धेत सं वेदफलमश्नुते ॥

**Colophon :**

इति जटाविषये सर्वलक्षणतात्पर्यनिर्णयः ॥

---

अभिधानाख्यवर्णस्य प्रथमस्य परे यदि ।
मुख्यप्रथमसद्भावे द्वित्वं न स्यात्सदोष्मणाम् ॥
प्रश्नानुवाकाद्यारम्भे सविसर्गोच्चको हविः ।
ससन्धिः प्रणवस्यादौ विरामे स्वरितो भवेत् ॥

---

(*b*) जटान्यायपञ्चाशद्भाष्यम्.

JAṬĀNYĀYAPAÑCĀŚADBHĀṢYAM.

Foll. 15*a*—35*a*. Fol. 35*b* is left blank.

A commentary on the Jaṭāvali, which is described under No. 909 of the D.C.S., MSS. Vol. II.

The original MS. is said to have been copied by Yanamaṇḍra Veṅkaṇṇa.

Complete.

**Beginning :**

वागीशं च तथा श्रीशं गौरीशं गजवक्त्रकम् ।
गुरुं नत्वा जटान्यायग्रन्थटीकां करोम्यहम् ॥

अत्र ग्रन्थकृत् स्वकृतस्य ग्रन्थस्य निष्प्रत्यूहपरिपूरणाय मङ्गलप्राप्तये प्रेक्षावतां प्रवृत्तिसिद्धये चेष्टदेवतानमस्काररूपं मङ्गलमाचरति—

अजादिभिः प्रार्थनीयं गजास्यं गिरिजासुतम् ।
सुजागरूकं सूर्याभं व्रजामि शरणं सदा ॥

अजो ब्रह्मा, आदिशब्देन विष्ण्वादयो गृह्यन्ते । विष्ण्वादिभिः प्रार्थनीयम् । गजस्यास्यमिवास्यं यस्य तम् । गिरौ जाता इति गिरिजा पार्वतीत्यर्थः, तस्याः सुतम् ।

* * * *

ननु जटायां सन्धिनिर्णयमित्यत्र जटाशब्दः प्रतिपादितः । तत्र जटा नाम का इत्याकाङ्क्षायामाह—

क्रमेण द्विपदं ब्रूयाद् व्युत्क्रमेणोत्क्रमेण च ।
सलक्षणं सर्वसन्धौ प्रोच्यते सा जटा बुधैः ॥

क्रमेण पदक्रमेण द्विपदं पदद्वयं ब्रूयात् ।

**End:**

दीर्घस्वरात् परा भक्तिर्वैकृता चित्स्वर्यते ॥
पूर्वविदितः उच्चवदुच्चार्यते । यथा—देवा वस्तोर्हविष्मती घृताची ।

* * * *

नाध्वरं चेति सूत्रेणावग्रहस्थो निषिध्यते ॥

---

R. No. 1632.

Paper. 11×9½ inches. Foll. 85. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Mulukulla Brahmayya Śāstri, Viśvāsarāyapuram, Razole taluk, Gōdāvari district.

Fol. 85*b* is left blank.

**वाल्मीकिभावप्रकाशिका.**

VĀLMĪKIBHĀVAPRAKĀŚIKĀ.

By Haripaṇḍita, son of Raṅgamāmbā and Lakṣmayāmātya of Muḍigōṇḍa family and of Kauṇḍinyagōtra. Same work as that described under R. No. 580 *ante*.

Contains one to six Kāṇḍas complete.

The original MS. from which this transcript is made is said to have been copied by Vaṅgīpuram Vīrarāghava Perumāḷ, the copying having been completed on a Tuesday of the dark fortnight of the Māgha month in the year Pramāthīca.

**End:**

सर्वो सकलामर्थसिद्धिम् अश्नुत इत्यर्थो मोक्षः तस्य सिद्धिं च प्राप्नोति लभत इत्यर्थः । साकल्यं च सायुज्यसालोक्यादिरूपमुक्तचवान्तरभेदाभिप्रायं द्रष्टव्यम् ॥

आयुष्यमारोग्यकरं यशस्यं सौभ्रात्रदं वृद्धिकरं वरिष्ठम् ।
श्रोतव्यमेतन्नियमेन सद्भिः संतानकामैर्धनधान्यकामैः ॥

**Colophon:**

इति श्रीजानकीरमणचरणशरणवरणसमासादितसारस्वतेन कौण्डिन्यसगोत्र-मुडिगोण्डवंशपारावारसुधाकरलक्ष्मयामात्यरङ्गम्माम्बातनूजेन हरिपण्डितेन विरचितायां लघुवाल्मीकिभावप्रकाशिकायां युद्धकाण्डः समाप्तः ॥

R. No. **1633.**

Paper. 11 × 9¼ inches. Foll. 54. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

Fol. 1*a* contains a few lines regarding Śābdabōdha according to Mīmāṁsakas, Tārkikas and Vaiyākaraṇas.

भाट्टभास्करः.

BHĀṬṬABHĀSKARAḤ.

By Jīvadēva, son of Āpadēva. Same work as that described under No. 2356 of Rājēndralāla Mitra's Notices of Sanskrit MSS., Vol. VII.

A treatise on the chief principles of the Pūrva-Mīmāṁsā.

Contains the Dharmaprāmāṇyaparicchēda complete.

**Beginning:**

श्रीकृष्णं प्रणतार्तिघ्नमापदेवाभिधं गुरुम्
प्रणम्य जीवदेवेन क्रियते भाट्टभास्करः ॥

अस्तु मत्सरिणां वार्ता सन्तस्तत्त्वार्थदर्शिनः ।
विवेचयन्तु ग्रन्थार्थमेष तेषु कृतोऽञ्जलिः ॥

इह खलु सुखदुःखप्राप्तिनिवृत्त्यर्थिप्रेक्षावतां धर्माधर्मविषये प्रवृत्तिनिवृत्ती दृश्येते। तत्र कात्स्न्र्येन धर्माधर्मनिर्णयार्थमयमारम्भः। धर्मो नाम वेदबोधित-श्रेयःसाधनताको यागादिः। अधर्मोऽपि वेदबोधिताश्रेयःसाधनताको ब्रह्महत्यादिः। तज्जन्यानि चापूर्वाणि पुण्यपापाख्यानि धर्माधर्मवाच्यानि। धर्मं चरेति धर्मान्न प्रमदितव्यमिति धर्मः क्षरति कीर्तनादिति चोभयत्रापि प्रयोगात्। अत्र चोभय-विचारात् तन्निष्कर्षः क्रियते। तत्रादौ धर्माधर्मौ प्रमाणतः स्वरूपतश्च निर्णीयेते। तयोः प्रमाणानि वेदमन्वादिस्मृतिशिष्टाचाराः।

**End:**

सामर्थ्यस्यापि संदिग्धार्थनिर्णये प्रामाण्यम् ; यथा स्रुवेणावद्यति, स्वधिति-नावद्यति, हस्तेनावद्यतीति विधिविहितस्रुवादीनां द्रव्याद्यवदानेषु सामर्थ्याद्विनि-योगः। तत्सिद्धये विधिषु द्रवादिपदकल्पनं द्रवं मांसं कठिनमिति, शाब्दं शाब्देनान्वेतीति न्यायात्। तस्य चोहादिवदवेदत्वेऽपि वैदि(वेदै)कदेशत्वादस्त्येव प्रामाण्यमिति दिक् ॥

**Colophon :**

इति श्रीमदापदेवात्मजजीवदेवकृतौ भाट्टभास्करे धर्मप्रमापरिच्छेदः ॥

---

R. No. **1634.**

Paper. 11 × 9¼ inches. Foll. 30. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Narasiṁhācārya of Villiyambākkam, Chingleput district.

(*a*) संन्यासविधिः.

SANNYĀSAVIDHIḤ.

Foll. 1*a*—6*a*.

Similar to the work described under No. 3841 of the D.C.S. MSS., Vol. VII.

This treatise is said to have been written after consulting Yādavaprakāśa's Yatidharmasamuccaya (which is said to have been approved of by Rāmānuja) and such of the statements contained in the Vaidyanātha Dīkṣitīya as are acceptable to Śrī-Vaiṣṇavas. It is evidently intended for Śrī-Vaiṣṇava Sannyāsins.

Complete.

**Beginning :**

भगवद्भाष्यकाराभिमतयादवप्रकाशाचार्यकृतयतिधर्मसमुच्चयं दृष्ट्वा वैद्यनाथीयवर्णाश्रमधर्मग्रन्थस्थान् अविरुद्धांशानुपादाय संन्यासाश्रमस्वीकारप्रयोगो यथामति विलिख्यते—

कृच्छ्रांस्तु चतुरः कृत्वा पावनार्थमनाश्रमी ।
आश्रमी चेत् तप्तकृच्छ्रं तेनासौ योग्यतां व्रजेत् ॥

इति कात्यायनाद्युक्तरीत्या यथायोग्यं पुरश्चरणत्वेन कृच्छ्रचतुष्टयादि कृत्वा उत्तरायणे शुक्लैकादश्यां द्वादश्यां पौर्णमास्यां वा स्वानुष्ठानानन्तरं मोक्षाश्रमस्वीकारार्थमष्टौ देवादिश्राद्धानि नान्दीमुखविधानेन करिष्ये इति संकल्प्य ।

**End :**

प्राचीमुदीचीं वा दिशं गत्वा अघमर्षणेन स्नात्वा षोडश प्राणायामान् कृत्वोत्तीर्य जङ्घे मृदा प्रक्षालयेत् । इदमस्यावभृथस्नानम् । अतः परं यतिधर्म एवानुष्ठेयः । बह्वृचपरिशिष्टे अथास्मै नाम दद्याद्वैष्णवं मनसा नामाथवा यद्वोचत इति ॥

**Colophon :**

इति संन्यासाश्रमस्वीकारप्रयोगः ॥

(*b*) यत्याह्निकप्रयोगः.

YATYĀHNIKAPRAYŌGAḤ.

Foll. 6*a*—11*a*.

On details of procedure relating to the daily duties and observances of a Śrī-Vaiṣṇava Sannyāsin from the time when he rises from his bed in the morning to the time he goes to bed in the night. The author appears to be a disciple of Raṅgarāmānuja.

Complete.

**Beginning:**

अज्ञानध्वान्तसंघातप्राभातिकदिवाकरः ।
रङ्गलक्ष्मणयोगीन्द्रः श्रीमान् श्रेयः करोतु नः ॥

संन्यासाश्रमनिष्ठानां नित्यानुष्ठानपद्धतिः ।
पाञ्चकालिकसद्धर्मसमुपेता प्रदर्श्यते ॥

मोक्षाश्रमी प्रातरुत्थाय उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वमहे । उपप्रयन्तु मरुतः सुदानवः । इन्द्र प्राशूर्भवा सचा । प्रैतु ब्रह्मणस्पतिः । प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसम् । देवा यज्ञं नयन्तु नः । वसुरण्यो . . . . त्युपनिषत् इति जपित्वा हरिर्हरिरिति कीर्तनादि पादेन्द्रियाधिदैवतत्रिविक्रमध्यानपर्यन्तमाह्निकोक्तक्रमेण कृत्वा स्नानघट्टं गत्वा,

दण्डात्मनोस्तु संयोगः सर्वदैव विधीयते ।
न दण्डेन विना गच्छेदिषुक्षेपत्रयं बुधः ॥
जलाम्बरादिषु क्षिप्ते न किंचिद्दोषभाग्भवेत् ।
शिष्यादिभिर्विनीतोऽपि नीत एव स आत्मना ॥
हस्तपादादिवच्छिष्य इति शिष्टानुशासनम् ।
इत्यादिस्मृतेः स्वेन वा शिष्येण वा नीतं त्रिदण्डं जलादौ न्यस्य.

**End:**

योगं संकल्प्य श्रीवैकुण्ठगद्यादिकमनुसन्धाय शयनकाले ।

वासुदेव प्रसुप्तोऽस्मि यावन्नोदयते रविः ।
अहं तावन्निवत्स्यामि सर्वभूतहिताय वै ॥

इत्युक्त्वा निद्रां कुर्यात् । निद्राविच्छेदे भगवन्नामसंकीर्तनध्यानादिकं कुर्यात् ॥

**Colophon:**

इति यत्याह्निकप्रयोगः ॥

(c) यतिधर्मसमुच्चयसारः.

YATIDHARMASAMUCCAYASĀRAḤ.

Foll. 11*a*—30*b*.

A summary containing the essence of what is stated in the Yatidharmasamuccaya of Yādavaprakāśa: by Raṅganāthadāsa, a disciple of Vēdāntaguru of Iḷayavilli family. It is stated in the colophon that this work was written and submitted for the approval of a Sannyāsin named Rāmānujamuni who was also a disciple of Vēdāntaguru referred to above.

Complete.

**Beginning:**

यतेरवश्यकर्तव्यानि यतिधर्मसमुच्चयात्संगृह्य लिख्यन्ते । तत्र प्रथमतः लिङ्गादिकं संगृह्य लिख्यन्ते । लिङ्गं द्विविधम् — बाह्यं शारीरं चेति । शारीरं मुण्डत्वं शिखामात्रधारणमिति । बाह्यं दण्डकमण्डलुप्रभृति । अत्र यमः—

नित्यं स्थण्डिलशायी स्यादनित्यां वसतिं वसेत् ।
अरण्यनित्यो मुण्डः स्यान्मनसा ज्ञानमभ्यसेत् ॥

तस्माद्विकल्पः । यज्ञोपवीतं तु सर्वेषां नित्यमेव ।

**End:**

तौ च श्रावणभाद्रपदौ । अशक्तस्य चत्वारो मासाः । तस्मिन्नेव स्थाने ऊर्ध्वकालं क्षणमपि स्थितिं न कुर्यात् । अज्ञानात् स्थितिं कृत्वा प्राजापत्यं चरेत् ॥

**Colophon:**

इति यतिधर्मसमुच्चयसारः ॥

श्रीबालधन्विवेदान्तगुरोर्नत्वा पदाम्बुजम् ।
श्रीरङ्गनाथदासेन यतिधर्मसमुच्चयात् ॥

यत्याचारान् सुसंगृह्य प्रायश्चित्तविधिं तथा ।
रामानुजमुनेर्द्रष्टुं लिखितं सन्मुदे मया ॥

श्रीबालधन्विनिगमान्तगुरोः पदाब्जहंसं तदीयचरणार्पितमोक्षभारम् ।
तद्वीक्षणात्तनिगमान्तरहस्यजातं रामानुजार्ययतिशेखरमाश्रयामः ॥

## R. No. 1635.

Paper. 11 × 9¼ inches. Foll. 31. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Jagannātha Śāstri of Indupalli.

लिङ्गोपहितलैङ्गिकभानवादार्थः.
LIṄGŌPAHITALAIṄGIKABHĀNAVĀDĀRTHAḤ.

Fol. 31*b* is left blank.

An investigation of the question relating to the middle term figuring as an object in inferential cognition : by Raghudēvabhaṭṭācārya. It is a hostile criticism of Tattvacintāmaṇi and its allied works.

Complete.

**Beginning :**

वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शात् वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्याद्यनुमितिमामनन्त्याचार्याः । तेषामयमाशयः—तथाविधपरामर्शात् तादृशानुमित्यनङ्गीकारे वह्निव्याप्यालोकवान् पर्वत इत्यादिपरामर्शादपि पर्वतो वह्निमानित्यनुमित्युत्पत्त्या पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकपरामर्शस्य हेतुतायां व्यभिचारात् तद्वारणार्थं धूमपरामर्शजन्यतावच्छेदककोटौ स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वादिसंबन्धेन धूमपरामर्शवच्चनिवेशनमावश्यकं चिन्तामणिकारमते । तादृशपरामर्शात् तथाविधानुमित्यभ्युपगमे आचार्यमते वह्निव्याप्यधूमप्रकारकपर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकपरामर्शत्वेन हेतुतायाः कल्पनीयतया वह्निव्याप्यालोकवान् पर्वत इत्यादिपरामर्शात् तथाविधानुमित्युत्पत्त्यभावेन धूमपरामर्शहेतुतायां व्यभिचाराभावात् धूमपरामर्शजन्यतावच्छेदककोटौ अव्यवहितोत्तरत्वनिवेशे प्रयोजनाभावात्तत्र तदनिवेशप्रयुक्तत्वाच्च(लाघवं) चिन्तामणिकारमतापेक्षया दुष्परिहरमेव ।

**End :**

तथाविधसामग्र्यभावकार्यतावच्छेदककोटौ तथाविधसामग्रीविशिष्टान्यत्वनिवेशे गौरवमिति तु नाशङ्कनीयम्, घटपटादिप्रत्यक्षं प्रति तथा(विध)सामग्र्या अनन्तप्रतिबध्यप्रतिबन्धकभाव(वा)कल्पने(न) लाघवसंभवात् इत्यलमतिशयितविस्तरेण ॥

**Colophon :**

इति श्रीरघुदेवभट्टाचार्यविरचितः लिङ्गोपहितलौङ्गिकभानवादार्थः समाप्तः ॥

The following stanza is found in the end instead of colophon in the MS. of Mantravādi Vēṅkaṭa Śāstrulu of Muñjavarappukōṭa with which this transcript has been compared :—

विद्यानिर्मान(ण)पुत्रस्य न्यायवाचस्पतेरियम् ।
निर्मितिर्निर्मलधियामानन्दयतु मानसम् ॥

---

R. No. **1636.**

Paper. 11 × 9¼ inches. Foll. 36. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS of Narasimhāchāriyar of Villiyambākkam, Chingleput district

वल्लीपुरमाहात्म्यम्.

VALLĪPURAMĀHĀTMYAM.

On the holiness and religious importance of the sacred shrine at Vallipura, probably the same as Villiyambākkam, which is said to be sixteen miles to the east of Conjeeveram. The stanzas extracted from the end below indicate the contents of the work.

Complete.

**Beginning :**

शुक्लाम्बरधरं( . . . . . ) विघ्नोपशान्तये ॥

* * * *

व्यासाय विष्णुरूपाय( . . . . )नमो नमः ॥
अभ्रश्यामः पिङ्गजटाबद्धकलापः प्रांशुर्दण्डी कृष्णमृगत्वक्परिधानः ।
सर्वान् लोकान् पावयमानः कविमुख्यः पाराशर्यः परमसरूपं
[विवृणोतु ॥

पुरा तु नैमिशारण्ये समवेता महर्षयः ।
श्रेयस्कामाः कर्तुमीषुः सत्रं द्वादशवार्षिकम् ॥
प्रत्यहं च प्रयोगान्ते दिनशेषं निनीषवः ।
ज्ञानयोगपराः सर्वे नित्यं हरिपरायणाः ॥
शौनकाद्या मुनिश्रेष्ठा व्यासशिष्यमनुत्तमम् ।
महात्मानं विष्णुभक्तं पप्रच्छू रौमहर्षणिम् ॥

सूत सूत महाभाग व्यासशिष्य महामुने ।
वत्सि सर्वं पुराणं त्वं पाराशर्यप्रसादतः ॥

* * * *

अर्चावतारमाहात्म्यं देवदेवस्य शार्ङ्गिणः ।
शुश्रूषूणां च नः काम्यं संकीर्तयितुमर्हसि ॥

* * * *

इममर्थं प्रजिज्ञासुः पुरेक्ष्वाकुकुलोद्भवः ।
वसिष्ठं स्वकुलाचार्यं दिलीपः पृष्टवान्मुनिः ॥

राजा—

निरञ्जनो निर्विकारो विष्णुः शाश्वतभूतिमान् ।
वैहारिकानिमान् कस्माद्वतारांश्चकार सः ॥

* * * *

इत्यादिश्य हृषीकेशस्तूष्णीमास गदाधरः ।
तौ तथेति तपः कर्तुमीषतुर्विधिशंकरौ ॥

**Colophon:**

इति श्रीपाद्मपुराणे वसिष्ठदिलीपसंवादे अर्चावतारप्रशंसायां श्रीवल्लीपुर माहात्म्यवर्णने प्रथमोऽध्यायः ॥

**End:**

श्रीसूतः—

भो भो महर्षयः सर्वमुक्तं वः परिपृच्छताम् ।
अर्चावतारमाहात्म्यं देवदेवस्य शार्ङ्गिणः ॥
महात्मनोः पुरावृत्तं यद्वसिष्ठदिलीपयोः ।
संवादं साधुसंसेव्यमवोचं गुरुशिष्ययोः ॥
आदिकेशवनाम्नास्मिन् पुण्ये दुग्धापगातटे ।
अर्चावतरणं यच्च श्रीमद्वल्लीपुरं हरेः ॥
निमित्तं चास्य तद्विष्णोर्वात्सल्यं निरुपाधिकम् ।
प्राणिनो मोहतमसि मग्नान्वीक्ष्यानुकम्पिनः ॥
आदिकेशवनामत्वं यथा प्राप्तं च वै हरेः ।
श्रीमद्वल्लीपुरत्वं च यथास्या अभवत्पुरः ॥

आविर्भावं पयस्विन्या महिष्याः क्षीरवारिधेः ।
श्रीमदम्बुजवल्लुचाश्च लक्ष्म्यास्तत्र समुद्भवम् ॥
अत्यद्भुतं विवाहं च लक्ष्मीकेशवयोरपि ।
सर्वं कथितवानस्मि गुरोर्व्यासस्य तेजसा ॥
इदं माहात्म्यमायुष्यं पुण्यं सर्वेष्टसाधनम् ।
यः पठेच्छृणुयाद्वापि सर्वैश्वर्यं समश्नुते ॥

* * * *

यदि वसति हि सद्मन्येतदाख्यानरत्नं
जलधिदुहितृपत्युः पुण्यचारित्रचित्रम् ।
सुतमिव जननी सा तं रमा पाति नित्यं
विकचकमलवीथीश्रीसदृक्षैः कटाक्षैः ॥

**Colophon:**

इति श्रीपाद्मपुराणे वसिष्ठदिलीपसंवादे अर्चावतारप्रशंसायां श्रीवल्लीपुरमाहात्म्ये सप्तमोऽध्यायः ॥

इति श्रीवल्लीपुरमाहात्म्यम् ॥

---

## R. No. 1637.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 61. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Śivaprasāda Śāstri of Sākurru, Gōdāvari district.

काव्यप्रकाशव्याख्या—बालचित्तानुरञ्जनी.

KĀVYAPRAKĀŚAVYĀKHYĀ: BĀLACITTĀNURAÑJANĪ.

A commentary by Sarasvatītīrtha on the Kāvyaprakāśa of Mammaṭa which is a work on poetics.

Contains the ninth and the tenth Ullāsas.

**Beginning:**

गुणविवेकानन्तरमलङ्काराणां प्रस्ताव इत्यत आह—गुणेति । तददोषौ शब्दार्थौ इत्यतिदेशक्रमेणालङ्कारनिरूपणस्यायमेवावसर इत्यर्थः ।

वदन्ति शब्दालङ्कारान् बहूनन्ये मनीषिणः ।

परिवृत्तिसहिष्णुत्वान्न ते शब्दैकभागिनः ।
ते च वक्रोक्त्यनुप्रासौ यमकं श्लेष इत्यपि ।

* * * *

तथा द्विधेत्येतद्व्याकरोति—तथेति । श्लेषो द्विविधः—भग्नपदः अभग्नपदश्चेति । तत्र भग्नपदश्लेषेण वक्रोक्तिमुदाहरति—तत्रेति । नारीणामङ्गनानाम् । अनुकूलमाचरसि चेत् जानासि ज्ञातेति लोके व्यवह्रियसे । अरीणामनुकूलं नाचरसि चेत् तर्हि ज्ञातासीत्यन्यथाकुर्वाणो द्वितीयमाह—कश्चेतन इति ।

* * * *

**Colophon:**

इति काव्यप्रकाशटीकायां सरस्वतीतीर्थविरचितायां शब्दालङ्कारनिरूपणं नाम नवम उल्लासः ॥

**End:**

उक्तमिदंप्रकरणार्थमुपसंहरति—संपूर्णमिति । ननु प्राचीनाचार्यमतोल्लङ्घनेन विरचितमिदमप्रमाणमेव स्यादित्याशङ्क्याह—इत्येष इति । विदुषां ध्वनिकारादीनाम् । य एष मार्गः सिद्धान्तविभिन्नः विशीर्णोऽप्यभिन्नरूपः एकत्र संकलितः प्रतिभासत इति यत् तन्न चित्रम् । यत् यस्मात् कारणात् अमुत्र प्रबन्धे सम्यग्विनिर्मिता संघटनैव हेतुः । येन ग्रन्थसंदर्भेण विकीर्णं प्रमेयजातं संकलय्य प्रतिपाद्यते स ग्रन्थसंदर्भः कृत इति नाप्रामाणिक इति भावः ॥

एवं सरस्वतीतीर्थ . . . . . धननिर्मिता ।
टीका काव्यप्रकाशस्य . . . . . ॥
. . . नजैर्धुर्जगति सुकृतिनो दुश्चरैस्तैस्तपोभि-
र्येषां चेतोऽरविन्दे स किल पुरहरो वा(स)मङ्गीचकार ।
येषां पादारविन्दस्मृतिरपि जडताहारिणी देहभाजां
तेषां केयं सरस्वत्युपपदविलसत्तीर्थसंज्ञैरकारि ॥
साहित्यकुमुदकाननिद्राविद्राणयामिनीनाथाः ।
काव्यप्रकाशटीकां व्यरीरचंस्ते सरस्वतीतीर्थाः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीसरस्वतीतीर्थश्रीचरणविरचितायां काव्यप्रकाशटीकायां दशम उल्लासः समाप्तः ॥

## R. No. 1638.

Paper. 11 × 9¼ inches. Foll. 28. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Vaṅka Jagannātha Śāstri of Indupalli, Gōdāvari district.

The leaves are not in order.

### तत्त्वबोधिनीटिप्पणी—तर्कोज्जीवनी.

### TATTVABŌDHINĪṬIPPAṆĪ: TARKŌJJĪVANĪ.

By Agnihōtrasūri, son of Dvādaśāhējyasūri and disciple of Gandhya Nṛsiṁha. Same work as that described under R. No. 1459 *ante*.

Contains the Pratyakṣaparicchēda.

**Beginning:**

जीवादृष्टसहायेन सृजन्तं निखिलं जगत् ।
प्रमाणमनुमागम्यं सीतापतिमुपास्महे ॥
शब्दप्रपञ्चनिर्माणभक्तेच्छोपात्तविग्रहम् ।
वासुदेवाभिधं ज्योतिः पतञ्जलिमहं भजे ॥
श्रीमद्गन्ध्यनृसिंहाख्यं जननुत्यगुणं गुरुम् ।
श्रीमन्न . . . यज्वानं नमामि निखिलार्थदम् ॥
टिप्पणी तत्त्वबोधिन्या द्वादशाहेज्यसूनुना ।
तर्कोज्जीवन्यग्निहोत्रसूरिणा क्रियतेऽधुना ॥

ननु धर्मार्थकामोपयोगिग्रन्थारम्भयत्नो युक्तः, अर्थकामयोरव्यवहिताविसंवाद्यैहिकफलकत्वात् । धर्मस्याप्यैहिकामुष्मिकसाधारणफलकत्वात् धर्मफलस्वर्गस्योपलब्धसुखजातीयत्वेन बहूनां तत्र कामनासंभवाच्च । मोक्षस्य तूपलब्धपुरुषार्थजातीयत्वाभावात् केवलामुष्मिकत्वाच्च बहूनां कामनाविषयत्वाभावाच्च तदुपयोगितयैव ग्रन्थारम्भो न युक्तः । कथमस्य ग्रन्थस्य मोक्षोपयोगः, तस्यात्मसाक्षात्कारैकसाध्यत्वात्, तत्साक्षात्कारे च ग्रन्थस्याहेतुत्वात् । किंच शिष्टकृतग्रन्थादौ सर्वत्र मङ्गलाचारो दृश्यते । तत्कर्तव्यतायां प्रमाणाभावात् स नोपपद्यते । कथं वा शिष्टस्य एतद्ग्रन्थकर्तुर्मङ्गलानाचरणम् । किंच न्यायपञ्चाध्याय्यादिनैवाभिमतमोक्षफलसिद्धेः किमेतद्ग्रन्थेनेत्याशङ्क्याह—धर्मार्थेति । मोक्षस्याभ्यर्हितत्वं स्वसमानाधिकरणस्वोत्तरकालीनदुःखाननुषङ्गात् । धर्मार्थकामेषु तदनुषङ्गात् ।

**End:**

आस्तां विस्तर इति । लाघवेन हेतुतदवच्छेदकसाधारणप्रयोजकत्वमात्रस्य परमार्थसत्त्वव्याप्यत्वादिति भावः ॥

**Colophon:**

इत्यग्निहोत्रभट्टस्य कृतौ तत्त्वबोधिनीटिप्पण्यां तर्कोज्जीवन्यां प्रत्यक्षपरिच्छेदः समाप्तः ॥

The following half of a stanza is added in the end :—

श्रीमत्युपद्रष्टकुले प्रसूतः श्रीयल्लभट्टाख्यबुधाग्रगण्यः ॥

---

R. No. **1639.**

Paper. 11 × 9¼ inches. Foll. 36. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Paṇḍita Madhya Rāja Vīravyagāru of Kammireddipālayam, Kottapet, Gōdāvari district.

**शंकरसंहिता.**

ŚAṄKARASAṀHITĀ.

On the details connected with the worship of Sivaliṅgas in accordance with Vīraśaivism.

Contains the Adhyāyas 180 to 185 of the latter part of the Śaṅkara-Saṁhitā forming part of the Skāndapurāṇa.

**Beginning:**

ऋषयः—

भगवन् श्रोतुमिच्छामो वीरमाहेश्वरक्रमम् ।
त्वमस्माकं महाभाग वक्तुमर्हसि सत्तम ॥

सूतः—

वक्ष्ये युष्माकमद्याहं शृणुध्वं श्रद्धयान्विताः ।
माहेश्वरमुखोद्गीतं वीरमाहेश्वरक्रमम् ॥
पुरा कैलासशिखरे नानामुनिगणावृते ।
विद्याधरसमाकीर्णे देवगन्धर्वसेविते ॥

* * * *

स्कन्दः—

भगवन् श्रोतुमिच्छामि सर्वप्राणिहितं परम् ।
केचिल्लिङ्गार्चनं पीठे प्रशस्तं तु प्रचक्षते ॥

केचिच्छैवागमाभिज्ञाः प्राणलिङ्गार्चनापराः ।
लिङ्गे प्राणं समादाय करपीठे शिवार्चनम् ॥
प्रशंसन्त्युत्तमं देव ब्रूहि किं मुख्यमेतयोः ।
संशयं मे महत्तत्त्वं छेत्तुमर्हसि शंकर ॥

* * * *

Colophon:

इति स्कान्दे महापुराणे शंकरसंहितायामुपरिभागे वीरमाहेश्वरप्रशंसा नामाशीतिशततमोऽध्यायः ॥

End:

सूतः—

भवन्तोऽपि मुनिश्रेष्ठाः शिवतुष्ट्यर्थमादरात् ।
कृत्वैवं धर्ममखिलं पूजयध्वं सदाशिवम् ॥
य इमं शृणुयान्नित्यमध्यायं शिवभक्तिमान् ।
शिवलिङ्गार्चनाकाले स सम्यग्ज्ञानवान् भवेत् ॥

Colophon:

इति श्रीस्कान्दे महापुराणे शंकरसंहितायामुपरिभागे माहेश्वरस्य लौकिकचर्या नाम पञ्चाशीतिशततमोऽध्यायः ॥

---

R. No. **1640.**

Paper. 10¾ × 8½ inches. Foll. 78. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Śivarāma Śāstri of Rāmēśvaram.

**वेदशब्दविभूषणम्.**

VĒDAŚABDAVIBHŪṢAṆAM.

A commentary on the Vedic Sūtras occurring in Pāṇini's Aṣṭādhyāyi, with illustrations of the Sūtras explained, and selected from the Taittirīya Saṁhitā of the Yajurvēda. The author pays his respects in the beginning to Gōpālakṛṣṇa also, as an author of grammatical works: by Ananta-Gōpālakṛṣṇa, disciple of Ananta-Vēṅkaṭēśvara of Śrīvatsagōtra.

Complete in eight Adhyāyas.

**Beginning:**

वन्दे विनायकं नित्यं वन्दमानेष्टदं प्रभुम् ।
विघ्नान्धतिमिरव्यूहविध्वंसनदिनेश्वरम् ॥
समष्टिं पाणिनिप्रष्ठमुनीन्द्राणामहर्दिवम् ।
नंनमीमि सदानन्तवेङ्कटेश्वरसूरिणम् ॥
पाणिनिप्रमुखान् वन्दे मुनीन् शास्त्रकृतस्तथा ।
अन्यान् गोपालकृष्णादीन् ग्रन्थकारानहं गुरून् ॥
यजुःश्रुत्यम्बुधेर्लब्धानुदाहरणसन्मणीन् ।
सूत्रेषु योजयन् कुर्वे वेदशब्दविभूषणम् ॥
अनुवृत्त्युपपत्ती च विरुद्धार्थनिराकृतिः ।
सर्वेषां वेदसूत्राणां व्याख्या चापि विशेषतः ॥
तैत्तिरीयोदाहरणं प्रायस्तदुपपादनम् ।
इत्यादि वर्ण्यतेऽस्माभिर्वेदशब्दविभूषणे ॥

अथ वैदिकः शब्दो निरूप्यते—अनवरतमग्निहोत्रादि कर्म कुर्वतां ब्राह्मणानामिष्टप्राप्तये अनिष्टनिवृत्तये च तत्परिज्ञानस्यावश्यकत्वात् । तदुक्तं भाष्ये—यो वा इमां पादशोऽक्षरशो वा वाचं निदधाति स आर्त्विजीनः, तेऽसुरा हेऽलयो हेऽलय इति कुर्वन्तः पराबभूवुस्तस्मात् ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः इति ।

* * * *

षष्ठीयुक्तश्छन्दसि वा । शेषो घीत्यतः घीत्यनुवर्तते । पतिः समास एवेत्यतः पतिरिति च । षष्ठ्यामित्येव वक्तव्ये युक्तग्रहणात्तदन्तलाभः । ततश्च षष्ठ्यन्तयुक्तः पतिशब्दः छन्दसि विसंज्ञो वा स्यादिति सूत्रार्थः । कुलि(लु)चानां पतये नमः ।

* * * *

एवं च गतिरनन्तर इत्यत्र अनन्तरग्रहणमभिप्रैतीत्यादिकं च नानुपपन्नम् ॥

**Colophon:**

इति वेदशब्दविभूषणे प्रथमोऽध्यायः ॥

**End:**

तश्च धातुस्थोरुषुभ्यः । छन्दसीत्यनुवर्तते, नो ण इति च । न इत्यस्मदादेश इह गृह्यते ।

* * * *

कृतषत्वस्य सुञ एव ग्रहणादिहं न, इन्द्रो धर्मा गृहेषु नः । इति सर्वेष्टसिद्धिः ॥

**Colophon:**

इति श्रीवत्सकुलकलशजलधिसकलकलकलानिधिवी(पी)तपातञ्जलात्(ल)-श्रीमदनन्तवेङ्कटेशाख्यमहागुरुचरणारविन्दपरिचरणप्रभावप्रतिभातविद्यावैभवस्य अनन्तगोपालकृष्णशर्मणः कृतौ वेदशब्दविभूषणे अष्टमोऽध्यायः ॥

समिष्टये देवतानां शासकाद्योगिनामपि ।
अनन्तवेङ्कटेशाख्यगुरवे करवै नमः ॥

---

R. No. **1641.**

Paper. 10⅝ × 9¼ inches. Foll. 216. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Uppalūri Vēṅkaṭakṛṣṇammagāru of Kottappalli, Godāvari district.

The fly-leaves contain the contents of the work.

**दैवज्ञविलासः.**

DAIVAJÑAVILĀSAḤ.

A comprehensive treatise on astrology consisting of five Khaṇḍas, viz., Utpātakhaṇḍa, Kālakhaṇḍa, Karmakhaṇḍa, Vāstukhaṇḍa and Rājanītikhaṇḍa. The subjects treated of in the Ullāsas seventy-eight to eighty, which portion alone is found in this manuscript, are indicated below in Sanskrit. The author says in the beginning that this forms the third Khaṇḍa of his work. By Kañca Yallayārya.

Contains—

७८ उल्लासे—ग्रन्थकर्तृप्रतिज्ञा, गर्भाधानम्, पुष्पवतीस्नानम्, रत्यर्थं पोषणप्रकारः, लिङ्गवृद्धिः, द्रावकम्, स्त्रीवशीकरणम्, पुरुषवशीकरणम्, शुक्रस्तम्भनम्, आकर्षणम्, ऋतुगमनविधिः, पुंस्त्रीजन्मप्राप्तियोगाः, क्लीबजन्म, पतिसंभोगप्राप्तियोगाः आधानेऽरिष्टयोगाः, प्रसवकालज्ञानम्, वन्ध्यास्त्रीणां संतानकरणम्, सुखप्रसूतिः, गर्भपातनिवारणम्, गर्भाधानलक्षणम् ॥

७९ उल्लासे — पुंसवनम्, स्त्रीप्रधानकर्म, केशकलापबन्धः, पुंसवने ऋक्षादि, सीमन्तकर्म, तत्र तिथ्यादि, गर्भपुष्टिः, गर्भिणीस्त्रीवर्ज्यानि, गर्भिणीपतिवर्ज्यानि, सूतिकागृहविधिः ॥

८० उल्लासे—नानाजातकलक्षणम्, पितुः स्थितिज्ञानम्, मात्रा परित्यक्तयोगाः, प्रसूतिस्थलज्ञानम्, सूतिकागृहदिग्लक्षणज्ञानम्, गृहद्वारज्ञानम्, शय्यास्थितिज्ञानम्, दीपज्ञानम्, प्रसवलक्षणम्, उपसूतिकाज्ञानम्, परजातकयोगाः, जन्मानन्तरकृत्यम्, तिथिगण्डाः, अन्तरालज्ञानम्, अभुक्तलक्षणम्, ज्येष्ठर्क्षगण्डाः, दशाविधगण्डाः, मूलर्क्षगण्डाः, मूलाश्लेषचक्रम्, कालगण्डाः, इतरर्क्षगण्डाः, एकर्क्षगण्डाः, दुष्टयोगोद्भवगण्डाः, दन्तजातगण्डाः, जन्मनरचक्रम्, ग्रहगण्डाः, शिशोर्ग्रहारिष्टम्, चन्द्रारिष्टम्, तद्भङ्गः, तद्धरदानम्, योगायुर्दायः, नीचवृत्तिप्राप्तियोगाः, रोगोद्भवयोगाः, अङ्गहीनयोगाः, द्युगणानयनम्, कल्याद्यब्दानयनम्, सृष्ट्यब्दानयनम्, द्युगणः, अयनांशाः, चरानयनम्, अहःसाधनम्, लङ्कोदयाः, स्वोदयः, नतोन्नतसाधनम्, मध्यलग्नसाधनम्, इष्टकालसाधनम्, सन्धयः, भावफलानि, दृष्टचानयनम्, भावानां ग्रहदृष्टिफलानि, आश्रयफलानि, रव्यादिचारः, उच्चस्थग्रहफलम्, त्रिकोणस्थग्रहफलम्, स्वक्षेत्रस्थग्रहफलम्। मित्रर्क्षस्थितग्रहफलम्, नीचस्थग्रहफलम्, शत्रुगृहस्थफलम्, द्विग्रहयोगफलम्, त्रिग्रहयोगफलम्, चतुर्ग्रहयोगफलम्, पञ्चग्रहयोगफलम्, षड्ग्रहयोगफलम्, प्रव्रज्यायोगः, चन्द्रयोगः, अधियोगादि, केतुद्रुमयोगः, तद्भङ्गः, शुभाशुभयोगः, राजयोगः, सिंहासनादियोगः, राजहंसयोगः, नाभसयोगः, राजयोगभङ्गः, रश्मिचिन्ता, षड्विधफलानि, मूलत्रिकोणक्षेत्राणि, सप्तवर्गसाधनम्, स्थानबलम्, सप्तवर्गबलम्, आयुर्दायाः, दशानिर्णयः, महादशाफलानि, लग्नदशा, अन्तर्दशाफलानि, अन्तर्दशारिष्टविचारः, दशारिष्टभङ्गः, दशारिष्टहरदानम्, रव्यष्टवर्गफलनिर्णयः, चन्द्राष्टकवर्गफलम्, भौमाद्यष्टकवर्गफलम्, समुदायाष्टकवर्गः, भिन्नाष्टकवर्गायुर्दायप्रकारः, समुदायाष्टकहरणायुर्दायप्रकारः, कालचक्रजातकम्, महादशाः, अन्तर्दशाप्रकारः, दशाफलानि, सिंहावलोकनादिफलम्, गौरीजातकम्, नक्षत्रजातकम्, राहुकेत्वोः पञ्चविधदशाफलानि, रव्यादिग्रहदशाः, राहोरन्तर्दशाफलानि, निर्वाणलक्षणम्, द्रेक्काणलक्षणम्, स्त्रीजातकम्, जन्मपत्रिकालेखनक्रमः, तिथिषु जातफलानि, वारफलानि, नक्षत्रफलानि, नक्षत्रांशफलानि, योगफलानि, करणफलानि, लग्नफलानि, होराफलानि, द्रेक्काणफलानि, नवांशफलानि, त्रिंशांशफलानि, नष्टजातकम्, अंशजातकम्, दुष्टातिथिनक्षत्रशान्तिः.

**Beginning:**

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता

* * * *

सा मां पातु सरस्वती भगवती निःशेषजाड्यापहा ॥
ततोऽभिधास्ये दैवज्ञविलासे कर्मसंज्ञकम् ।
अहं तृतीयकं खण्डं कंचयल्लारि(र्य)धीमणिः ॥
निषेकादि श्मशानान्तं वेदोक्तं गृहमेधिनाम् ।
कर्मानेकं विद्यतेऽत्र कालं वच्मि समासतः ॥

गर्भाधानम्—

वेदागमोक्तसमये रुचिरप्रदेशे व्याजीकृतेन जितरोषभयेन पुंसा ।
मन्त्रौषधप्रवरतीर्थजलोज्ज्वलेषु कान्ताजनेष्वथ निषेकविधिर्विधेयः ॥

पुष्पस्नानम्—

पुष्पस्नानौषधयः कथितास्ताभिरम्बुमिश्राभिः ।
स्नायाच्चतुर्थादिवसे शास्त्रोक्तेनोपदेशेन ॥
फलिनीफलकनकाम्बुजकल्हारकज्जलोपेतैः ।
स्नायादभिनवपुष्पवती पुष्पैर्नानाविधैर्बहुभिः ॥
सुतसौभाग्यविवृद्ध्यै एलाचम्पकचन्दनोपेतैः ।
नवपुष्पे च युवत्यास्तृतीयनिशात्यये स्नायात् ॥

वराहः—

रक्तेऽधिके स्त्री पुरुषश्च शुक्ले नपुंसकः शोणितशुक्लसाम्ये ।
यस्मादतः शुक्लविवृद्धिदानि निषेवितव्यानि रसायनानि ॥

* * * *

संग्रहकारः—

गर्भाधानमृतौ कुर्यात्सवनं स्पन्दते(ने)श्विशौ(शोः) ।
सर्वं स्वामिविशुद्ध्या च कर्तव्यमिति निश्चयः ॥

Colophon:

इति श्रीसकलबुधजनपारिजातकंचयल्लार्यवर्यविरचिते दैवज्ञविलासनामनि ग्रन्थे गर्भाधानलक्षणं नाम अष्टोत्तरसप्ततितमोऽध्यायः ॥

* * * *

**Colophon:**

इति सकलविबुधजनपारिजातकंचंयल्लार्यविरचिते दैवज्ञविलासनामनि ग्रन्थे पुंसवनसीमन्तलक्षणं नाम एकोनाशीतितमोल्लासः ॥

**End:**

सव्यं वाप्यपसव्यं वा आवर्तो यस्य मस्तके ।
तद्दोषशमनार्थाय दानं कुर्याद्यथाविधि ॥
निष्कमात्रसुवर्णेन तद्रूपं कारयेत्सुधीः ।
शिशोश्च मस्तके न्यस्तमभिषेकं च कारयेत् ॥
वस्त्रादिभिरलंकृत्य गन्धपुष्पाक्षतादिभिः ।
दद्याद् दक्षिणया सार्धं रूपं तद्दोषशान्तये ॥

**Colophon:**

इति सकलविबुधजनपारिजातकंचंयल्लयार्यविरचिते दैवज्ञविलासनामनि ग्रन्थे कर्मखण्डे नानाजातकलक्षणदुष्टतिथिनक्षत्राद्युद्भवशान्तिलक्षणं नामाशीतितमोल्लासः ॥

---

R. No. **1642.**

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 196. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Duvvūri Lakṣmīnārāyaṇa sōmayājin of Mukkāmala, Amalāpuram taluk.

**भागवतसारसंग्रहः.**

BHĀGAVATASĀRASAṄGRAHAḤ.

A commentary on some of the select stanzas of the Bhāgavata. There is reference to another commentary by the same author; and he explains the plan of this work in the introduction. By Brahmānandabhāratī, disciple of Kṛṣṇānandabhāratī. The author pays his homage to Vidyāraṇyamuni and Bhāratītīrtha.

Contains the eleventh Skandha.

**Beginning:**

यदखण्डमनाद्यन्तमनन्तं शान्तमद्वयम् ।
चिदेकरसमानन्दं ब्रह्म तत्त्वमुपास्महे ॥
यदद्वयं परानन्दं सत्यज्ञानादिलक्षणम् ।
निष्कलं निष्क्रियं शान्तं ब्रह्म तत्समुपास्महे ॥

नमः कृष्णाय गुरवे बुद्धितद्वृत्तिसाक्षिणे ।
सच्चिदानन्दरूपाय परस्मै ब्रह्मणे मुहुः ॥
विराजते त्रयी येन भानुनेव जगत्त्रयी ।
प्रकाशितार्था तं वन्दे विद्यारण्यमुनीश्वरम् ॥
एकादशे प्रकरणसंग्रहस्तु पुरा कृतः ।
इदानीं पुनरत्रैव क्रियते श्लोकसङ्ग्रहः ॥
स्कन्ध एकादशे श्लोका गृह्यन्ते सारवत्तराः ।
विदुषां चित्तविश्रान्त्यै तदर्थोऽपि च वर्ण्यते ॥
अत्रत्यश्लोक एकैक उपरत्युपपादने ।
अलं तथापि गृह्यन्ते कतिचित्सारभागिनः ॥
अनेकजन्मार्जितपुण्यसंततेः फलं हि वैराग्यमतीव निर्मलम् ।
सम्यग्विरक्तेः फलमात्मबोधो बोधस्य बाह्योपरतिः फलं स्यात् ॥

* * * *

बहिः प्रवृत्त्या यदि चित्तवृत्तिर्वेदान्तचिन्ता तु सदैव कार्या ।
विपश्चिताखण्डसुखानुभूत्या स्थेयं यदन्तः प्रणवं स्वबुद्धेः ॥

अत्र तावदादौ नित्यानित्यविवेकवैराग्यशमादिसाधनसंपन्नस्य यस्य यतेर्बहुश्रुतस्यापि कृतयमनस्य प्रबलप्रतिबन्धवशात् सम्यग्ज्ञानानुपपत्तौ विपरीतभावना तत्कृतविक्षेपश्च न निवर्तते, तस्य सम्यग्ज्ञानसिद्धये विपरीतभावनाविक्षेपनिवृत्तये च 'श्रद्धावान् लभते ज्ञानं तत्परः संयतेन्द्रियः' इति न्यायेन श्रद्धावत्त्वसंयतेन्द्रियत्वतत्परत्वाद्यन्तरङ्गसहकारिसाधनसामग्रीमवलम्ब्य तीव्रमुमुक्षया निदिध्यासनमवश्यं कर्तव्यं तितीर्षोरिति ज्ञापयितुमाह—

मन्येऽकुतश्चिद्भयमच्युतस्य पादाम्बुजोपासनमत्र नित्यम् ।
उद्विग्नबुद्धेरसदात्मभावाद्विश्वात्मना यत्र निवर्तते भीः ॥

न च्यवते न क्षरति प्रकृतितत्कार्यवत् कदाचिदपि न विक्रियत इत्यच्युतः नित्यकूटस्थोऽक्षरः परमात्मा केवलः सत्यज्ञानादिलक्षणः । तस्याच्युतस्य परस्य ब्रह्मणः पादाम्बुजोपासनम् ।

**End:**

योगात्संजायते ज्ञानं ज्ञानान्मोक्षो न कर्मणा ।
मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः ॥

इत्यादिस्मृतयश्च । यस्मादेवं तस्मात् मुमुक्षोर्यतेः सर्वथा समाधिरवश्यं कर्तव्य एवेति सिद्धम् । तथैव जीवन्मुक्तिप्रकरणे श्रीविद्यारण्यगुरुभिः प्रतिपादितं सर्वमनवद्यम् ॥

श्रीमत्येकादशस्कन्धे साक्षाद्भगवता स्फुटम् ।
ज्ञानं तत्साधनं ज्ञेयस्वरूपं च निरूपितम् ॥
कालकूटसमो दोषो यस्य कण्ठे लवायते ।
गुणोऽपि वा कलामात्रो यस्य भूषायते सतः ॥
तमहं पुरुषं वन्दे विद्यादोषहरं हरम् ।
ब्रह्मा वादिभयात् क्वचित् क्षितितलं नैवेति मद्वैभवो
भूलोके प्रकटीभवेत्कथमिति स्वालोच्य सा भारती ।
विद्यारण्यमुखे विधेर्मुख इव स्थित्वा ननर्त स्फुटं
श्रौतस्मार्तसमस्तशास्त्रनिगमव्याख्यातरङ्गेष्वलम् ॥
भारती भारतीतीर्थरूपेणैवात्मनः क्षितौ ।
पुंभावमेव संभाव्य व्यातनोदात्मवैभवम् ॥
वाग्वैभवं यस्य निशम्य वेधाः प्रस्तोतुकामश्चतुराननोऽभूत् ।
पञ्चाननस्त्विन्दुधरः षडाननो गुहः सहस्रानन आदिशेषः ।
यस्य दर्शनमात्रेण भवतापः प्रलीयते ।
तमहं भारतीतीर्थं सेवेऽहं सन्निषेवितम् ॥
यद्भारतीं जनाः श्रुत्वा त्यजन्तीन्द्रसभारतिम् ।
तमहं श्रीगुरुं वन्दे श्रीकृष्णानन्दभारतीम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकृष्णानन्दभारतीमुनिवर्यप्रियाशिष्य-ब्रह्मानन्दभारतीकृत एकादशस्कन्धसारश्लोकसंग्रहः सव्याख्यः संपूर्णः ॥

---

R. No. **1643.**

Paper. 11 × 9¼ inches. Foll. 18. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Duvvūri Rāmacyavanulu of Kapilēśvarapura Agrahāram, Rāmachandrapuram taluk.

**अग्निहोत्रमन्त्रार्थसंग्रहः.**

AGNIHŌTRAMANTRĀRTHASAṄGRAHAḤ.

Foll. 1*a*—17*b*. Fol. 10*b* is left blank.

A brief commentary on the Mantras to be used in connection with the ritual called Agnihōtra: by Kṛṣṇasōmayājin.

Complete.

**Beginning:**

सूर्यनारायणं देवं त्रिपुरहरसुन्दरम् ।
गुरूनधिगतार्थांश्च निरन्तरमहं भजे ॥
अनुष्ठानाय विप्राणां मन्त्रार्थज्ञानपूर्वकम् ।
नित्याग्निहोत्रमन्त्रार्थसंग्रहः क्रियते मया ॥

धृष्टिरसि ब्रह्म यच्छ धृष्टिमादाय हे दारुविशेष त्वं धृष्टिः धर्षणसमर्थोऽसि। ब्रह्म प्रणयनार्थमग्युद्धरणादिकं यच्छ देहि कुर्विति यावत् । सुरागं ह . . . अस्मासु धेहि शोभनो गार्हपत्योऽग्निररातेः द्वेषिणः

**End:**

एवं केवलस्य यजमानस्य प्रमाणमुक्तम् । पत्न्यास्तु केवलायाः प्रवासो नेष्यते, पत्नीविदस्याग्निहोत्रं भवतीति वचनात्, यदि यजमानः प्रवसेदितिवत् यदि पत्नी प्रवसेदित्यवचनाच्च । दैवात् प्रवासेऽग्निहोत्रं कथमिति चेन्न, पत्न्या अङ्गत्वपक्षे अङ्गलोपेऽपि अग्निहोत्रं कार्यमेव । प्रधानपक्षे लोप एवेत्याहुः ॥

**Colophon:**

इति श्रीकृष्णसोमयाजिविरचितोऽग्निहोत्रमन्त्रार्थसंग्रहः ॥

Fol. 18*a* contains a few lines regarding the time of performing the Agnihōtra. Fol. 18*b* is left blank.

---

## R. No. **1644.**

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 343. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Anappiṇḍi Śivarāmayyagāru of Anāthavaram, Gōdāvari district.

Fol. 243*b* is left blank.

**धर्मखण्डः.**

**DHARMAKHAṆḌAḤ.**

This portion of the Skāndapurāṇa deals with the leading incidents of Rāma's life, as also with the greatness of Śiva. The work is also called Śivakhaṇḍa as opposed to Viṣṇukhaṇḍa, both being said to be part

of the Skāndapurāṇa. The names of the Adhyāyas indicate more fully the subject-matter dealt with therein.

Contains Adhyāyas 1 to 121 as given below of which Adhyāyas 30, 55, 86 to 108 and 111 to 120 are wanting :—

१ शिवतीर्थमाहात्म्यम्.
२–४ शिवप्रसादमाहात्म्यम्.
५ ब्रह्मविष्णुयुद्धम्, केतकीसंवादश्च
६ ब्रह्मविष्णुभ्यां शिवलिङ्गदर्शनम्। केतक्याः शापश्च.
७ रावणवधानन्तरं पुष्पकविमानेन रामागमनम्.
८ कलिनिन्दा.
९ शिवलिङ्गप्रतिष्ठार्थं ब्रह्मागमनम्.
१०, ११ शिवपूजामाहात्म्यम्.
१२, १३ धर्मकथनम्.
१४ स्थावरलिङ्गानयनार्थं हिमवद्गिरिं प्रति रामेण हनूमत्प्रेषणम्.
१५ रामेण वालुकालिङ्गप्रतिष्ठाकरणम् हनूमदानीतलिङ्गप्रतिष्ठाकरणं च.
१६ गङ्गामाहात्म्यम्.
१७ गौतमीनदीमाहात्म्यम्.
१८, १९ दण्डकोपाख्यानम्.
२० ताटकावधः.
२१ रामाय विश्वामित्रेणानेककथाकथनम्.
२२ गायत्रीमाहिमा, गङ्गोपाख्यानं च.
२३ गङ्गानयनम्.
२४ अहल्याशापविमोचनम्.
२५ शिवपूजामाहात्म्यम्.
२६ शिवभक्तलक्षणानि.
२७ सात्त्विकादिलक्षणम्.
२८ शिवधनुर्भङ्गकथनम्.
२९ सीताकल्याणम्, परशुरामागमनम्.
३० wanting.
३१ परशुरामजयः, अयोध्याप्रवेशश्च
३२ रामाभिषेकविघातार्थं देवानामालोचनम्.
३३ कैकेयीं प्रति मन्थरावचनम्.
३४ मन्थराभेदवचनादि.
३५ लक्ष्मणं प्रति रामवचनम्.
३६ दत्तात्रेयावधूतसंवादः.
३७ रामेण वनवासनिवेदनम्.
३८ रामब्राह्मणसंवादः.
३९ रामेण शृङ्गिबेरपुरगमनम्.
४० गुहसंदर्शनम्,
४१ रामेण गुहगृहगमंनंम्.
४२ रामगुहसंभाषणम्.
४३ भरद्वाजाश्रमगमनम्.
४४, ४५ यतिधर्माः.
४६ धर्मविचारः.
४७ रामस्य काशीप्रवेशः.
४८ मेरुविन्ध्ययोर्विरोधजननम्.
४९ दानमहिमा.
५० लोपामुद्रावर्णनम्.

५१ पतिव्रताधर्मः.
५२ शिवशर्मोपाख्यानम्.
५३ रामस्य गयागमनम्.
५४ चित्रकूटगमनम्.
५५ wanting.
५६ भरतस्य चित्रकूटगमनम्.
५७, ५८ रामभरतसंभाषणम्.
५९ भरतनिवर्तनं नारदागमनं च.
६० वृन्दोपाख्यानम्, जलन्धरशिवयोः युद्धम्.
६१ जलन्धरवधः, वृन्दाशापश्च.
६२ रामेणातिथिप्रीणनम्.
६३ कबन्धवधः, अत्रिदर्शनं च.
६४ गायत्रीप्रभावः.
६५ लक्षणोपाख्यानम्.
६६ ऋषिपञ्चमीव्रतम्.
६७ लक्षणोपाख्यानम्,
६८ अरुन्धतीव्रतम्.
६९ रामस्यागस्त्याश्रमप्रवेशः.
७० शिवोपदेशः, लिङ्गपूजाप्रकारः.
७१ राक्षसवधं प्रति रामप्रतिज्ञा.
७२ नारदागमनम्.
७३ शूर्पणखासंवादः.
७४ खरादीनामागमनम्.
७५ खरादीनां वधः.
७६ शूर्पणखया रावणे निवेदनम्, कुम्भकर्णस्य नीतिवाक्यम्.
७७ रावणस्य मारचिन सह दण्डकागमनम्.
७८ नारदोपदेशः.
७९ मृत्युदेव्यागमः.
८० स्त्रीणामपराधाः, मायामृगदर्शनम्.
८१ सीतया लक्ष्मणनिन्दा, सीताहरणं च.
८२ रावणेन जटायुषः पक्षच्छेदः.
८३ रामस्य जटायुषा संभाषणम्.
८४ रामस्य पम्पासरोगमनम्, परमेश्वरसंवादश्च.
८५ परमेश्वरसंवादः wants end.
८६—१०८ wanting.
१०९ हनूमद्रावणसंवादः wants beginning.
११० हनूमद्रावणसंवादः wants end.
१११—१२० wanting.
१२१ इन्द्रजिद्युद्धम् wants beginning and end.

**Beginning:**

इन्द्रनीलमणिसंनिभदेहं वन्दनीयमसकृन्मुनिवृन्दैः।
लम्बमानतुलसीवनमालं चिन्तयामि सततं रघुवीरम् ॥
वन्दे . . . . . .चण्डमुण्डापहारिणीम् ।
दम्भोलिकरकुम्भीन्द्रकुम्भो . . . . . .॥

दंष्ट्रा(अस्मा)भिर्वैष्णवं खण्डं श्रुतं श्रुतिमनोरमम् ।
इदानीं श्रोतुमिच्छामः शैवं खण्डमनुत्तमम् ॥

सूतः—

साधु पृष्टं महाभागाः प्रश्नोऽयं लोकसंमतः ।
पवित्रः सर्वपापघ्नः परमेशकथाश्रयः ॥
भवाङ्गपतितं तोयं गङ्गा त्रिपथगा नदी ।
पवित्रयति लोकांस्त्रीन् पतितान् पुण्यकर्मणः ॥
एवं शिवकथाभिः सा शिवसाहित्यगोचरा ।
पतितान् पापकर्मस्थान् पुनाति भुवनत्रयम् ॥
शिवाश्रयाः कथा नित्यं श्रोतव्याः पापभीरुभिः ।
कालिनाशकरे तीर्थे स्नातव्यं जाह्नवीजले ॥
प्रायश्चित्तिर्हि पापानां महादेवकथाश्रुतिः ।
प्रायश्चित्तो हि विगुणः श्रुतिस्मृतिषु चोदितः ॥

* * * *

पवित्रयति लोकांस्त्रीन् प्रत्यक्षं सर्वजन्तुषु ।
एवं तीर्थप्रसादश्च लोकान् रक्षति शाम्भवः ॥

**Colophon:**

इति श्रीधर्मखण्डे धर्मोत्तरे शैवे प्रथमोऽध्यायः ॥

**End:**

समुद्रमध्ये सदनं तव विक्रमसूचकम् ।
रामसंनिधिमासाद्य सीताहरणमप्यलम् ॥

**Colophon:**

इति श्रीधर्मखण्डे शैवे नवोत्तरशततमोऽध्यायः ॥

हनूमान्—

तदानीं भिक्षुरूपं च ब्राह्मणत्वान्ननिन्दितम् ।
लज्जाहीनस्य ते वाक्यमपहासाय कल्पते ॥

* * * *

शतयोजनपर्यन्तं वालमासीन्महात्मनः ।
महावीरस्य धीरस्य स्थौल्यं तु शतयोजनम् ॥

वस्त्रमात्रं त्वेकदा ।

(अतः परं ग्रन्थपातः)

१२१ अध्याये—

राक्षसैर्निहता वीराश्छिन्नभिन्नोरुमस्तकाः ।
कुठारैर्निशितैर्घोरैः खड्गैः परशुपट्टसैः ॥
केचित् किलिकिलांश्चक्रुरट्टहासांश्च केचन ।
* * * *
यदि तस्य विपत्तिः स्याद्वयं सर्वे विनिर्जिताः ।
चरन्नेवं हनूमन्तं दृष्ट्वा मिथ्याप . . . ॥

---

R. No. **1645.**

Paper. 11 × 9¼ inches. Foll. 31. Lines, 10 in a page. Dēvanāgarī. Good.

(*a*) महिम्नस्स्तुतिव्याख्या— कौमुदी.

MAHIMNASSTUTIVYĀKHYĀ : KAUMUDĪ.

Foll. 1*a*—10*a*.

Transcribed in 1915-16 from a MS. of Pēri Vissaṇṇagāru of Baṇḍārlaṅka in Gōdāvari district.

A commentary on the Mahimnasstuti, which is herein attributed to Puṣpadanta and which is described under R. No. 399(*a*) *ante*: by Buddhisūri, son of Cennabhaṭṭa.

The original MS. is said to have been written by Nāgabhūṣaṇa for Bhuggayagāri, the copy having been completed on Monday, the 9th day of the bright fortnight of the Āśvija month in the year Īśvara.

Complete.

**Beginning :**

श्रीचन्नभट्टात्मजबुद्धिसूरिणा टीका महिम्नो रचिता च कौमुदी ।
भूयाच्चिरं तिष्ठतु मेदिनीतले नत्वा गणेशं प्रमथाधिनायकम् ॥

पुरा भट्टाचार्यो बौद्धैः सह निरीश्वरवादं कृत्वा तद्दोषपरिहारार्थमाद्यश्लोके हरशब्दं संबोधनरूपेण प्रयुक्तवान् । तत्र हरशब्दस्य कोऽर्थ इत्यत्राह— हृञ् हरण इत्यस्माद्धातोः मानसिकानि वाचिकानि कायिकानि सर्वाणि पापानि हरतीति हरः । तस्य संबुद्धिः हे हर, ते तव महिम्नः ऐश्वर्यस्य पारमन्तं परं सम्यक् अविदुषः अज्ञातस्य स्तुतिः स्तोत्रम् असदृशी यदि अनुरूपा न चेत् तत् तर्हि ब्रह्मादीनां गिरः श्रुतिरूपा वाचोऽपि त्वयि भवति विषये अवसन्नाः कुण्ठिताः ।

End:

अग्रे मुक्तेरूर्ध्वं नतिर्नमस्कारोऽस्यास्तीति नतिमान्, न नतिमान् अनतिमानिति विग्रहः, त्वदैक्यापत्तेरिति यावत् । इति यत्तदिदमपराधद्वयं क्षन्तव्यं सोढव्यमिति योजना ॥

Colophon:

इति पुष्पदन्तकृतमहिम्नव्याख्यानं संपूर्णम् ॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नःस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥

* * *

कुसुमरदननामा सर्वगन्धर्वराजः शिशुशशधरमौलेर्देववदेवस्य दासः ।
स्वगुरुनिजमहिम्नो भ्रष्ट एवास्य दोषात् स्तवनमिदमकार्षीद्दिव्यदिव्यं
[महिम्नः ॥

Fol. 10*b* gives the date of transcription of the original MS. Foll. 11 and 12 are left blank.

---

(*b*) सिद्धान्तसंग्रहः—सव्याख्यः.

SIDDHĀNTASAṄGRAHAḤ WITH COMMENTARY.

Foll. 13—31. Fol. 31*b* is left blank.

Transcribed in 1915–16 from a MS. of Garimalla Sōmannagāru of Gangalakurru, Amalāpuram taluk.

A eulogy addressed to Śiva with whom is identified the Brahman as conceived by the Advaita school of the Vēdānta: by Rāma of Ātrēya-gōtra, who was a Pandit patronized by Apparāya, Zamindār of Nuzvid. The commentary also seems to be by the same author. The stanzas of the text are not given in some cases

Complete.

Beginning:

अपारसंसारसमुद्रमध्यगः कश्चन जीवः सर्वेका(ता)रणकारणं कर्णधारणं भगवन्तं पारगमनं याचते—

त्वमाराध्यः शम्भो सुहृदयहृदाकाशविवरे
ततो ब्रह्मादीनां यदसि परमं कारणमिति ।
श्रुतिः स्तौति त्वातोऽसुमतिमधमं पाहि कृपया
न चेदेनं(वं) चाहं नरकभवनः स्यां हर विभो ॥

शमस्माद्भवतीति शंभुः परमात्मा शिवः तस्य संबुद्धिः । तत् तस्मात् कारणात् मुहृदयानां तत्तद्वर्णोचितकर्मानुष्ठानादिना शुद्धान्तःकरणानां हृदाकाशविवरे दहराकाशमध्ये ।

**End :**

तस्मान्न संचितकर्माप्रतिबन्धात् यथोक्तस्य ज्ञानस्य निष्फलत्वाशङ्क्येत्यर्थ इति च तस्मात् सच्चिदानन्दरूपः शम्भुरेव मुमुक्षुभिर्ध्येय इति तरति शोकमात्मविदिति श्रुतेरिति शिवम् ॥

**Colophon :**

आत्रेयगोत्रजातेन रामेण विदुषा गुरून् ।
नत्वा ध्यात्वा परं ब्रह्म जगन्मिथ्यात्ववादिनाम् ॥
सर्वान् स्कन्धा(ग्रन्था)न् समालोच्य कृतः सिद्धान्तसंग्रहः ।
मुदेऽस्तु विदुषां सम्यक् सर्वसिद्धान्तसंविदाम् ॥

The scribe of the original manuscript writes—

सोपद्रष्टः परं ब्रह्म गुरुं सिद्धान्तसंग्रहम् ।
युवाब्द ऊर्जे राकायां रामस्वाम्यलिखत् स्मरन् ॥

The following stanzas seem to be the beginning of the work Sidhāntasaṅgraha, though they are written at the end of this manuscript :—

विद्वत्कल्पतरोर्विष्णुसमाराधनतत्परात् ।
दीनावनसमासक्ताच्छन्नुकक्षहुताशनात् ॥
नूजवीटिपुराधीशाच्छोभनाद्यप्परायतः ।
अनायासेन संलब्धजीवनस्थिरसन्मतिः ॥
गुरूणां वन्दनं कृत्वा सरस्वत्याश्च वन्दनम् ।
करोमि विद्वत्संतुष्ट्यै त्रयीसिद्धान्तसंग्रहम् ॥

---

## R. No. **1646.**

Paper. 10¾ × 9¼ inches. Foll. 34. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Sampatkumāra Varada Vēṅkaṭa Raṅgācārya Ayyāvayyaṅgārulu of Tuni.

चातुरीचन्द्रिकाभाणः.

CĀTURĪCANDRIKĀBHĀṆAḤ.

A kind of dramatic composition, called Bhāṇa, in one Act dealing with the love between Caturaśēkhara and Camatkāramañjarī, the scene of action being Tirupati: by Vēṅkaṭārya, son of Śaraṇyapāda and Sarasvatī and disciple of Kandāḷa Raṅgavarya. The author's father was the son of a person named Dharma and the grandson of Cilkamarti Śaraṇya.

Complete.

**Beginning:**

जयं दिशतु नः कामजननीवदनं सदा ।
कौस्तुभोपलसंक्रान्तनाभिपङ्कजबुद्धिकृत् ॥

अपि च—

तल्पेऽनल्पभुजङ्गवल्लभभये किंचित्तदा फूत्कृते
पद्मा भूरपि वेपमानमनसौ तत्रासतुर्भीतितः ।
ते संवीक्ष्य रसादसावपि हसन्मन्दं मुकुन्दः करै-
रालिङ्गन्निजदोश्चतुष्टयफलं मन्वंस्तनोतु श्रियम् ॥

(नान्द्यन्ते)

सूत्रधारः—

केलीमन्दिरसंगणा(रा)ङ्गणतटे खेलत्कटाक्षाशुगं
भ्रूवल्लीधनुरभ्युदीर्णजघनप्राग्भारचक्रोज्ज्वलम् ।
जङ्घाकाहलमात्मकण्ठमणितव्याकीर्णशङ्खारवं
वेलातीतनखक्षतं विजयतां वीरायितं योषिताम् ॥

* * * *

किमस्य विचारस्य ? । तादृशमपि रूपकं पूर्वमस्माभिः श्रुतमेव खलु रङ्गनगर्याम् ।

यतः—

श्रीचिल्कमद्रि(र्ति)कुलसिन्धुशशाङ्कबिम्बः
श्रीनाथपादसरसीरुहभक्तिलम्बः ।
शास्त्रावबोधनसमर्थबुधाग्रगण्यः
सोऽयं बभूव भुवि भूरिगुणः शरण्यः ॥

भास्वद्दानाम्बुधाराकटकरटिघटाकुम्भनिर्भेदलीला-
भ्यश्चत्पञ्चाननेन्द्रप्रबलरवतिरस्कारकैः कण्ठनादैः ।
यस्मिन् शास्त्रप्रसङ्गोद्यमनकृतमतौ स्तम्भवज्जृम्भमाणः
शम्भुः स्थाणुप्रतिष्ठां समग[म]त (हि) तदारभ्य सभ्यप्रधाने ॥
तस्मादस्मात्परस्मात्समजनि विबुधो धर्मनामार्कधामा
राकाकोकारिबिम्बोदयसमयपयोराशिगम्भीरनादैः ।
यस्मिन् वेदान्ततर्कादिकसकलकलावर्गमार्गप्रसक्तेः
शेषः पाताललोके चिरमपि चरति व्रीडया गूढपादः ॥
अजनि रजनिनाथो वा पयोराशितोऽस्मा-
त्सकलविबुधगण्यः सत्प्रभावः शरण्यः ।
स्तनितगलनिनादैः शास्त्रवादप्रसक्ते
स गुरुरनिमिषत्वं प्राप यस्मिन् विचित्रात् ॥
जातः पूतः प्रभातस्फुरितसरसिजव्राननिर्यातमाध्वी-
धारामाधुर्यधुर्यप्रकटितरसवाक्कल्पनाचातुरीकः ।
श्रीकन्दालान्ववायाभिधजलधिविधो रङ्गवर्यस्य शिष्य-
स्तत्पुत्रो वेङ्कटार्यो वृषभगिरिपतेः पादपद्मार्पितात्मा ॥
माताभवत्तस्य दयासमेता पूताजकान्ता भुवनप्रतीता ।
निपीय बाल्ये वटुधे हि यस्याः स्तनद्वयं यः श्रुतिशास्त्ररूपम् ॥
रसालयरसालभूरुहकिसालपालीगल-
न्मरन्दरसमाधुरीगुणधुरीणवाक्कल्पनम् ।
ततानवरतोल्लसत्कविवितानसंमोदकं
ततान स तु रूपकं किमपि चातुरीचन्द्रिकाम् ॥

स भाण एव सभ्योपरञ्जकः

* * * *

चमत्कारमञ्जरी निजप्रथमरङ्गाधिरोहणमहोत्सवविलोकनकुतूहलात् समायातैः कुशीलवव्रातैरुपगीता सखीमुखाच्चतुरशेखरमाहूतवती । तदवलोकनाय प्रयातुकामोऽयमपि ॥

सूत्रधारः—तर्हि त्वर्यतां त्वर्यतां तदीयमहोत्सवावलोकनायाहमप्यनेन साधयामि । (इति निष्क्रान्तः)

प्रस्तावना.

ततः प्रविशति यथानिर्दिष्टश्चतुरशेखरः ॥

चतुरशेखरः—(सवितर्कम्)

[रागात् ।

स हि किल भुवि धन्यः पञ्चबाणोत्सवेषु प्रकटितरसयोगात्तां परीरभ्य
अमृतरसनिवासं भासमानान्तरङ्गो मधुरमधरबिम्बं यः पिबत्यादरेण ॥

End:

अयि चमत्कारमञ्जरि, (सानन्दम्) किं ब्रवीषि?—मम मनोरथश्चिरेण संपूर्णः । यदहं भगवतो वेङ्कटनाथस्य पुरतः नाट्यविद्यां दर्शयितुं तव समीपे कामसञ्जरकलाकौशलं प्रकटयितुं च दीक्षितास्मि । तदद्य मनोरथद्वयं पूर्णमिति ।

* * * *

अथाप्येतदस्तु भरतवाक्यम्—

भवतु निखिलविश्वं भद्रकार्यैकसक्तं भवतु विविधसस्यैर्भासुरा भूतधात्री ।
भवतु सुजनपालिर्भाग्यसौभाग्यकेलिर्भवतु निरुपमश्रीभास्वरो वेङ्कटेन्द्रः ॥

(इति यथायथं सर्वेऽपि ययुरमन्दहृदयानन्दाः.)

Colophon:

इति श्रीवेङ्कटेश्वरप्रसादलब्धोभयविधकवितारसामोदशुकबहुपादकुलकलश-जलधिशीतपादशरण्यपादनन्दनवेङ्कटार्यविरचितः चातुरीचन्द्रिकाभिधानो भा समाप्तः ॥

---

R. No. **1647.**

Paper. 11 × 9½ inches. Foll. 179. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Ayyagāri Sītārāmayya Śāstrigāru of Sākuṟṟu, Gōdāvari district.

Foll. 166*a* and 159*a* are left blank.

## वेदसारशिवसहस्रनामव्याख्या.

## VĒDASĀRAŚIVASAHASRANĀMAVYĀKHYĀ.

A commentary on the Vēdasāraśivasahasranāmastōtra described under R. No. 142(*c*) *ante*: by Paramaśivēndrasarasvatī, disciple of Abhinava-Nārāyaṇēndrasarasvatī.

The original manuscript is said to have been copied by Gaurīpati, son of Ayyagāri Cennavengu, for Rājaṇṇagāri, the copying having been completed on Sunday, the 14th day of the dark fortnight of the month of Kārtikai in the year Rudhirōdgāri.

Complete.

**Beginning :**

ईश्वरं परमं तत्त्वमादिमध्यान्तवर्जितम् ।
आधारं सर्वभूतानामनाधारमविक्रियम् ॥
अनन्तानन्दबोधाम्बुनिधिमद्भुतविक्रमम् ।
अम्बिकापतिमीशानमनीशं प्रणमाम्यहम् ॥
ऐशमाद्यन्तनिर्मुक्तमतिशोभनमादरात् ।
नमामि विग्रहं साम्बं संसारामयभेषजम् ॥
महदादिविशेषान्तं जगद्यस्याः समुत्थितम् ।
यस्यामेव लयं याति वन्दे तामम्बिकामहम् ॥
गुरुमूर्तिधरां गुह्यां गुह्यविज्ञानदायिनीम् ।
गुह्यभक्तजनप्रीतां गुहायां निहितां न(नु)मः ॥
नत्वा गणेश्वरं स्कन्दं साम्बं सद्गुरुमेव च ।
वेदसारसहस्राख्यव्याख्या सम्यग्विरच्यते ॥

काशीखण्डे विष्णुवचनम्—

कृत्वापि सुमहत्पापं त्वां यः स्मरति भावतः ।
आधारं जगतामीशं तस्य पापं विलीयते ॥
तव नामानुरक्ता वाक् पुंसो यस्य जगत्पते ।
अप्यद्रिकूटतुलितं नैनस्तमनुबाधते ॥

* * * *

जगतः जङ्गमस्य । तस्थुषः स्थावरस्य । मूलं कारणम् ।

* * * *

**Colophon :**

इत्थमाद्यशतकव्याख्यानं संपूर्णम् ॥

**End :**

यस्त्रिसन्ध्यं जपेद्भक्त्या वत्सरं नियमान्वितः ।
मच्चित्तो मन्मना भूत्वा साक्षान्मोक्षमवाप्नुयात् ॥

नियमान्वितः शिवक्षेत्रवासशिवप्रदक्षिणनमस्कारशिवपूजादिसंयुतः मच्चेता वेदान्तश्रवणादियुक्तः मन्मनाः ज्ञानध्यानादिपरः.

* * * *

सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति श्रुतिः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदभिनवनारायणेन्द्रसरस्वतीपूज्यपाद-शिष्यश्रीमत्परमशिवेन्द्रसरस्वतीविरचितायां वेदसारशिवसहस्रनामव्याख्यायां दशमशतकविवरणं समाप्तम् ॥

* * * *

पिशाचस्य विनाशाय जप्तव्यमिदमुत्तमम् ।
नाम्नां सहस्रेणानेन समं किंचिन्न विद्यते ॥

**Colophon:**

इति पाद्मपुराणे पञ्चपञ्चाशत्सहस्रिकायां संहितायामुत्तरभागे बिल्वकेश्वर-कृष्णमार्कण्डेयव्यासादिसंवादे वेदसारशिवसहस्रं नाम एकोननवतितमोऽध्यायः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीमदभिनवनारायणेन्द्रसरस्वतीपूज्य-पादशिष्यश्रीमत्परमशिवेन्द्रविरचिता वेदसारशिवसहस्रनामव्याख्या भाष्याख्या समाप्ता ॥

---

R. No. **1648.**

Paper. 11 × 9¼ inches. Foll. 26. Lines, 20 in a page. Dēvanāgarī. Good.

Restored in 1915–16 from a MS. of the Library.

The fly-leaves contain the table of contents of the work.

**कुन्दारण्यमाहात्म्यम्.**

KUNDĀRAṆYAMĀHĀTMYAM.

Same work as that described under No. 2389 of the D.C.S. MSS., Vol. IV, Part II.

Complete.

---

R. No. **1649.**

Paper. 10¼ × 9¼ inches. Foll. 229. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

Fol. 1 contains some passages on Śrautaprayōga.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ : PRAYŌGA-RATNAMĀLĀ.

By Cauṇḍapācārya. Same work as that described under R. No. 795 *ante*.

Contains Praśnas one to four, but a few stanzas in the beginning are broken; for the beginning and end see R. Nos. 795 and 1353 *ante*, respectively.

---

## R. No. 1650.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 89. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamiḍipāṭi Acyutarāma Sōmayājulugāru of Irusumanda, Gōdāvari district.

सिद्धान्तकौमुदीव्याख्या—तत्त्वबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ : TATTVABŌDHINĪ.

Foll. 1*a*—52*b*.

By Jñānēndrasarasvatī. Same work as that described under No. 1439 of the D.C.S. MSS., Vol. III.

Begins in Rudhādiprakaraṇa and breaks off in the Kṛtyaprakaraṇa.

---

(*b*) सिद्धान्तकौमुदीव्याख्या—सुबोधिनी.

SIDDHĀNTAKAUMUDĪVYĀKHYĀ : SUBŌDHINĪ.

Foll. 53*a*—89*a*. Fol. 89*b* is left blank.

By Jayakṛṣṇa. Same work as that described under No. 1442 of the D.C.S. MSS., Vol. III.

Svaraprakriyā complete.

---

## R. No. 1651.

Paper. 11 × $9\frac{1}{2}$ inches. Foll. 76. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

महाभाष्यविद्वन्मुखभूषणम्.

MAHĀBHĀṢYAVIDVANMUKHABHŪṢAṆAM.

A work illustrating by means of witty stanzas the meaning of the Sūtras of Pāṇini as explained in the Mahābhāṣya: by Prayāga Vēṅkaṭādribhaṭṭa.

Contains Āhnikas three to nine of the first Pāda of the first Adhyāya.

**Beginning:**

दासायते यद्दासस्य स्वयमेव चतुर्गुणः ।
श्रीरामं तमनाद्यन्तं वन्दे शुभगिरीश्वरम् ॥

वृद्धिरादैच्—

शिष्टा एव न किंतु ग्राह्यं क्षुधितार्थिमात्रमिह दात्रा ।
अन्नस्यादैञ्मात्रमिवादैच्छब्देन वृद्धिसंज्ञायाम् ॥

अत्र भगवता भाष्यकारेण किं तद्भाविता नामेवादैचां ग्रहणम्? उतादैञ्मात्रस्येति संशयं प्रदर्श्य दूषणमुक्त्वा आदैञ्मात्रपक्षे दूषणोद्धारपूर्वकं स एव पक्षः सिद्धान्तितः । तथाच यथा वृद्धिसंज्ञायां वृद्धिसंज्ञाविधायके वृद्धिरादैजिति सूत्र इत्यर्थः । आदैज्ग्रहणेन आदैच्छब्देन आदैञ्मात्रं गृह्यते न तु शिष्टाः विहिताः । तद्भाविता एवादैचो गृह्यन्त इति विशेषमगृहीत्वा तद्भाविता अतद्भाविताश्च स्वतः सिद्धाः सामान्येनादैचो गृह्यन्ते, आदैञ्मात्रपक्षस्यैव सिद्धान्तितत्वादिति भावः । तथेह जगति अन्नस्य दात्रा सर्वेषामतिथीनां योऽन्नं प्रयच्छति तेन शिष्टाः सदाचारसंपन्नाः श्रोत्रिया एवातिथयो न ग्राह्याः, किंतु श्रोत्रियाश्रोत्रियसाधारण्येन क्षुधितार्थिमात्रं ग्राह्यम् । अन्नार्थिने क्षुधितार्थिमात्रायान्नं दातव्यमित्यर्थः, अन्नस्य क्षुधितं पात्रमिति न्यायादिति भावः ॥

* * * *

**Colophon:**

इति श्रीमहाभाष्यविद्वन्मुखभूषणे प्रथमे पादे तृतीयमाह्निकम् ॥

**End:**

तमिमं भाष्यकारसिद्धान्तं निबध्नाति—

प्राचामाचार्याणां पदमेका(ङा)दि व्यवस्थितं यद्वत् ।
तद्वदनुभवति कश्चिद्वृद्धत्वं सदसि न स्वभार्यायाम् ॥

प्राचां प्राचीनानामाचार्याणां मत इति शेषः । एङादि एङ् अदिर्यस्य तत् एङादि । एङादि पदं यद्वत् यथा वृद्धत्वं वृद्धसंज्ञां व्यवस्थितमनुभवति, क्वचित् प्राप्नोति क्वचिन्न प्राप्नोतीत्यर्थः । व्यवस्थितविभाषाश्रयणादिति भावः । तद्वत् तथा कश्चित् धूर्त इति शेषः । सदसि सभायां वृद्धत्वं स्थविरभावमनुभवति । क्वचित् उद्वाहः कर्तव्य इति सभ्यैरनुयुक्तः बाल्ये मम सामर्थ्यमुद्वाहे स्थितम् । इदानीमहं वृद्धो जातः उद्वाहं कर्तुं न शक्नोमीति स्वास्मिन्

वृद्धत्वमारोपयतीत्यर्थः । नतु स्वभार्यायाम् । तस्यां तु युववदेव व्यवहरतीति भावः । अत एव तस्यापि वृद्धत्वं व्यवस्थितम्—उद्वाहादौ विषये वृद्धत्वमस्ति । भार्यायां विषये नास्तीति दृष्टान्तदार्ष्टान्तिकयोस्तुल्यता ॥

आह्निकसमाप्तिं पादसमाप्तिं च कथयति ॥

Colophon:

इति श्रीप्रयागवेंकटाद्रिभट्टविरचिते श्रीमहाभाष्यविद्वन्मुखभूषणे प्रथमेऽध्याये प्रथमे पादे नवममाह्निकम् ॥

---

R. No. **1652.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 127. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Bhamidipāti Acyutarāmasōmayājulugāru of Irusumanda, Gōdāvari district.

तत्त्वचिन्तामण्यालोकव्याख्या—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀ: SĪDDHĀÑJANAM.

By Annambhaṭṭa. Same work as that described under R. Nos. 1536 and 1537 *ante*.

Contains the Maṅgalavāda, the Utpatti Prāmāṇyavāda and the Pramātvalakṣaṇa. The original manuscript is said to have been copied by Kāmarāju of Indupalli, the copying having been completed on Monday, the 10th day of the bright fortnight of the month of Śrāvaṇa in the year Tāraṇa.

---

R. No. **1653.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 129. Lines, 20 in a page. Dēvanāgarī. Good.

Trsnscribed in 1915-16 from a MS. of M.R.Ry. Veṅka Jagannātha Śāstri of Indupalli, Gōdāvari district.

न्यायसुधाव्याख्या—राणकोज्जीविनी.

NYĀYASUDHĀVYĀKHYĀ: RĀṆAKŌJJĪVINĪ.

By Annambhaṭṭa. Same work as that described under R. No. 1532 *ante*.

Wants a few lines in the beginning of the third Pāda of the first Adhyāya and ends in the same Pāda.

R. No. **1654.**

Paper. $10\frac{3}{4} \times 9\frac{3}{8}$ inches. Foll. 188. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamidipāṭi Acyutarāmasōmayājulugāru of Irusumanda, Gōdāvari district

न्यायसुधाव्याख्या—राणकोज्जीविनी.

NYĀYASUDHĀVYĀKHYĀ: RĀṆAKŌJJĪVINĪ.

By Annambhaṭṭa. Same work as that described under R. No. 1532 *ante*.

Contains the second Adhyāya almost complete.

**Beginning:**

भावार्थाः कर्मशब्दाः। आवतारिकभाष्यस्य प्रतीकानुपादाने बीजमाह—पाठक्रमेणेति। आद्यवार्तिकमाद्यभाष्यव्याख्यानार्थमिति प्रतीतेरननुभाषणमित्यर्थः। नन्वादावाद्यमेव व्याख्येयमिति नियमाभावान्न पाठक्रमो नियामकः। अत आह—तावच्छब्दादिति।

* * * *

**Colophon:**

इति श्रीमदद्वैतविद्याचार्यमहोपाध्यायराघवसोमयाजिकुलावतंसश्रीतिरुमला-[चा]र्यवर्यस(सू)नोरन्नभट्टस्य कृतौ राणकोज्जीविन्यां द्वितीयाध्याये प्रथमः पादः॥

**End:**

सिद्धान्तसूत्रसमासेर्वार्तिककृता दर्शितत्वात् पुनरुक्तिः स्यादेवेति शङ्कते—ननु तेष्विति। आचमनादिस्मृतीनां भ्रमादिकारणान्तराभावात् श्रुतिमूलत्वमेवेति आचमनादीन्यनुष्ठेयान्येव क्रमादि.

**Colophon:**

इति श्रीमदद्वैतविद्याचार्यमहोपाध्यायराघवसोमयाजिकुलावतंसश्रीतिरुमला-[चा]र्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ राणकोज्जीविन्यां सुधासाराख्यायां द्वितीयाध्यायस्य चतुर्थः पादः। समाप्त(श्च द्वितीयाध्यायः)॥

The scribe of the original MS. writes—

मुक्कामलजगन्नाथशास्त्री सम्यगलीलिखत्।
उज्जीविनीं राणकस्य द्वितीया(ध्या)यगोचराम्॥

---

R. No. **1655.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 99. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Mantravādi Veṅkaṭa Śāstrigāru of Munjavarapukōṭa, Gōdāvari district.

तत्त्वचिन्तामण्यालोकव्याख्या.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀ.

A commentary on Jayadēva's Tattvacintāmaṇyālōka described under No. 3998 of the D.C.S. MSS., Vol. VIII.

Wants the beginning and the end in the Prāmāṇyavāda.

**Beginning:**

अथवा प्रमात्वग्रहस्य प्रवृत्तिहेतुतया शास्त्रफलाभिधेयसंबन्धज्ञाने च वक्ष्यमाणदोषेण प्रामाण्यग्रहविरहात् शास्त्रे प्रवृत्तिरेव नास्ति । कुतः प्रमाणादितत्त्वावधारणम् । कुतस्तरां च शास्त्रस्य निश्श्रेयससंबन्धः इत्याक्षेपार्थः । प्रमातत्त्वावधारणमित्यत्र शास्त्रे प्रवृत्तिद्वारेति शेषः । अतएव प्रामाण्यग्रहो नाप्रवृत्तिहेतुरिति तमन्तरेणापि शास्त्रे प्रवृत्तिः स्यादिति माध्यमिकं प्रति तटस्थः शङ्कते—अथेति ।

**End:**

नचैवं प्रथमतोऽपि तत्संभवे तावत्पर्यन्तवैयर्थ्यम्, तथाप्रवृत्तिहेतुत्वलिङ्गाग्रहेण प्राथमिकप्रवृत्त्युपयोगानुपपत्तेरित्यभिप्रेत्याह—वस्तुतस्त्विति । फलत इति । योग्यतायास्तदवच्छेदकप्रामाण्यपर्यवसायित्वेन हेतुसाध्ययोरविशेषप्रसङ्गादित्यर्थः । तदनुमानात् तदनुमानोपस्थितप्रामाण्योपनयात् ।

---

R. No. **1656.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 104. Lines, 23 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Bhamidipāṭi Acyutarāmasōmayājulugāru of Irusumanda, Gōdāvari district.

तत्त्वचिन्तामण्यालोकव्याख्या—सिद्धाञ्जनम्.

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀ: SIDDHĀÑJANAM.

By Annambhaṭṭa. Same work as that described under R. No. 1537 *ante*.

Contains the Jñaptiprāmāṇyavāda.

---

R. No. **1657.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 41. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Tiru. Śrīnivāsavarada Tātāchāriyar of Villiyambākkam, Chingleput district.

## पारमेश्वरसंहिता.

PĀRAMĒŚVARASAṀHITĀ.

A Saṁhitā of the Pāñcarātrāgama, which is an important Āgama work on Śrī-Vaiṣṇavism. The subjects dealt with in this manuscript are clear from the headings of the Adhyāyas given below.

Contains Adhyāyas 20 to 26. The portion here is a continuation of what is contained in the MS. described under No. 5297 of the D.C.S. MSS., Vol. XI:

२०. प्रायश्चित्ततुलाभारविधिः.
२१. प्रायश्चित्तहिरण्यगर्भविधिः.
२२. प्रायश्चित्तसंप्रोक्षणपञ्चगव्यस्थापनविधिः.
२३. सुदर्शननारसिंहयन्त्रस्वरूपकथनम्.
२४. यन्त्रराजमन्त्रोद्धारकथनम्.
२५. सुदर्शनयन्त्रबाह्याभ्यन्तरयागनिर्णयः.
२६. सुदर्शनयन्त्रार्चनाग्निकार्यविधिः.

**Beginning:**

सनकः—

तुलापुरुषदानादि मम संसूचितं पुरा ।
भूभुजां तद्विधानं मे विस्तरेणैं मुने वद ॥

शाण्डिल्यः—

शृणु सम्यक् प्रवक्ष्यामि द्विज सर्वाघनाशनम् ।
तुलापुरुषदानाद्यं सर्वकामफलप्रदम् ॥
प्रजापालनशीलस्य सत्त्वनिष्ठस्य भूभुजः ।
कदाचित्कर्मलोपेन देवकोपोऽभिजायते ॥
तदैव राष्ट्रसंक्षोभः प्रजापीडा च वर्तते ।
* * * *
स्वयंव्यक्तादिके स्थाने विष्णोः सर्वगुणान्विते ।
यथाभिमतदिग्वक्त्रे पुरस्ताद्भगवद्गृहे ॥
त्रिवर्गं मण्डपं कुर्याच्चतुरश्रं समन्ततः ।
सप्तविंशत्करं क्षेत्रं सप्तधा संविभज्य च ॥
* * * *

**Colophon:**

इति श्रीपाञ्चरात्रे पारमेश्वरे क्रियाकाण्डे प्रायश्चित्ततुलाभारविधिर्नाम विंशोऽध्यायः ॥

**End:**

इति सम्यक् समुद्दिष्टं महायन्त्रार्चनं परम् ।
अदीक्षितानां विधिवदशिष्याणां दुरात्मनाम् ॥
गोपनीयं प्रयत्नेन त्वभक्तानां जनार्दने ।
भावभक्तिसेमतानां वाच्यवाचकयोर्गुरौ ॥
शास्त्रज्ञानीक्रयोपेते सात्त्विके वेदसंमिते ।
आस्तिक्यं जायते येषां तेषामेतत्प्रकाशय ॥

**Colophon:**

इति श्रीपाञ्चरात्रे पारमेश्वरे क्रियाकाण्डे सुदर्शनमहायन्त्रार्चने आग्नेकाय-विधिर्नाम षड्विंशोऽध्यायः ॥

---

R. No. **1658.**

Paper. 11 × 9½ inches. Foll. 156. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Tiru. Śrīnivāsavarada Tātācāriyar of Villiyambākkam, Chingleput district.

पारमेश्वरविवृतिः.

PĀRAMĒŚVARAVIVṚTIḤ.

A commentary on the Pāramēśvarasaṁhitā described under the last number: by Nṛsiṁhayajvan, son of Sampatkumāra. The author salutes Appayārya of Kauśikagōtra and Raṅgarāja Bhaṭṭārya. This Saṁhitā is followed in conducting the worship of God in the Srirangam temple.

Contains one to twenty-six Adhyāyas, the subject-matter of which is briefly described in the first seven stanzas in the beginning.

**Beginning:**

शास्त्रावतारः प्रथमे ज्ञान(क्रिया)काण्डे तथैव च ।
द्वितीये स्नानशुच्यादि तृतीये भूतशुद्धिका ॥
चतुर्थे मन्त्रविन्यासः पञ्चमे मानसार्चनम् ।
षष्ठे तु बेरपूजा स्यात् सप्तमे वह्नितर्पणम् ॥
अष्टमे गारुडी पूजा विष्वक्सेनार्चनं तथा ।
नवमे कालसंक्षप्तिर्दशमे रङ्गिवैभवम् ॥
एकादशे द्वारदेवा द्वादशे तु पवित्रकम् ।
त्रयोदशे तु शयनं स्वपनं च चतुर्दशे ॥

प्रतिष्ठा पञ्चदशके षोडशे चाङ्कुरार्पणम् ।
उत्सवः सप्तदशके चरोरष्टादशे विधिः ॥
निष्कृतिश्चैकोनविंशे विंशे चैव तुलावेधिः ।
एकविंशे स्वर्णगर्भो द्वाविंशे प्रोक्षणक्रमः ॥
ऊर्ध्वं चतुर्भिरध्यायैः सौदर्शनविधिक्रमः ।
इत्थं प्रवृत्तैरध्यायैः पारमेश्वरसंस्थितिः ॥

योगवासिष्ठे—

युक्तियुक्तं वचो ग्राह्यं यद्युक्तं बालकादपि ।
अन्यत् तृणमिव त्याज्यमप्युक्तं पद्मजन्मना ॥
शब्दार्थविषया दोषा भवेयुर्मतिविभ्रमात् ।
तान् सन्तः क्षन्तुमर्हन्ति कस्य वा नास्ति विभ्रमः ॥
पारमेश्वरटीकायां सहस्रत्रयषट्छतैः ।
श्लोकैर्माल्यैरार्चतः सन् प्रीणातु मम रङ्गराट् ॥
शुक्लाम्बरधरं (. . . . . .) शान्तये ।

* * * *

भगवच्छास्त्रतत्त्वज्ञमौपगायनदेशिकम् ।
तोताद्रिसंभवं वन्दे वासुदेवैकतत्परम् ॥
भगवच्छास्त्रतत्त्वज्ञमौपगायनवंशजम् ।
श्रीरङ्गराजभट्टार्यं वन्दे रङ्गपदार्चकम् ॥
भगवच्छास्त्रतत्त्वज्ञं कौशिकान्वयभूषणम् ।
अप्पयार्यगुरुं वन्द केशवाराधने रतम् ॥

* * * *

प्रणम्य प्रेरकं वाच्यं स्वबोधाय यथामति ।
पारमेश्वरपद्यानां विवृतिः क्रियते मया ॥
नमः सकलकल्याणदायिने चक्रपाणये ।
विषयार्णवमग्नानां समुद्धरणहेतवे ॥

इह खलु प्रत्यक्षितसमस्तवेदार्थतत्त्वस्थितिः तापत्रयदावदहनदंदह्यमानजीवजीवातुः भगवान् शाण्डिल्यो भवोदधिपतितजीवोत्तारय सर्वागमसारभूतं पारमेश्वराख्यं भगवच्छास्त्रमुपादित्सुः तन्निर्विघ्नपरिसमाप्तये भोगमोक्षप्रदं भगवन्तं

लक्ष्मीपतिं नमस्यति—नमः सकलेति । अत्र चक्रपाण्यादिपदेन विरोधिनिरसन-द्वारा भगवतो मोक्षप्रदत्वं सुव्यक्तम् । तोताद्रिशिखरमनुवर्णयति चतुर्भिः श्लोकैः—तोताद्रिरिति । प्रशस्ताश्रमसंयुक्ते सांख्यमात्मविवेकम् । योग अष्टाङ्गयुक्तः ।

* * * *

Colophon:

इति श्रीपाञ्चरात्रे पारमेश्वरविवृतौ श्रीसंपत्कुमारसूनुश्रीनृसिंहयज्वविरचितायां ज्ञान(क्रिया)काण्डे प्रथमोऽध्यायः ॥

End:

निगमयति—इतीदमिति । रहस्यत्वात अयोग्येषु गोपनमित्याह—दीक्षितानामिति । तर्हि कथंभूताय वक्तव्यमित्यत आह—भावभक्तीति सार्धेन । वेदसंमिते मूलवेदाथर्वणसमुद्भूते ॥

चतुर्विंशतिभिश्लोकानै(स्तत्त्वै)रावृतं पञ्चविंशकम् ।
मानुद्धर दयासिन्धो षड्विंशपुरुषोत्तम ॥

क्षमन्तां साहसं सन्तो मूढस्य मम दुर्विदः ।
मया हि स्वीयबोधाय कृतमेतन्न गर्वतः ॥

शब्दार्थविषया दोषा भवेयुर्मतिविभ्रमात् ।
तत्सन्तः क्षन्तुमर्हन्ति कस्य वा नास्ति विभ्रमः ॥

विस्मार्य हि निजानन्दं विषयेन्द्रियजे सुखे ।
भ्रामयत्येष लोकेऽन्यस्तस्मै भगवते नमः ॥

भगवन् सर्वविजय सहस्रारापराजित ।
शरण.

Colophon:

इति श्रीसंपत्कुमारसूनुश्रीनृसिंहयज्वविरचितायां पारमेश्वरपञ्चविंशतौ क्रियाकाण्डे षड्विंशोऽध्यायः ॥

---

R. No. **1659.**

Paper. 10¾ × 9½ inches. Foll. 270. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Veṅka Jagannātha Śāstri of Indupalli, Gōdāvari district.

तत्त्वचिन्तामणिदीधितिव्याख्या—सुबुद्धिमनोहरः.

TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ: SUBUDDHI-MANŌHARAḤ.

A commentary on the Tattvacintāmaṇidīdhiti, which work is described under No. 4002 of the D.C.S. MSS., Vol. VIII: by Annambhaṭṭa, son of Tirumalārya of Rāghava sōmayāji family.

Contains the following Prakaraṇas in Anumāna:—

व्याप्तिग्रहनिरूपणम्, (wants beginning) पूर्वपक्षग्रन्थः, उपाधिवादः, पक्षतावादः, परामर्शवादः, लिङ्गकारणतावादः, केवलान्वयिग्रन्थः, केवलान्वयिखण्डनम्, केवलव्यतिरेकिखण्डनम्, अवयवनिरूपणम्।

**Beginning:**

संपद्यते . . . . . तत्प्रत्यायकत्वमविरुद्धमित्याशयः। ननु भूधातोरुत्पत्तिरर्थः तादृशकालीनत्वं च प्रत्ययार्थः, तर्हि नङ्क्ष्यतीत्यत्र उत्पत्तिप्रत्यायकाभावात् देशकालयोः प्रतियोगिनि ध्वंसे वा अन्वयो वाच्यः। तथाच प्रतियोग्यन्वये श्वोभाविनाशके अद्य नङ्क्ष्यतीति प्रतीतिप्रसङ्गः। धात्वर्थान्वये चाद्य नष्टे श्वो नङ्क्ष्यतीति प्रतीतिप्रसङ्ग इत्यत आह—नङ्क्ष्यतीति।

* * * *

**Colophon:**

इति दीधितिव्याख्याने सुबुद्धिमनोहरे व्याप्तिग्रहनिरूपणं संपूर्णम्॥

**End:**

तस्यापि प्रतिज्ञार्थविशेष्यकस्वार्थबोधजनकत्वादाह—हेत्वर्थश्चेति। प्रतिज्ञार्थो वह्निमत्पर्वता

* * * *

विशेषणं साध्यमेव च तद्विशेष्यं न सर्वप्रतिज्ञार्थ इति नोक्तदोष इत्यर्थः। पञ्चम्यर्थान्वितो न प्रतिज्ञार्थ इति नोक्तदोष इत्यर्थः। पञ्चम्यर्थान्वितो . . . र्थ इत्येव प्रागुक्तम्। न तु हेत्वर्थान्वितो न प्रतिज्ञार्थ इत्युक्तमित्याशयेन प्रायमित्युक्तम्॥

**Colophon:**

इति श्रीमहामहोपाध्यायराघवसोमयाजिकुलावतंसस्य तिरुमलार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ दीधितिव्याख्याने सुबुद्धिमनोहरेऽवयवनिरूपणं संपूर्णम्॥

The fly-leaf contains the contents of the MS.

## R. No. 1660.

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 19. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

Fol. 19*b* is left blank.

**आशौचत्रिंशच्छ्लोकी—सव्याख्या.**

ĀŚAUCATRIMŚACCHLŌKĪ WITH COMMENTARY.

The text is by Rāmacandrārya and the commentary by Nṛsiṁhārya. Same work as that described under No. 3020 of the D.C.S. MSS., Vol. V, but with the following colophon.

Complete.

इति श्रीरामचन्द्रार्यकृतायामाशौचत्रिंशच्छ्लोक्यां नृसिंहार्येण कृतं (व्याख्यानं) समाप्तम् ॥

---

## R. No. 1661.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 27. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Ayyagāri Sītārāmayyagāru of Sākurru, Gōdāvari district.

**अद्वैतदीपिका.**

ADVAITADĪPIKĀ.

By Nṛsiṁhāśrama, a pupil of Jagannāthāśrama. Same work as that described under No. 4514 of the D.C.S. MSS., Vol IX.

Contains the fourth Pariccheda.

**Beginning :**

यस्मिन्नस्तसमस्तमोहमहिमस्वानन्दमन्दीकृत-
ब्रह्मानन्दमहार्णवे महति न प्राचीनवाचामपि ।
शक्तिः सत्याचिदात्मके नरहरौ मोहामरारेररौ
तन्मे तापनिवृत्तये श्रुतिगतं भूयादखण्डं महः ॥
जगन्नाथाश्रमगुरोः कृपाराकासुधाकरः ।
स्फुटीकरोतु मे स्पष्टं मार्गं ब्रह्मसुखावहम् ॥

अथ वाक्यार्थो ब्रह्म निरूप्यते, तत्र वादिनां विप्रतिपत्तेः । तदर्थं वाक्यार्थे ब्रह्मणि पदानां शक्तिरस्ति न वेति चिन्त्यते । अत्र नवीनः—न ब्रह्म सर्वशब्द-वाच्यम्, अवाच्यपदेनैवाभिधानात् । नच तेनापि लक्ष्यम्, अवाच्यरूपमुख्यार्थ-स्याभावात् ।

**End:**

तस्मादहमनुभवगोचरातिरिक्तमकर्तृभोक्तृस्वभावस्वप्रकाशात्मकमाविद्यया विभक्तमिव प्रतीयमानं तं पदलक्ष्यमुद्दिश्य औपनिषदस्य मायया जगदुपादाननिमित्तभूतस्य वस्तुतो निर्विशेषस्य सत्यज्ञानानन्दात्मनस्तत्पदलक्ष्यस्य स्वरूपमात्राभेदो महावाक्येन प्रतिपाद्यत इति सिद्धम् ॥

श्रुतिरयमिति वक्तुं यं न शक्नोति यस्मिन् वटतरुतलवासी मौनमास्ते महीयान् ।
अतुलनिजविभूतेस्तस्य देवस्य भूयान्नरमृगवपुषोऽयं प्री(तये)ऽद्वैतदीपः ॥
कृतिरियममरेन्द्रोन्निद्रमौलिप्रभौघप्रमृदितपदपीठे श्रीपतेरेव विष्णोः ।
न मम निजानेमेषेऽप्यप्रबोधक्षतास्तु स्फुटबहुविकृतिर्वा नात्र मे किंचिदेनः ॥
किंयदपि परिपीतं यत्कदाचि(त् प्रसङ्गा)द्विमलपदसरोजक्षालनाम्भो गुरोर्नः ।
शमयति हृदि तापं वर्धयत्यात्मविद्याजलनिधिमपि विष्णौ भक्तिमेतद्विधत्ते ॥
अहं कियानेष गुरोः प्रसादः क्व वामरेन्द्रैर्मनसाप्यलभ्यः ।
प्रसादिते देववरे मु(रारौ) न किंचिदप्राप्यमिहेति मन्ये ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभगवज्जगन्नाथाश्रमश्रीचरणशिष्यश्रीनृसिंहाश्रमकृतौ अद्वैतदीपिकायामानन्ददीपिकाख्यश्चतुर्थः परिच्छेदः । समाप्तश्च (ग्रन्थः) ॥

---

R. No. **1662.**

Paper. 10¾ × 9⅓ inches. Foll. 143. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Ayyagāri Sītārāmayyagāru of Sākurru, Gōdāvari district.

**छान्दोग्योपनिषद्भाष्यटीका.**

CHĀNDŌGYŌPANIṢADBHĀṢYAṬĪKĀ.

A commentary on the Chāndōgyōpaṇiṣadbhāṣya of Śaṅkarācārya: by Abhinava Nārāyaṇēndrasarasvatī, disciple of Jñānēndrasarasvatī who was himself the disciple of Kaivalyēndrasarasvatī.

Contains Adhyāyas six to eight.

**Beginning:**

यद्विज्ञानात्सर्वविज्ञानमाहुर्यच्चाद्वैतं तेजआदीनि सृष्ट्वा ।
तत्कार्येऽस्मिन् प्राविशज्जीवसङ्घः सोऽहं सत्तामात्ररूपः परात्मा ॥

नत्वा श्रीदक्षिणामूर्तिं ज्ञानेन्द्रगुरुरूपिणम् ।
छान्दोग्यषष्ठभाष्यस्य विवृतिः क्रियतेऽधुना ॥

पूर्वग्रन्थे उद्गीथादिवैश्वानरान्तान्युपासनान्युक्तानि । नच तैः परमपुरुषार्थ-ब्रह्मत्वलाभः, तेषां सांसारिकफलत्वादिति तन्निवृत्युपलक्षितब्रह्मभावलाभाय षष्ठा-ध्याय आरब्धः । तस्य पूर्वग्रन्थेन संगतिरुच्यत इत्याह—श्वेतकेतुरिति । इत्यध्यायेति इत्यादेरध्यायस्य संबन्ध उच्यत इति शेषः । तत्र तत्तेजोऽसृजत इत्यादिसृष्ट्यंशपर्यालोचनया तृतीयाध्यायेन संबन्धमाह—सर्वमिति ।

* * * *

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कैवल्येन्द्रसरस्वतीपूज्यपादशिष्य-ज्ञानेन्द्रसरस्वतीपूज्यपादशिष्यश्रीमदभिनवनारायणेन्द्रसरस्वतीविरचितायां छान्दो-ग्यभाष्यटीकायां षष्ठोऽध्यायः ॥

End :

अन्यथा आत्मनि सर्वेन्द्रियाणि संप्रतिष्ठाप्येत्यस्य गृहस्थे असंकोचेनानुपपत्तेः पूर्वोक्तन्यायविरोधापत्तेश्चेति ॥

Colophon :

इत्यष्टमाध्यायस्य चदुर्दशः खण्डः ॥

अङ्गुष्ठतर्जनीन(युक्त)मुद्राव्याजेन सेविनाम् ।
श्रुत्यर्थं ब्रुव . . . दर्शयन्नवताच्छिवः ॥
श्रीमज्ज्ञानेन्द्रगुरवे दक्षिणामूर्तये नमः ।
कृपासुधासमुद्राय ज्ञानशीतांशुहेतवे ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमत्कैवल्येन्द्रसरस्वतीपूज्यपादशिष्य-ज्ञानेन्द्रसरस्वतीपूज्यपादशिष्यश्रीमदभिनवनारायणेन्द्रसरस्वतीविरचितायां छान्दो-ग्यभाष्यटीकायामष्टमोऽध्यायः ॥

---

R. No. **1663.**

Paper. 10¾ × 9½ inches. Foll. 114. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Kaṇvapūri Rāmajōgi Śāstrulu of Pulivela, Razole taluk.

## कण्वकण्ठाभरणम्.

## KAṆVAKAṆṬHĀBHARAṆAM.

On the religious duties and observances known as the Gṛhya or Śmārta rituals, as opposed to the Śrauta rituals, laid down for the followers of the Kaṇvaśākhā of the White Yajurvēda. The names of the Prakaraṇas given below indicate clearly the subjects dealt with therein. By Anantabhaṭṭa, son of Dēvanāga. The author salutes in the beginning Kātyāyana, the author of the Kalpasūtra of this school, Karka, the commentator thereon, and Vāsudēva, the compiler of a Prayōga manual of the rituals prescribed in the Sūtras. The author proposes to follow the Sūtra, the Bhāṣya and the Smṛti pertaining to this school.

Contains the following Prakaraṇas :—

प्रायश्चित्तपद्धतिः, वृद्धिश्राद्धपद्धतिः, प्रायश्चित्तप्रयोगः, स्मार्ताधानम्, यजुर्वेदमुख्यामुख्यत्वविचारः, पञ्चमहायज्ञविधिः, सायंहोमविधिः, औपासनविधिः, पिण्डपितृयज्ञविधिः, पक्षादिस्थालीपाकनिरूपणम्, नवान्नप्राशनम् (incomplete) ।

**Beginning :**

वन्दे श्रीमदनन्तसंज्ञगिरिपं लक्ष्मीनिवासं हरिं
विघ्नध्वान्तदिवाकरं सुरगुरुं सर्वार्थसिद्धिप्रदम् ।
ब्रह्मा शर्वसुरेन्द्रपूर्वकसुरा यस्य प्रसादात् सदा
सर्वारम्भसमाप्तिमापुरमलं श्रीवल्लभं तं परम् ॥
कात्यायनमुनिं वन्दे सूत्रकर्तारमुत्तमम् ।
यस्य चित्तामलादर्शे प्रतिबिम्बगता त्रयी ॥
यदनुग्रहवातेन नुन्ना अल्पज्ञपङ्गवः ।
श्रौतस्मार्तादितत्त्वार्थ(र्थ)गङ्गायां सम्प्लुताहताः ॥
तं कर्कं भाष्यकर्तारं नुमः सर्वार्थसिद्धये ।
वासुदेवं च येनादौ प्रयोगो दर्शितो नृणाम् ॥
श्रीकण्वकण्ठाभरणं ग्रन्थं कुर्वे विपश्चितः ।
संतोषाय गुरुं नत्वा स्मार्तानुष्ठानसिद्धये ॥
समस्तकण्वशाखिभ्यो मूर्धन्येषोऽञ्जलिर्मया ।
बध्यते मच्छ्रमं दृष्ट्वा कृपां कुर्वन्तु ते मयि ॥

श्रीमत्कण्वकुलाब्धिशीतकिरणो विद्याकुलानां निधिः
श्रीमद्विष्णुपदाश्रितः सरसगुर्विद्वच्चकोराप्रियः ।
भट्टोऽनन्त इति श्रुतप्रथुयशाः श्रीदेवनागात्मजः
तेनेयं कुरु(क्रिय)ते परोपकृतये ह्याधानसत्पद्धतिः ॥
सूत्रभाष्यादिग्रन्थानामेकवाक्यतया मया ।
पद्धतिः क्रियते तेन सन्तो गृह्णन्तु मत्कृतिम् ॥
बालानां मन्ददृष्टीनां तुष्टयै न क्रियते श्रमः ।
किंतु प्रगल्भदृष्टीनां गुणो यत्र गुणायते ॥

विवाहानन्तरमावसथ्याधानं कर्तव्यम् ।
तत्र आवसथ्याधानं कर्तव्यम् ॥ सूत्रम् ॥

आवसथ्यो गृह्यः शालाग्निरित्य(न)र्थान्तरम् । तस्याधानं स्थापनमात्मसात्करणमिति यावत् । तत् दारकाले भवति । दार[काल]शब्देन पाणिग्रहणादिसंस्कारसंस्कृतं स्त्रीद्रव्यमभिधीयते । तद्वहणकालो दारकालः । तत्र केचित् पाणिग्रहणात् प्रागिच्छन्ति, गृह्यकारान्तरवचनात् । एवं हि तेनोक्तम्--जायायाः पाणिं जिघृक्षन्निति । तत्पुनर्नातीव युक्तरूपम्

* * * *

**Colophon:**

इति श्रीमद्वाजसनेयकुलतिलकश्रीमदनन्तभट्टविरचिते आधानपद्धतौ प्रायश्चित्तपद्धतिः ॥

**End:**

तत्रापि तिथिविशेषमाहाश्वलायनः—

नातीतेष्टिश्चतुर्दश्यां चतुर्थ्यां मध्यपञ्चके ।
नवम्यां च द्वितीयायां कार्या ह्याहुतयस्तदा ॥

इति ॥

सूत्रभाष्यस्मृतीनां वै एकवाक्यतया मया ।
निर्णीय संगृहीतोऽर्थः स्थालीपाकविधौ परः ॥

**Colophon:**

इति श्रीमन्महामहिमपदवाक्यप्रमाणज्ञश्रौतस्मार्तपारदृश्वश्रीमत्कण्वकुलाब्धिचन्द्रेण श्रीमदनन्तभट्टेन विरचिते कण्वकण्ठाभरणे स्थालीपाकप्रयोगः ॥

अथ नवान्नप्राशनम्—

तत्र अनाहिताग्नेर्नवप्राशनम् इति सूत्रम् ॥ अनाहिताग्निरवैतानिकः कृताधानः । नवप्राशनमिति कर्मणो नामधेयम् ।

* * * *

आचम्य पवित्राभ्यां मार्जनम् । पवित्रप्रतिपत्तिः प्रणीताविमोकः ॥

---

R. No. **1664.**

Paper. 11×8⅝ inches. Foll. 69. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Bidusu Pārvatīśvarasōmayājulu of Vyāghrēśvaram, Razole taluk.

(*a*) दर्शपूर्णमासमन्त्रभाष्यम्.

DARŚAPŪRṆAMĀSAMANTRABHĀṢYAM.

Foll. 1*a*—66*b*.

A commentary on the Mantras recited in connection with the performance of the Darśapūrṇamāsa sacrifice: by Timmayajvan, also called Tirumalayajvan, son of Mallaya of Mādhavasōmayāji family. The author is stated to have written a commentary on the Mahābhāṣya, entitled Anupada, and another commentary on the Sandhyāvandanamantra of the Vaiṣṇavas. The author's father is said to have written commentaries on the Tattvavivēka, the Maṇyālōka and the Kaiyaṭa. The author's grandfather is said to have written a poem, viz., Kṛṣṇābhyudaya, as well a commentary on the Darśapūrṇamāsamantra, and the Gurumatānuvāda.

Complete.

**Beginning:**

इन्दिरारुणपादारविन्दसंपर्कसुन्दरः ।
देयादमन्दमानन्दं योगानन्दनृकेसरी ॥
दर्वीकरेशमौर्वीश(क)मुर्वीरथमुमापतिम् ।
स्वरटानिटलद्वारं(स्वर्वाहिनीसरिद्द्वार)दुर्वाराटज्जटं श्रये ॥
परदार(वरदान)नवोल्लासं सुरदानवसेवितम् ।
गन्धदानपसंसेव्यं(वलद्भृङ्ग)द्विरदाननमाश्रये ॥
चतुर्दशसु विद्यासु वल्लभं पितरं गुरुम् ।
वन्दे कूश्माण्डदातारं मल्लयज्वानमन्वहम् ॥

पितामहस्तु यस्येदमन्त्रभाष्यं चकार च ।
श्रीकृष्णाभ्युदयं काव्यमनुवादं गुरोर्मते ॥

यत्पित्रा(तु कृ)ता टीका मण्यालोकस्य धीमता ।
तथा तत्त्वविवेकस्य (कैयट)स्यापि टिप्पणिः ॥
तत्पुत्रेण बुधा तिम्मसर्वतोमुखयाजिना ।
(पश्चाधाने)ष्टिमन्त्राणामर्थो गूढो विविच्यते ॥
तत्पा(त्रा)दाविष्टिमन्त्राणां सर्वतोमुखयाजिना ।
अर्थो गूढो यथाभाष्यं यथामति विधीय(विच्य)ते ॥
टीका चानुपदाख्या हि महाभाष्यस्य धीमता ।
सन्ध्यावन्दनमन्त्राणां वैष्णवानां च सा कृता ॥

स्थाणुरयं भारवाहः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । स वेदवित् सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥

यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ॥

यदेव विद्यया करोति तदेव वीर्यवत्तरं भवति इति श्रवणात् अध्ययनविधेरर्थावबोधपर्यन्तत्वाच्चार्थानवबोधे फलाश्रवणात् अर्थावबोधे फलश्रवणाच्च । तस्माद्वेदार्थः प्रतिपत्तव्यः । विद्युदसि विद्य मे पाप्मानममृतात् सत्यमुपैमि अपउपस्पृशति । विद्युन्नाम प्रजापतिर्देवता जले अध्यारोप्योच्यते । हे प्रजापत्यधिष्ठित जल यतस्त्वं विद्युदसि देवानां पापवियोगहेतुरसि अतो मे पाप्मानं पापं विद्य वियोजय ।

**End:**

ब्राह्मणानिति । हे पत्नि ब्राह्मणान् तर्पयितुमानुकूल्यं रचय ; तुमर्थे तवैप्रत्ययः । अथवा हे परिचारकाः ऋत्विजः अन्यांश्च तर्पयत तृप्तिं कुरुत । वै इति प्रसिद्धौ ॥

**Colophon:**

इति श्रीमाधवसोमयाजिकुलावतंसचतुर्दशविद्यावल्लभमल्लयसूनुना तिरुमलसर्वतोमुखयाजिना महाभाष्यस्यानुपदाख्यटीकाकृता रचितं दर्शपूर्णमासमन्त्रभाष्यं संपूर्णम् ॥

मया कृते च भाष्येऽस्मिन् स्खालित्यं यदि विद्यते ।
अदूषयित्वा तद्भाष्यं शोधयन्तु विपश्चितः ॥

(*b*) अनाज्ञातमन्त्रभाष्यम्.

ANĀJÑĀTAMANTRABHĀṢYAM.

Foll. 66*b*—69*a*.

A commentary on the Vedic Mantra beginning with the word अनाज्ञात and used in the performance of the fire-offerings.

Complete.

**Beginning:**

अथ प्रकरणवशादनाज्ञातमन्त्राण्युच्यन्ते । अनाज्ञातं . . . . तथम् । यज्ञस्य संबन्धि यदङ्गमनाज्ञातं यथाशास्त्रोक्तक्रमेणास्माभिरज्ञातं यत् यदाज्ञातं सम्यग्विज्ञातं सत् मिथु क्रियते ज्ञानादज्ञानाद्वा अन्यथा अनुष्ठीयते । हे अग्ने अस्य कर्मणः संबन्धि तत् सर्वमङ्गं कल्पय फलदानसमर्थं कुरु । हे अग्ने यस्मात् कारणात् त्वं यथातथा कर्मणो वस्तुतत्त्वं वेत्थ ।

**End:**

इदं मध्यं रक्ष अतीतानागतयोर्मध्ये स्थितमस्मदीयं शरीरं पालय ॥

**Colophon:**

इत्यनाज्ञातमन्त्रभाष्यं संपूर्णम् ॥

Fol. 69 contains some lines being the commentary on Araṇimathana-mantra.

---

R. No. **1665.**

Paper. 10¾ × 9½ inches. Foll. 43. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamidipāṭi Acyutarāma-sōmayājulu of Irusumanda, Gōdāvari district.

महाभाष्यविद्वन्मुखभूषणम्.

MAHĀBHĀṢYAVIDVANMUKHABHŪṢAṆAM.

By Prayāga Vēṅkaṭādribhaṭṭa. Same work as that described under R. No. 1651 *ante*.

Contains the Āhnikas three to nine in the first Pāda of the first Adhyāya.

---

R. No. **1666.**

Paper. 11 × 8¾ inches. Foll. 103. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Anappindi Pullaya Śāstri of Perūru, Amalāpuram taluk.

The fly-leaves contain the contents of the MS.

अध्यात्मरामायणसेतुः.

ADHYĀTMARĀMĀYAṆASĒTUḤ.

By Rāmavarman. Same work as that described under No. 2158 of the D.C.S. MSS., Vol. IV, Part I.

Contains the Bālakāṇḍa (except the first Sarga), the Ayōdhyākāṇḍa, the Sundarakāṇḍa and the Yuddhakāṇḍa.

---

R. No. **1667.**

Paper. $10\frac{3}{4} \times 9\frac{1}{4}$ inches. Foll. 30. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of V. S. Narasiṁhācāriyar of Villiyambākkam, Chingleput district.

तर्कसंग्रहदीपिकाव्याख्या.

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ.

A commentary on the Tarkasaṅgrahadīpikā of Annambhaṭṭa, described under No. 4154 of the D.C.S. MSS., Vol. VIII; by Vēṅkaṭācārya, son of Śrīnivāsārya of Vādhūlagōtra and grandson of Mahārya who was the son of Saumyavarārya.

Contains the Pratyakṣa incomplete.

**Beginning:**

कस्तूरीकमनीयास्यः करुणाकलशोदधिः ।
कमलाकमनो रङ्गी करोतु करुणां मयि ॥
फलं यः सप्तर्षिप्रमुखतपसां प्रादुरभव-
न्नृसिंहः संहृष्यन्नृततिघटिकाद्वौ वसति यः ॥
महार्याद्यैरार्यैर्महितचरणो यश्चिरमसा-
वपायात्पायान्मामसृतफलवल्लीसहचरः ॥
वाधूलान्वयवार्धिकौस्तुभमणिर्वन्दारुचिन्तामणि-
र्वीदिव्राततमश्छटादिनमणिर्वागीशचूडामणिः ।
श्रीमत्सौम्यवरार्यवर्यतनय श्रीमन्महार्यात्मजः
श्रीमान् सद्गुणशेवधिर्विजयतां श्रीश्रीनिवासो गुरुः ॥
श्रीवाधूलकुलोत्तंस श्रीनिवासार्यनन्दनः ।
तनुते वेंकटाचार्यस्तर्कसंग्रहटिप्पणीम् ॥

सन्तु साहसिकाः कामं साभ्यसूयाः सहस्रशः ।
सन्त्येव सुधियस्तेन सफलोऽस्मत्समुद्यमः ॥

अन्नंभट्टो नाम कश्चन विपश्चित् दुश्चरतपश्चरणाद्विगुणितबुद्धिवैशारद्यैः दूरीभवदवद्यैः कणचरणपश्यच्चरणप्रधानैः प्राचीनैः बहुधा लक्षणप्रमाणाभ्यां लक्षितमपि पदार्थसार्थं व्युत्पित्स्वनुजिघृक्षया परिमितपदनिबन्धेन तर्कसंग्रहनामकेन केनचित् प्रबन्धेन संगृह्य स्वयमेव श्रुतार्थधारणनैपुणविधुराणां मितमतीनां हिताय तमेव प्रबन्ध व्याचिकीर्षुः प्रारिप्सितपरिसमाप्तिपरिपन्थिप्रत्यूहसमूहव्यपोहनाय विवक्षितार्थविशदावबोधनसमर्थगम्भीरवाग्गुम्भनचातुरीस्थिरीकरणाय

* * * *

प्रतिजानीते—विश्वेश्वरमित्यादिना । टीकां कुर्वे इत्यन्वयः । कथंभूतां किमभिधानामित्यत आह—तर्कसंग्रहदीपिकामिति ।

**End:**

तथाच प्रकृतेऽपि घटत्वं जातिः पटत्वं जातिरित्याद्यनुगतव्यवहारावलम्बनभूता जातित्वाख्या जातिर्जातिसामान्यलक्षणत्वेनाभिमतैव ॥

---

R. No. **1668.**

Paper. 10⅝ × 9¼ inches. Foll. 33. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Sampatkumāra Varada Vēṅkaṭa Raṅgācārya Ayyāvayyaṅgārlu of Tuni.

भरतसर्वार्थसंग्रहः.

BHARATASARVĀRTHASAṄGRAHAH.

A work on the art of gesticulation. The portion contained in this manuscript deals with the following subjects :—

| | |
|---|---|
| अर्धपताकहस्तविनियोगः. | पद्मकोशहस्तविनियोगः. |
| कर्तरीमुखहस्तविनियोगः. | बाणहस्तविनियोगः. |
| मयूरहस्तविनियोगः. | सर्पशीर्षहस्तविनियोगः. |
| रेखाचन्द्रहस्तविनियोगः. | चलसर्पहस्तविनियोगः. |
| शुकतुण्डहस्तविनियोगः. | चतुरहस्तविनियोगः. |
| मुष्टिहस्तविनियोगः. | भ्रमरहस्तविनियोगः. |
| कपित्थहस्तविनियोगः. | हंसाख्यहस्तविनियोगः. |
| सूचीमुखहस्तविनियोगः. | मुकुलहस्तविनियोगः. |

ऊर्णनाभहस्तविनियोगः.
सिंहाननहस्तविनियोगः.
मणिहस्तविनियोगः.
चलपल्लवहस्तविनियोगः.
मुकुरहस्तविनियोगः.
खञ्जनहस्तविनियोगः.
कपिलहस्तविनियोगः.
वंशालहस्तविनियोगः.
स्वर्णरञ्जनहस्तविनियोगः.
स्वस्तिकहस्तलक्षणम्.
संमोहनहस्तलक्षणम्.
सिन्धुहस्तलक्षणम्.
भ्रामकहस्तलक्षणम्.

The author is Muḍumba Nṛsiṁhācārya of Śrīvatsagōtra. He states that this work is based upon similar prior works attributed to Nandikēśvara, Nārada, Bṛhaspati and Bharata.

Wants the beginning and end.

**Beginning :**

. . . पतनधारापातनेष्वधःप्रसृतिः ।
. . . . . ॥

ऊर्ध्वमुखप्रसराः—

पादसपरागभ्रमरोष्णीषकिरीटेषु पक्षिपक्षेषु ।
गगने . . त्पतनमहापक्षित्वरेषुदिषु(?)म्लेच्छदैवेऽपि ॥

* * * *

कज्जलवदनसुमाघ्राणेषु श्रुतिस्मृतिषु मक्षिकास्वपि च ।
वह्निज्वालाकट्यां त्रिपताकाभिधकरावयवसाराः ॥

**End :**

कोटीरनटनसिंहाननयोर्हृदये च कु . . दीक्षासु ।
मुकुराख्यकरप्रसृतिः सारस्वतभरतशास्त्रतः प्रोक्ता ॥

**Colophon :**

इति श्रीवत्सान्ववायसंजातमुडुम्बनृकण्ठीरवाचार्येण लेखकपठनप्रमादादिदोषरहितं मया(यथा)शास्त्रं परिष्कृतदर्पणशास्त्रे नन्दिकेश्वरीयनारदीयबृहस्पतीयसारस्वतभरताख्यचतुर्ग्रन्थस्थासंयुतहस्तसर्वविनियोगतत्प्रसारसं(घ)टितभरतसर्वार्थसारसंग्रहाभिधाने षट्त्रिंशतिसंख्याविशिष्टासंयुतहस्तप्रकरणं संपूर्णम् ॥

* * * *

आमकहस्तलक्षणम्—

मध्यमाद्यत्रयोऽङ्गुल्यो विसृष्टास्तर्जनी ततः ।
अङ्गुष्ठघटिताग्रा च प्रसृतो आमकः करः ॥
शङ्खे ध्वजे शैलशृङ्गे ताटङ्केऽपि च नाट्यके ।
तार्क्ष्यस्य मुद्राभावेऽपि देवतागृहवाचके ।
कल्पवृक्षे खञ्जरीटे आमकः कर ईरितः ॥

**Colophon:**

अनन्तरोद्भवासंयुतहस्तप्रकरणं समाप्तम् ॥

---

R. No. **1669.**

Paper. $10\frac{5}{8} \times 9\frac{1}{4}$ inches. Foll. 110. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Mantha Cennaya Śāstri of Pantuluvar Agrahāram, Amalāpuram taluk.

भागवतव्याख्या.

BHĀGAVATAVYĀKHYĀ.

Foll. 1*a*—109*a*. Foll. 109*b* and 110*a* contain the portions omitted in the MS. Fol. 110*b* is left blank.

A commentary on the Śrī-Bhāgavata; by Rēgilla Śarva Śāstrin.

Begins in the first Adhyāya of the fifth Skandha and breaks off in the 23rd Adhyāya of the same Skandha.

**Beginning:**

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।
कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥
यो नारदादात्मविद्यामधिगम्य पुनर्महीम् ।
भक्त्या विभज्य पुत्रेभ्य ऐश्वरं समगात्पदम् ॥

इति चतुर्थस्कन्ध . . . . . पि प्रियपुत्रकृतं महीभोगं प्रति विस्मितः राजा पृच्छति—प्रियव्रत इति । भागवतः स्वभावत एव भगवद्भक्तः प्रियव्रतः नारदोपदेशादात्मारामश्च भूत्वा कथं गृहे अरमत आत्मरमणगृहरमणयोः परस्परविरुद्धत्वेनेति भावः ।

* * * *

**Colophon:**

इति श्रीरेगिल्लसर्वशास्त्रिविरचितायां श्रीभागवतव्याख्यायां पञ्चमस्कन्धे प्रथमोऽध्यायः ॥

**End:**

तत उपरिष्टात् ऋषयः एकादशलक्षयोजनान्तरे उपलभ्यन्ते ज्ञायन्ते य एते सूर्यादयः लोकान् समनुभावयन्तः सम्यगनुभावयन्तः भगवतः विष्णोः श्रीहरेः परमं पदं ध्रुवपदं प्रदक्षिणं यथा तथा परिभ्रमन्ति ॥

**Colophon:**

इति श्रीरेगिल्लसर्वशास्त्रिविरचितायां श्रीभागवतव्याख्यायां पञ्चमस्कन्धे द्वाविंशोऽध्यायः ॥

अथ त्रयोविंशोऽध्यायः ॥

अथेति । अथ तस्माद्दषिमण्डलात् परतः उपरि त्रयोदशलक्षयोजनान्तरतः

* * * *

ज्योतिर्गणानां स्थाणुरिवावष्टम्भः आधारः ईश्वरेण श्रीहरिणा विहितः नियुक्तः सदा अवभासते प्रकाशते ।

---

## R.No. **1670.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 77. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

(*a*) दक्षिणामूर्तिसहस्रनामव्याख्यानम्—सुविग्रहालंकरणम्.

DAKṢIṆĀMŪRTISAHASRANĀMAVYĀKHYĀNAM: SUVIGRAHĀLAṄKARAṆAM.

Foll. 1*a*—4*a* and 10*a*—76*a*.

A commentary on the work described under No. 9219 of the D.C.S. MSS., Vol. XVII. The author of the commentary is Kāmēśvara, second son of Vīrēśvara of Vādhūlagōtra who became a Sannyāsin in Kañcīpuram and whose maternal grandfather was Mantrādi Vīrēśvara, son of Kṛṣṇayajvan of Kauṇḍinyagōtra and an inhabitant of the Gōdāvari banks. The commentary is called Suvigrahālaṅkaraṇa.

Complete.

**Beginning:**

अम्बाङ्कमारुह्य पिपासुरादरात् स्तन्यं सुस्री यस्तमिभाननं मुहुः ।
नत्वा मनोऽभीष्टफलाय सादरं श्रीदक्षिणामूर्तिगुरुं नमामि ॥

वेदशास्त्रमखिलं च विदित्वा कर्मकाण्डमखिलं विरचय्य ।
कीर्तिमेत्य भुवि कर्म निरस्य ब्रह्मरूपमिम एत्य विरेजुः ॥
जग्राह कौण्डिन्यसगोत्रविद्वच्छ्रीकृष्णयज्वाख्यपितुर्य आर्यः ।
श्रीसप्तगोदावरतीरवासी मन्त्रादिवीरेश्वरसोमयाजी ॥
स्वपुत्रिकायास्तनयाय सोऽयं मन्त्रादिवाधूलसगोत्रजाय ।
स्वाख्याधृते मज्जनकाय सम्यगुपादिशन्नौमि गुरूनिमान् स्वान् ॥
यो वाधूलसगोत्रयज्वसु महान् दिव्याः प्रकुर्वन् क्रियाः
सज्जायोऽथ समस्ततीर्थपदवीमासेतुवाराणसि ।
त्रिः संसेव्य ततः कलत्रमरणात् काञ्चीपुरेऽथ स्वयं
ब्रह्मीभूय गृहे नियोज्य तनयो(यं) भूयोऽपि काशीमगात् ॥
सोऽत्र सन्न्यस्तसंकल्पः परहंसो यतोऽभवत् ।
अतः परमहंसाख्यं नुमस्तद्ब्रह्मकारणम् ॥
श्रीवाधूलसगोत्रस्य श्रीवीरेश्वरयज्वनः ।
द्वितीयस्तनयो योऽयं कामेश्वर इति द्विजः ॥
श्रीदक्षिणामूर्तिसहस्रनाममुक्तावलेरीश्वरदत्तबुद्ध्या ।
सुविग्रहालंकरणं करिष्ये तुष्यन्तु दृष्ट्वेदमपूर्वमार्याः ॥
अनेकदेशमूलानि दृष्ट्वा संशोध्य यत्नतः ।
सुविग्रहालंकरणे प्रवृत्तोऽस्मि सतां मुदे ॥
शब्दार्थनिश्चयज्ञानं न मे यद्यपि विद्यते ।
अथाप्युपास्यदेवस्य भक्त्या साहसमाश्रयाम् ॥
क्षमन्ते बालकस्याज्ञाः साहसं यद्वदादरात् ।
तद्वद्यूयमपि प्राज्ञाः क्षन्तुमर्हथ मामकम् ॥
किंच सम्यग्विलोक्येदं वैषम्यमपहाय च ।
अलंकुरुत सद्वृत्त्या भक्तानुग्रहवाञ्छया ॥

अत्र नाम्नां शब्दतोऽर्थतश्च पौनरुक्त्येऽपि शब्दार्थभेदान्न पौनरुक्त्यम् । विधिगत एव शब्दः प्रयोक्तव्य इति मीमांसकनियमात् । अन्यथा अग्नये जुष्टं निर्वपामीत्यत्र वह्न्यादिपदप्रयोगापत्तिर्दुर्वारा । शिवादिशब्दानां पुनरुक्तानामपि वृत्तिभेदेनार्थभेदान्न पौनरुक्त्यम् ।

* * * *

दक्षिणाय नमः । दक्षिणायेति । श्रीविष्णुसहस्रनामभाष्ये—दक्षते वर्धत इति दक्षिणः प्रवृद्धः शक्तः शीघ्रकारी च ।

**End :**

धिमीधिमीधिमीरूपाय नमः धिमीधिमीधिमी इति यो नादः तत्स्वरूपः । धै धै धै नाट्यनायकाय नमः धै धै धै इति यन्नाट्यं तस्य नायकः ॥

**Colophon :**

दशमशतकं समाप्तम् ॥

श्रीदक्षिणामूर्तिसाहस्रनाममुक्तावलेरिति ।
सुविग्रहालंकरणं यथामति मया कृतम् ॥
श्रीवाधूलसगोत्रेण कामनाम्ना द्विजन्मना ।
अतोऽसौ विबुधप्रीत्यै भूयात्सुन्दरविग्रहः ॥

इति श्रीसुविग्रहालंकरणे दशमः परिस्पन्दः ॥

---

(*b*) दक्षिणामूर्तिसहस्रनामस्तोत्रम्.

DAKṢIṆĀMŪRTISAHASRANĀMASTŌTRAM.

Foll. 4*a*—9*a* and 76*a*—77*a*. Fol. 77*b* is left blank.

Same work as that described under No. 9219 of the D.C.S. MSS., Vol. XVII.

Complete.

---

(*c*) मेधादक्षिणामूर्तिमन्त्रार्थः.

MĒDHĀDAKṢIṆĀMŪRTIMANTRĀRTHAḤ.

Fol. 9*b*.

A commentary on the Mantra relating to Mēdhā-Dakṣiṇāmūrti, described under No. 6957 of the D.C.S. MSS., Vol. XIII.

Complete.

**Beginning :**

अत्र ओंकारेण स्थूलसूक्ष्मकारणप्रपञ्चावधिभूतं प्रत्यगभिन्नं तत्त्वमस्यादि-महावाक्यार्थभूतं ब्रह्माभिधीयते । भगवच्छब्देन

उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥

इति श्लोकोक्तसर्वज्ञसर्वशक्तिमांश्चाभिधीयते ।

**End:**

जडानृताहंकारेभ्यः प्रातिलोम्येन सत्यज्ञानानन्दात्मकतया अञ्चति प्रकाशयतीति प्रत्यक् ॥

**Colophon:**

इति शंकराचार्यविरचितम्.

---

R. No. **1671.**

Paper. 11 × 9½ inches. Foll. 72. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Ayyagāri Sītārāmayyagāru of Sākuṟṟu, Gōdāvari district.

चम्पूरामायणव्याख्या—विद्वत्कौतूहलम्.

CAMPŪRĀMĀYAṆAVYĀKHYĀ: VIDVATKAUTŪHALAM.

A commentary on the Yuddhakāṇḍa of Bhōja's Campūrāmāyaṇa, the author of which Kāṇḍa is Lakṣmaṇasūri. The commentator Kāmēśvarasūri traces his genealogy thus:—

Brahmāntarvāṇi
|
Mallēśvara
|
Gaṅgādhara
|
Kāmēśvara
(disciple of Viśvēśvara and the son of Vēṅkaṭēśvara's sister.

Contains the Yuddhakāṇḍa.

**Beginning:**

जगद्वन्दितपादोद्यद्वारणो वारणाननः ।
निरङ्कुशस्य यस्याभूद्विधौ विधुकलाङ्कुशः ॥
नम्यद्विष्णुमुखाखिलामराशिरःकोटीरकोटीघट-
न्माणिक्यार्ककरप्रसारविकसत्सौगन्धिताशामुखम् ।
ताद . . . . . दानक्षमं गाभृशं(?)
. . . पदपङ्कजं वितरतु श्रेयांसि भूयांसि नः ॥
जनकदुहितुराकण्याञ्जनेयादुदन्तं
प्लवगबलसमेतः प्राप्य लङ्कामशङ्कम् ।
रिपुहतिपरितुष्टः स्वर्गिवाण्यात्तसीत-
स्त्वधिगतनिजवासः सानुजः पातु रामः ॥

* * * *

व्याकृत्येत्पञ्चकाण्डीं मृदुलपरिलसच्छिष्टसद्गुढशब्दां
सर्वान्तर्वाणि . . . . डितविरचितां भोजभूपेन तेन .
षष्ठं श्रीलक्ष्मणीयं विषमललितशब्दाभिरामं च काण्डं
व्याकर्तुं यत्नकर्तुर्निखिलबुधगणः क्षाम्यतां साहसं मे ॥
श्रीकामेश्वरपण्डितः क्व विषमा श्रील(क्ष्मणीया) कृतिः
क्वेयं चेत्यतिसंशयाङ्कितहृदो मा भूत यूयं बुधाः ।
मन्दं चाखिलशास्त्रधारणपटुं व्याख्यासमर्थं बुधं
श्रीविश्वेश्वरलोचनाञ्चलकृपावीक्षाः परं तन्वते ॥

अथ तत्रभवान् लक्ष्मणनामा महाकविः . . . . . भौमः सकलतन्त्रस्वतन्त्रः संगीतसाहित्यसारस्यपारदृश्वा भोजकृतं चम्प्वभिधं प्रबन्धं पूरयितुकामः

* * * *

महाराजे भोजे भक्तिं प्रकटयति—दृष्ट इति । अत्रादौ दकारप्रयोगात् अध्येतृव्याख्यातृणां सौख्य . . . . गन्तव्यम् । सुखदौ दधौ इति वचनात् । यत्र यस्मिन् गुरुपदाम्बुजे भोजे चेत्यर्थः ।

**End :**

काण्डोऽपि युद्धाख्य इत्यर्थः । चिरं चिरकालं जीयात् भोजप्रबन्धेन मिलित्वा स इव सर्वदा विद्वदानन्दं कुर्वन् आचन्द्रतारकं सर्वोत्कर्षेण वर्ततामित्यर्थः । स्वप्रबन्धव्याख्यातृश्रोतृजनानुद्दिश्यापि इयमेवाशीरुक्तिरित्यवगन्तव्यम् ॥

शार्दूलक्रीडितद्वन्द्वं वसन्ततिलकोदरम् ।

* * * *

इति श्रीयुद्धकाण्डीयः प्रोक्तो वृत्तौघसंग्रहः ॥

**Colophon :**

इति श्रीमदखिलविद्यासंप्रदायप्रवर्तकसाहित्यपादसार्वभौमश्रीमत्तोड(त्कोण्ड)मूर्तिवंशरत्नाकरसुधाकरब्रह्मान्तर्वाणितनूभवस्य विश्वजनीनविद्यावैशद्यनिरवद्यस्य विद्वन्मणेर्मल्लेश्वरपण्डितस्य सूनोर्गङ्गाधरधीरस्य तनूभवेन वेङ्कटेश्वरभागिनेयेन विश्वेश्वरकरुणाकटाक्षनिरीक्षणलब्धविद्यावैशद्येन कामेश्वरसूरिणा विरचितायां चम्पूरामायणव्याख्यायां विद्वत्कौतूहलसमाख्यायां युद्धकाण्डः समाप्तिमगमत् ॥

सत्साहित्यप्रवीणास्त्रिभुवनमहिते कोण्डुमूर्त्यन्ववाये
धीरो गङ्गाधराख्यः समजनि महितो मल्लिनाथात्कवेर्यः ।

तस्य श्रीसूनुकामेश्वरकविरचिते योजने भोजचम्प्वाः
विद्वत्कौतूहलाख्ये समभवदमलो युद्धकाण्डः समाप्तः ॥

विद्वत्कौतूहलाभिख्यः कामेश्वरविनिर्मितः ।
ग्रन्थोऽयं विदुषां मोदं कर्यादाचन्द्रतारकम् ॥

* * * *

यद्वात्सल्यसुधापयोधिलहरीकल्लोलजालोल्लस-
द्वेल्लत्कभ्रकटाक्षवीक्षणदयाह्लादादभीष्टार्थदात् ।
स्वाच्छन्द्यं निगमागमादिषु समाशेषेषु शास्त्रेष्वभूत्
तं गङ्गाधरधीरमात्मजनकं वन्दे गणाधीशवत् ॥
शम्भुर्विधिर्विष्णुगणाधिनाथौ गौरी गिरा मा रमणी गणस्य ।
इन्द्रादिनाथा दिविजाधिनाथा कृपार्द्रवीक्षाः परि मामवन्तु ॥

---

R. No. **1672.**

Paper. 10¾ × 9½ inches. Foll. 41. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of V. S. Narasiṁhācāriyar of Villiyambākkam, Chingleput district.

**पारिजातनाटकम्.**

PĀRIJĀTANĀṬAKAM.

This is a drama in five Acts, the plot of which is based on the story of the fetching of a twig of Pārijāta tree by Kṛṣṇa from Indra's garden to please his beloved Satyabhāmā. By Kumāra Tātācārya, son of Vēṅkaṭācārya and grandson of Śrīnivāsaguru of Śaṭhamarṣaṇagōtra. He is said to be a descendant of Śrīśailapūrṇa, who was a preceptor of Bhagavad-Rāmānuja. He is also said to have been the preceptor of Raghunāthabhūpa who is highly spoken of in the introduction. The drama is said to have been staged in the court of Raghunāthabhūpa on the occasion of the Mahānavamī feast.

Complete.

**Beginning:**

वेदान्ताचार्यसिद्धान्तविमलीकृतचेतसम् ।
तारकं भवभीतानां तातार्यमहं भजे ॥

पुष्णातु श्रियमम्बुराशिरशनाकन्या चिरं काङ्क्षितां
क्षोणीन्दो रघुनाथनेतुरतुलां पाणौ कृता प्रेयसा।
आलीभिः परिहासपूर्वमसकृत् तत्पञ्चशाखाग्रहं
मन्दाक्षेण नियोजिता विदधती सान्तःप्रमोदोदया ॥
धातुर्नेत्राणि हस्तैः स्थगयदविरलं शेषनिश्वासनिर्य-
न्नाभीनालीकधूलीपरिहरणमिषान्नमसाचिव्यदक्षैः।
कुर्वाणं द्वन्द्वमाद्यं मुहुरधरसुधापानमाचन्द्रतारं
तन्यादष्टौ विभूतीरधिमहि रघुनाथावनीनाथमौलेः ॥

* * * *

(नान्द्यन्ते) सूत्रधारः—(साञ्जलिः सामाजिकानवलोक्य)

अव्याद्भव्यानुकम्पालहरिरुपसृतः सत्यया साधुवाचा
त्राता यस्तापभाजामपि नरकभयादाश्रितस्वर्द्रुमेन्द्रः।
धात्रा भूम्नाञ्चितेनाहृतमणिधरणीधूर्वहश्रीःप्रवेकं
राज्ञां प्रज्ञानिधीनामधिमहि रघुनाथावनीन्द्रं मुरारिः ॥

* * * *

सूत्रधारः—(सविमर्शम्) आः पारिजातप्रसङ्गेन पारिजातं नाम नाटक-मनुस्मारितोऽस्मि ॥

नटी—अय्य कस्स उण परिस्समो एसो ॥ आर्य कस्य पुनः परिश्रम एषः ॥

सूत्रधारः—अस्ति खलु समस्तजनकर्णाटकेषु कर्णाटकेषु वेङ्कटागिरिर्नाम गिरिः ॥

* * * *

तत्र खलु कल्याणगुणगणपरिपूर्णः श्रीशैलपूर्णो नाम गुरुः ॥

येनाभूवन् जगति यतयो भूषितोत्तंसभूषाः
सर्वे रामावरजमणिना सर्वतन्त्रस्वतन्त्राः।
आचार्योऽभूदनघमहिमा तस्य चाप्युत्तमो य-
स्तातस्यापि त्रिभुवनकृतस्तातातां यो जगाहे ॥

तदन्वयेऽभवदुभयवेदान्तराद्धान्तदेशिको देशिककुलचूडालंकारमणिः शठ-मर्षणगोत्रसंभूतः श्रीनिवासगुरुपुण्यपरिपाको लोकोत्तरसुकृतचर्यः शीलितकमलार-मणचरणकैङ्कर्यः श्रीवेङ्कटाचार्यः ॥

सूनुस्तस्य कुमारतातयगुरुः सूरीन्द्रचूडामणिः
प्रत्युद्यत्प्रतिवादिकुञ्जरघटापञ्चाननप्रक्रमः।
व्याख्याता फणिराट्कणादकपिलश्रीभाष्यकारादिम-
ग्रन्थानां पुनरीदृशां च करणे ख्यातः कृतीनामसौ ॥
एकाह्नैव विधातुमद्भुतरसं काव्यं समर्थस्तथा
व्याख्यानं च समर्थता रचयितुं सर्वेषु तन्त्रेष्वपि।
यद्वादैरपि वादितूलनिवहैर्वातूललीलायितं
यश्चक्रे च महाक्रतून् हरिमुखोल्लासाय ताताध्वरी ॥
अनारतसुवृत्तस्य चतुःषष्टिकलानिधेः।
रघुनाथविधोरस्य निष्कलङ्कस्य यो गुरुः ॥

अस्यैवायं यत्नः ॥

* * * *

आस्थानी रघुनाथभूवलरिपोराचार्यचूडामणेः
श्रीमत्तातयदेशिकस्य भणितिः शृङ्गारवीरोज्ज्वला।
शृङ्गारैकनिकेतनं स कमलाकान्तः कथानायको
भारं हन्त वहन्त्यमी च भरता नाट्येषु पारं गताः ॥

* * * *

सूत्रधारः—(आकर्ण्य सानन्दम्) यदियं बहुवल्लभाय मधुभिदे पारिजातैक-कुसुमप्रदानेन कलहकाङ्क्षिणः पारिकाङ्क्षिणः तत्रभवतो नारदस्य प्रावेशिकी ध्रुवा। (पुरोऽवलोक्य) कथमयमायाति कलहकलाविशारदो नारदः। तदावामप्य-नन्तरकरणीयाय सज्जीभवावः ॥

(इति निष्क्रान्तौ)

॥ प्रस्तावना ॥

**End:**

(प्रविश्य) दौवारिकः—देव, पारिजातहरणराजकन्यकापरिणयाभ्यामभिनन्दितो नारदो देवं जयाशीर्वचनादिना सभाजयितुं महर्षिभिर्द्वारमध्यास्ते ॥

* * * *

तथापीदमस्तु भरतवाक्यम्—

पुञ्जानुपुञ्जश्रीरिन्दोर्यथा पर्वाणि वर्धते।
तथा विजयिनो लक्ष्मीस्तव माधव वर्धताम् ॥

(इति निष्क्रान्ताः सर्वे) ॥

Colophon:

इति श्रीशैलकुलतिलकचतुर्वेदशतक्रतुकुमारताताचार्यकृतिषु पारिजातास्य-नाटके पञ्चमोऽङ्कः समाप्तः ॥

---

## R. No. 1673.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 97. Lines, 20 in a page. Grantha Good

Transcribed in 1915–16 from a MS. of M.R.Ry. Tiru. Śrīnivāsa Varada Tātācārya of Villiyambākkam, Chingleput district.

The fly-leaf contains the contents of the work.

Fol. 97*b* is left blank.

### अनिरुद्धसंहिता.

### ANIRUDDHASAṂHITĀ.

This is one of the Pāñcarātrāgamas, and is said to have been originally related by Aniruddha, one of the manifestations of God Nārāyaṇa, to Bhṛgu. The work treats of the manner of conducting the worship and festivals in Viṣṇu temples; and the detailed subjects dealt with in the various Adhyāyas are shown below.

Breaks off in the 33rd Adhyāya.

The Adhyāyas deal with—

१. शास्त्रावतारः.
२. शास्त्रप्रशंसा.
३. आचार्यलक्षणम्.
४. शास्त्रदीक्षाविधिः.
५. यन्त्रविधानम्.
६. मण्डलविधिः.
७. चक्राब्जमण्डलम्.
८. कुण्डलक्षणम्.
९. अभिषेकविधिः.
१०. राजलक्षणम्.
११. ग्रामादिनिर्माणम्.
१२. बेरलक्षणम्
१३. अङ्कुरार्पणविधिः.
१४. जलाधिवासः.
१५. प्रतिष्ठाविधानम्.
१६. सदाचारविधिः.
१७. समाराधनविधिः.
१८. अग्निकार्यबलिप्रदानम्.
१९. स्नपनविधिः.
२०. ध्वजारोहणविधिः.
२१. महोत्सवविधिः.
२२. मासोत्सवविधिः.
२३. Do.
२४. पवित्रारोहणम्.

२५. संवत्सरोत्सवविधिः.
२६. जयन्तीकृत्तिकोत्सवविधिः.
२७. नीराजनाध्ययनोत्सवविधिः.
२८. संवत्सरोत्सवविधिः.
२९. संप्रोक्षणविधिः.
३०. प्रायश्चित्तविधिः.
३१. गर्भन्यासविधिः.
३२. बलिपीठप्रतिष्ठा.
३३. विष्वक्सेनप्रतिष्ठा.

**Beginning:**

हेमाद्रिशिखरक्षेत्रे सर्वसिद्धनिषेविते ।
सर्वविद्याधरैश्चैव सर्वगन्धर्वसेविते ॥
सर्वसिद्धामरश्रेष्ठैः सर्वदैव समाकुले ।
नानामृगसमाकीर्णे नानापद्मसमाकुले ॥
* * * *
भृगुं वेदविदां श्रेष्ठमात्मध्यानपरायणम् ।
* * * *
पार्श्वस्था मुनयः सर्वे प्रणिपत्य जगद्गुरुम् ॥
ऊचुस्तं मुनयः सर्वे एतद्वाक्यमतन्द्रिमा(ता)ः ।
वेदाः सर्वाः समासेन साङ्गोपाङ्गाः सविस्तराः ॥
तत्त्वात् कमलपत्राक्ष श्रुत्वा(ताः) पूर्वं मया परम् ।
श्रेयसेऽमुं न पश्यामि(मः) तद्वदस्व महामुने ॥
* * * *

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि अनिरुद्धसंहितायां शास्त्रावतारो नाम प्रथमोऽध्यायः ॥

**End:**

आचार्यं पूजयेत् पश्चाद्दत्विजानांतु (जां चैव) दक्षिणाम् ।
इति संक्षेपतः प्रोक्तं प्रतिष्ठा बलिपीठके ॥

**Colophon:**

इति श्रीपाञ्चरात्रे महोपनिषदि अनिरुद्धसंहितायां बलिपीठप्रतिष्ठाविधिर्नाम द्वात्रिंशोऽध्यायः ॥

भृगुरुवाच—

विष्वक्सेनस्य देवस्य प्रतिष्ठा विहिता पुरा ।
तद्विधानं विशेषेण मदनुग्रहकाम्यया ॥

* * * *

पूर्णाहुतिं ततो हुत्वा शास्त्रदृष्टेन वर्त्मना ।
मुहूर्ते समनुप्राप्ते ब्राह्मणानामनुज्ञया ॥

---

## R. No. 1674.

Paper. 10⅝ × 9¼ inches. Foll. 66. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Amalāpuram taluk.

**स्वरमनोज्ञमञ्जरी.**

SVARAMANŌJÑAMAÑJARĪ.

By Narasiṁhasūri, son of Rudrārya. Same work as that described under R. No. 158(*b*) *ante*, but with the addition of the following stanzas in the beginning and in the end.

Complete.

**Beginning:**

वेदवेदार्थयोस्तत्त्वमशेषं येन बोधितम् ।
सर्वज्ञमीश्वरं वन्दे विश्वात्मानं सदाशिवम् ।
पाणिनिप्रभृतिशास्त्रकोविदान् पावनानथ गुरून् प्रणम्य तान् ।

**End:**

वाग्वादिन्याह्वयाया वरतरकरुणालोकसंलोकनाथ(नं तत्)
प्रेयस्याः स्वप्नकाले हृदि परिकलये पञ्चवर्णिप्रपा(प्रिया)याः ।
यस्मादाश्चर्यचर्याचरणपटुनटच्छम्भुमूर्धातिरिङ्ग-
द्रङ्गद्भङ्गातरङ्गप्रतिनिधि सुवचोवैभवं भूरि भाति ॥

**Colophon:**

इति श्रीरुद्रार्यसूनुना नृसिंहसूरिणा विरचिता स्वरमञ्जरी संपूर्णा ॥

---

## R. No. 1675.

Paper. 10¾ × 9½ inches. Foll. 154. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Duvvūri Lakṣmīnārāyaṇasōmayājulu of Mukkāmala, Amalāpuram taluk.

**ब्रह्मसूत्रवृत्तिः—मिताक्षरा.**

BRAHMASŪTRAVṚTTIḤ : MITĀKṢARĀ.

Foll. 1*a*—149*b*.

A commentary on the Brahmasūtras of Vyāsa: by Annambhaṭṭa, son of Tirumalāryavarya of Rāghavasōmayāji family. The author proposes in this work to follow the Bhāmatī, which is a commentary on Śaṅkarācārya's Brahmasūtrabhāṣya by Vācaspatimiśra.

Complete.

**Beginning:**

विश्वेश्वरं नमस्कृत्य ब्रह्मसूत्रार्थबोधिकाम् ।
वृत्तिं मिताक्षरां कुर्वे भामत्यादिमतानुगाम् ॥

अथातो ब्रह्मजिज्ञासा—तत्र तावदात्मा वारे द्रष्टव्यः श्रोतव्य इति फलमनूद्य तत्साधनत्वेन श्रवणं विधीयते । श्रवणं नाम वेदान्तवाक्यानामद्वितीये ब्रह्मणि तात्पर्यनिर्णयानुकूलो न्यायविचारः । तादृशन्यायविचारात्मकं वेदान्तशास्त्रमारम्भणीयमनारम्भणीयं वेति सन्देहः । सर्वत्र पूर्वोत्तरपक्षयुक्तिद्वयं सन्देहबीजं द्रष्टव्यम् ॥

तत्र वेदान्तशास्त्रमनारम्भणीयं विषयप्रयोजनाभावात् । तथाहि—सन्दिग्धं हि न्यायविचारविषयम्, सन्दिग्धे न्यायः प्रवर्तत इति न्यायात् । ब्रह्मत्वं सन्दिग्धम् । तत्किं ब्रह्मात्मना सन्देहविषयो जीवात्मना वा ? नाद्यः, सत्यं ज्ञानमनन्तं ब्रह्मेत्यादिभिः ब्रह्मस्वरूपस्य निश्चितत्वात् । न द्वितीयः, अहंप्रत्ययेन जीवस्वरूपस्यापि निश्चितत्वात् ॥

* * * *

एवं स्थिते श्रवणविधिरपेक्षिताधिकारिविषयफलत्रयमागमिकमपि न्यायेन निर्णेतुमिदं सूत्रम्—अथातो ब्रह्मजिज्ञासेति । अत्र सूत्रेऽनुवादपरिहाराय शास्त्रे पुरुषप्रवृत्तिसिद्ध्ये च कर्तव्येति पदमध्याहर्तव्यम् । जिज्ञासापदेन विचारो(र उ)पलक्षणीयः । अथशब्देन च साधनचतुष्टयानन्तर्याभिधानात्साधनचतुष्टयसम्पन्ने . . . . . ब्रह्मज्ञानाय विचारः कर्तव्य इति सूत्रस्य श्रौतोऽर्थः । अर्थान्मोक्षसाधनं ब्रह्मज्ञानं विचार्यं च वेदान्तवाक्यमिति सिध्यति ।

**End:**

अनावृत्तिः शब्दादनावृत्तिः शब्दात्—

तयोर्ध्वमायन्नमृतत्वमेतीत्यादिशब्दादनावृत्तिश्रुतेः तदध्यक्षेणेत्यस्मिन्सूत्रे तदुपपादनाच्च नावृत्तिशङ्केत्यर्थः । सम्पूर्णसूत्राभ्यासः शास्त्रपरिसमाप्तिद्योतक इति सर्वमतिमङ्गलम् ॥

इति जगद्व्यापारवर्जाधिकरणम् ॥

**Colophon:**

अन्नम्भट्टेन वेदान्तसूत्रवृत्तिर्मिताक्षरा ।
कृता तया साम्बमूर्तिः प्रीयतां परमेश्वरः ॥

इति श्रीमहोपाध्यायश्रीमदद्वैतविद्याचार्यश्रीमद्राघवसोमयाजिकुलावतंसश्रीमत्तिरुमलार्यवर्यस्य सूनोरन्नम्भट्टस्य कृतौ मिताक्षरायां ब्रह्मसूत्रवृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः । समाप्तश्चायं ग्रन्थः ॥

Foll. 150*a*—153*b* contain the table of contents of this work. Fol. 154 is left blank.

---

## R. No. 1676.

Paper. 10¾ × 9½ inches. Foll. 142. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from the MSS. of M.R.Ry. Ayyagāri Sītārāma Śāstrigāru of Sākurru and Garimalla Sōmannagāru of Gangalakurru, Amalāpuram taluk

### काव्यप्रकाशिकाव्याख्या—मधुमती.
### KĀVYAPRAKĀŚIKĀVYĀKHYĀ : MADHUMATĪ.

Foll. 1*a*—142*a*. Foll. 12*a*, 77*b*—78*a*, 85*b* and 142*b* are left blank on account of omissions in the work.

A commentary on Mammaṭa's Kāvyaprakāśa : by Ravipāṇi, son of Gaurī and Mahāmahōpādhyāya Mantri Manōdhara *alias* Ratnapāṇi and grandson of Acyuta Mantrin, who was granted the title of Mantrin by Śivasiddha, king of Mithilā. The commentator proposes in this work to clearly explain the ideas contained in his father's commentary on the Kāvyaprakāśa, called the Kāvyadarpaṇa. The author appears to have had a daughter named Madhumatī.

This copy has been taken, up to the middle of the seventh Ullāsa from the first MS., and for the further portion from the second MS., referred to above.

Complete.

**Beginning:**

अमरीकबरीभारभ्रमरीमुखरीकृतम् ।
दूरीकरोतु दुरितं गौरीचरणपङ्कजम् ॥
भूत्यालेपनभूषितः प्रविलसन्नेत्राग्निदीपाङ्कुरः
कण्ठे पन्नगपुष्पदामसुभगो गङ्गाजलैः पूरितः ।

ईषत्ताम्रजटाम्रपल्लवयुतो व्यस्तो जगन्मण्डपे
शम्भुर्मङ्गलकुम्भतामुपगतो भूयान्मम श्रेयसे ॥
गङ्गे विमुञ्च रुषमेष न तेऽपराधः
सन्ध्यां नमामि यदशेषजनाभिवन्द्याम् ।
तत्स्वप्नजल्पितमिदं स्वपतो निशम्य
कण्ठश्लथीकृतभुजा गिरिजा पुनातु ॥
शिवसिद्धान्मिथिलेशादवाप यो मन्त्रितां विबुधः ।
तस्याच्युतस्य सूनुर्बभूव भुवि रत्नपाणिरयम् ॥
तर्कः कवितया सार्धं विवेकश्च सह श्रिया ।
मिथो विरोधमाशङ्क्य यत्रैकाश्रयतां गतौ ॥
भावं काव्यप्रकाशस्य काव्यदर्पणबिम्बितम् ।
दृष्ट्वा मधुमतीं टीकां कुरुते तत्सुतो रविः ।

शिष्टाचारपरिप्राप्ततया मङ्गलं प्रेक्षावत्प्रवृत्यङ्गतयाभिधेयं वा प्रथममभिधातुमुचितम् । न तु देवताकीर्तनमिति शङ्कां निराकर्तुमाह —ग्रन्थारम्भ इति ॥ अनेन मङ्गलस्य कर्तव्यत्वे सदाचारः प्रमाणमिति सूचितम् ।

**End:**

अन्येऽपीति—

या घर्मभासस्तनयापि शीतलैः स्वसा यमस्यापि जनस्य जीवनैः ।
कृष्णापि शुद्धेरधिकं विधातृभिर्विहन्तुमन्धूं(मंहां)सि जलैः पटीयसी ॥

इत्यत्र तात्पर्यविषयीभूतस्य विरोधालङ्कारस्य विरुद्धयोः सामानाधिकरण्यप्रतिभानमूलकत्वादत्रोष्णत्वादीनां वैयधिकरण्येन शारनभीत(?) वाच्यत्वमिति ।

अच्युतमन्त्रितनूद्भवमन्त्रिमनोधरसुतस्य गुणसिन्धोः ।
गौरीतनयस्यैषा श्रीरविपाणेः कृतिर्जयति ॥
पित्रा काव्यप्रकाशस्य कृतो यः काव्यदर्पणः ।
युक्तिचूर्णेन तस्येदं मार्जनं विहितं मया ॥
मत्तोऽनतिचिरजाता मृदुपदविन्यासजनितजनकुतुका ।
भुवि मधुमतिनाम्ना टीका कन्या च गच्छतु ख्यातिम् ॥

**Colophon:**

समस्तेत्यादिमहासामन्ताधिपतिमहामहोपाध्यायमन्त्रिमनोधरात्मजश्रीरविपाणि-कृता टीका समाप्ता ॥

---

## R. No. 1677.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 88. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Mantravādi Veṅkaṭa Śāstrigāru of Muñjavarapukōṭa, Amalāpuram taluk.

तत्त्वचिन्तामण्यालोकस्फूर्तिः.

TATTVACINTĀMAṆYĀLŌKASPHŪRTIḤ.

Foll. 1*a*—88*a*. Fol. 88*b* is left blank.

A gloss on the Tattvacintāmaṇyālōka of Pakṣadhara *alias* Jayadēva, which is itself a commentary on the logical treatise Tattvacintāmaṇi of Gaṅgēsōpādhyāya: by Agnihōtrabhaṭṭa, son of Bhavānī and Dvādaśāhādhvarin. The author pays homage to his preceptors, Gaṇṭi Nṛsiṁha and Kālahastiyajvan, and also to Vāsudēva, an ascetic, and to one Patañjali.

Contains the Prāmāṇyavāda complete and the Anyathākhyātivāda incomplete.

**Beginning:**

दासोऽहं सदयावलोकनसुधासारेण लोकत्रया-
धारेणानुगृहीतवर्धितरुमादारेण मां तोषय ।
इत्युच्चैर्वचसे द्विषोऽनुजनुषे सद्यो व्यतानीच्छ्रियं
लङ्कानायकपालितां रघुवरो यस्तं नमामीष्टदम् ॥
कृताखिलाकर्मनिवृत्तिधर्मश्रीवासुदेवाह्वयभासुराङ्गः ।
पदाद्यपारप्रतिपत्तिभव्यः पतञ्जलिः पातु पवित्रमूर्तिः ॥
श्रीमद्वृण्टिनृसिंहाख्यं नत्वा देशिकमादरात् ।
श्रीकालहस्तियज्वानं भावुकं गुरुमाश्रये ॥
श्रीद्वादशाहाध्वरिणो भवान्यां कृतावतारो निखिलागमज्ञः ।
श्रीमान्मणेः पक्षधरस्य टीकां व्याख्याति विद्वत्प्रमुदेऽग्निहोत्रः ॥
आस्तां केवलदूषणाद्यतिपरा व्याख्या तथा पाठतो
ग्रन्थार्थप्रतिपादनैकनिरता चान्यापि तिष्ठत्वलम् ।

अस्त्वन्याऽप्यनपेक्षितार्थविवृतौ दक्षोऽप्यशिक्षावता-
मध्वा मामक उद्यमस्तु विदुषः सन्तोषयेदाहतः ॥
मीमांसान्यायभाष्यादिमांसलोद्बोधशालिना ।
वितन्यतेऽग्निहोत्रेण स्फूर्तिरालोकगा मणेः ॥

* * * *

गुणातीत इति मूलम् । पुरभिदे पुरनामकदैत्यभेत्रे । अयस्मयादिपुरत्रय-भेत्रे वा । नम इति स्वाभीष्टशिवलीलाविग्रहोपहितपरमात्मनमस्कारो दर्शितः । परमात्मैक्येऽपि तत्तल्लीलाविग्रहोपहितत्वेनैवोपास्यत्वात् । पुरभित्पदोपादानं च तन्नमस्कारस्य प्रारिप्सितप्रतिबन्धकदुरितनिवारणक्षमत्वसूचनाय ।

Colophon:

इत्यग्निहोत्रभट्टकृतौ पक्षधरटीकायां मङ्गलप्रकरणम् ॥

End:

. . . . . घटकमात्रम् । तद्घटनं चात्र दोषेणा-न्यथासिद्धमिति नात्र तदपेक्षापीत्यर्थः । नन्वेवमुपनीतप्रत्यक्षविशेषसामग्र्यलाभा-त्तत्कार्यमोक . . .

---

## R. No. 1678.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 101. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Peddinti Yajñanārāyaṇagāru of Sākurru, Amalāpuram taluk.

### सामान्यनिरुक्तिक्रोडपत्रम्.

SĀMĀNYANIRUKTIKRŌḌAPATRAM.

By Kālīśaṅkara. Similar to the work described under No. 4320 of the D.C.S. MSS., Vol. VIII.

Incomplete.

Beginning:

तत्रानुमितिपदमनुमितिनिष्ठकार्यतानिरूपकसंबन्धित्वेनानुमितितत्करणान्य-तरपरमिति शिरोमणिः । निरूपकत्वं यदि प्रतियोगित्वं तदा कार्यस्य कार्यताप्रति-योगित्वाभावादसंग्रहः ।

End:

नच जातिमान्वह्न्यभाववानितिज्ञानीयवह्न्यभाववद्भूदत्वावच्छिन्नविषयता.

## R. No. 1679.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 21. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. Raṅgarāmānuja Cakravartyācārya of Pallakachēri, South Arcot district.

### परार्थयजनाधिकारनिर्वाहः.

### PARĀRTHAYAJANĀDHIKĀRANIRVĀHAḤ.

Foll. 1*a* –20*b*.

A treatise maintaining with the aid of authorities quoted mainly from the Pāñcarātrāgama, that all those Brahmans who have received the Pañcasaṁskāra or the five sacraments peculiar to Śrī-Vaiṣṇavas are empowered to officiate as priests and conduct worship in temples for the sake of others: by Sundara Vīrarāghava of Śiruvaḷūr, South-Arcot district. He refers among others to Satkriyākalpamañjarī of Mansālakaṭṭai Vēdāntācārya.

Complete.

**Beginning:**

जीयात्सुदर्शनं विष्णोः करपल्लवभूषणम् ।
यत्स्पर्शादेव संशुद्धिं यात्येतदखिलं जगत् ॥

प्रणमामि पदाम्भोजं प्राज्ञानां पञ्चरात्रिणाम् ।
याद्विकासयति प्रज्ञां भक्तानां स्मरणक्षणात् ॥

अद्य तावत्केचन भागवताः चक्राब्जमण्डलदीक्षारहितं पञ्चसंस्कारिणं भगवतः परार्थयजनेऽनधिकारिणं पञ्चसंस्कार आत्मार्थयजनमात्रयोग्यतापादक इति च मन्यन्ते। असाम्प्रतमेतत्। यद्बहुषु शास्त्रेषु पञ्चसंस्कारिणां महाभागवतत्वं स्वयंव्यक्तादिस्थलेषु तेषां यजनाधिकारित्व चोपदिश्यत ।

**End:**

आत्मार्थं वा परार्थं वा मम पूजापरः सदा ।
न स देवलको ज्ञेयः सर्वपूजां समाचरेत् ॥

इतीमानि वचनानि मन्सालकट्टै वेदान्ताचार्यविरचितायां सत्क्रियाकल्पमञ्जर्यामुत्तरपरिच्छेदे चरुप्रकरणे द्रष्टव्यानि ॥

* * * *

शुद्धा वाप्यथवाशुद्धा पद्मनाभपरा कृतिः ।
सन्तस्तदनुगृह्णन्तु समीक्ष्य कृपया परम् ॥

सुन्दरवीररघूद्वहगुरुणा श्रीपाञ्चरात्रशास्त्रविदा ।
संस्कारपञ्चकजुषां कलितः सर्वार्थयजननिर्वाहः ॥

Colophon:

इति श्रीबालकिंगृहपुरीतिलकायपानवाधूलकुलतिलकश्रीसुन्दरवीररघूद्वहगुरोः कृतिषु पञ्चसंस्कारिपरार्थयजनाधिकारनिर्वाहः समाप्तः ॥

Fol. 21 gives the table of contents of the work.

---

## R. No. 1680.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 70. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Raṅgarāmānuja Cakravartyācārya of Pallakachēri, South Arcot district.

रम्भारावणीयम्.

RAMBHĀRĀVAṆĪYAM.

Foll. 1*a*–69*b*.

This is a kind of drama in four Acts called Īhāmṛga and its plot is based on the story of Rambhā, a celestial damsel, having been outraged by Rāvaṇa, who was consequently cursed by Nalakūbara, son of Kubēra and the real lover, to have his head split into thousands of parts if he should misbehave with any other than his wife. The characteristics of Īhāmṛga herein seen, closely follow the canons laid down for such composition in Viśvanātha's Sāhityadarpaṇa and Rājaśēkhara's Śāhitya-kalpadruma. The author of the drama is Sundara-Vīrarāghava, son of Kastūriraṅgadēśika of Vādhūlagōtra of Śiruvaḷūr and is the same as that of the work described under the last number.

Complete.

**Beginning:**

मृगीमिव मृगः पुमाननभिलाषिणीं संभ्रमा-
त्प्रसह्य सुरसुन्दरीं भजति चित्तजन्मेह या ।
सुरारिविधिशङ्कराद्यखिलमानसोन्माथिनी
सदा विजयशालिनी जयति सा निरुच्छृङ्खला ॥

नान्द्यन्ते सूत्रधारः—(समन्तादवलोक्य सहर्षम्)

अहो, आगता एव सामाजिकाः । य इमे—

दशरथतनयावनीन्द्रदिव्यामृतचरितार्णवनित्यकर्णधाराः ।
अहह सकुतुकं शुभेक्षणा मां नटनगतस्पृहयावलोकयन्ति ॥

* * * *

अहो, अस्ति खलु सकलरसिकजनमनोहर्षजनकः सरससुकुमारपदगम्भीरो रम्भारावणीयो नामेहामृगप्रबन्धः। (सहर्षम्)।

सुन्दरवीररघूद्वहसूरिर्वीधूलवंशमणिदीपः।
कस्तूरिरङ्गदेशिकतनयः खलु भवति यस्य निर्माता॥

तमेवाभिनीय सभासदां हृदयमाह्लादयामि।

End:

यत्त्वामधर्षयद्दम्भे शिरस्तस्य सहस्रधा।
फलिष्यति हठादेवं रमते यदि योषितः॥

रावणः—

* * * *

नीलकण्ठः—सखे कलकण्ठ नलकूबरशापेनावतारितोऽस्य परदारबलात्कार-सुरतावलेपः!

कलकण्ठः—भविष्यत्येवेतःपरं प्रसिद्धकर्मा दशकण्ठः। तथापीदमस्तु भरतवाक्यम्—

सन्मार्गे मुनिभिर्गतं जगदिदं यातु स्वकान्ताजनैः
क्रीडन्ति(न्तः)क्षितिवासिनो नृपतयो रक्षन्तु धर्मैर्महीम्।
विद्वांसः सततं मुदा कृतिमिमां पश्यन्त्वसूयां विना
सर्वे सन्तु यशोधनक्षितिसुधीविद्यायशःश्रीयुताः॥

(इति निष्क्रान्ताः सर्वेऽपि)॥

Colophon:

इति बालकिंगृहपुरीतिलकायमानवाधूलकुलतिलकसुन्दरवीररघूद्वहस्य कृतिषु रम्भारावणीये ईहामृगे चतुर्थोऽङ्कः॥

Fol. 70*a* contains a gloss on the 21st stanza of the third Act of this work. Fol. 70*b* is left blank.

---

R. No. **1681.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 144. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Rāmāji Bhānōji Pantulugāru of Pēruru, Amalāpuram, taluk.

धर्मखण्डः.

DHARMAKHAṆḌAḤ.

Same work as that described under No. 2299 of the D.C.S. MSS., Vol. IV, Part I.

Breaks off in the 25th Adhyāya.

## R. No. 1682.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 15. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Veṅka Jagannātha Śāstrigāru of Indupalli, Amalāpuram taluk.

### लाघवगौरवचर्चा.

LĀGHAVAGAURAVACARCĀ.

This is a treatise in logic discussing the import and scope of the law of parsimony.

Incomplete.

**Beginning :**

प्रवहपवनवेगघट्टितोऽपि सु(न)चलति [न] यज्जगदण्डपिण्डभावः ।
लघुगुरुतुलनातुलाप्रकाण्डद्राढिमगुणत्रितयस्य यस्य विष्णोः ॥

हिरण्यगर्भस्य गुरुः शरीरसंख्यालघुर्यः पुरुषः पुराणः ।
अणोरणीयान्महतो महीयान्पश्यत्यचक्षुः स शृणोत्यकर्णः ॥

सकलाङ्कुरकारिबीजानुगतं तदकारिव्यावृत्तं कुर्वद्रूपत्वं नाम सामान्यं न कल्पयितुमुचितम्। गौरवात्। ननु गौरवेण गुरुवस्तुसिद्धिर्वा प्रतिबध्यते तदभावसिद्धिर्वा क्रियते।

**End :**

द्वितीये तु इतरबाधस्यैव शुद्धव्यापकतावच्छेदकधर्मावच्छिन्नविधेयताकानुमितौ प्रति.

---

## R. No. 1683.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 392. Lines, 20 in a page. Dēvanāgarī. Good. Bound in two volumes.

Transcribed in 1915–16 from a MS. of M.R.Ry. Ayyagāri Sītārāmayyagāru of Śākurru, Amalāpuram taluk.

### शिवतत्त्वरत्नकलिका—आमोदरञ्जनसहिता.

ŚIVATATTVARATNAKALIKĀ WITH ĀMŌDARAÑJANA.

By Kṛṣṇānanda, a disciple of Rāmabhadrayōgin. Same work as that described under R. No. 1507 *ante*, wherein the MS. has the first two leaves injured.

Complete in five Ullāsas.

End :

एवमियता ग्रन्थसन्दर्भेण मुमुक्षुभ्यः प्रतिपादनीयमखिलागमार्थतत्त्वं संक्षेपतः प्रतिपादितम् । अधुना श्रीमदाचार्यश्रीनामधेयनिर्देशेन विशुद्धविद्यासंप्रदायतामात्मनो दर्शयन्विनेयविघ्नम्भणाय निबन्धान्ते स्वनामनिर्देशमुपसंहरति —

श्रीरामभद्रयोगीन्द्रचरणाम्बुजरेणुना ।
शिवतत्त्वरत्नकलिका कृष्णानन्देन निर्मिता ॥

अत्र शिवशब्देन वेदा विवक्ष्यन्ते । ऋचः सामानि यजूंषि सा हि श्रीरमृता सताम् , इति श्रूयते ।

* * * *

इत्थं श्रीशिवतत्त्वरत्नकलिकामामोदसंरञ्जन-
प्राप्तस्वादिमसौरभामुपहरन्पञ्चप्रसूनार्चिताम् ।
श्रीशंभोरधिवासयामि परमं यत्तत्पदं शाश्वतं
शश्वत्तेन . . . . . धान्मम ॥
क्व गाम्भीर्यं त्रय्याः क्व मम मतिरुत्तानविषया
क्व तत्त्वं श्रीशम्भोः क्व च मम गिरो भावसुलभाः ।
विमृश्यैवं व्रीडाभरजडमपि श्रीशिवगुरो-
रुदारा काप्याज्ञा मुखरयति . . . . . ॥
विगुणमतिगुणं वा यन्मयाध्याहृतं ते
परशिव परतत्त्वालम्बमाम्नायगत्या ।
तादिदमनुविमृश्य त्वत्कृपापात्रभूताः
प्रकृतिमुषितदोषा वी (तदोषाः) क्षमन्ताम् ॥
आचार्यैरुपदेशमार्गमागिरा युक्त्या च संभावितं
तत्त्वं ते परिशीलितं शिव मया योगेन साक्षात्कृतम् ।
निर्वाणे परिशीलितं च तदपि स्मेराननाम्भोरुहं
चेतश्चुम्बति चन्द्रविम्बसुभगं त्वामम्बिकार्धासनम् ।
दृष्टद्रुष्टमनङ्गमङ्कुरयता येनापुनर्भङ्गुरं
तार्तीयीकविलोचनं द्रढयति व्रीडाजडं मीलनम् ।
तन्निःसीमदयान्तरङ्गशिशिरापाङ्गश्रि तुङ्गस्तनं
. . . . . पायादपायाच्चिरम् ॥

**Colophon:**

इति श्रीशिवतत्त्वरत्नकलिकाव्याख्यायामामोदरञ्जनाख्यायां कैवल्यवासनोल्लासः पञ्चमः ॥

Fol. 248*b* is left blank.

---

R. No. **1684.**

Paper. 10¾ × 9½ inches. Foll. 117. Lines, 30 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. Ayyagāri Sītārāmayyagāru of Sākuṟṟu, Amalāpuram taluk.

तत्त्वमुक्तावली—बालभूषाव्याख्यासहिता.

TATTVAMUKTĀVALĪ WITH THE COMMENTARY BĀLA-BHŪṢĀ.

This is a treatise in Dharmaśāstra chiefly dealing with the determination of the proper time for performing certain ceremonies, feasts and fasts. By Nandapaṇḍita, son of Rāmapaṇḍita. He is said to have first composed the Smṛtisindhu after consulting the works of Anantabhaṭṭa, Hēmādri, Kavivallabha and Mādhava, and to have then written this work by making careful selections from the former. The commentary was written by the author's son, Vēṇipaṇḍita.

Wants the beginning; otherwise complete.

The following subjects are herein treated :—

सामान्यनिर्णयः.
तिथिनिर्णयः.
श्राद्धनिर्णयः.
ग्रहणनिर्णयः.
संक्रान्तिनिर्णयः.
युगाद्यादिनिर्णयः.
अष्टकाश्राद्धनिर्णयः.
जयन्तीनिर्णयः.
नक्षत्रनिर्णयः.
योगकरणादिनिर्णयः.
वारनिर्णयः.

**Beginning:**

(मा)सचातुर्विध्यार्थमहोरात्रचातुर्विध्यमाह—

चतुर्धा स्युरहोरात्राः चान्द्रसौराक्षसावनाः ।

आर्क्षो नाक्षत्रः । तल्लक्षणान्याह—

चान्द्रश्चन्द्रकलाभागात्सौरस्त्रिंशांशभागतः ।
चन्द्रर्क्षभागान्नाक्षत्रं सावनो दिनरात्रितः ॥

चन्द्रकलोत्पत्तिकालश्चान्द्रोऽहोरात्रः । सूर्यस्य राशित्रिंशांशकालः सौरः । चन्द्रनक्षत्रभागकालो नाक्षत्रः । अहोरात्रेण सावनः ॥

* * * *

**Colophon:**

इति श्रीधर्माधिकारिरामपण्डितात्मजनन्दपण्डितसूनुवेणिपण्डितविरचितायां तत्त्वमुक्तावलीव्याख्यायां बालभूषायां पूज्य . . . (उ)पोद्घातप्रकरणे सामान्यनिर्णयः ॥

**End:**

तदाह श्रीपतिः—

यस्य ग्रहस्य वारे यत्किञ्चित्कार्यं प्रकीर्तितम् ।
तत्तस्य कालहोरायां सर्वमेव विधीयते ॥

इति ॥ इति वारप्रकरणम् ।

स्वग्रन्थं प्रशंसति—

अनन्तभट्टहेमाद्रिकविवल्लभमाधवैः ।
कृताः सिद्धान्तसरितः स्मृतिसिन्धौ समाविशन् ॥
तत्त्वमुक्ताः समुद्धृत्य स्मृतिसिन्धोः स्वयं कृतात् ।
तत्त्वमुक्तावलीमेतां निरमान्नन्दपण्डितः ॥
श्रीनन्दपण्डितसुतो वेणिदत्तो(ऽर्थ)तत्त्ववित् ।
तत्त्वमुक्तावलीव्याख्यां बालभूषां व्यधामिमाम् ॥
तत्त्वमुक्तावलीव्याख्या बालभूषा कृता मया ।
बाललीलाधरः कृष्णः प्रीयतामनया मयि ॥

---

R. No. **1685.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 449. Lines, 20 in a page. Grantha Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. A. M. Śrīnivāsācāriyar of Agaram, Chingleput district.

**श्रुतप्रकाशिकाविवरणम्—तात्पर्यदीपिका.**

**ŚRUTAPRAKĀŚIKĀVIVARAṆAM : TĀTPARYADĪPIKĀ.**

A gloss on the Śrutaprakāśikā of Sudarśanācārya, which is itself a commentary on the Śrībhāṣya of Bhagavad Rāmānujācārya. The name of the commentator is not known.

Bound in three volumes. Incomplete.

Vol. I. आदित आरभ्य पाराशर्यवचःसुधामितिश्लोकस्थसंजीवनीमिति-पदव्याख्यानपर्यन्तम् ।

" II. } भक्तेरुपायत्वसमर्थनप्रकरणे ध्यानशब्दार्थविचारे भवति चेत्यादि-
" III. } श्रीभाष्यव्याख्याग्रन्थमारभ्य साधनचतुष्टयपूर्वदृत्तत्वनिरास-प्रकरणे उपदिशतीतिपदव्याख्यापर्यन्तम् ।

**Beginning:**

श्रीनिधिं केशवं ध्यात्वा ध्यात्वा गुरुपरम्पराम् ।
श्रुतप्रकाशिकोक्तीनां कुर्वे तात्पर्यदीपिकाम् ॥

श्रीरङ्गेशदिव्याज्ञालब्धव्यासापरनामा सुदर्शनगुरुः श्रीभाष्यं व्याचिख्यासुः प्रारिप्सितविघ्नपरिसमाप्तिप्रचयगमनार्थं परमपुरुषं वशीकुर्वन्सिद्धसाध्योपायोपेयात्मकं शास्त्रार्थं संगृह्णाति—वरदमिति । द्विरदाद्रीशमिति । अनेन सौलभ्यमुक्तम् ।

वरदः सर्वभूतानामद्यापि परिदृश्यते ।

इति प्रसिद्धत्वात् । श्रीनिधिमिति पुरुषकारान्वयः ।

**End:**

उपदिशति विदधाति । इदमुपलक्षणम् । सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत इति शास्त्रजन्यब्रह्मज्ञान

---

R. No. **1686.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 60. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Karra Simhādri Śāstri of Ēnugulamahal, Razole taluk.

**भावानन्दीव्याख्या—सर्वोपकारिणी.**

BHĀVĀNANDĪVYĀKHYĀ: SARVŌPAKĀRIṆĪ.

Foll. 1*a*—59*a*. Fol. 59*b* contains the table of contents.

By Mahādēva. Similar to the work described under No. 4098 of the D.C.S. MSS., Vol. VIII.

Contains from the middle of the Siddhāntalakṣaṇagranthaḷup to the end of the Vyāptivāda.

**Beginning:**

नातिव्याप्तिरिति । तदतिरिक्तत्वव्यवस्थापनं नायुक्तमिति भावः । नपुंसकाङ्गस्यानतिरिक्तामित्यस्य तदवच्छिन्नाभाव इत्यनेनानन्वयादाह—अनतिरिक्त इतीत्यादि ।

* * * *

**Colophon:**

इति श्रीमहादेवविरचितायां सर्वोपकारिण्यां भावानन्दीव्याख्यायामवच्छेदकलक्षणव्याख्या ॥

**End:**

लाभादिति । व्यभिचारिसाधनव्यापकस्य साध्याव्याप्यत्वनियमेन साधनाव्यापकत्वे साध्यव्याप्यत्वापत्त्या तस्य स्वनिष्ठव्याप्तिसंक्रामकत्वस्यैवासंभवादित्याशयः ॥

**Colophon:**

इति व्याप्तिवादः समाप्तः ॥

---

## R. No. 1687.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 62 Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Vaṅka Jagannātha Śāstrigāru of Indupalli, Gōdāvari district.

**तत्त्वचिन्तामण्यालोकटिप्पणी.**

TATTVACINTĀMAṆYĀLŌKAṬIPPAṆĪ.

A commentary on Jayadēva's Tattvacintāmaṇyālōka, described under R. No. 1539 *ante*. The name of the commentator is not known.

Contains the Prāmāṇyavāda; wants the beginning.

**Beginning:**

. . . ग्रहयोर्विरोधः । अन्यथा कुत्रचिद्घटत्वं कुत्रचित् घटत्वाभाव इति ज्ञानयोरपि विरोधापत्तेरिति वाच्यम् । घटत्ववद्विशेष्यकत्वं घटत्वाभाववद्विशेष्यकत्वं च गृह्णतोर्ज्ञानयोरेतज्ज्ञानविशेष्यत्वावच्छेदेन घटत्वतदभावविषयकत्वसंभवादिति ।

**End:**

ज्ञानेनैवेति । इच्छायाः सविषयकत्वसिद्ध्यर्थं तद्विषयतयावश्यमभ्युपेयं नेति । पूर्वं ज्ञानविषयस्वरूपं विषयतेत्यभिप्रेत्य । इदानीं ज्ञानस्वरूपमेव सेत्याह—वस्तुतस्त्विति । यद्यपि ज्ञाने अतीते विषये च विद्यमाने विशिष्टव्यवहारदर्शनाद्वैपरीत्यम् ॥

**Colophon:**

इत्युत्पत्तिप्रामाण्यवादः समाप्तः ॥

आलोकटिप्पण्यां प्रामाण्यवादः संपूर्णः ॥

---

R. No. **1688.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. S. Gōpālācāriyar of Villiyambākkam, Chingleput district.

(*a*) **भक्तामरविधानम्.**

BHAKTĀMARAVIDHĀNAM.

Foll. 1*a*—10*b*.

Gives the procedure relating to the conduct of the worship of Vṛṣabhajina, son of Nābhirāja and the first of the Tīrthaṅkaras. By Sōmasēnabhaṭṭāraka.

Complete.

**Beginning:**

श्रीमद्देवेन्द्रवन्द्यौ जिनवरचरणौ ज्ञानदीपप्रकाशौ
लोकालोकावकाशौ भवजलनिधिपारं गतौ भव्यपूज्यौ ।
नत्वा वक्ष्ये सुपूजां वृषभजिनपतेः प्राणिनां मुक्तिहेतोः
यस्मात्संसारपारं लभति सुमनुजः भक्तियुक्तः सदाप्तः ॥
श्रीनाभिराजतनुजं शुभसृष्टिनाथं पापापहं मनुजरागसुरेशसेव्यम् ।
संसारसागरसुपोतसमं पवित्रं वन्दामि भव्यशुभदं वृषभं जिनेशम् ॥

* * * *

इति स्तोत्रं पठित्वा कर्णिकोपरि पुष्पाञ्जलिं क्षिपेत् ।

मोक्षसौख्यस्य कर्तारं भोक्तारं शिवसंपदाम् ॥
आह्वयामि जगत्पूज्यं जगच्छान्तिविधायकम् ।

ओं ह्रीं देवाधिदेव श्रीवृषभजिनदेव, अत्रावतर ॥

आह्वानम्—

श्रीदेवाधिदेवं वृषभं जिनेशमिक्ष्वाकुवंशं परमं पवित्रम् ।
संस्थापयामीह पुरं प्रसिद्धं जगत्सुपूज्यं जगतां पतिं च ॥

ओं ह्रीं तिष्ठ तिष्ठ ॥

स्थापनम्—

**End:**

जपः। श्रीं ह्रीं वृषभजिनदेवाय नमः ॥

**Colophon:**

सोमसेनभट्टारककृतभक्तामरविधानं परिसमाप्तम् ॥

---

(*b*) चतुर्दशीविधानम्.

CATURDAŚĪVIDHĀNAM.

Foll. 11*a*—28*a*. Foll. 17*a*—28*b* are left blank.

On the rituals and worship to be observed by a Jaina commencing from the 14th day of the bright fortnight of every month, which are said to consist of 168 kinds: by Rāma, a disciple of Vidyānandi. The author states that this work was composed on the occasion of the performance of this Vrata by Tārā(Rāma)candra, a minister of King Jayasiṁha.

Complete.

**Beginning:**

श्रीवीरं शिरसानम्य वक्ष्ये संक्षेपतस्तराम् ।
चतुर्दश्युपवासानामष्टषष्टिशतप्रमाम् ॥
जिनेन्द्रपादपङ्कजं प्रणम्य नाकनायकैः
प्रपूजित . . . . . प्रकाशयामि द्योतनम् ।
दयावहं चतुर्दशीव्रतस्य सारसौख्यदं
सदा धरन्ति धी[रया]रका विधानमेनमग्रिमम् ।
शुक्लपक्षे चतुर्दश्याः . . . षधः पुण्यकारकः ।
चतुर्दश्याष्टपर्यन्तं कर्तव्यः श्रावकैः सदा ॥
तत (उत्था) पनं कुर्याच्छक्त्या शास्त्रविधानतः ।
नैवं चेत् द्विगुणं कुर्याद्व्रतमेतदघापहम् ॥

**End:**

शास्त्राब्धेः पारगामी परममुनिरभून्मण्डलाचार्यमुख्यः
श्रीविद्यानन्दिनामा निखिलगुणनिधिः पुण्यमूर्तिः प्रसिद्धः ।
तच्छिष्यः संप्रधारी विबुधजनमनोहर्षसन्तानदक्षो
दक्षो वै रामनामा विधिममुमकरोत्पूजनाया विधेश्च ॥
श्रीजयसिंहभूपस्य मान्त्रिमुख्योऽग्रणीः सताम् ।
श्रावकस्ताराचन्द्राख्यः तेनेदं व्रतमुद्धृतम् ॥

तदवसरमुद्दिश्य पूर्वशास्त्रानुवृत्तितः ।
व्रतोद्योतनमेतेन कारितं पुण्यहेतवे ॥

**Colophon :**

इति श्रीपतिमा[स]सान्त(न्ते) चतुर्दशीव्रतोद्यापनविधिपूजाजयमाला संपूर्णा ॥

---

R. No. **1689.**

Paper. 10¾ × 9½ inches. Foll. 40. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Sāmayapantulu Sārayagāru of Ralli, Gōdāvari district.

तत्त्वचिन्तामण्यालोकदर्पणम्.

TATTVACINTĀMAṆYĀLŌKADARPAṆAM.

A commentary on Jayadēva's Tattvacintāmaṇyālōka. The name of the commentator is not given herein; but according to the India office Library Ca'alogue No. 1938, page 631, with which this work agrees, it is attributed to Ṭhakkura Mahēśa, son of Candrapati and Dhīrā and the younger brother of Mahādēva, Bhagīratha and Dāmōdara.

Contains the Anumāna which breaks off in the Sahacāravāda.

**Beginning :**

व्यासलिङ्गचरणाम्बुजयुग्मं तन्नमामि सकलार्थदमार्द्यम् ।
यन्महेन्द्रमकुटोज्ज्वलरत्नालोकचित्रितमनन्तमनाद्यम् ॥

मामन्तरायात्प्रणतं भवानि त्रायस्व ते पादसरोजयुग्मम् ।
कूजन्महाहंसकहंसशोभि विद्वन्महाभृङ्गगणैः परीतम् ॥
वक्षोजकुम्भयुगनम्रशरीरवल्लीं ब्रह्मादिमौलिमणिमण्डितपादपद्माम् ।
वक्त्रप्रभालहरिनिर्जितपूर्णचन्द्रां वन्दे गिरीन्द्रतनयां जगदेकरम्याम् ॥

उद्देशादिति । स्वयं संगतिकथनं तल्लक्षणस्यावधित्वमर्थाल्लक्षणनिरूपणं संगतिलक्षणपर्यालोचनेन तस्यावश्यकत्वं दर्शयितुम् । तल्लक्षणमाह- —पूर्वापरेति ; अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यात्, इति जैमिनिसूत्रम् । तत्रार्थैकत्वमात्रे उक्ते भगो वां विभजतु पूषा वां विभजत्वित्येतयोः अर्थैक्यादेकवाक्यत्वं स्यात् ।

* * * *

ननु प्रत्यक्षानुमानयोः साक्षात्परम्परासाधारणः प्रयोज्यप्रयोजकभावो वाच्यः । न तु साक्षादेव ।

**End :**

अधिकरणादिना भूयस्त्वं विशिष्य विकल्प इत्यर्थः । व्याप्त्यग्रहादिति मूलम् । व्यभिचारशङ्कानिवृत्त्यभावादिति भावः । विशेषण.

Fol. 40*b* is left blank.

## R. No. 1690.

Paper. 10¾ × 9½ inches. Foll. 32. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Śāmayapantulu Sārayagāru of Ralli, Gōdāvari district.

**तत्त्वचिन्तामण्यालोकव्याख्या.**

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀ.

Another commentary on the Ālōka of Jayadēva. The name of the commentary is not given.

Contains the Anumānakhaṇḍa which breaks off in the Anumānalakṣaṇa.

**Beginning:**

भवानीशमहं वन्दे भक्ताभीष्टप्रदं शिवम् ।
भुजङ्गमाधिपैर्नित्यं भूषितं भुवनेश्वरम् ॥

मङ्गलादीनि मङ्गलमध्यानि शास्त्राणि प्रथन्त इति भाष्यकारवचनप्रामाण्यादावदन्तरायाशङ्कं मङ्गलाचरणस्यावश्यकत्वाच्चेष्टदेवतानमस्करणलक्षणं मङ्गलमाचरन्नेव स्वस्य ग्रन्थकरणसामर्थ्यमाक्षिप्य समाधत्ते—अमुष्मिन्निति । एतावतीति ग्रन्थबाहुल्यमुक्तम् ।

**End:**

नतु तत्करणमित्यस्यानुमितिकरणमित्यर्थः । तथा च पौनरुक्त्यम्, अनुमानपदस्य करणव्युत्पत्त्या अनुमितिकरणार्थकत्वात् इत्यत आह—व्याप्तीति । तथा चानुमितिकरणत्वं लक्ष्यतावच्छेदकं व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणत्वं लक्षणमिति न पौनरुक्त्यमित्यर्थः

* * * *

नन्वतो नाप्रत्यक्षं प्रमाणमित्युपसंहारो न संभवति, अननुप्रक्रान्तस्योपसंहारायोगात् इत्याशङ्क्याताःशब्दार्थमाह—अत इति । अनुमाने व्यभिचार . .

---

## R. No. 1691.

Paper. 10¾ × 9½ inches. Foll. 14. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS of M.R.Ry. Śāmayapantulu Sārayagāru of Ralli, Gōdāvari district.

**तत्त्वचिन्तामण्यालोकव्याख्या.**

TATTVACINTĀMAṆYĀLŌKAVYĀKHYĀ.

This is another commentary on the Tattvacintāmaṇyālōka of Jayadēva for the portion Upādhivāda in the Anumānakhaṇḍa.

Incomplete.

**Beginning :**

शैलेन्द्रराजतनयोज्ज्वलसव्यभागं नीलाम्बुदच्छविगलं निगमान्तवेद्यम्।
कल्याणदं कमलनाथसमर्चिताङ्घ्रिं कैलासनाथमहमिन्दुवलर्क्षमौडे ॥

उपाधेर्व्याप्तिधीप्रतिबन्धकधीविषयत्वं निरूपणेऽनुपयुक्तमित्यसंगतिं परिहर्तुमाह—तथाचेति । तस्योपाधेर्निरूपण इत्यन्वयः । तदभावज्ञानमुपाध्यभावज्ञानम् । तस्मिन्नुपाध्यभावे ।

**End :**

शुद्धसाध्यव्यापके तदभाववद्वृत्तित्वमात्रम्, अवच्छिन्नसाध्यव्यापके तु अवच्छेदकाधिकरणीभूततदभावाधिकरणवृत्तित्वं तथेत्युभय. . . . .

---

R. No. **1692.**

Paper. 10½ × 8½ inches. Foll. 9. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. Rājāgurukkaḷ of Rāmēśvaram.

**नवार्णपद्धतिः.**

NAVĀRṆAPADDHATIḤ.

A treatise relating to the nine-syllabled Mantra addressed to Dēvī. The subjects dealt with are given in the third and the fourth of the stanzas extracted below from the beginning. The author says that he has consulted the works, Yāmala, Ḍāmara Yōginītantra, Vārāhītantra, etc.

Incomplete.

**Beginning :**

तारां नत्वा स्वेष्टदेवीं श्रीलक्ष्मीं कुलदेवताम् ।
नवार्णस्य हि मन्त्रस्य पद्धतिर्लिख्यतेऽधुना ॥
यामलं डामरं चैव योगिनीतन्त्रमेव च ।
वाराहीतन्त्रमन्यांश्च ग्रन्थानालोच्य यत्नतः ॥
नवचण्डीविधिश्चैव शतचण्डीविधिस्तथा ।
सप्तशतीमालामन्त्रविभागो मन्त्रमेव च ॥
कवचादिरहस्यानां विधिः संप्रोच्यते मया ।
नामूलं लिख्यते किञ्चित्संप्रदायगतं च यत् ॥

* * * *

नवाक्षरस्य ऋषयो ब्रह्मविष्णुमहेश्वराः ।
उक्ताश्छन्दांसि मुनिभिः गायत्र्युष्णिगनुष्टुभः ॥
* * * *
भक्ताभीष्टप्रसिद्ध्यर्थं नियोगस्तु उदाहृतः ॥

**End:**

तत्र ज्ञानार्णवे उत्तरभागे—

ब्रह्मैको भगवानेको मार्कण्डेयस्य मार्गणाः ।
देवाः पञ्च ऋषिस्त्रिंशद्देवीद्वादशकं तथा ॥
* * * *
अर्थानि सप्त च द्वे च अध्यायास्तु त्रयोदश ॥
श्लोकाश्च चतुराशीतिः पुनः पञ्चशतानि च ।
एवं ज्ञानार्णवे तन्त्रे सप्तशत्यः प्रकीर्तिताः ॥

एवं ज्ञानार्णवोक्तसप्तशती संख्या ॥

---

R. No. **1693.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 58. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Ayyagāri Sītārāmayyagāru of Sākurru, Gōdāvari district.

(*a*) **न्यायरहस्यम्.**

NYĀYARAHASYAM.

Foll. 1*a*—9*b*.

A metrical treatise in 172 stanzas explaining the 16 Padārthas or categories enunciated by Gautama in his Nyāyasūtra: by Gōvinda Śarman, son of Nyāyavācaspati.

Complete.

**Beginning:**

नीलोत्पलाभिरामं कामं गोपालबालानाम् ।
नन्दानन्दनिदानं जगन्निदानं नमस्यामः ॥ १ ॥
प्रथमप्रवेशहेतोरनधीतन्यायशास्त्राणाम् ।
श्रीगौतममुनिमतमिति संक्षेपेणात्र लिख्यतेऽस्माभिः ॥ २ ॥
प्रमाणं च प्रमेयं च संशयश्च प्रयोजनम् ।
तथा दृष्टान्तसिद्धान्तावयवास्तर्कनिर्णयौ ॥ ३ ॥

वादजल्पवितण्डाश्च हेत्वाभासच्छले तथा ।
जातिश्च निग्रहस्थानं पदार्थाः षोडश त्वमी ॥ ४ ॥
तत्र प्रमायाः करणं प्रमाणमिति कथ्यते ।
तत्प्रकारस्तद्वति योऽनुभवः स प्रमोच्यते ॥ ५ ॥

**End:**

भवन्ति निग्रहस्थानान्येवं नैयायिके नये ।
पदार्थाः षोडश त्वेवं प्रमाणाद्या निरूपिताः ॥ १७१ ॥
एतावन्न्यायरहस्यं रहस्यसिद्धान्तसंबन्ध(द्ध)म् ।
गोविन्दशर्मनिर्मितममत्सराणां मुदे भवतु ॥ १७२ ॥

**Colophon:**

इति श्रीगोविन्दभट्टाचार्यविरचितं न्यायरहस्यं संपूर्णम् ।

---

(*b*) न्यायरहस्यव्याख्या.
NYĀYARAHASYAVYĀKHYĀ.

A commentary on the work described under the last sub-division: by the same author as that of the text.

Breaks off in the 120th stanza.

**Beginning:**

भूयो भूधरतनयां विनयेन याचमानस्य ।
कृत्यानि केलिकाले भवस्य भव्याय भूयासुः ॥
ईषद्दूढार्थानां विवरणमल्पाक्षरैरेव ।
कुतुकेन कारिकाणां स्वयं कृतानां वयं तनुमः ॥
न्यायवाचस्पतेः सूनोरियं गोविन्दशर्मणः ।
कृतिः कृतधियां भूयादमन्दानन्ददायिनी ॥

विशिष्टशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकं मङ्गलं शिष्यशिक्षायै निबध्नाति— नीलोत्पलेत्यादि । नमस्कार्यतावच्छेदकमाह—जगदिति । जगदत्र कार्यजातम् ।

**End:**

रूपान्तरसहकृतस्यैव रूपादेः रूपाद्यन्तरजनकत्वे तु चतुर्थक्षणा । क्षणद्वयं तु नीरूपादिकमेव ।

## R. No. 1694.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 53. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. Karra Simhādri Śāstrigāru of Enukulamahal, Gōdāvari district.

वेदान्तसारसंग्रहमननम्.

VĒDĀNTASĀRASAṄGRAHAMANANAM.

The fly-leaf contains the contents of this work.

An elementary treatise on the principles of the Advaita system of philosophy : by Cidghanabhāratī, a disciple of Saccidānandasukhacidrūpabhāratī. The details of the subject dealt with herein will be clear from the following table of contents :—

मोक्षस्वरूपविवरणम्.
साधनचतुष्टयकथनम्.
श्रवणसाधनविचारः.
समष्टिशरीरत्रयविचारः.
व्यष्टिशरीरत्रयविचारः.
देहत्यागप्रकारः.
गर्भपिण्डोत्पत्तिप्रकारः.
प्राणोत्क्रान्तिनिषेधः.
स्थूलशरीरनिरूपणम्.
जाग्रदाद्यवस्थाचतुष्टयनिरूपणम्.
मूर्छानिरूपणम्.
प्रमाणविचारः.
अध्यारोपविचारः.
अपवादनिरूपणम्.

Complete

**Beginning :**

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
अहं हृदि नियन्तारं बहिश्च गुरुरूपिणम् ।
उभयत्रापि कृष्णाख्यं तं वन्दे देवकीसुतम् ॥

यतमाना द्विविधाः—अभ्युदयकामा निःश्रेयसकामाश्च । अत्र श्रुतिः—श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ संपरीत्य विविनक्ति धीरः । श्रेयो हि धीरो निःश्रेयसो वृणीते प्रेयो नन्दो योगक्षेमाद्वृणीते ।

धर्मार्थकाममोक्षाख्याः पुरुषार्था उदाहृताः ।
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ॥

इत्यागमप्रसिद्धेषु चतुर्षु पुरुषार्थेषु मोक्ष एव परमपुरुषार्थः, इतरे तदाभासाः ।

**End :**

एवं देशकालवस्तुपरिच्छेदशून्यसजातीयविजातीयस्वगतभेदरहितसच्चिदानन्दाखण्डब्रह्माहमिति ज्ञाता मुक्त इति सिद्धम् ॥

(गी)तानुज्ञात्रनुज्ञापरिलसदविकल्पात्मयोगानुयोगि-
व्याख्यारूपा यदीयाश्रमवनविलसद्विप्रवर्यार्भकाणाम् ।
अन्योऽन्येष्टप्रसङ्गप्रकरणवदनोद्भूतवाग्वैखरी स्या-
त्सोऽयं चिद्रूपभारत्यभिधयतिवरो मद्गुरुः सर्वसाक्षी ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यसच्चिदानन्दसुखचिद्रूपभारतीस्वामिनां शिष्यचिद्घनभारत्यभिधयतिना संगृहीतं वेदान्तसारसंग्रहमननं समाप्तम् ॥

---

R. No. **1695.**

Paper. $10\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 155. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

(*a*) आश्वलायनश्रौतसूत्रसिद्धान्तिभाष्यम्.
ĀŚVALĀYANAŚRAUTASŪTRASIDDHĀNTIBHĀṢYAM.

Foll. 1*a*—115*a*. Foll. 75—76 are left blank.

The commentary called Siddhāntin on the Āśvalāyana-Śrautasūtra. The author of the work appears to be Viṣṇugūḍhōpādhyāya, who seems to have followed Dēvasvāmin's commentary of the Sūtras, as is explicitly stated by him in connection with the Prayōgavṛtti of the same author described under the next sub-section. Dr. Bhaṇḍārkar, however, calls the commentator Siddhāntin (page 25 of the Report on the Search for Sanskrit MSS. in the Bombay Presidency during 1883–84). The author appears to have commented on the first six Adhyāyas of the Śrautasūtra and to have written only a manual of ritualistic procedure in regard to the next six Adhyāyas (7 to 12).

Contains the Adhyāyas first (complete), second (except 11 to 13 Khaṇḍas), third (first 12 Sūtras in the first Khaṇḍa), fifth (from the tenth Khaṇḍa) and sixth (complete).

**Beginning :**

अथैतस्य समाम्नायस्य विताने योगापत्तिं वक्ष्यामः । अथेत्यथशब्दोऽयं निपात इह मङ्गलार्थं शास्त्रे प्रयुज्यते । अकारो वै सर्व . . . . . शिक्षायां वचनाच्चाकारस्य मङ्गलार्थत्वम् । तथाकारस्याद्य(प्य)कारोदयत्वान्मङ्गलभावः । समाम्नायविशेषणार्थमेतस्येत्युच्यते ।

**Colophon:**

सेयं सिद्धान्तिनो वृत्तिः प्रथमाध्यायगोचरा ।
आश्वलायनसूत्रस्य लिखिता सूत्रसंमिता ॥
इत्याश्वलायनसूत्रव्याख्यायां सिद्धान्तिसंज्ञितायां प्रथमोऽध्यायः ॥

* * * *

आश्वलायनसूत्रस्य वृत्तिः सिद्धान्तिसंज्ञिता ।
द्वितीयाध्यायगा यत्नाल्लिखितातिमनोहरा ॥
इत्याश्वलायनसूत्रव्याख्यायां सिद्धान्तिसंज्ञितायां द्वितीयोऽध्यायः ॥

* * * *

सिद्धान्तिसंज्ञिता वृत्तिः पञ्चमाध्यायगोचरा ।
आश्वलायनसूत्रस्य लिखितातिमनोहरा ॥
इत्याश्वलायनसूत्रव्याख्यायां सिद्धान्तिसंज्ञितायां पञ्चमोऽध्यायः ॥

**End:**

पौन( . . . )कृता । अविकृतेति वचनात्तस्यां प्रयाजानुयाजानविभक्तिभिर्यजेदित्येवमादेर्विकारस्य निवृत्तिर्भवतीत्याह . . .

* * * *

इहाप्याग्नेयस्यावाज्यभागावध्वर्युवशाद्भवत इति वाधूलकानामाज्यभागयोः पूर्वोऽग्निर्नित्यः । द्वितीयोऽग्निः पवमान इति ॥

**Colophon:**

आश्वलायनसूत्रस्य वृत्तिः सिद्धान्तिसंज्ञिता ।
षष्ठाध्यायगता यत्नाल्लिखिता सूत्रसंमिता ॥
इत्याश्वलायनसूत्रव्याख्यायां सिद्धान्तिसंज्ञितायां देवस्वामिकृतौ विष्णुगूढभट्टोपाध्यायकृतौ षष्ठोऽध्यायः ॥

---

(*b*) आश्वलायनश्रौतप्रयोगवृत्तिः.
ĀŚVALĀYANAŚRAUTAPRAYŌGAVṚTTIḤ.

Foll. 115*a*—155*a*. Fol. 155*b* is left blank.

This is a manual of procedure relating to the conduct of the various sacrifices, as dealt with in the Āśvalāyana Śrautasūtra, Adhyāyas 7 to 12. The author Viṣṇugūḍhabhaṭṭōpādhyāya says that he follows the commentary of Dēvasvāmin on the Āśvalāyana Śrautasūtra.

Contains the Adhyāyas seventh complete and the eighth incomplete.

**Beginning:**

आश्वलायनसूत्रस्योपरितनषट्क(स्य) देवस्वामिव्याख्यानुसारेण प्रयोग उच्यते । सत्राणामुक्थ्य(क्त्या)दीक्षोपसद इत्यारभ्य दीक्षोपसद उक्ताः सामान्येन पूर्वमेव सत्राणामस्मिन्नुक्ता इत्यनुवादो गवामयनार्थः । प्रथमं गवामयनमुच्यते । प्रायणीयातिरात्रः प्रथमः पूर्वमेव विस्तरेणोक्तः । उदयनीयोऽप्येष एव कालेऽवगम्यते । अयमेवैकाहोऽतिरात्रः आदौ प्रायणीयः एषोऽन्त्य उदयनीय इति वचनात् ॥

**Colophon:**

इति देवस्वामिकृतौ आश्वलायनसूत्रवृत्तौ विष्णुगूढभट्टोपाध्यायकृतौ सप्तमोऽध्यायः ॥

**Beginning:**

अथ पृष्ठस्य षष्ठमहरुच्यते । प्रातरनुवाकादिसमानमुक्त्वा सूक्तात्प्रस्थितयाज्याविशेषः ।

**End:**

अस्मिन्काले छन्दोगा मानसिनः स्तुवन्ति । स्तुत्युत्तरकालमध्वर्यव इति मन्त्रस्य . . . . . .

---

R. No. **1696.**

Paper. 10¼ × 9⅓ inches. Foll. 91. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

**नरसंभट्टीयम्.**

NARASAṀBHAṬṬĪYAM.

A digest of Dharmaśāstras dealing with the various topics contained therein as given below: by Gaṇṭi Nṛsiṁhārya.

ग्रहणनिर्णयः, भोजनविषयः, ग्रहणे श्राद्धनिर्णयः, अतिथिलक्षणम्, संक्रान्तिनिर्णयः, तर्पणविधिः, एकादशीनिर्णयः, जयन्तीपारणा, एकभक्तनिर्णयः, कर्माङ्गकालविभागः, पार्वणश्राद्धनिर्णयः, कुतपकालः, षण्णवतिश्राद्धानि, अमावास्यानिर्णयः, श्राद्धकर्तृप्रतिनिधिः, विनायकचतुर्थीनिर्णयः, नागचतुर्थीनिर्णयः, अनन्तचतुर्दशीनिर्णयः, आकाशदापदीनम्, वैश्वदेवनिर्णयः, कर्मविपाकपद्धतिः,

निष्कादिपरिमाणलक्षणम्, नारायणाष्टाक्षरी, वन्ध्यात्वहरधेनुदानम्, तटाकप्रतिष्ठाविधिः, यतिसंस्कारविधिः, आपणीयभक्ष्याभक्ष्याणि, देवप्रतिष्ठाकालः, स्नानलक्षणम्, देवतार्चनाविधिः, स्त्रीणामनुगमनफलम्, नरकचतुर्दशीनिर्णयः, पञ्चमसप्तमयोः सापिण्ड्यम्.

Contains from ग्रहणनिर्णय to पञ्चमसप्तमसापिण्ड्यनिरूपण which is incomplete.

**Beginning:**

अथ ग्रहणनिर्णयः—तत्र बृद्धगार्ग्यः—

पूर्णिमाप्रतिपत्सन्धौ राहुः संपूर्णमण्डलम् ।
ग्रसते चन्द्रमर्कं च दर्शप्रतिपदन्तरा ।

इति। दर्शप्रतिपदन्तरा दर्शप्रतिपदोर्मध्ये, तत्र कालविभागो ब्रह्मसिद्धान्ते दर्शितः—

यावान्कालः पर्वणोऽन्ते तावान्प्रतिपदादिमः ।
रवीन्दुग्रहणेऽनेहा स पुण्यो मिश्रणा भवेत् ॥

इति। अनेहा कालः पर्वणोऽन्तिमो भागः स्पर्शकालः प्रतिपदादिमो मोक्षकाल इति विभागः ॥

* * * *

इति राशिग्रहणस्नानविधिः ॥

**Colophon:**

इति गण्टिनृसिंहेन कृतो ग्रहणनिर्णयः ।
पर्यालोच्य स्मृतीर्बह्वीः परिग्राह्यो मनीषिभिः ॥

* * *

पर्यालोच्य स्मृतीर्गण्टिनृसिंहार्येण धीमता ।
श्लोकैरेवाथ सङ्क्रान्तिनिर्णयः क्रियतेऽधुना ॥

* * * *

**End:**

हेमाद्रौ—

चतुर्थीं पञ्चमीं वाऽपि षष्ठीं वा मातृसंज्ञिताम् ।
स्वसृसंज्ञां च वै (पु)त्रीसंज्ञां वा परिवर्जयेत् ॥

तत्र विशेषः—

यत्रोक्तंसापिण्ड्यनिवृत्तिपूर्वं तत्रैव कन्या यदि मातृसंज्ञा ।
पुत्री यदि स्याद्भगिनी यदि स्यात्तदा विवाहो न कदाचिदेव ॥

R. No. **1697.**

Paper. $10\frac{1}{4} \times 9\frac{1}{2}$ inches. Foll. 222. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. Vemparāla Sītārāma Śāstrigāru of Toṇḍavaram, Gōdāvari district.

आह्निकभास्करः.

ĀHNIKABHĀSKARAḤ.

A digest of the various Smṛtis in regard to the daily duties and rituals to be observed in a Brahmin household: by Indrakanṭi Yajñanārāyaṇa, son of Veṅkamāmbā and Vēṅkaṭēśa of Śrīvatsagōtra. The author makes a salutation to God Rāma worshipped at Bhadrācala (Bhadrāchalam of the Gōdāvari district).

This deals with the following subjects :—

आत्माचिन्ता, श्रोत्रियाद्यवलोकननिर्णयः, मूत्रपुरीषोत्सर्गनिर्णयः, मृत्तिकाशौचविधिः, शारीरमलानि, गण्डूषविधिः, आचमनविधिः, दन्तधावनविधिः, दर्भलक्षणम्, अङ्गुलिनियमः, सुवर्णादिपवित्रम्, जीवत्पितृकस्य वर्ज्यानि, प्रातःस्नानविधिः, वस्त्रधारणविधिः, यज्ञोपवीतधारणविधिः, ऊर्ध्वपुण्ड्रधारणम्, सन्ध्यावन्दनविधिः, प्रातरौपासनप्रयोगः, नैमित्तिकस्नानम्, तत्तमुद्राधारणनिषेधः, समुद्रस्नानविधिः, नदीरजोनिर्णयः, तैलाभ्यङ्गस्नानविधिः, गोमयस्नानविधिः, गृहस्थधर्माः, आचारलक्षणम्, अध्ययनविधिः, स्त्रीणामाचाराः ।

**Beginning :**

नमामि विघ्नेश पदाम्बुजं ते स्मरामि लम्बोदर दिव्यनाम ।
करोमि पूजां तव मूर्धदेशे ग्रन्थस्य पूर्तिं कुरु विघ्नराज ॥
भद्राद्रेः शिखरे सुवर्णखचिते रत्नासने संस्थितं
सुश्रीवादिकपीश्वरैरवरजैः संसेव्यमानं मुदा ।
भक्तानामभयप्रदं स्मितमुखं दूर्वादलश्यामलं
वैदेह्या सह संचरन्तमनिशं श्रीरामचन्द्रं भजे ॥

* * * *

नत्वाहं वेङ्कमाम्बां वरगुणरुचिरां मज्जनित्रीं पवित्रं
(तातं) विद्यानिकेतं स्मृतिजलधिविधुं वेङ्कटेशं सुधीशम् ।
ध्यात्वा पौरेशमीशं हृदि गिरिसुतया रामालिङ्गाभिधानं
युक्तं संप्रार्थयिष्ये मुनिवरसुधियः पूर्तयेऽरं कृतेर्मे ॥

श्रीवत्सप्रवरेन्द्रकण्टिकुलसंभूतस्त्वहं कर्मठः
पाण्डित्याम्बुधिवेङ्कटेशतनुजः श्रीयज्ञनारायणः ।
कुर्वेऽद्याह्निकभास्करं बुधमनःपद्माटवीभास्करं
मन्वादिस्मृतिवृन्दमूलवचनान्यालोड्य निष्कृष्य च ॥

अथ मन्वादिप्रणीतानां धर्मशास्त्राणां वेदमूलत्वात्तान्येव धर्मप्रमाणमिति तदधिगमोपयोगितया तच्छास्त्रप्रणेतारः प्रदर्श्यन्ते—

तेषां मन्वङ्गिरो व्यासो गौतमोऽत्रिः क्रतुर्यमः ।
वसिष्ठदक्षसंवर्तशातातपपराशराः ॥
विष्ण्वापस्तम्बहारीताः शङ्खः कात्यायनो भृगुः ।
प्रचेता नारदो योगी बोधायनो(न)पितामहः(हौ) ॥
सुमन्तुः कश्यपो बभ्रुः पैठीनो व्याघ्र एव च ।
सत्यव्रतो भरद्वाजो गार्ग्यः काष्णाजिनिस्तथा ॥
जाबालिर्जमदग्निश्च लोकाक्षिर्ब्रह्मसंभवः ।
इति धर्मप्रणेतारः षट्त्रिंशदृषयः स्मृताः ॥

शङ्खोऽपि—

**End:**

पुनरपि स एवाह—

एवं संशोध्य भाण्डानि यज्ञार्थं पाचयेद्धविः ।

गृहभाण्डानि चतुर्विधानि सम्यक् संशोध्य पञ्चमहायज्ञार्थं देवतार्थं च हविः पाचयेदित्यर्थः ॥

**Colophon:**

इति श्री आह्निकभास्करे स्त्रीणामाचारनिर्णयः ॥

---

R. No. **1698.**

Paper. 10½ × 9½ inches. Foll. 144. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Ānappiṇḍi Śivarāmayagāru of Anathavaram, Gōdāvari district.

**आनन्दकल्पलतिका.**

ĀNANDAKALPALATIKĀ.

A treatise on the worship of Śakti and on the rituals connected therewith: by Mahēśvaratējānandanātha. He mentions the following

names of persons among his preceptors:—Triyambaka, Śrīkaṇṭha, Vasugupta, Sōmānanda, Utpalācārya, Abhinavagupta, Kṣēmarāja, Mādhura-Mahēśāna and Sukhatīrtha-Candrasēkhara-Saṅgabhaṭṭāraka, etc.

Contains the following 13 Parispandas:—

१. श्रीनाथापूजाविधानम्.
२. आह्निकविधिः.
३. सौरपूजाविधानम्.
४. पीठपूजाविधानम्.
५. बीजषोढान्यास..
६. न्यासविधानम्.
७. देहपूजाविधिः.
८. पूर्वपरापूजनम्.
९. परापूजनम्.
१०. षडन्वयशाम्भवरश्मिपूजनम्.
११. परपरापूजनम्.
१२. होमविधानम्.
१३. कुलाकुलविधानम्.

**Beginning:**

सौवर्णाद्रितटस्थलीपरिणमद्दन्ताग्रविस्फूर्जित-
स्वर्णक्षोणिविकीर्णरेणुपटलीनीरन्ध्रसिन्दूरिता ।
गण्डोड्डीनमधुव्रतोरुविरुतस्फारीभवद्बृंहिता
हैरम्बी तनुरस्तु नः शुभकरी शुण्डालदण्डोद्धुरा ॥

* * * *

श्रीमत्परेशप्रतिबिम्बकल्पाः त्रियम्बकाख्या गुरवो जयन्ति ।
तान्खेचरीगोचरमुक्तिभाजांश्चतुर्दशाराध्यपदान्प्रपद्ये ॥

श्रीकण्ठं वसुगुप्तं श्रीसोमानन्दमुत्पलाचार्यम् ।

अभिनवगुप्तं नाथं वन्दे श्रीक्षेमराजं च ।
श्रीपादभैरवस्वादुनायकोदयदेशिकाः ॥
त्रयो यस्य प्रसन्ना मे सुप्रसीदन्तु माधुराः ।
श्रीमाधुरमहेशानशिवो निर्द्वन्द्वमानसः ॥

अव्याहताशिवाभासः कृष्णवासः प्रसीदतु ।
श्रीहृदयचन्द्रिकास्वप्रकाशिकाविमर्शकोभयाचार्यान् ।
सुखतीर्थचन्द्रशेखरसङ्गभट्टारकं सदा वन्दे ॥

* * * *

श्रीनाथाय नमस्तस्मै यत्पदं मकुटायते ।
धारायते भवग्रन्थौ यत्कटाक्षसुधानदी ॥
ब्राह्मे मुहूर्ते चोत्थाय संस्मरेद्गुरुपादुकाम् ।
वन्दे गुरुपदद्वन्द्वमवाङ्मनसगोचरम् ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदवधूतमहेश्वरतेजानन्दनाथविरचितायामानन्दकल्पलतायां श्रीनाथपूजनं नाम प्रथमः परिस्पन्दः ॥

**End:**

इत्येवं चरणं जप्यं परं प्राप्यं परं पदम् ।
गुरुकारुण्यसौलभ्यमीदृशं कुलदर्शितम् ॥
महापापदशा नृणां तेषां वाञ्छा न जायते ।
तेषां हि सद्गतिर्नास्ति कल्पकोटिशतैरपि ॥
कौलाः पशुव्रतस्था ये पक्षिद्वयविडम्बकाः ।
केशसंख्या स्मृता यावात्तवतिष्ठन्ति रौरवे ॥

**Colophon:**

श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदवधूतमहेश्वरतेजानन्दनाथविरचितायामानन्दकल्पलतायां कुलाकुलविधानं नाम त्रयोदशः परिस्पन्दः ॥

---

## R. No. 1699.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 204. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Uppulūri Veṅkaṭakṛṣṇammagāru of Kottappalli, Gōdāvari district.

**स्मार्तपद्धतिविवेचनिका.**

SMĀRTAPADDHATIVIVĒCANIKĀ.

Same work as that described under R. No. 412 *ante*. By Indrakaṇṭhi Yajñanārāyaṇa, who is apparently the same as the author of Āhnikabhāskara described under R. No. 1697 *ante*.

Complete. Deals with the following subjects:—

धार्याग्निहोमविशेषः, सर्वप्रायश्चित्तम्, पुनःसन्धानम्, औपासनम्, ब्रह्मयज्ञनिर्णयः, वस्त्रनिष्पीडनम्, वैश्वेदेवनिर्णयः, नित्यश्राद्धनिर्णयः, द्वादशरात्रव्रतनिर्णयः, स्थालीपाकादि, दम्पत्योरुपवासानिर्णयः, पाकयज्ञविधिः, सर्पबलिः, आग्रयणकालनिर्णयः, ईशानबलिस्वरूपम्, श्राद्धदेशनिर्णयः, ब्राह्मणनिर्णयः, सुवासिनीपूजानिर्णयः, श्राद्धकर्तृभोक्तृनियमाः, पाकभाण्डनिर्णयः, कुशग्रहणनिर्णयः, उत्तरीयनिर्णयः, श्राद्धकर्माणि वैश्वदेवनिर्णयः, एकोद्दिष्टनिर्णयः, श्राद्धारम्भकालनिर्णयः, मण्डलनिर्णयः, गन्धादिदाननिर्णयः, अर्घ्यादिविस्मृतिप्रायश्चित्तम्, परिवेषणनिर्णयः,

विसर्जननिर्णयः, पिण्डोपघातनिर्णयः, पार्वणविस्मृतिप्रायश्चित्तम्, श्राद्धशेषान्नभोजनविचारः, पितृदेवतास्वरूपम्, दर्शादिश्राद्धनिर्णयः, अष्टकाश्राद्धनिर्णयः, आमश्राद्धनिर्णयः, अविभक्तश्राद्धनिर्णयः, कर्तृनष्टश्राद्धनिर्णयः, अतिक्रान्तश्राद्धम्, जीवत्पितृकस्य दर्शादिश्राद्धनिषेधः, चतुर्विधाश्रमलक्षणम्, यतिसंस्कारनिर्णयः, सपिण्डीकरणानन्तरं शुभकर्मविधिः, मृताहाज्ञाने श्राद्धकालः, संक्रान्तिनिर्णयः, महालयादिः, हेमान्नश्राद्धविधिः ॥

**End :**

प्रभासखण्डे—

श्राद्धाङ्गतर्पणं कृत्वा पिण्डानप्सु विनिक्षिपेत् ।
बन्धुभिः सह भुक्त्वा तु ताम्बूलं चर्वणं ततः ॥

आमश्राद्धे श्राद्धानन्तरं श्राद्धाङ्गतर्पणं कुर्यादित्यर्थः ॥

**Colophon :**

इति श्रीइन्द्रकण्टियज्ञनारायणसूरिविरचितायां स्मार्तपद्धतिविवेचनिकायां हेमान्नश्राद्धनिर्णयः ॥

श्रीवत्सगोत्रोल्लसदिन्द्रकण्टिवंशेन्दुना याजुषशेखरेण।
श्रीयज्ञनारायणसूरिणासीत्कृता कृतिः पादगयैकसेयम् ॥
श्रीवेङ्कटेश्वरसुतेन कृतिर्विचित्रा यज्ञेश्वराख्यविदुषा रचिता सुपूर्णा।
प्रायात्सतां रसविदामधिकां प्रसिद्धिं ग्राह्याखिलार्थभरिता पदतोऽपि वेद्या ॥
स्मार्तपद्धतिविवेचनिकेयं सूत्रिता च विदुषां परिहृद्या।
वेङ्कटेशतनुजेन मया सा वृद्धिमुन्नततरां कृतिरीयात् ॥

---

R. No. **1700.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 37. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of M.R.Ry. Bhamidipāṭi Acyutarāma Sōmayājulugāru of Irusumanda, Gōdāvari district.

**पौलस्त्यराघवीयम्.**

PAULASTYARĀGHAVĪYAM.

Foll. 1*a*—35*b*.

A poem in about 20 Sargas, summarizing the story of the Rāmāyaṇa : by Pullēla Rāmacandra of Kauṇḍinyagōtra. The work is said to be marked by Lakṣmīpada.

Contains the Bālakāṇḍa (in six Sargas), the Ayodhyākāṇḍa (in four Sargas) and the Āraṇyakāṇḍa (in four Sargas).

**Beginning:**

वैनायकं पदसरोजयुगं मुनीन्द्रहृत्कैरवौघविधुविम्बमहं भजिष्ये।
विघ्नौघकुध्रदलने शतकोटिसारं सारं गिरामजमुखाब्जविनिस्सृतानाम् ॥

* * * *

नारायणीति महतीमभिवादयन्तमम्भोजसम्भवभुवं तपनप्रभावम् ।
पप्रच्छ नारदमुनिं मुनिवृन्द(म)ध्ये वल्मीकसंभवकविः कविराजराजः ॥

**Colophon:**

इति श्रीमत्त्रिभुवनाविदितपरमपवित्रकौण्डिन्यगोत्रावतंसश्रीमत्पुल्लेलवंशाब्धिसमुद्भूतरामचन्द्राविरचिते महाकाव्ये पौलस्त्यराघवीये लक्ष्मीपदलाञ्छने बालकाण्डे प्रथमः सर्गः ॥

**End:**

रघुपतिरथ त(प)म्पां वीक्ष्य चञ्चत्तरङ्गां
ध्वनिमपि पिकशब्दं नीलकण्ठौघलास्यम् ।
मधुकरमदरावं तत्र संवीक्ष्य रामः
श्रुतिहृदयविनोदां नाट्यलक्ष्मीं स मेने ॥

**Colophon :**

इति श्रीमत्त्रिभुवनविदितपरमपवित्रकौण्डिन्यगोत्रावतंसश्रीमत्पुल्लेलवंशाब्धिसमुद्भूत रामचन्द्रविरचिते महाकाव्ये लक्ष्मीपदलाञ्छने पौलस्त्यराघवीये श्रीमदारण्यकाण्डे चतुर्थः सर्गः ॥

Foll. 35*b*—37*b* give some Bandha Ślōkas with their corresponding Bandhas.

---

## R. No. **1701.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 23. Lines, 20 in a page. Telugu. Good.

Tanscribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

(*a*) आपस्तम्बश्रौतसूत्रभाष्यवृत्तिः.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAVṚTTIḤ.

Foll. 1*a*—7*b*.

By Kauśikarāma Same work as that described under No. 3, page 148, of M. Seshagiri Sastri's Report, No. 2. It is stated herein that Dhūrtasvāmin, the author of the Āpastambaśrautasūtrabhāṣya,

commented upon the Hautrasūtras at the end of the fourth Praśna, although these form part of the 24th Praśna.

Contains the Hautraprakaraṇa.

**Beginning:**

इष्टिहौत्रे कल्पकारेण परिभाषाप्रकरणे उक्तेऽपि दर्शपूर्णमासप्रयोगसाकल्यार्थमिह भाष्यकारेणोच्यते । समिदाधानार्था ऋचः सामिधेन्यः । तासां पुरस्ताद्धोता हृदयदेशं स्पृशन्नूर्ध्वं प्रादेशं प्रदेशिन्या युक्तोऽङ्गुष्ठः प्रादेशः । तं धारयमाणः ।

**End:**

यत्र तु मन्त्राम्नाय एव याज्यानुवाक्यादिरभीयते तत्र बह्वृचात्प्रयोगावगमो नियतः । दर्शपूर्णमासयोस्समग्रोपदेशेऽपि बह्वृचप्रयोगो विकल्प्यते, ऋग्वेदेन होता करोतीति परिभाषोक्तेः ॥

**Colophon:**

इति हौत्रकल्पः ॥

Fol. 8*a* contains a few lines in connection with Nakṣatranāman.

---

(*b*) आपस्तम्बहौत्रसूत्रम्.

ĀPASTAMBAHAUTRASŪTRAM.

Foll. 8*a*—11*a*.

This is the last portion of the 24th Praśna of the Āpastambaśrautasūtra described under No. 1042 of the D.C.S. MSS., Vol. II, and the first two portions of that Praśna deal with Paribhāṣā and Pravara.

Complete.

---

(*c*) हौत्रमन्त्रार्थः.

HAUTRAMANTRĀRTHAḤ.

Foll. 11*a*—17*b* and 20*a*—23*a*. Fol. 23*b* is left blank.

A commentary on the Mantras to be recited by the Hōtṛ priests in sacrifices.

Incomplete.

**Beginning:**

इदमहं त्रिवृता . . . निर्हण्मि अयमहं त्रिवृत्स्तोमादिना साधनेनास्याः पृथिव्याः सकाशात्तत्राप्यस्याः प्रतिष्ठाया गृहात्तत्राप्यस्मादायतनाद्वेदिरूपादस्मद्वेष्टारमस्मद्वेष्यं च निकृष्य हन्मि ।

**End:**

व्यतिषङ्गमुत्तरेणोत्तरेण मैत्रावरुणः प्रेष्यति । उत्तरेणोत्तरेण होता यजति ।

(*d*) आपस्तम्बश्रौतसूत्रभाष्यम्.

ĀPASTAMBAŚRAUTASŪTRABHĀṢYAM.

Foll. 17*b*—20*a*.

By Dhūrtasvāmin. Same work as that described under No. 1060 of the D.C.S. MSS., Vol. II.

Contains the Hautraprakaraṇa only, which is commented upon at the end of the fourth Praśna.

---

## R.No. 1702.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 35 Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. Raṅgarāmānuja Cakravartyācāriyar of Pallakacēri, South Arcot district.

भोजराजाङ्कः.

BHŌJARĀJĀṄKAḤ.

This drama in one Act belongs to the class of Rūpakas called Aṅka, the chief characteristics of which are that it consists of one act, that the hero is a mortal man or woman, that the chief sentiment (Rasa) is the Karuṇa or the pathetic, that it contains much lamentation on the part of women and that the fight ensuing therein is carried on not in deeds, but in words. The plot of this drama is based upon the well-known adventures of Bhōjarāja arising from domestic conspiracies. The drama was intended to be staged on the occasion of the festival of God Dēhaḷīśa worshipped at Tirukōyilūr on the banks of the southern Pennār. By Sundaravīrarāghava, son of Kastūri Raṅga of Vādhūlagōtra of Śiruvaḷūr (in the South Arcot district).

Complete.

**Beginning :**

अस्तु नः स्वस्तिदं वस्तु कौस्तुभप्रभमुज्ज्वलम् ।
क्षमाक्षमा सदा लक्ष्मीर्यस्य वक्षसि लक्ष्यते ॥

(नान्द्यन्ते) सूत्रधारः—(समन्तादवलोक्य) ।

अहो विरतप्रायैव शर्वरी । यतः,

साधूनां हृदयमिव प्रसन्नमभ्रं सर्वत्र प्रसरति मन्दगन्धवाहः ।
उद्बुद्धाम्बुजविपिनं प्रयाति भृङ्गश्चन्द्रोऽपि प्रियवनितामिव प्रतीचीम् ॥

* * * *

अहो भाग्यवती गोपनगरी । यतः,

पण्णानदीपवनपावितपुण्यभूमिः कृष्णाटवीचरगवीपदरेणुसान्द्रा ।
श्रीदेहलीशवनिताजनगुल्फलम्बिमञ्जीरशिञ्जितशुचिध्वनिचुम्बितास्ते ॥

* * * *

यदस्मद्धृदयं विदित्वा भोजराजाङ्कं निरूपयितुं प्रवृत्तोऽसि इति । (पुनः सविनयम्) सर्वोऽप्यार्यानुग्रहपरिणाम एव । (सप्रमोदं शिरः कम्पयन्)

सरसो रसिकश्लाघ्यो ग्रन्थः सोऽयं कविश्च वाधूलः ।
दासो भागवतानां सुन्दरवीररघुनायकाचार्यः ॥

यस्तु—

श्रीवालकिंगृहपुरीविहरद्रमेशपादाब्जरेणुपरिमण्डितमूर्धभागः ।
श्रीसात्वतामृतमहोदधिपूर्णचन्द्रः कस्तूरिरङ्गतनयो जयति(विदित)स्सुमेधाः ॥

* * * *

(ततः प्रविशति गोविन्दपण्डितः)

गोविन्दपण्डितः—अहो सिन्धुलप्रभोः प्रभावः ।

मूकश्चापि विलोकनान्नरपतेरासाद्य सर्वज्ञतां
वाणीं वाचि विहारयन्नपि सभां सम्यक् समाह्लादयन् ।
कोशागारविभूषणैकनिरतैरावापकाद्यैः शुभैः
तैस्तैश्च प्रतिकर्मितः सकुतुकं संभावितः काञ्चनैः ॥

देवी शशिप्रभापि नष्टमुष्टिरिति प्रसिद्धा । यतः

यद्दत्तमुक्ताभरणानि नित्यादानेन वोढ्रा परिवर्जितानि ।
लज्जावशाद्म्बरमभ्युपेत्य नक्षत्ररूपेण परिक्रमन्ते ॥

(विचिन्त्य) किं ब्रवीमि तत्तनयस्य भोजकुमारस्य विक्रमम् ! ॥

**End:**

भोजः—

रिपुरपि गतो राज्यं प्राप्तं विलासवती प्रिया
शुभगुणनिधिर्लक्ष्मीभूमिर्मया सह संगता ।
तव करुणया लीलावत्या बभूव करग्रहो
भवति जननीसेवा श्लाघ्या प्रियं किमतः परम् ॥

अद्य राज्यपरिपालनाय यतामहे ।

तथापीदमस्तु भरतवाक्यम्—

नार्यः सन्तु पतिव्रता भुवि सदा भूपालपुत्री यथा
वाञ्छन्त्वार्यसुतोदयं पुनरिमा देवीव लीलावती ।
धर्मे दत्तधियो भवन्तु नृपतिर्भोजो यथा भूमिपाः
लाल्यन्तां कवयश्च भूमिपतिभी रामेण देवा यथा ॥

इति निष्क्रान्ताः सर्वे ॥

Colophon :

इति श्रीबालकिंगृहपुरीतिलकायमानवाधूलकुलतिलकश्रीसुन्दरवीररघूद्भहगुरोः कृतिषु श्रीभोजराजाङ्कः समाप्तः ॥

Fol. 35 contains the dramatic personage of the drama.

---

R. No. **1703.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 52. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of M.R Ry. Vaṅka Jagannātha Śāstrigāru of Indupalli, Gōdāvari district.

संक्षेपशारीरकव्याख्या—सिद्धान्तदीपः.

SAṄKṢĒPAŚĀRĪRAKAVYĀKHYĀ : SIDDHĀNTADĪPAḤ.

By Viśvavēda. Same work as that described under R. No. 1558(*b*) *ante*.

Breaks off in the 254th stanza of the first Sarga.

---

R. No. **1704.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 139. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of M.R.Ry. Mantravādi Vēṅkaṭa Śāstrulu of Muñjavarapukōṭa, Gōdāvari district.

तत्त्वचिन्तामणिव्याख्या—आलोकः.

TATTVACINTĀMAṆIVYĀKHYĀ : ĀLŌKAḤ.

By Jayadēva, who states that he records the views of his uncle Harimiśra. Same work as that described under No. 3998 of the D.C.S. MSS., Vol. VIII.

Contains the Anumānakhaṇḍa which breaks off in the Hētvābhāsanirūpaṇa.

**Beginning:**

अमुष्मिन्नेतावत्यपरिचिततत्त्वार्थगहने
प्रसङ्गो मे यद्यप्यहह परिहासैकफलकः ।
तथापि श्रीगौरीपरिबृढपदाम्भोजयुगले
न भग्ना भक्तिश्चेत्कथय किमशक्यं त्रिजगति ॥
अनुमानपरिच्छेदे तत्त्वचिन्तामणेरयम् ।
पितृव्यहरिमिश्रोपदिष्टो भात्रः प्रकाश्यते ॥

प्रत्यक्षानन्तरमनुमानस्योद्देशात् तल्लक्षणानन्तरमनुमानलक्षणं क्रियत इत्याह—अथेति ।

**End:**

हेत्वाभासपदेन साध्याव्याप्यत्वस्य विवक्षितत्वात् । अत एव विप्रतिपत्तौ विशेषणविशेष्ययोरेवासत्त्वमुपदर्शितम् । यथाश्रुतविवक्षित . . . . . दर्शनेनेत्यर्थः ।

---

R. No. **1705.**

Paper. 10¾ × 9½ inches. Foll. 96. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of S. Gōpālācārya of Villiyambākkam, Chingleput district.

Bound in two volumes.

**पञ्चकालक्रियादीपः.**

PAÑCAKĀLAKRIYĀDĪPAḤ.

Deals mainly with the daily routine of rites and worships to be performed by a Śrī-Vaiṣṇava Brahmin during the five periods into which the day is equally divided. The work is based chiefly on quotations from Dharmaśāstras, Purāṇas and Āgamas. The author of the work is Śatakratu Caturvēdi Śrīnivāsācārya, who is said to be a propagandist of Rāmānuja's doctrines.

Complete in five Paricchēdas dealing with the following subjects :—

१. प्रातस्स्मरणीयस्तोत्र.
२. मूत्रपुरीषोत्सर्जनविधिः.
३. शौचविधिः.
४. आचमनाविधिः.
५. दन्तधावनस्नानादिविधिः.
६. प्रातः सन्ध्यावन्दनम्.

७. अष्टाक्षरमन्त्रजपः.
८. आधारशक्तितर्पणम्.
९. ब्रह्मयज्ञः.
१०. परमैकान्तिनां श्रौताग्निनिर्णयः.
११. दर्शपूर्णमासविचारः.
१२. अभिगमनसात्त्विकत्यागः।
१३. उपादानम्.
१४. माध्याह्निकस्नानम्.
१५. भगवदाराधनम्.
१६. स्वाध्यायः.
१७. योगः.

**Beginning :**

सिद्ध्यर्थमस्मद्देशिकमिति श्लोकोक्तरीत्या गुरुपरम्परोपसत्तिपूर्वकं भगवन्तं प्रपद्य,

आत्मानं देहमीशं च चिन्तयेत्संयतेन्द्रियः।
ज्ञानानन्दमयो नित्यः पञ्चकालात्मको ह्ययम् ॥
अस्मिन्देहे निवत्स्यामि शेषभूतोऽपि शार्ङ्गिणः।
शुक्रलोहितसंभूते जरारोगाद्युपद्रुते ॥

* * * *

एवं शृण्वतां दुरितहरिणा हरिसङ्कीर्तनेन संहृष्टमनाः सन्ध्यायामासन्नायां भगवन्तमुपासितुमधिजिगमिषुः संकल्पं कुर्यात्।

* * * *

**Colophon :**

इति भगवद्रामानुजसिद्धान्तस्थापनाचार्यशतक्रतुचतुर्वेदिश्रीनिवासाचार्य-विरचिते पञ्चकालक्रियादीपेऽभिगमननिरूपणाख्यः प्रथमः परिच्छेदः ॥

**End :**

एवं यथाधिकारं यथाविधि नित्यानित्यकर्माणि सर्वाण्याश्रमकर्माणि सर्वैराश्रमिभिः यावज्जीवमनुष्ठेयानि ॥

**Colophon :**

इति भगवद्रामानुजसिद्धान्तस्थापनाचार्यशतक्रतुचतुर्वेदिश्रीनिवासाचार्य-विरचिते पञ्चकालक्रियादीपे योगनिरूपणाख्यः पञ्चमः परिच्छेदः ॥

अनेकस्मृतिविज्ञेयकृत्याकृत्यप्रकाशकम्।
पञ्चकालक्रियादीपमज्ञानध्वान्तरोधकम् ॥
शतक्रतुचतुर्वेदिश्रीनिवासार्यनिर्मितम्।
सन्तः समीक्ष्य सन्तोषं प्राप्नुवन्तु विमत्सराः।

पञ्चकालक्रियादीपः संपूर्णः ॥

R. No. **1706.**

Paper. 10¾ × 9½ inches. Foll. 102. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Uppulūri Veñkaṭakṛṣṇammagāru of Kottapalli, Gōdāvari district.

सूर्यसिद्धान्तः—सव्याख्यः.

SŪRYASIDDHĀNTAḤ WITH COMMENTARY.

The celebrated ancient astronomical treatise consisting of 14 Adhyāyas, the subjects dealt with therein being given under R. No. 363 *ante*. The commentary entitled Gaṇakōpakāriṇī contained in this MS. is by Cōlavipaścit.

Contains the first 11 Adhyāyas.

**Beginning:**

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने ।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥

अथ ब्रह्मणः कियत्परमायुः तस्मादायुषः कियद्गतं कियान्शेष इत्यपेक्षायामाह—

परमायुः शतं तस्य तस्याहोरात्रसंख्यया ।
आयुषोऽर्धमितं तस्य शेषात्कल्पोऽयममादिः ॥

कल्पद्वयमहोरात्रस्य या संख्या भु(उ)क्ता तया अहोरात्रसंख्यया तस्य ब्रह्मणः परमायुः शतम् । तस्यायुषोऽर्धमितं गतम् । शेषादायुषः कल्पोऽयमादिमः ।

* * * *

**Colophon:**

प्रज्ञोदग्रविशिष्टशिष्यनिवहश्लाघ्योपदेशक्रिया-
प्रत्यक्षीकृतविप्रकीर्णविषयस्कन्धत्रयीमर्मणा ।
चोलाख्येन विपश्चिता विरचिते श्रीसूर्यसिद्धान्तक-
व्याख्याने गणकोपकारचतुरेऽध्यायोऽयमाद्यो गतः ॥

**End:**

इत्येतदखिलं प्रोक्तं ज्योतिषां चरितं हितम् ।
रहस्यं महदाख्यातं किमन्यच्छ्रोतुमर्हति ॥

स्पष्टोऽर्थः । उक्तानां वक्ष्यमाणैरध्यायैर्भिन्नविषयत्वाच्छास्त्रमध्येऽप्युपसंहारोऽयमिति बोद्धव्यम् । अत्र शास्त्रे सूत्रमूलत्वात्प्रतिप्रकरणं प्रकारान्तराणि यद्यप्युत्पादयितुं शक्यन्ते तथापि ग्रन्थविस्तरभयान्नोक्तानि ॥

**Colophon :**

प्रज्ञोदग्रविशिष्टशिष्यनिवहश्लाघ्योपदेशक्रिया-
प्रत्यक्षीकृतविप्रकीर्णविषयस्कन्धत्रयीमर्मणा ।
चोलाख्येन विपश्चिता विरचिते श्रीसूर्यसिद्धान्तक-
व्याख्याने गणकोपकारिणि गतोऽध्यायोऽयमेकादशः ॥

---

R. No. **1707.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 42. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

प्रयोगरत्नावली.

PRAYŌGARATNĀVALĪ.

By Paramānandaghanēndra, disciple of Cidānandabrahmēndrasarasvatī. Same work as that described under R. No. 1629(*c*) *ante*.

Contains the seventh Adhyāya only, which deals with Paśubandhaprayōga, etc.

**Beginning :**

प्रावृषि पौर्णमास्यामावास्यायां वा प्रातरग्निहोत्रं हुत्वा दर्भेष्वासीनो दर्भान्धारयमाणः पत्न्या सह प्राणानायम्य सङ्कल्पं करोति । पशुबन्धमारप्स्ये ।

**End :**

गौणकालेऽप्यतिक्रान्ते प्रायश्चित्तमेवोत्तराज्याधिकारार्थम् ॥

**Colophon :**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्चिदानन्दब्रह्मेन्द्रसरस्वतीपूज्यपाद-शिष्यपरमानन्दघनेन्द्रविरचितायां भगवदापस्तम्बसूत्रभाष्यानुसारिण्यां प्रयोग-रत्नावल्यां सप्तमः प्रश्नः ॥

---

R. No. **1708.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 83. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamiḍipāṭi Acyutarāmasōmāyajulugāru of Irusumanda, Gōdāvari district, which MS. is said to have been copied by Viñjamūri Rāmayya from the MS. of Vīrarāghavayyagāru on Thursday, the 2nd day of the dark fortnight of the Kārtika month in the year Vikārin.

Foll. 31, 32 and 34*a* are left blank.

सूर्यसिद्धान्तः—कल्पवल्लीव्याख्यासहितः.

SŪRYASIDDHĀNTAḤ WITH THE COMMENTARY KALPA-VALLĪ.

Similar to the work described under R. No. 1706 *ante*.

The commentary herein added is by Yallaya, son of Śrīdhara and grandson of Yallaya of Kāśyapagōtra He was the disciple of Sūrya, son of Bālāditya. Some details given in a stanza extracted from the end about the author's great grandfather are obscure on account of the mistakes found in the transcript. The commentator is stated to have received learning through the grace of Candraśēkhara.

Contains Adhyāyas 1, 2 (the first 59 stanzas) and 5 to 14.

**Beginning:**

यो देवश्चन्द्रमौलिस्त्रिनयनविलसद्वक्त्रपद्मः करालः
ते(क्ष्वे)लग्रासी कपाली सकलसुरपतिः शंकरः पार्वतीशः।
कृत्वा रक्षन् विनिघ्नन् सकलजगदिदं मायया निर्गुणः सन्
नित्यः सच्चादिरूपो विमलमतिमतां बुद्धिवाग्मी तमीडे ॥
कण्ठेकालं त्रिनेत्रं तुहिनकरविषद्वाहिनीसक्तजूटं
नानालंकारयुक्तं विमलकरगणैरक्षसूत्रं च विद्याम् ।
से(सौ)धं संपूर्णकुम्भं पटुतिमिरहरं ज्ञानमुद्रां दधानं
वन्दे श्रीदेवदेवं सकलसुरनुतं दक्षिणामूर्तिमीशम् ॥
श्रीवाणीशं माधवं पार्वतीशं श्रीवीरेशं विघ्नराजोडुखेटान् ।
नत्वा सूर्यं देशिकं यल्लयाख्यः सम्यग्वक्ष्ये सौर्यतन्त्रस्य टीकाम् ॥

इह शास्त्रे कानि संबन्धाभिधेयप्रयोजनानीत्युच्यन्ते ।

* * * *

अवि(गी)तशिष्टाचारपरम्परावाप्ति(प्त)मिष्टदेवतानमस्कारलक्षणं मङ्गलं मुखतः संपादयन् श्रीभगवान् सूर्यदेव आह—

अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने।
समस्तजगदाधारमूर्तये ब्रह्मणे नमः ॥

अचिन्त्याव्यक्तरूपाय न चिन्त्यः अचिन्त्यः, न व्यक्तमव्यक्तं रूपं यस्य सः अचिन्त्यश्चासावव्यक्तरूपश्च तस्मै ।

* * * *

श्रीबालादित्यपुत्रात् सुरगुरुसदृशात् सूर्य(तः) प्राप्तविद्यो
विद्वान् श्रीयल्लयाख्यः प्रथितगुणयशाः श्रीधरार्यस्य पुत्रः ।
सिद्धान्तस्यार्कनाम्नो विशदपदवतीं पञ्जिकां कल्पवल्ली-
माद्याध्यायस्य सम्यक् शिवगुरुकृपया प्रोक्तवान् शंकराय ॥

**Colophon:**

श्रीमच्चन्द्रशेखरवरलब्धवाग्विभवेन श्रीबालादित्यसुतसूर्याचार्यशिष्येण श्रीधरार्यपुत्रेण यल्लयाख्येन विपश्चिता श्रीसूर्यसिद्धान्तमध्यग्रहाध्यायस्य टीकोदिता॥

**End:**

तथैवोक्तं ब्रह्मणा—

इत्येतदखिलं ब्रह्म पैतामहमनुत्तमम् ।
यो वेद स परं ब्रह्म सदानन्दं (प्रपद्यते)॥
ये कल्पवल्लीसदृशां मदुक्तां टीकां प्रयत्नेन विलोकयन्ति ।
ते सर्वसिद्धान्तविदो भवेयुर्भुक्त्वेह कामान् परमं लभन्ते ॥
अन्दख्याः सौम्यभागे सकलशुभकरः कल्पकुर्याभिधानः (?)
तास्मिन्याश्चाप्रासिद्धः (?) सकलगुणयशास्तत्सुतो यल्लयाख्यः ।
तत्पुत्रः श्रीधराख्यः श्रुतिपठनपटुस्तत्सुतो यल्लयाख्यः
श्रीसूरात्प्राप्तविद्यः शिवनिहितमनाः काश्यपोऽस्ति प्रसिद्धः ॥

श्रीबालादित्यपुत्रात् सुरगुरुसदृशात्सूर्यतः प्राप्तविद्यो
विद्वान् श्रीयल्लयाख्यः प्रथितगुणयशाः श्रीधरार्यस्य पुत्रः ।
सिद्धान्तस्यार्कनाम्नो विशदपदततिं पञ्जिकां कल्पवल्लीं
मानाध्यायस्य सम्यक् शिवगुरुकृपया प्रोक्तवान् शंकराय ॥

**Colophon:**

श्रीमच्चन्द्रशेखरवरलब्धवाग्विभवेन श्रीबालादित्यसुतसूर्याचार्यशिष्येण श्रीधरार्यपुत्रेण यल्लयाख्येन सूर्यसिद्धान्तस्य मानाध्यायस्य कल्पवल्ली नाम टीका कृता ॥

---

## R. No. 1709.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 56. Lines, 20 in a page. Telugu. Good.
Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district

## प्रयोगपद्धतिः.
## PRAYŌGAPADDHATIḤ.

A manual of procedure relating to the conduct of the rituals to be performed in the household sacred fire, especially those that are to be performed from the time of the conception in the mother's womb to marriage: by Śiṅgayārya, son of Peñjarla Mañcanārya.

Contains the following subjects:—श्रीशमुखम्, दर्भादिप्रमाणम्, आधारादिहोमः, जयादिहोमः, अग्निमुखानुक्रमणिका, गर्भाधानम्, पुंसवनम्, सीमन्तः, जातकर्म, नामकरणम्, अन्नप्राशनम्, चौलम्, उपनयनम्, वेदव्रतादि, विवाहः, वैश्वदेवः.

**Beginning:**

महादेवमहं वन्दे महातातमहर्निशम् ।
सहायं महतां शश्वदहार्यदुहितुः पतिम् ॥
महागणपतिं वन्दे गुहाग्रजमजार्चितम् ।
अहार्यतनयानन्दं सहायमसकृत्सताम् ॥
पेञ्जर्लमञ्चनार्यस्य सुतः शिङ्गयकोविदः ।
प्रयोगपद्धतिं चक्रे मन्त्रपूर्वं क्रियोत्तरम् ॥

तत्रायं कर्मक्रमः—

गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।
नामान्नप्राशने चौलं मौञ्जीव्रतचतुष्टयम् ॥
गोदानाख्यं स्नातकं च विवाहः पैतृमेधिकम् ॥

इति । एतानि षोडश कर्माणि । इतोऽतिरिक्तश्रावणहोमादीनि । तत्र प्रायश्चित्तानि वक्ष्यन्ते । तत्रादौ सर्वकर्मसाधारणमग्निमुखमुच्यते । प्राणानायम्य अमुकं कर्म करिष्ये इति संकल्पं कुर्यात् । तथा पूर्णाश्रमः—

श्रुतिस्मृतिप्रचोदितं करिष्यते यदा तदा
स्वकर्मयत्तदादितो यतासुरागुरं वदेत् ॥

**End:**

अस्मिन्नर्थे विधिरत्नकारिकाः—

वैश्वदेवस्थालीपाके हृदिसंसर्गहोमके ।
द्विभार्याग्न्योश्च संसर्गे परिधीन् प्रहरेदिति ॥

दम्पत्योश्चित्तसंसर्गे विच्छिन्नौपासने तयोः ।
पुनर्वस्वोश्चरुं पक्त्वा तत अग्निमुखे कृते ॥
प्रातरग्निप्रभृतिभिः सप्तभिः स्विष्टकृत्ततः ।
जयादि प्रतिपद्येत सर्वमापरिषेचनात् ॥
ब्रह्मचर्यं चरित्वाथ त्रिरात्रं च ततः परम् ।

इति ॥

Colophon:

इति हृदयसंसर्गहोमः ॥

इति पेञ्जर्लशिङ्गयसूरिविरचितायां प्रयोगपद्धतौ विवाहतन्त्रं समाप्तम् ॥

अथ वैश्वदेव उच्यते । तत्रायं विशेषः—

* * * *

स्वपादं पाणिना विप्रो वामेन क्षालयेत्तदा ।
शौचे दक्षिणपादं तु परस्यादौ तु दक्षिणम् ॥

---

R. No. **1710.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 52. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Appan Veṅkatācāriyar of Vāḍapalli, Gōdāvari district.

प्रयोगपद्धतिः.

PRAYŌGAPADDHATIḤ.

Same work as the above, but with a slightly different arrangement of the subjects dealt with.

Contains up to Vaiśvadēva.

---

R. No. **1711.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 26. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Kāśibhaṭla Kāmēśvara Śāstri of Betamallipūḍi Sāvaram, Razole taluk, Gōdāvari district.

Fol. 12*b* is left blank.

The fly-leaf contains the table of contents of the work.

प्रयोगपद्धतिः.

PRAYŌGAPADDHATIḤ.

Same work as the above.

Contains द्विभार्याग्निद्वयसंसर्गः, अग्निजिह्वालक्षणम्, शय्यानिर्णयः, विवाहे स्त्रीवरयोर्नियमः, कन्यादाने मातृनियमः, दर्भभेदाः, विवाहप्रकारः, स्थालीपाक

विषयः, ब्रह्मचर्यव्रतलोपप्रायश्चित्तम्, दन्तधावनम्, दानमन्त्राः, कूश्माण्ड-होमादिः, वैश्वदेवः.

**Beginning:**

अथ द्विभार्याग्निद्वयसंसर्ग उच्यते । यस्य लौकिकाग्नौ द्वितीयविवाहः स्यात् द्वितीयविवाहप्रभृति नवाहं चोभावग्नी विधिवत् ।

**End:**

श्वभ्यः(श्व) श्वपतिभ्यश्च पतितेभ्यस्तथैव च ।
दद्याद्भूमौ बलिं क्षिप्त्वा वायसेभ्यो बलिं हरेत् ॥

इति ।

---

R. No. **1712.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 13. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Mantha Cennaya Śāstri of Pantuluvāri Agrahāram, Gōdāvari district.

Fol. 13*b* is left blank.

**तर्कसंग्रहदीपिकाव्याख्या—प्रभा.**

TARKASAṄGRAHADĪPIKĀVYĀKHYĀ: PRABHĀ.

A gloss on Annambhaṭṭa's commentary on his own Tarkasaṅgraha. It is stated in another MS. of this work that the author is Nārāyaṇa-bhikṣu.

Contains the Pratyakṣa incomplete.

**Beginning:**

नत्वा विघ्नेश्वरं देवं साम्बं च परमेश्वरम् ।
तर्कसंग्रहदीपस्य प्रमेयं सुविरच्यते ॥

अन्नंभट्टाख्यो विद्वान् प्रारिप्सितस्य व्याख्यानस्याविघ्नेन परिसमाप्तिप्रचय-गमनाभ्यां शिष्टाचारपरिपालनाय च कृतं विशिष्टेष्टदेवतानमस्कारलक्षणं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नन् चिकीर्षितं प्रतिजानीते—विश्वेश्वरमिति ।

**End:**

कार्यद्रव्यनाशं प्रत्यसमवायिकारण(नाश)स्यैव कारणत्वमुचितम्, आवश्यकत्वात् । समवायिकारणनाशेऽपि असमवायिकारणनाशसंभव इति नवीनमत-मनुवदति ।

---

R. No. **1713.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 45. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛiṣṇammagāru of Indupalli, Gōdāvari district.

**परिभाषाभास्करः.**

PARIBHĀṢĀBHĀSKARAḤ.

A commentary on the grammatical Paribhāsās attributed to Vyāḍi: by Agnihōtrin Bhāskara. His genealogy is thus given: Puruṣottamabhaṭṭa—Haribhaṭṭa—Āpājibhaṭṭa—Bhāskara.

Complete.

**Beginning:**

आखण्डलादिसुरमण्डलमण्डनं तमुद्दण्डकोकविरहानलदण्डचण्डम् ।
ईडेऽहमत्र बहुबोधितपद्मकाण्डं मार्तण्डमन्धतमसं प्रति कालदण्डम् ॥

श्रीगुरून् पितरौ नत्वाग्निहोत्री भास्कराभिधः ।
भास्करं परिभाषाणां तनुते बालबुद्धये ॥

युक्तायुक्ताभिज्ञं वन्द्यं भूयो भूयो विद्वद्वृन्दम् ।
नामंनामं याचे मन्दो मान्द्यं चेदं शोध्यं सम्यक् ॥
मृद्वी मृद्वीकया तुल्या खरैरिव खलैर्यदि ।
नाद्दतेयं कृतिस्तस्मादस्माकं हानिरस्ति किम् ॥

तत्र तावत् भाषृ व्यक्तायां वाचीत्यस्मात् परितो भाष्यत इति व्युत्पत्तेः कर्मणि घञुत्पत्तेस्तथा प्रतीतेश्च परिभाषापदं यौगिकम् ।

* * * *

व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणम् ॥

व्याख्यानात् विशेषार्थज्ञानं संदेहे सति कर्तव्यम् । नतु संदेहादभिमतार्थाप्रतिपादकं शास्त्रं स्यात् । तच्च व्याख्यानं षड्विधम् । यदाहुः—

पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं मतम् ॥

इति ।

**End:**

अत एवानिष्टप्रसक्तौ नैषामभ्युपगम इति ज्ञापकसिद्धं न सर्वत्रेति परिभाषाया न्यायसिद्धार्थानुवादिकात्वमिति न परिभाषावशादनिष्टापादनं युक्तमिति सकलेष्टसिद्धिः ॥

परिभाषाकमलिनीर्युक्तिरुग्भिर्विकासयन् ।
भास्करः पण्डितालीनां स्वान्तमानन्दयत्वयम् ॥

त्र्यम्बकेश्वरपुरीकृतवासादग्निहोत्रिकुलनीरधिचन्द्रात् ।
पुण्यपूर्णपुरुषोत्तमभट्टादुद्बभूव सुकृती हरिभट्टः ॥
वेदवाक्यनिचयोपचयेन प्रेक्षितो विधिरिवेह बुधौघैः ।
लोकगीतविमलायतकीर्तिः सोऽपि सज्जनमणिर्जयति स्म ॥
तस्मादुद्भूतकीर्तिः कृतसुकृतभरान्मन्त्रतन्त्रस्वतन्त्रः
साधूनामग्रगण्यो गदद(ल)नविधौ माधवानां शरण्यः ।
कालीक्षेत्राधिवासो हृतकठिनतरारातिषड्वर्गदम्भः
श्रीमानापाजिभट्टः सुरभजनरतः शुद्धधीराविरासीत् ॥

तनय इह तदापोरोरुच(जेरभू)द्भास्कराख्यः फणिपतिभणितानामाशयं भावयित्वा ।
परमथ परिभाषाभास्करं चार्पयत्तं सुखखररविपादे सच्चिदानन्दरूपे ॥

अत्राभ्यासो मनीषा वा सुकृतं वा न किंचन ।
मन्ये गुरुकृपाकल्पलतिकैवादिकारणम् ॥

**Colophon:**

इति श्रीमत्काश्यपान्वयसंभवाग्निहोत्रिकुलतिलकायमानहरिभट्टसूनुश्रीमदापाजिभट्टसूनुभास्करविरचितः परिभाषाभास्करः समाप्तिमगमत् ॥

कर्पूरगौरं करुणावतारं संसारतारं भुजगेन्द्रहारम् ।
सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥

* * * *

पूर्णानन्दस्वरूपाय दक्षिणामूर्तये नमः ।
मा(अ)ज्ञान् प्राज्ञान् करोमीति दीक्षिताय स्वचिन्तया ॥

---

R. No **1714.**

Paper. 10¼ × 9½ inches. Foll. 28. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Bulusu Pārvatīśvarasōmayājulugāru of Vyāghrēśvaram, Gōdāvari district.

Fol. 28*b* is left blank.

## वैदिकमार्गप्रदर्शनम्.

## VAIDIKAMĀRGAPRADARŚANAM.

This is apparently a criticism by Vēdādri Nṛsimhādhavarin of the views of Candracūḍa in regard to the discussion as to which ceremony

forms the primary or basic Śrāddha ceremony in the case of the followers of Āpastamba and of Āśvalāyana. The author proposes to quote in support of his remarks, from the works, Candrikā, Mādhavīya, Vijñānēśvara, Aparārka, and Smṛtisaṅgraha. Candracūḍa is called a recent author as compared with the authors of the other works referred to.

Contains the Śrāddhātidēśanirṇaya only.

**Beginning:**

अप्रामाणिकार्थनिराकरणप्रसङ्गादपरमपि किंचिद्विचार्य निर्णीयते । चन्द्रिकादिप्राचीनमहानिबन्धनेषु श्राद्धप्रकरणे आपस्तम्बाश्वलायनादीनां सर्वेषामपि पार्वणश्राद्धं सर्वश्राद्धप्रकृतिरित्युक्तम् । चन्द्रचूडादिभिर्नवीनैस्तु आपस्तम्बशाखिनामापस्तम्बगृह्योक्तमासिश्राद्धं प्रकृतिः । पार्वणश्राद्धं तु आश्वलायनादीनां प्रकृतिरित्यभिहितम् ।

* * * *

अत्रादौ चन्द्रिकामाधवीयविज्ञानेश्वरापरार्कस्मृतिसंग्रहादिमहानिबन्धनग्रन्थोदाहरणपूर्वकं दर्शश्राद्धप्रकृतित्वपक्षमुपपाद्य तदवलम्बनेनानन्तरं चन्द्रचूडादिनवीनमतमुपन्यस्य निराकरिष्यामः । तथाहि,

**End:**

यत्तु उत्तमान् दूषयन्त इति स्वस्य परकृतदूषणमुक्तं तदिहामूलकाचारत्वेन दूष्यत्वात् ।

स्वाभिप्रायकृतं कर्म यत्किंचिद्विधिवर्जितम् ।
क्रीडाकर्मैव बालानां तत्सर्वं स्यान्निरर्थकम् ॥

इति स्मरणात् ।

यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥

इति भगवता विगीतत्वाच्च ॥

**Colophon:**

इति नैधा(ध्रुवा)न्वयसंभूतेन वेदाद्रिनृसिंहाध्वरिणा कृते वैदिकमार्गप्रदर्शने श्राद्धातिदेशनिर्णयः ॥

---

R. No. **1715.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 56. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamidipāti Acyutarāma-

have been copied by Vēṅkaṭācārya in the dark fortnight of the Mārgaśīrṣa month in the year Pārthiva, when the moon was in the constellation Citrā.

सोमसिद्धान्तः—सव्याख्यः.

SŌMASIDDHĀNTAḤ WITH COMMENTARY.

This is an astronomical treatise in ten Adhyāyas, the subjects dealt with therein being given below. It is said to have been taught by Candra (the moon) to Śaunaka. There is a commentary added to it by Māmiḍi Śiṅgaya, who is also called Nṛsiṁha. The commentary is called Gūḍhārthadīpikā, and the commentator was the son of Peddanārya, grandson of Māmiḍimantrin and great grandson of Cittaya who is said to be a descendent of Pedda Tukkaya of Bhāradvājagōtra. It is also stated that the commentator was a minister in the court of Pedda-Kōmaṭi Vēma.

Complete in ten Adhyāyas as follow :—

| | |
|---|---|
| मध्याधिकारः. | ग्रहयोगाध्यायः. |
| स्पष्टाधिकारः. | उदयास्तमयाधिकारः. |
| त्रिप्रश्नाध्यायः. | शृङ्गोन्नत्यध्यायः. |
| ग्रहणाध्यायः. | व्यतीपाताध्यायः. |
| परिलेखनाध्यायः. | गोलाध्यायः. |

**Beginning :**

चान्द्रीं कलां वहन्मौलौ प्रत्यूहाख्यं महत्तमः ।
हरन्दीव्यति यो देवः तं वन्दे शङ्करात्मकम् ॥
तावकृत्रिमसंबन्धौ वेद्यां(द्ये)तामादिदम्पती ।
ययोरपत्यमखिलं चराचरमिदं जगत् ॥
सूर्याचन्द्रमसौ वन्दे जगद्धितमहोदयौ ।
लोकस्यान्तर्बहिर्व्याप्तं तमो याभ्यां निवार्यते ॥
अस्ति श्रीमद्भरद्वाजगोत्रे श्रोत्रियभूषणम् ।
पेद्दतुक्कयसन्मन्त्रिवंशाम्बोधिसुधाकरः ॥
नप्ता श्रीचिट्टयाख्यस्य पौत्रो मामिडिमन्त्रिणः ।
तनुजः पेद्दनार्यस्य श्रीनृसिंहो महायशाः ॥
मन्त्रिणो यस्य मन्त्रेण नरेन्द्रा वैरिणो भुवि ।
चित्रं गिरिबिलान्तेष [illegible]

पेद्दकोमटिवेमेन्द्रमन्त्रिणा तेन धीमता ।
ज्योतिर्विद्यानिराघाटसरस्वत्पारदृश्वना ॥
शिङ्गयामात्यरत्नेन भुवि लोकहितैषिणा ।
क्रियते सोमसिद्धान्तव्याख्या गूढार्थदीपिका ॥

इह खलु निखिलविद्यास्थानसंप्रवर्तकाद्भगवतो हिरण्यगर्भादधीतज्योतिःशास्त्रं सर्वज्ञः सुधादीधितिः शौनकाख्येन बृहस्पतिपुत्रेण महर्षिणा विनयोपसत्तिपूर्वकं परिपृष्टः त्रैलोक्यज्ञाननिबन्धनं नित्यं निरुपप्लवस्य चक्षुर्भूतं ज्योतिषामयनं शास्त्रं रहस्यं तस्मै शौनकायोपादिक्षत्। तदेतत्सोमसिद्धान्ताभिधं ज्योतिःशास्त्रं सत्संप्रदायानुपातिमामिडिशिङ्गयाख्यो मन्त्री सत्सम्प्रदायपूर्वकत्वं शास्त्रस्य प्रदर्शयन्प्रतिपाद्यसंग्रहात्मकं प्रश्नोत्तररूपं सिद्धान्तावतरणं निबध्नाति —बृहस्पतिसुत इत्यादिना ।

बृहस्पतिसुतः शान्तः सुखासीनं प्रियेक्षणम् ।
अभिवाद्य मुनिं सोमं शौनकः परिपृच्छति ॥

अत्र शान्तत्वेन चिन्ताविशेषाभावः ॥

* * * *

**Colophon :**

इति सकलसिद्धान्तमतानुसारेण मामिडिशिङ्गयार्येण वि चितायां सोमसिद्धान्तटीकायां गूढार्थदीपिकायां मध्यग्रहाधिकारो नाम प्रथमोऽध्यायः ॥

**End :**

शास्त्रमुपसंहरति—

इति गुह्यतमं शास्त्रं भुक्तिमुक्तिफलप्रदम् ।
अधिगम्य गुरोः सोमाच्छौनको मुनिपुङ्गवः ॥

* * * *

अध्येतव्यं सदा विप्रैरुत्तमैर्वेदवादिभिः ।

विप्रैरिति त्रैवर्णिकोपलक्षणम् । शास्त्रारम्भ एवैतद्व्याख्यातम् । इति यज्ञेश्वर . . . विद्यायज्ञेन तोषितो भूयादिह प्र . . . नकोसुख . . . नचित्पुनः ॥

**Colophon :**

इति सकलसिद्धान्तमतानुसारिणा मामिडिशिङ्गणाचा(या)र्येण विरचितायां सोमसिद्धान्तटीकायां गढार्थदीपिकायां गोलाध्यायो दशम· ॥

R. No. **1716.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 17. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

(*a*) ब्रह्मतत्त्वसुबोधिनी.

BRAHMATATTVASUBŌDHINĪ.

Foll. 1*a*—7*a*.

A treatise explaining some of the chief principles of the Advaita-Vēdānta as noted below : by Gōpālānandāśrama, a disciple of Advaitānanda.

Complete, dealing with the following subjects :—

अध्यारोपापवादप्रकरणम् । महावाक्यविवरणम् । दहराद्युपासनामार्गकर्ममार्गप्रकरणम् । जीवन्मुक्तलक्षणम् ।

**Beginning :**

निर्मलाय प्रशान्ताय भक्तानां मुक्तिदायिने ।
सच्चिदानन्दरूपाय श्रीरामाय नमो नमः ॥
नत्वा सदाद्वयानन्दश्रीमदाश्रमदेशिकान् ।
कैवल्यसुखदां ब्रूमो ब्रह्मतत्त्वसुबोधिनीम् ॥

लोके तावन्निष्कामनयाऽनेकजन्मसु कृतसुकृतपरिपाकवशात्परिशुद्धान्तःकरणानां केवलमोक्षमात्रलिप्सूनां बहुग्रन्थावलोकनेष्वलसानामध्यारोपापवादन्यायेन प्रत्यगभिन्नब्रह्मतत्त्वनिरूपणार्थं तावदध्यारोपापवादप्रकारं निरूपयामः ।

**End :**

नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दानन्दाद्वयं प्रत्यग्बोधचैतन्यं परं ब्रह्मैवाहमस्मीति यस्तिष्ठति स ब्रह्मीभवतीति सकलवेदान्तसिद्धान्तः ॥

**Colophon :**

इति श्रीब्रह्मतत्त्वसुबोधिन्यामात्मानात्मविवेकसाधनपुरःसरजीवन्मुक्तप्रकरणं समाप्तम् ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीअद्वैतानन्दपादाब्जसेवापरायणेन श्रीगोपालानन्दाश्रमेण विरचिता ब्रह्मतत्त्वसुबोधिनी समाप्ता ॥

Foll. 7*b* and 8 are left blank.

(*b*) सन्ध्यावन्दनपद्धतिः.

SANDHYĀVANDANAPADDHATIḤ.

Foll. 9*a*—17*b*.

By Kāmēśvara of Vādhūlagōtra, who refers among others to Mādhavācārya, the Vedic commentator, Kṛṣṇa-paṇḍita and the author of Candrikā. Similar to the work described under No. 2876 of the D.C.S. MSS., Vol. V.

Complete, dealing with the following subjects :—

| | |
|---|---|
| वैदिकसन्ध्यावन्दनम्. | गायत्रीमहिमा. |
| द्राविडसन्ध्यावन्दनम्. | अशक्तस्य प्राणायामजपः. |
| श्रौताचमनम्. | श्रीवैष्णवानुसारेण गायत्र्यर्थः. |
| प्रणवमुद्रा. | तुर्यपादस्यार्थः. |
| मार्जनम्. | गौतमानुसारेणाचमनम्. |

**Beginning :**

मत्वा मदिष्टप्रदमग्रपूज्यं गजाननं श्रीवटपादपाधः ।
आसीनमस्मत्तरणार्थबोधं नत्वा महासाहसमाप्नवानि ॥
नमस्कृत्य गुरूनद्य श्रीवाधूलसगोत्रजः ।
कामेश्वरो वैदिकानामापस्तम्बानुशासिनाम् ॥
अद्वैतिनामनुष्ठेयां सन्ध्यावन्दनपद्धतिम् ।
स्वसम्प्रदायाच्छिथिलां करोमि सुदृढां पुनः ॥
आयात्त्वित्यादिमन्त्राणां माधवाचार्यभाष्यतः ।
अङ्गीकृतानां पाठेन बालानामुपयोगिनीम् ॥
मन्त्रार्थो वेदभाष्यस्थो गृहोक्ताचमनादिकम् ।

* * *

अथ तत्रभवाञ्छ्रीकृष्णपण्डितः सन्ध्यावन्दनपद्धतिं प्रकाशयामास । तत्रार्घ्यप्रक्षेपणं गायत्रीजपः सूर्योपस्थानं चेति त्रितयं सन्ध्याकर्मणि समप्रधानम् ।

**End :**

सङ्कल्पस्तु देशकालसङ्कीर्तनपूर्वकं फलप्रापककर्मकरणप्रतिज्ञा । अन्यत्सर्वं कृष्णपण्डितीयाद्वेदितव्यम् ॥

स्वसम्प्रदायदार्ढ्यार्थं रचितेयं यथामति ।
पद्धतिस्त्वनया भर्गः प्रीणातु करुणानिधिः ॥

आपस्तम्बमुनिं नत्वा वेदार्थस्य प्रकाशकम् ।
गुरुं द्राविडसन्ध्यानुष्ठानक्रम उदाहृतः ॥
चन्द्रिकाकारश्रीकृष्णपण्डिताद्यैः पुरा कृता ।
पद्धतिस्त्वत्र सर्वस्वं संगृह्णन्तु विशेषतः ॥

* * * *

क्रिया यः कुरुते मोहादनाचम्यैव नास्तिकः ।
भवन्तीह(न्ति वि)क्रियास्तस्य क्रियाः सर्वा न संशयः ॥

इति चन्द्रिकायाम् ॥

---

R. No. **1717.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 13. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Vakkalaṅka Rāmabrahmamgāru of Mummiḍivaram, Gōdāvari district.

Fol. 13*b* is left blank.

**दीक्षापूजापद्धतिः.**

DĪKṢĀPŪJĀPADDHATIḤ.

Similar to the work described under No. 5656 of the D.C.S. MSS., Vol. XII. The manner of conducting the worship given here is said to have been composed by Svacchānanda.

Complete.

**Beginning:**

भूशुद्धिभूतशुद्धिप्राणप्रतिष्ठान्तर्मातृकाबहिर्मातृकान्यासपूर्वकं नित्यकर्मानुष्ठानमहं करिष्ये । अस्त्रमन्त्रेण पूजास्थलं संप्रोक्ष्य मत्स्यमुद्रया त्रिकोणषट्कोणवृत्तचतुरश्रं विलिख्य तत्र त्रिकोणे ऐं ह्रीं श्रीं ऐं नमः क्लीं नमः सौं नमः ।

**End:**

ततः सुवासिनीमहेश्वरैः सह पञ्चाकारेण वा चक्राकारेण वा इष्टपदार्थानि भोजयेत् । ततः यथासुखं चरेत् ॥

**Colophon:**

इति स्वच्छानन्दविरचितपूजाप्रकरणं समाप्तम् ॥

* * * *

पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥ ओं शान्तिः शान्तिः ॥

R. No. **1718.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 79. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of V. S. Narasimhācāriyar of Villiyambākkam, Chingleput district.

तर्कसंग्रहदीपिकाटिप्पणी—तत्त्वार्थदीपिका.

TARKASAṄGRAHADĪPIKĀṬIPPAṆĪ : TATTVĀRTHA-DĪPIKĀ.

A gloss on the commentary of Annambhaṭṭa on his own Tarka-saṅgraha. The name of the author of the gloss is not given.

Begins in the Anumānakhaṇḍa and breaks off in the Prāmāṇya-nirūpaṇa.

**Beginning :**

अन्तेवास्यवधानायाह—अनुमानमिति । प्रथमोद्दिष्टप्रत्यक्षलक्षणानन्तर-मनन्तरोद्दिष्टानुमानलक्षणस्यैवौचित्यादिति भावः । अनुमितिकरणमनुमानमिति लक्ष्यसमर्पकं, परामर्शजन्यं ज्ञानमिति तल्लक्षणसमर्पकमित्यपि कदाचित् प्रती-येतेति तद्वारणाय तदनुमितिलक्षणपरं वाक्यान्तरमित्यवगमयितुमाह—अनु-मितेरिति ।

* * * *

**Colophon :**

तत्त्वार्थदीपिकायामनुमानपरिच्छेदः समाप्तः ॥

**End :**

तत्त्वबुभुत्सुकथारूपे वादे स्वपक्षपरपक्षयोरभावेन स्वपक्षस्थापनहीने तत्रा-तिव्याप्तिवारणेन विजिगीषुपदस्यानुवृत्तौ प्रयोजनाभावात् ।

---

R. No. **1719.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 30. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Jayanti Sītārāmayagāru of Tōṭṭaramuḍi, Gōdāvari district.

(*a*) भागवतैकादशस्कन्धसारसंग्रहः.

BHĀGAVATAIKĀDAŚASKANDHASĀRASAṄGRAHAḤ.

Foll. 1*a*—11*b*. Fol. 12 is left blank.

A work giving the teachings as contained in the 11th Skandha of the Bhāgavata and similar to the work described under R. No. 1642 *ante*. The name of the author is not given.

Incomplete.

**Beginning:**

यदखण्डमनाद्यन्तमनन्तं शान्तमद्वयम् ।
चिदेकरसमानन्दं ब्रह्मतत्त्वमुपास्महे ॥
नमः कृष्णाय गुरवे बुद्धितद्वृत्तिसाक्षिणे ।
सच्चिदानन्दरूपाय परस्मै ब्रह्मणे नमः ॥

* * * *

एकादशाक्षाविषयप्रत्यक्तत्त्वानुभूतये ।
एकादशस्कन्धसारसंग्रहः क्रियते मया ॥

शुक्तौ मुक्तामणिरिव लीनार्थोऽपि प्रकाश्यते ।
प्रहर्षायामलद्दशां धारणाय च धीमताम् ॥

आदौ तावत्,

क्षुत्तृड्व्याधिजरातरङ्गबहुले तापत्रयौर्वानले
मायागन्धतले प्रकीर्णविषयोद्वेलाम्बुपूर्णोदरे ।
मोहावर्तवति स्पृहाग्रहमुखे दुर्वासनाशैवले
संसाराम्बुनिधौ भ्रमन्त्यसुभृतः सौख्यं न तेषां क्वचित् ॥

इत्यपारसंसारनिमग्नानां नित्यनिरन्तरदुःखदोधूयमानानां प्राणिनां तत्तरणायासाधारणकारणमेतदेव नान्यदिति निरूप्यते ।

दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।
तत्रापि दुर्लभं मन्ये वैकुण्ठप्रियदर्शनम् ॥

टीका । संसारसागरे निमग्नानां देहिनां देहात्मबुद्धीनां क्षणभङ्गुरः अव्यवस्थितः अविश्वसनीयः ।

**End:**

किंच,

ज्ञानविज्ञानसंयुक्त आत्मभूतः शरीरिणाम् ।
आत्मानुभवसंतुष्टो नान्तरायैर्विहन्यते ॥

---

(*b*) वेदान्तसंज्ञानिरूपणम्.

VĒDĀNTASAṀJÑĀNIRŪPAṆAM.

Foll. 13*a*—28*b*.

A treatise explaining the meaniug of the technical terms used in expounding the Advaita-Vēdānta.

Complete.

**Beginning:**

श्रीगुरोः पादयुगलं नत्वा तस्य प्रसादतः ।
वेदान्तसंज्ञाः प्रत्येकं निरूप्यन्ते यथामति ॥

'अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते' इति वृद्धवचनम् । अत्र अध्यारोपो नाम वस्तुन्यवस्त्वारोपः । वस्तु सच्चिदानन्दात्मकं ब्रह्म ।

**End:**

संप्रत्यपवादो निरूप्यते—अधिष्ठानमात्रपर्यवशेषणमपवादः । तथाच सर्वप्रपञ्चरहितं ब्रह्माहमस्मीति प्रत्यगभिन्नब्रह्मज्ञानान्मुक्तिरिति सिद्धम् ॥

**Colophon:**

इति संज्ञाप्रकरणं संपूर्णम् ॥

नवलक्षणम्—

अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥

---

(*e*) महावाक्यसिद्धान्तस्तोत्रम्.

MAHĀVĀKYASIDDHĀNTASTŌTRAM.

Foll. 29*a*—30*a*. Fol. 30*b* is left blank.

An enunciation in the form of stanzas of the truths contained in what are called the Mahāvākyas or the principal passages culled from the Upaniṣads and interpreted to support the Advaita-Vēdānta. The work is attributed to Śaṅkarācārya.

Complete.

**Beginning:**

क्षणं ब्रह्माहमस्मीति यः कुर्यादात्मचिन्तनम् ।
तन्महापातकं हन्ति तमः सूर्योदयो यथा ॥

**End:**

अयं प्रपञ्चो मिथ्यैव सत्यं ब्रह्माहमव्ययम् ।
अत्र प्रमाणं वेदानुभवं गुरुवचस्तथा ॥

**Colophon:**

इति श्रीमच्छङ्कराचार्यविरचितं महावाक्यसिद्धान्तस्तोत्रं संपूर्णम् ॥

---

R. No. **1720.**

Paper. 10¾ × 9½ inches. Foll. 37. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamidipāṭi Acyutarāma-

(*a*) नानार्थपदपेटिका.

NĀNĀRTHAPADAPĒṬIKĀ.

Foll. 1*a*—8*b*.

By Sujana. Same work as that described under No. 1716 of the D.C.S. MSS., Vol. III.

Complete.

---

(*b*) शब्दलिङ्गार्थचन्द्रिकाव्याख्यानम्—दृष्टान्तसिद्धाञ्जनम्.

ŚABDALIṄGĀRTHACANDRIKĀVYĀKHYĀNAM: DṚṢṬĀNTASIDDHĀÑJANAM.

Foll. 9*a*—32*b*.

By Vidvatkallōlabhaṭṭācārya. Same work as that described under No. 1762 of the D.C.S. MSS., Vol. III.

Complete.

---

(*c*) सरस्वतीविलासव्याख्या—विद्वन्मनोविलासः.

SARASVATĪVILĀSAVYĀKHYĀ: VIDVANMANŌVILĀSAḤ.

Foll. 33*a*—37*b*.

A commentary on the Sarasvatīvilāsa of Saridvallabhamiśra, which work is described under No. 1776 of the D.C.S. MSS., Vol. III: by Vidvanmattēbhakēsarin, son of Biḍōjadīkṣita.

Complete.

**Beginning:**

श्रीकैलासविलासभासुरलसत्स्वान्तं सदा पार्वती-
वक्षोजद्वयशैलशृङ्गनिलयं यस्य प्रियं राजते ।
एवं योग्यमिति प्रतीर्यनद्वतं(?) दानाधिवासः स्वतः
पुष्णातु प्रकटानुरागनिलयो मां शेसुषीपूर्तितः ॥

* * * *

सरस्वतीविलासस्य विद्वन्मत्तेभकेसरी ।
विद्वन्मनोविलासाख्यं व्याख्यानं कुरुतेऽधुना ॥

किंवा वदत्यहोऽस्माकमिति भीतिं विसर्जयन् ।
विद्वांसो मच्चमत्कारं कलयन्तु लसन्मनाः(न्मुदः) ॥

तत्तद्भाष्ये तु संप्रोक्तसारवाक्यमुदाहरन् ।
तनुते तनुते मोदं तनुतातनुतावशात् ॥

श्रीमत्प्रतापनरसिंहनरेन्द्रगोष्ठीसम्प्राप्तमत्तकविदन्तिसुमर्मभेदात् ।
यन्नाम मे निज(परि)जगाद स माथनाय विद्वद्द्विषामपि करोति वया(महा)नुभावात्॥

अथ सरिद्वल्लभकविराशीराद्यन्यतमस्य प्रबन्धमुखत्वादिष्टदेवतानमस्कारपूर्वकं सङ्गतिमुपवर्णयति—नत्वेति । लोकानां भुवनानामीशानम् ।

**End:**

एतद्भाष्यव्याख्यानेऽपि अस्मत्पिता विद्वत्प्रचण्डपण्डितबिडोजदीक्षितोऽपि केषां चिदत्रैतेषां कर्तव्यमिति शब्दमात्रस्यापि न सर्वत्रासर्वत्रेति चिन्त्यम् । इति सर्वत्र सुष्ठूक्तम् ॥

**Colophon:**

इति श्रीमत्सकलविद्वत्तासार्वभौमेन विद्वत्तान्धतमः(स)कर्दमितसमस्तविद्वदखर्वगर्वमूलविदलनपटुतरेण समस्तपृथ्वीपालकशेखरमन्दारमुखकुसुमपरागघुसुघुसायितचरणशरणागतजनावनपराकाष्ठेन श्रीमद्विद्वन्मत्तेभकेसरिविद्वद्दलङ्कारेण विरचितायां सरस्वतीविलासव्याख्यायां विद्वन्मनोविलासाख्यायां गणितागणितादिकथनं नाम तृतीयोऽध्यायः ॥

---

## R. No. 1721.

Paper. 10¾ × 9½ inches. Foll. 212. Lines, 20 in a page. Grantha and Telugu. Good.

Transcribed in 1915-16 from a MS. of Jayanti Rāmacandrulugāru of Mānēpalli, Gōdāvari district.

Bound in two volumes.

### भागवतव्याख्या—प्रतिपदार्थप्रकाशिका.

### BHĀGAVATAVYĀKHYĀ: PRATIPADĀRTHAPRAKĀŚIKĀ.

A commentary on the Bhāgavata-Purāṇa, apparently for the tenth Skandha alone. The name of the commentator is not given here, but he salutes Nṛsiṁhaguru in the invocatory stanza. The commentary is called Pratipadārthaprakāśikā.

The first volume contains Adhyāyas 1 to 14, and the second volume begins in the 25th Adhyāya and breaks off in the 45th Adhyāya, of the tenth Skandha.

**Beginning:**

श्रीनृसिंहगुरुं नत्वा विघ्नेशं संप्रणम्य च ।
वाचं देवीं नमस्कृत्य व्याख्यास्ये भगवत्कथाम् ॥
श्रीकृष्णाख्यं परं ब्रह्म सत्यज्ञानसुखात्मकम् ।
ध्यात्वाहं दशमस्कन्धव्याख्यां कुर्वे तदाज्ञया ॥
दशमं दशमस्कन्धे लक्ष्यं श्रीकृष्णसंज्ञितम् ।
अध्यायैस्तु नवत्याह शुकः पृष्टः परीक्षिता ॥
अध्यायैश्च चतुर्भिस्तु ब्रह्मप्रार्थनया हरेः ।
जन्म च प्रथमे तत्र कंसदुश्चेष्टितं क्रमात् ॥

अतिक्रान्तस्कन्धान्ते जातो गतः पितृगृहाद्व्रज मेधितार्थ इत्यादिना भगवदवतारचरित्रश्रवणसंजातौत्सुक्यः भगवत्कथाश्रवणप्रवणचेताः पृच्छति—कथित इत्यादिना। भवता सोमसूर्ययोः चन्द्रादित्ययोः वंशविस्तारः कथितः। उभय वंश्यानामुभयकुलप्रसूतानां राज्ञां पुरूरवेक्ष्वाकादीनां परमाद्भुतमत्याश्चर्यकरं चरितं च कथामित्यध्याहारः।

* * * *

**Colophon:**

इति भागवतदशमस्कन्धव्याख्यायां प्रतिपदार्थप्रकाशिकायां प्रथमोऽध्यायः॥

**End:**

देवकीति । देवकी वसुदेवश्च द्वौ पितरौ कृतसंवदनौ पुत्रौ रामकृष्णौ जगदीश्वराविति विज्ञाय शङ्कितौ सन्तौ न सस्वजाते नालिलिङ्गतुः ॥

**Colophon:**

इति श्रीभागवते दशमस्कन्धव्याख्यायां प्रतिपदार्थप्रकाशिकाख्यायां कंसवधो नाम चतुश्चत्वारिंशोऽध्यायः ॥

* * * *

तेभ्य इति । तेभ्यो ब्राह्मणेभ्यो रुक्ममाल्याः हेममालिनः स्वलङ्कृताः स्वाङ्गलङ्कारयुक्ताः ।

---

R. No. **1722.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll 96. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Nūkala Kṛṣṇa Śāstrigāru of Mummidivaram, Gōdāvari district, which is said to have been

transcribed from the MS. of Naṇḍūri Vēṅkaṭarāmayya, the copying having been completed on the 11th day of the bright fortnight of the Caitra month in the year Saumya.

महावाक्यरत्नावलिः—किरणावलिसहिता.

MAHĀVĀKYARATNĀVALIḤ WITH KIRAṆĀVALI.

The Mahāvākyaratnāvali of Rāmacandrēndra, disciple of Vāsudēvēndra, described under No. 4708 of the D.C.S. MSS., Vol. IX, with the commentary Kiraṇāvalī: by Upaniṣad-Brahmayōgin, disciple of Vāsudēvēndra. It is stated that the text is based on the 1,008 passages selected from the 5,735 passages of the 108 Upaniṣads.

Complete.

**Beginning:**

ईशाद्युपनिषत्प्रोद्यन्महावाक्यकलेबरम् ।
विकलेबरकैवल्यं रामचन्द्रपदं भजे ॥
विश्वाधिष्ठानसन्मात्रवासुदेवेन्द्रमूर्तये ।
श्रीदेशिकस्वरूपाय परस्मै ब्रह्मणे नमः ॥
नत्वा श्रीदेशिकं ब्रह्ममात्रानन्दाप्तिमिच्छताम् ।
महावाक्यरत्नजातकिरणावलिरीर्यते ॥

इह खलु परमदयाकलेबरेयं भगवती लीलाविभूतिः स्वांशजन्माणिपटलनिष्प्रतियोगिकनिर्विशेषब्रह्ममात्रप्राप्तये ऋगादिचतुर्वेदप्रविभक्तेशाद्यष्टोत्तरशतोपनिषत्प्रसिद्धाष्टोत्तरसहस्रमहावाक्यान्युद्धृत्य

* * * *

उपोद्घातप्रकरणस्थः श्रीरामचन्द्रं छन्दोमयाङ्गतया नमस्करोति—

यो विध्यादिविदेहान्तमहावाक्यार्थविग्रहः ।
श्रीरामचन्द्ररूपाय तस्मै भूतात्मने नमः ॥

य इति । सर्वं खल्विदं ब्रह्मेत्युपक्रम्य विदेहो मुक्त एव सः इत्यन्तावेध्यादिविदेहमुक्त्यन्तमहावाक्यानामर्थो निष्प्रतियोगिकब्रह्ममात्रावस्थानलक्षणविकलेबरकैवल्यं तदेव विग्रहो यस्य तथोक्तः ।

**End:**

यत्तेजोमात्रमवशिष्यते तत्स्वमात्रतया नौमि तत्पर्यवसन्नो भवामीत्यर्थः ॥

वासुदेवेन्द्रशिष्योपनिषद्ब्रह्मेन्द्रयोगिना ।
महावाक्यरत्नजातकिरणावलिरीरिता ॥

महावाक्यरत्नजातकिरणग्रन्थसञ्चयः ।
द्विपञ्चाशत्सङ्कुचतोऽधि द्विसहस्रमुदीरितः ॥

**Colophon:**

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्दतृप्तस्वान्तरामचन्द्रेन्द्रग्रथितायामीशाद्यष्टोत्तरशतोपनिषत्सारसंग्रहभूतायां महावाक्यरत्नावल्यां पञ्चत्रिंशदधिकसप्तशतपञ्चसहस्रवाक्यात्मिकायां सारतरभूताष्टोत्तरसहस्रमहावाक्यरत्नावलिः सश्रीवासुदेवेन्द्रशिष्योपनिषद्ब्रह्मयोगीरितकिरणावलिः समाप्ता ॥

पूर्णम (. . .) शान्तिः ॥

---

R. No. **1723.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 41. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Cilakamarri Raṅgācārlugāru of Kottakōṭa, Gōdāvari district.

(*a*) श्रीगुणरत्नकोशव्याख्या.

ŚRĪGUṆARATNAKŌŚAVYĀKHYĀ.

Foll. 1*a*—22*a*. Fol. 22*b* is left blank.

A commentary on the Śrīguṇaratnakōśa of Parāśarabhaṭṭa, which work is described under R. No. 160(*f*) *ante*: by Jagannātha.

Complete.

**Beginning:**

बालानां सुखबोधाय लघुटीका सुबोधिका ।
श्रीगुणस्तुतिराजस्य जगन्नाथेन लिख्यते ॥

श्रीपराशरभट्टार्यः श्रीगुणरत्नकोशं करिष्यमाणः तन्नमस्काररूपमङ्गलमादौ वाचयति—श्रियै इति । हरेराश्रितदुरितहरस्य श्रीरङ्गनायकस्य समस्ताचिदचिद्विधानव्यसनं समस्तयोर्निखिलयोश्चिदचितोश्चाचेतनयोर्विधाने सृष्टौ व्यसनं परिश्रमम् ।

**End:**

हे अम्ब जननि पिता जनकः सर्वं च त्वमसि, त्वमेव भवसि । तस्मादकस्मात्कृपां निर्हेतुककृपां . . . . . र्णां स्वीकुरु अङ्गीकुरुष्व ॥

**Colophon:**

इति श्रीगुणरत्नकोशटीका समाप्ता ॥

(6) एकादशीश्राद्धमीमांसा.
ĒKĀDAŚĪŚRĀDDHAMĪMĀṂSĀ.

Foll. 23*a*—34*a*. Fol. 34*b* is left blank.

Transcribed in 1915-16 from a MS. of Appan Vēṅkaṭācāriyar of Vāḍapalli, Gōdāvari district.

An investigation of the Dharmaśāstras, Purāṇas, etc., in regard to the question of performing the Śrāddha ceremony—which consists in feeding the Brahmins in honor of the manes—on the Ēkādaśī or the 11th day of either the bright or the dark fortnight of a month which is enjoined to be observed as a fasting day in honor of Viṣṇu, especially by Vaiṣṇavites. The author seems to incline to the view that the Śrāddha should not be performed on the Ēkādaśī day.

Complete.

**Beginning:**

सपुराणस्मृतिन्यायानाचारांश्च सतामपि ।
आलोक्यैकादशीश्राद्धमीमांसा लिख्यते मया ॥

इह खलु केचन शिष्टा एकादशीव्रतदिने श्राद्धं कुर्वन्ति । केचन शिष्टास्तत्र तन्न कुर्वन्ति । अतोऽयं संशयः तत्र कर्तव्यं न कर्तव्यं चेति। तत्रायं विधिकोटेर्युक्तिसंग्रहः—

आद्यश्राद्धं तथाब्दं तदितरदपि यत्पित्र्यमेकादशीषु
प्राप्तं तत्तत्र कार्यं स्मृतिवचनबलाच्यक्तमज्ञातकालम् ।
तत्रैतच्चापि कुर्यादिति च विधिवशात्तान्निषेधस्मृतेश्च
स्मृत्युक्तेभ्यः पुराणस्य तु बलविरहात्तत्स्मृतौ सापवादात् ॥

श्रीमहाभारते ।

* * * *

**End:**

देवानां च पितृणां च ऋषीणां च विशेषतः ।
अन्नं न दद्यात्कृष्णं हि भगवन्तं हरिं विना ॥
एकादश्यां तु यच्छ्राद्धं कुर्यान्मोहेन पद्मज ।
रेतोमूत्रपुरीषादि स पितृभ्यः प्रयच्छति ॥

**Colophon:**

इत्येकादशीश्राद्धमीमांसा समाप्ता ॥

(*c*) रामायणोपाख्यानम्.

RĀMĀYAṆŌPĀKHYĀNAM.

Foll. 35*a*—41*b*.

Transcribed in 1915-16 from a MS. of Rājagurukkaḷ of Rāmēśvaram.

These Adhyāyas relate how Rāma with the blessings of Śiva was able to defeat Rāvaṇa and his Rākṣasa followers.

Contains the Adhyāyas 125 and 126 and breaks off in the 127th Adhyāya of the Pādma-Purāṇa in the Brahmarahasyakhaṇḍa.

**Beginning:**

प्रकटनिःसृतदानजलाशयं निकटसञ्चरनीलमधुव्रतम् ।
शकटपाणिमुखामरवन्दितं विकटचक्रगणाधिपमाश्रये ॥
सेतुमारभमाणस्य रामस्याक्लिष्टकर्मणः ।
द्रष्टुं समागताः सर्वे कुम्भजाद्या महर्षयः ॥

* * * *

शिवभक्ताग्रणीः सोऽयमवध्यो देवदानवैः ।
तं जेतुमसुरं सङ्गच्चे शरणं याहि शङ्करम् ॥

* * * *

**Colophon:**

इति श्रीपाद्मे पुराणे ब्रह्मरहस्यखण्डे रामायणोपाख्याने रामेणार्चितरामेश्वराविर्भावो नाम पञ्चविंशोत्तरशततमोऽध्यायः ॥

**End:**

मम वक्त्रागताः सर्वे राक्षसा युद्धदुर्मदाः ।
निमित्तमात्रं त्वं भूयः कीर्तिमाप्स्यसि सङ्गरे ॥
इत्युक्त्वान्तर्दधे शम्भुर्भवान्या सह दैवतैः ।
रामेण पूजिते तत्र-लिङ्गे रामेश्वराभिधे ॥

**Colophon:**

इति श्रीमत्पाद्मपुराणे ब्रह्मरहस्यखण्डे रामायणोपाख्याने रामस्य वरप्रदानं नाम षड्विंशोत्तरशततमोऽध्यायः ॥

* * * *

समुद्रे क्षिप्त्व तद्धारं ब्रह्म प्राप्योत्यसंशयः ॥

## R. No. 1724.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 187. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Garimalla Sōmannagāru of Gaṅgalakuṟṟu, Gōdāvari district.

The fly-leaves give the contents of this work.

**जगद्वल्लभा.**

JAGADVALLABHĀ.

A treatise on some of the important topics of the Dharmaśāstra : by Paiḍimukkala Śrīvallabhācārya of Bhāradvājagōtra.

Contains the Prakaraṇas 1 to 11, 13 to 17, 24 and 25, the last being incomplete. The Prakaraṇas are written in disorder.

**Beginning:**

तमालदलमेचकं तरुणभृङ्गजालालकं सुवर्णरुचिराम्बरं सुरमुनीन्द्रचेतोहरम् ।
सरोजदललोचनं सकलसम्पदां भाजनं स्मरायुतसमप्रभं स्मरत वल्लवीवल्लभम् ॥

कण्ठीरवाजिनधराय वटोपकण्ठवासाय कुण्ठितसुरेतरवैभवाय ।
वैकुण्ठसंस्तुतगुणाय नमोऽस्तु नीलकण्ठाय कण्ठकलिताहिविभूषणाय ॥

आदावखिलसृष्टिक्रमः—

अप एव ससर्जादौ तासु वीर्यमपासृजत् ।

* * * *

मार्कण्डेयः—

मुखबाहूरुपज्जानां वामदक्षिणभेदतः ।
मिथुनानां सहस्रं तु विप्रादीनां ससर्ज ह ॥

* * * *

**Colophon:**

इति श्रीजगद्वल्लभायां प्रथमं प्रकरणम् ॥

* * * *

इति श्रीभरद्वाजगोत्रावतंसश्रीवल्लभाचार्यविरचितायां जगद्वल्लभायां शैवपुराणीयवामदेवमार्कण्डेयसंवादोक्ताष्टविधविवाहचातुर्वर्ण्यानुलोमसङ्करतत्कृत्यसुवर्णादिमानकथनं नाम द्वितीयं प्रकरणम् ॥

**End:**

स्पृष्ट्वा रजस्वलास्पृष्टं संस्तरं तृणपर्णयोः ।
इष्टकं च फलं काष्ठं पत्रमाचम्य शुध्यति ॥

**Colophon:**

इति श्रीभरद्वाजगोत्रावतंसपैडिमुक्कलश्रीवल्लभाचार्यविरचितायां जगद्वल्लभायां मृतसूतगर्भस्रावत्रिपुष्करपालाशविध्यस्थिक्षेपरजस्वलादिकथनं नाम चतुर्विंशं प्रकरणं समाप्तम् ॥

* * * *

वाराणसीं समासाद्य पुनात्यासप्तमं कुलम् ॥
यत्र साक्षान्महादेवो देहान्ते स्वयमीयिवान् ॥

---

R. No. **1725.**

Paper. 10¾ × 9½ inches. Foll. 51. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Raṅgarāmānujacakravartyācārya of Pallakacheri, South Arcot district.

रघुवीरविजयः.

RAGHUVĪRAVIJAYAḤ.

This drama in three Acts belongs to the class of Rūpakas called Samavākāra. It is based on the story of the marriage of Sītā with Rāma. By Kastūri Raṅganātha, son of Kanakavallī and Vīrarāghava of Vādhūlagōtra. The author is said to have studied general literature under Vēṅkaṭakṛṣṇamārya of Śrīvatsagōtra.

Complete.

**Beginning:**

कमलाकुचकस्तूरीकलितोरसमाश्रये ।
गोविन्दं गोकुलानन्दकन्दलं नन्दनन्दनम् ॥

नान्द्यन्ते सूत्रधारः—(प्राचीमवलोक्य सहर्षम्) उदितभूयिष्ठ एव भगवानम्भोजिनीवल्लभः ।

* * * *

सूत्रधारः—अपि किं त्वमपि विस्मृतासि, शृणु, अस्ति वाधूलकुलमूर्धन्यस्य कनकवल्लीनाम्ना तपोमयेन ज्योतिषा सहचरितधर्मणः वीरराघवकवेरात्मसंभवः श्रीरङ्गनाथाभिधानः कविकुञ्जरः । यस्तु—

श्रीवत्सवंशामृतसिन्धुसोमो विराजते वेङ्कटकृष्णमार्यः ।
यत्पादपङ्केरुहसेवनेन साहित्यपाथोनिधिपारगोऽयम् ॥

नटी—अय्य अवि णाम एसो कइपुरन्दरो साहित्तमेत्तकसलो ।

सूत्रधारः—(सहर्षं श्लाघयन्)

कर्कशतर्कपयोनिधिपाता शब्दप्रयोगनिर्माता ।
कवितासुदनीभर्ता किं न श्रोत्रं गतः कवीन्द्रोऽयम् ॥

(विमृश्य) अहो फलितमस्मत्पुण्यकल्पलतया । यतः—

श्रीरामः कृतिनायकः कविरपि श्रीरङ्गनाथो गुरुः
शेषाद्रीशमहे नितान्तरसिकाः प्राप्ताश्च सङ्ख्याविदः ।
मद्वर्ग्याश्च रसानुवादनविधावन्योन्यमुत्सेकिनः
प्राप्तासि त्वमपीह नाट्यकुशला किं वाञ्छितं मे परम् ॥

**End:**

रामः—(सविनयम्)

त्रातोऽध्वरो विनमितः शशिचूडचापो
लङ्केश्वरोऽपि विजितः सहपुत्रमित्रः ।
भूकन्यकापरिणयः कथितो यथाव-
त्प्राप्तो मयाद्य मकुटः किमितः परं नः ॥

तथापीदमस्तु भरतवाक्यम्—

एधेत श्रीनिवासो जयतु जगति सा वैदिकश्रीर्द्विजानां
पूज्यन्तां पण्डितेन्द्राः सततमवनिपैः पाल्यतां धर्मतः क्ष्मा ।
लाल्यन्तां धर्मपत्न्यः सुकृतिभिरनिशं सत्पथेष्वेव साध्व्यः
स्थीयन्तां ग्रन्थलक्ष्मीः प्रतिसभमनघा श्लाघ्यतामभ्युपैतु ॥

* * * *

रामः—(सानन्दपुलकं दशरथं प्रणम्य) तात व्यतीतप्राय एव द्वितीयो मुहूर्तः; तत्साकेतं गच्छामो नागरिकानुल्लासयितुम् ।

(इति निष्क्रान्ताः सर्वे)

**Colophon:**

इति श्रीरघुवीरविजयसमवाकारे तृतीयोऽङ्कः समाप्तः ॥

इति श्रीवाधूलकुलतिलकेन श्रीवीरराघवाचार्यकविवरसूनुना कस्तूरिरङ्गाचार्येण विरचितो रघुवीरविजयसमवाकारः समाप्तः ॥

---

R. No. **1726.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 40. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

## क्रतुप्रायश्चित्तम्.
## KRATUPRĀYAŚCITTAM.

A treatise on the performance of expiatory ceremonies in connection with the sacrifices mentioned below: by Tōṭamalla Harihara of Kāśyapagōtra. The work is based on the ninth Praśna of the Āpastambaśrautasūtra, which is largely extracted and commented upon.

Complete, dealing with the following subjects: —

| | |
|---|---|
| अग्निहोत्रप्रायश्चित्तम्. | पशुप्रायश्चित्तम्. |
| दर्शपूर्णमासप्रायश्चित्तम्. | चयनप्रायश्चित्तम्. |
| आधानप्रायश्चित्तम्. | इष्टिकालनिर्णयः. |

**Beginning:**

शुक्तौ रजतवद्यत्र प्रमया दृश्यते जगत् ।
तद्ब्रह्माहमिति ज्ञेयं सच्चिदानन्दविग्रहम् ॥
देशं कालं वयोऽवस्थां विद्यां सामर्थ्यमेव च ।
ब्राह्मणानां समालोच्य ग्रन्थान्सर्वविनिर्मितान् ॥
आलोच्य सुलभान्पक्षांस्तत्र तत्र विकल्पितान् ।
संगृह्य सुखबोधाय कुर्वे शङ्करकिङ्करः ॥

अत्र सर्वपापक्षयहेतुत्वात्प्रथमं ब्रह्मानुसन्धानमाह—शुक्तौ रजतवदिति । अस्यायमाशयः । श्रौतानां कर्मणामपचारेषु शृङ्गग्राहिकया यानि प्रायश्चित्तानि वक्ष्यन्ते तानि तथैव चरितव्यानि । यत्र तु प्रायश्चित्तं नोक्तमुक्तमपि न प्रतीयते वा तत्र सर्वत्र ब्रह्माहमिति भावयेत् । तदेव सर्वप्रायश्चित्तम् ॥

**End:**

अनेनैव न्यायेन घटिकात्रययोजितायामष्टादशघटिकामावास्या भवति तथा सत्यावर्तनादूर्ध्वं सन्धिर्भवति । एवं सन्धिं विज्ञाय तदनुसारेणान्वाधानेष्टिरनुष्ठातव्येति । इतीष्टिकालनिर्णयः ॥

**Colophon:**

कविना तोटमल्लेन काश्यपेन महात्मना ।
उक्तं हरिहरेणेदं प्रायश्चित्तं क्रतोरिह ॥

Fol. 40*a* contains some passages connected with Śrautaprayōga. Fol. 40*b* is left blank.

## R. No. 1727.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 78. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

दर्शपूर्णमासमन्त्रभाष्यम्.

DARŚAPŪRṆAMĀSAMANTRABHĀṢYAM.

Similar to the work described under R. No. 1664(*a*) *ante*.

Wants the beginning; otherwise complete.

**Beginning:**

यजारूपं हे इन्द्र तव वज्रेणोपमेयं वज्रसदृशेन स्फ्येन छिनद्मि छिन्नं च हरामीति शेषः । वेदिं यजमानं वा प्रत्यवेक्षते । वर्षतु ते द्यौः ।

**End:**

वृश्चतश्चेति ब्राह्मणम्, ब्राह्मणांस्तर्पयत वेति संप्रैषणं पत्नीं प्रति ॥

**Colophon:**

इति दर्शपूर्णमासमन्त्रभाष्यं संपूर्णम् ॥

---

## R. No. 1728.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 13. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of Ramaji Bhano Pantulugāru of Perūr, Gōdāvari district.

रागप्रदीपः.

RĀGAPRADĪPAḤ.

Foll. 1*a*—11*b*.

A treatise in music dealing with the characteristics of the various Rāgas or tunes. The name of the author is not given.

Breaks off in the second Adhyāya.

**Beginning:**

अथ रागाणां नामानि —

स्वरभैरवितालात्तु भैरवीरागवृद्धितः ।
धन्यासि . . . . ग्रहः परिकीर्तितः ।
आरोहणे चावरोहे . . . . कृतायुतः ।
तत्रैव जातसंन्यासः स्वांशः सग्र . . . ॥

* * * *

आरोहे तु स संपूर्णोऽवरोहे गदवर्जितः ॥

**Colophon:**

इति शुद्धमध्यमरागः षट्त्रिंशत् ॥

इति रागप्रदीपे प्रथमोऽध्यायः ॥

अथ प्रतिमध्यमरागनिर्णयः—

मेलान्मालवरागश्च साल्वरागसमुत्थितः ।

धन्यासस्यांशकश्चैव षड्जग्रहवधीरितः ॥

**End:**

आरोहे पूर्णरागोऽयं गदवर्ज्यावरोहकः ।

स रि गा मा प धा नी सा स नि पा मा रि री स सा ॥

Foll. 11*b*—13*a* contain some Telugu songs intended to be sung in the Śaṅkarābharaṇa Rāga with Āditāla. Fol. 13*b* is left blank.

---

R. No. **1729.**

Paper. 10¾ × 9½ inches. Foll. 149. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of the Bhamidipāṭi Acyutarāma-sōmayājulugāru of Irusumanda, Gōdāvari district.

Fol. 149*b* is left blank.

मध्यसिद्धान्तकौमुदीव्याख्या—सन्मनोरञ्जनी.

MADHYASIDDHĀNTAKAUMUDĪVYĀKHYĀ : SANMANŌ-RAÑJANĪ.

A commentary on the Madhyasiddhāntakaumudī of Varadarāja which is a summary of Bhaṭṭōji's Siddhāntakaumudī. It is called Sanmanōrañjanī. By Brahmadēva-paṇḍita, pupil of his paternal uncle Mallēśvara-paṇḍita.

Contains सन्धित्रय (wanting the beginning), शब्दाधिकार, अव्यय, तिङन्तनिरूपण, कृदन्तनिरूपण (including उणादि), कारकप्रकरण and अव्ययीभावसमास (wanting the end).

**Beginning:**

क्षत्वादर्थादुत्तरमिति लभ्यते । तेन त्रिपादीलाभ इत्यभिप्रेत्याचष्टे—सपादेति । सप्तानामध्यायानां समाहारः सप्ताध्यायी । पादेन सहिता सपादा । सा च सा सप्ताध्यायी च । वृद्धिसूत्रमारभ्य पूर्वत्रासिद्धमित्यवधिका । त्रयाण

पादानां समाहारः त्रिपादी । एतदारभ्याष्टमाध्यायसमाप्तिपर्यन्ता । इदमधिकारसूत्रमपि । तेन त्रिपाद्यां तत्तत्सूत्रगतं सत् पूर्वं प्रति तत्रासिद्धतां बोधयतीत्यभिप्रेत्याह—त्रिपाद्यामपीति ।

* * * *

**Colophon:**

इति सन्मनोरञ्जन्यां स्वरसन्धिः समाप्तः ॥

* * * *

इति श्रीमत्सर्वतन्त्रस्वतन्त्राद्वैतविद्याचार्यपितृव्यमल्लेश्वरपण्डितविनतब्रह्मदेवपण्डितविरचितायां मध्यसिद्धान्तकौमुदीव्याख्यायां सन्मनोरञ्जन्यां सन्धिप्रकरणम् ॥

**End:**

नदीभिश्च । अत्र बहुवचननिर्देशान्न संज्ञाया ग्रहणम् ।

* * * *

एवं च तदविवक्षायां पूर्वकालैकेति समासे एकनदीत्यस्य सिद्धिः । अन्यथा समानाधिकरणतत्पुरुषं बाधित्वा अव्ययीभावे नपुंसकप्राप्त्यापत्तिः । पञ्चनदमिति । पञ्चानां नदीनां समाहारः ॥

**Colophon:**

सन्मनोरञ्जनी संपूर्णा ॥

---

R. No. **1730.**

Paper. 10¾ × 9½ inches. Foll. 15. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamidipāti Acyutarāmasōmayājulugāru of Irusumanda, Gōdāvari district.

मध्यसिद्धान्तकौमुदीव्याख्या—सन्मनोरञ्जनीशेषः.

MADHYASIDDHĀNTAKAUMUDĪVYĀKHYĀ: SANMANŌRAÑJANĪŚĒṢAḤ.

This commentary deals with the portion in the Samāsaprakaraṇa left unfinished by the author in the work described under the last number. By Agnihōtra, son of Vēṅkaṭakṛṣṇa-vidvat of Ēkēśvara family. The original commentator is said to have belonged to Penniṇṭi family.

From the end of the Avyayībhāvasamāsa to the end of Samāsāśrayavidhi.

**Beginning:**

स्तुत्या संपूजितः शम्भुसुतो विघ्नं करोतु मे ।
स्मृतमात्र. सकृच्छम्भुः सर्वकामप्रदो यतः ॥
श्रीराम तन्नमस्तुभ्यं यत्त्वयापि विभीषणः ।
साक्षाच्छत्रुसखः प्रीत्या श्रियमापादितः पराम् ॥
नत्वाग्निहोत्रः पेन्नि(द्दि ण्टिब्रह्मदेवगुरून् गुरून् ।
सन्मनोरञ्जनीं पूर्णां गुरूक्तां कर्तुमिच्छति ॥

अन्यपदार्थे च संज्ञायाम् । नदीभिरिति पूर्वसूत्रान्नदीभिरित्यनुवर्तत इत्याह—नदीभिरिति । विभाषाधिकारेऽपीति, महाविभाषाविषयत्वात् । इह अस्मिन् सूत्रे ।

* * * *

**Colophon:**

इत्येकेश्वरान्वयावतंसश्रीवेङ्कटकृष्णविदुषः सूनोरग्निहोत्रस्य कृतौ सन्मनोरञ्जनीशेषे अव्ययीभावः ॥

**End:**

आकृतिगणोऽयमिति । तेन (वन)स्पतिरित्यादि सिध्यति । एव स्थिते वाचस्पतिरित्यत्र षष्ठ्याः पतीतिसूत्रेण निर्वाहयन्तः प्रत्युक्ताः, तस्य छन्दोविषयत्वात् ॥

**Colophon:**

इति श्रीएकेश्वरान्वयावतंसश्रीवेङ्कटकृष्णविदुषः सूनोरग्निहोत्रस्य कृतौ सन्मनोरञ्जनीशेषे समासप्रकरणम् ॥

---

R. No. **1731.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 25. Lines, 20 in a page. Dēvanāgarī. Good

(*a*) **तारावली.**

TĀRĀVALĪ.

Foll. 1*a*—4*a*.

Transcribed in 1915-16 from a MS. of Karra Jagayyagāru of Kūcimañci Agrahāram, Gōdāvari district.

A metrical treatise in 27 stanzas laying down rules for the preparation of the Hindu calendar. From the first stanza the work may be inferred to have been composed within 50 years.

Complete.

**Beginning:**

गुणाष्टसंख्या षष्टिघ्ना प्रभवादिगताब्दयुक् ।
द्वादशोना भवेयुस्ते कल्यादिगतवत्सराः ॥
नत्वाजादिसुरान् ब्रवीम्यृजु लघु स्पष्टं च तारावलीं
कल्याद्यब्दगणो दिवाकरगुणो मासान्वितोऽधोगुणः ।
व्यष्टैकैर्युगबाणगोऽर्थफलयुक् त्रिंशद्गुणोऽहर्युतो
द्विस्थोऽब्धीन्द्रगुणस्त्रिखाक्षिनवहृच्छुद्धो युवृन्दः सितात् ॥

**End:**

तद्दिक्षाङ्गनृपैस्तदन्तविधुविक्षेपावनत्योर्युति-
र्दिक्साम्येऽन्तरमन्यथा स्थितिदलाद्यन्तेन शीतांशुवत् ।
भाद्यभ्राब्धिगुणत्रिहृच्छवमुखं तत्त्रिघ्नमभ्राब्धिहृ-
द्वाद्येन्दोर्घटिकाः शुभांशवचनैः प्राग्वच्छुभाप्तं गतेः ॥

Foll. 4*b*—15*b* contain the tables worked out according to the rules explained in the Tārāvalī. Fol. 16 is left blank.

---

(*b*) अजीर्णमञ्जरी.

AJĪRṆAMAÑJARĪ.

Foll. 17*a*—20*b*.

Transcribed in 1915-16 from a MS. of Karṇa Jagayyagāru of Kūcimañci Agrahāram, Gōdāvari district.

A short treatise prescribing simple antidotes for the indigestion that may be caused by taking various kinds of food: by Kāśirāja.

Complete.

**Beginning:**

यो रावणं रणमुखे भुवनैकभारं हत्वा चकार जगतः परमोपकारम् ।
यं ब्रह्म चाभिदधिरे परतोयपारं तं नौमि मैथिलसुताहृदयैकहारम् ॥
नारीकेलफलेषु तण्डुलमथ क्षीरं रसालो(ले)हितं
जम्बीरोऽथ रसे घृते समुचितः सर्पिस्तु मोचाफले ।

गोधूमेषु च कर्कटी हिततमा मांसाशने काञ्जिकं
नारङ्गे गुडभक्षणं प्रकथितं पीडारकं कोद्रवे ॥

**End:**

सूक्तमुक्तमपि तद्बहुभेदं हन्ति सर्वगि(द)मामजखेदम् ।
यन्मयात्र गदितं समधूक्तं तद्विषग्भिरपि पाचनमुक्तम् ॥
पद्यैर्मुनीनामनवद्यपद्याः श्रीकाशिराजेन शिशोः सुखाय ।
स्फुटीकृताजीर्णविषापहन्त्री जीयाच्चिरायामृतमञ्जरीयम् ॥

**Colophon:**

इति काशीनाथकृता अजीर्णमञ्जरी समाप्तिमगमत् ॥

---

(*c*) शृङ्गारभेदप्रदीपिका.

ŚṚṄGĀRABHĒDAPRADĪPIKĀ.

Foll. 21*a*—23*b*.

Transcribed in 1915–16 from a MS. of Vemparla Sītārāma Śāstri of Tōṇḍavaram in Gōdāvari district.

This is a treatise in erotics, and in the absence of the complete work it is not known how many chapters it consists of. The fourth chapter deals with the Mantras, Yantras and medicines considered efficacious in captivating one's beloved. By Harihara, son of Rāma-vidvat.

Contains the fourth Paricchēda complete and the fifth Paricchēda incomplete.

**Beginning:**

नत्वाहं त्रिपुरां जगत्त्रयनुतां बालां पुरारिप्रियां
वश्यायाखिलमेदिनीतलवधूसंघस्य मन्त्रौषधान् ।
यन्त्रादींस्तिलकं च लेपनविधिं दन्तस्य सिद्धक्रिया
मूलेनाथ वदामि सारसहितं पूर्वोक्तशास्त्रक्रमात् ॥
प्रसङ्गेन मया सम्यक् प्रोच्यते विस्तरादिह ।
वश्यं स्त्रीणां तथा पुंसां मन्त्रयन्त्रौषधादिकम् ॥
विना यन्त्रौषधैः कान्ता न गम्याश्च कदाचन ।
तस्मादौषधमन्त्राणि प्रयुज्य रतिमाचरेत् ॥
औषधास्त्रिविधा ज्ञेया लेपास्वादनधारणाः ।
मन्त्रयन्त्रैश्च सहितांस्तान्वक्ष्ये पूर्वसंमतान् ॥
द्रावकराणि स्त्रीणां वश्यानि द्रावकराणिं बिन्दूनाम् ।
ध्वजदैर्ध्यकराण्यभिहितः पुरुषाणामौषधानि सर्वत्र ॥

* * * *

**Colophon:**

इति सहजसारस्वतचन्द्रनामाङ्करामविद्वत्कुमारहरिहरनामाङ्कविरचितायां शृङ्गारभेदप्रदीपिकायां रतिरहस्ये चतुर्थः परिच्छेदः ॥

**End:**

एकादश्यां कर्ज्जकृत(पद)ग्रीवमालिङ्ग्य गाढं
पायंपायं दशनवसनं किञ्चिदालीढलोलम् ।
घातंघातं हृदि सहसितं मन्मथागारमुद्रा-
भङ्गक्रीडातरलिततनुं कामिनीमाप कामी ॥

Fol. 24 is left blank.

---

(*d*) मनोनैर्मल्यपञ्चकम्.

MANŌNAIRMALYAPAÑCAKAM.

Fol. 25.

Transcribed in 1915–16 from a MS. of Pullela Subbayagāru of Indupalli, Gōdāvari district.

Five stanzas on the importance and necessity of the purity of mind in a person who is desirous of salvation: by Dakṣiṇāmūrti.

Complete.

**Beginning:**

प्रतिक्षणविशोधनाद्वपुरिदं बहिर्निर्मलं
न चेदिदमहर्निशं स्रवति गन्धदुष्टान्मलान् ।
सदामलमिदं कथं भवति निर्मलनक्षालना-
न्मनस्तु यदि निर्मलं तदखिलं भवेन्निर्मलम् ॥

**End:**

य एतद्भक्तिसंयुक्तो मनोनैर्मल्यपञ्चकम् ।
जायते तस्य वैराग्यं मनो नैर्मल्यमाप्नुयात् ॥

**Colophon:**

इति दक्षिणामूर्तिपण्डितविरचितं मनोनैर्मल्यपञ्चकं संपूर्णम् ॥

---

R. No. **1732.**

Paper. 10¾ × 9½ inches. Foll. 15. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhamidipāti Acyutarāmasōmayājulugāru of Irusumanda, Gōdāvari district.

Fol. 15*b* is left blank.

पञ्चदशी— सव्याख्या.
PAÑCADADAŚĪ WITH COMMENTARY.

Same work as that described under No. 4615 of the D.C.S. MSS., Vol. IX. The text is by Vidyāraṇya and the commentary by Rāmakṛṣṇa.

Contains 184 stanzas in the Citradīpa.

---

R. No. 1733.

Paper. 10¾ × 9½ inches. Foll. 143. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Raṅgarāmānujacakravartyācāriyar of Pallakacheri, South Arcot district.

Foll. 1*a* to 8*a* give the contents of the MS. Fol. 8*b* is left blank.

(*a*) भार्गवसंहिता.
BHĀRGAVASAṂHITĀ.

Foll. 9*a*—94*a*. Fol. 94*b* is left blank.

This is one of the 108 Saṁhitās included in the class of literature called Pāñcarātrāgama which deals with the construction of temples and holy images of God Viṣṇu and with their sanctification and worship and the conduct of festivals, etc This Saṁhitā is said to have been originally related by Bhārgava to Agastya and by the latter to the other sages.

Complete in 25 Adhyāyas.

**Beginning:**

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥

वन्दे लक्ष्मीपतिं देवं शङ्खचक्रगदाधरम् ।
विद्यामूर्तिं हयग्रीवं शब्दार्थज्ञानलब्धये ॥

अमृताध्मातमेघाभममृताहरणं विभुम् ।
पाञ्चरात्रागमाचार्यं वन्दे वैकुण्ठभूपतिम् ॥

अगस्त्यं मुनिशार्दूलं महेन्द्रशिखरे स्थितम् ।
प्रणम्य प्रयता भूत्वा पप्रच्छुर्मुनिपुङ्गवाः ॥

मुनयः—

भगवन्मुनिशार्दूल सर्वशास्त्रविशारद ।
कथमद्य वयं सर्वे तीर्णाः स्म भवसागरात् ॥

अधीतान्यपि शास्त्राणि समधीता त्रयी पुनः ।
तथापि निर्मलं नैव मनोऽस्माकं मुनीश्वर ॥

कथं वयं समुत्तीर्णा भविष्यामो भवाम्बुधेः ।
उपायमद्य नो ब्रूहि येन यामोऽक्षयं पदम् ॥
एतच्छ्रुत्वा महातेजाः स्वयं स्वायंभुवो मुनिः ।
ऋषिभ्यो वक्तुमारेभे स्वधीतं च स्वनुष्ठितम् ॥

अगस्त्यः—

पुरा खलु मया रक्षो जीर्णितं श्राद्धभोजने ।
वातापिरिल्वलः पश्चात् कुपितः सोऽपि मारितः ॥
अहो रक्षोद्वयं नष्टं मया खलु तपस्यता ।
ताभ्यां नष्टं तपोऽस्माकं किं कुर्म इति चिन्तयन् ॥

* * * *

किं तद्धर्यर्चनातन्त्रं तन्त्रं तत् कथमागतम् ।
सर्वं निरवशेषेण उपदेष्टुं त्वमर्हसि ॥

Colophon:

इति श्रीभार्गवतन्त्रे प्रथमोऽध्यायः ॥

श्रीरामः—

अक्षय्यसंख्यं तन्त्रं तत्परस्मिन् ब्रह्मणि स्थितम् ।
सार्धकोटिप्रमाणेन जग्राह भगवान्विधिः ॥

End:

एतद्यः पठते भक्त्या तस्मिन् देवः प्रसीदति ।
तस्य मुक्तिः करतले स पापेभ्यः प्रमुच्यते ॥
सुतार्थी सुतमाप्नोति स्त्रीकामः सुदतीं द्रुतम् ।
आयुष्कामो दीर्घमायुः रुग्णो रोगाद्विमुच्यते ॥

* * * *

अगस्त्यः—

अनेन विधिना यूयमर्चयध्वमधोक्षजम् ।
सर्वपापहरं देवं जगद्बीजं परात्परम् ॥
तत्परं तत्परं तीर्थं तत्तपो मङ्गलं बहु ।
तेन सर्वं करतले भवत्यत्र न संशयः ॥
यः पूजयति देवेशं वासुदेवं सनातनम् ।
किं तस्य बहुभिस्तीर्थैः किं यज्ञैः किं व्रतैरपि ॥

तत्सर्वं विष्णुयजनाद्धस्तप्राप्तं भविष्यति ।
तस्मात्सर्वप्रयत्नेन वासुदेवं समर्चयेत् ॥
इति शास्त्रं महद्दिव्यं गृहीतं भार्गवान्मुनेः ।
उपादिशत्तपस्विभ्य अगस्त्यो भगवानृषिः ॥

**Colophon:**

इति श्रीभार्गवतन्त्रे पञ्चविंशोऽध्यायः ॥
ग्रन्थश्च परिसमाप्तः ॥

---

(*b*) भार्गवतन्त्रप्रयोगः.

BHĀRGAVATANTRAPRAYŌGAḤ.

Foll. 95*a*—143*a*. Fol. 143*b* is left blank.

A manual of procedure as to the conduct of the consecration of holy images of God Viṣṇu and of their worship in temples, etc., as prescribed in the Bhārgavasaṁhitā described under the last sub-division.

Contains प्रतिष्ठाप्रयोगः, पाणिग्रहणप्रयोगः, नित्याराधनप्रयोगः ।

**Beginning:**

अथ श्रीभार्गवतन्त्रस्य प्रतिष्ठाप्रयोगः समारभ्यते —

ज्ञानानन्दमयं ( . . . . . ) हयग्रीवमुपास्महे ॥

सर्वगुणविशिष्ट आस्तिको यजमानः मौहूर्तिकैः साकं देवदेवस्य प्रतिष्ठाकालं निश्चित्य तदर्थं शुभदिने ब्राह्मणानाहूय तैः साकं सबन्धुः स्वयं सर्वलक्षणसंपन्नमाचार्यं वरयेत् ।

**End:**

समाराधनफलं भगवते समर्प्य स्वगृहं प्रविश्य स्वीयं कर्म समाप्य भगवन्तमाराध्य वैश्वदेवादिकं कृत्वा गुर्वतिथीनाराध्य भुञ्जीत ॥

**Colophon:**

इति श्रीभार्गवतन्त्रप्रयोगः समाप्तः ॥

---

R. No. **1734.**

Paper. 10¾ × 9½ inches. Foll. 92. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

Fol. 92*b* is left blank.

रामायणसारसंग्रहः—सव्याख्यः.

RĀMĀYAṆASĀRASAṄGRAHAḤ WITH COMMENTARY.

A commentary is herein added to certain select stanzas culled from the Rāmāyaṇa of Vālmīki: by Varadarāja of Ṇōdāri family and of Ātrēyagōtra, also called Cōḷapaṇḍita Brahmādhirāja.

Complete up to the end of the Yuddhakāṇḍa.

**Beginning:**

अथ तत्रभगवान् वाल्मीकिः सर्वारम्भस्याभियुक्तोपदेशपूर्वकत्वादादौ नारदं प्रति वदति—

तपस्स्वाध्यायनिरतं तपस्वी वाग्विदां वरम् ।
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुङ्गवम् ॥

तपस्वी प्रशस्ततपाः; तपसः प्राशस्त्यं नाम आध्यात्मिकादिदुःखसहिष्णुत्वं तद्वान् । अस्मायामेधेत्यादि(ना इ)नि प्रत्ययः । अनेनास्य वक्ष्यमाणोत्तरविषयप्रश्नकरणसामर्थ्यं सूचितम् । वाल्मीकिः वल्मीकाद्भवः ।

* * * *

**Colophon:**

इति श्रीरामायणसारसंग्रहणे बालकाण्डः समाप्तः ॥

**End:**

सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् ।
नियोज्यमानोऽपि च यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा ॥

आतिष्ठेत्यादिना लक्ष्मणस्य यौवराज्याभिषेके अनुनय . . . . . हराज्यसुखानुभवाय, नतु वयःप्राप्त्या, तस्यां सत्यामनुनयस्यावसरो नास्ति । अतः पूर्वोक्तैर्हेतुभिः सहानेनापि हेतुना भरत एव ज्येष्ठ इति प्रतिष्ठितम् । भक्त्येति । संहि . . . . . काव्यमपि संहितैव ॥

**Colophon:**

एकोनत्रिंशच्छततमः ॥

इति प्रथमात्रेयणोदारिकुलसंभवेन वरदराजेन चोलपण्डितब्रह्माधिराजापरनाम्ना (विरचिते विवेकतिलकनाम्नि) रामायणव्याख्याने श्रीमद्युद्धकाण्डव्याख्यानं संपूर्णम् ॥

---

R. No. **1735.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 28. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Paṇḍitārādhya Rājayyagāru of Kammireḍḍipālayam, Gōdāvari district.

## विशेषार्थप्रकाशकम्.
## VIŚEṢĀRTHAPRAKĀŚAKAM.

This is a treatise in five Adhikaraṇas or chapters explaining the teachings contained in the Śivānubhavasūtra. It is in the form of a dialogue between a teacher and his disciple on the contents of the Śaivasiddhāntāgama; and the topics dealt with in the five chapters are given in the stanzas extracted below from the beginning. By Māyidēva.

Complete.

**Beginning:**

श्रीमदैपुरसोमेशलिङ्गायालिङ्गरूपिणे ।
लिङ्गाङ्गैक्यस्वलिङ्गाय नमस्ते लिङ्गमूर्तये ॥
नमःशब्दमुमा साक्षाच्छिवशब्दः शिवः स्वयम् ।
आयशब्दस्तयोर्योगः सोमतत्त्वमुपास्महे ॥
शिवो लिङ्गमुमैवाङ्गमनया सहितः स्वयम् ।
सोमः संबन्ध इत्येवं पदत्रयमुपास्महे ॥
अतः परं प्रवक्ष्यामि विशेषार्थप्रकाशकम् ।
शिवसिद्धान्ततन्त्रोक्तं संवादं गुरुशिष्ययोः ॥
तत्रादौ षट्स्थलब्रह्मोपदेश(शो हि) विधीयते ।
द्वितीये कथ्यते सम्यक् शिवलिङ्गार्चनक्रमः ।
श्रीमत्प्रसादसद्भावस्तृतीये परिगीयते ।
चतुर्थे षट्स्थलब्रह्मपुरश्चरणमुच्यते ॥
अवसानविधानं यत् पञ्चमे तु प्रकीर्त्यते ।
एवं पञ्चाधिकरणं विशेषार्थप्रकाशकम् ॥
शिवानुभवसूत्रार्थः क्रमादेवं निरूप्यते ॥

* * * *

**Colophon:**

इति श्रीशिवसिद्धान्ततन्त्रे विशेषार्थप्रकाशके षट्स्थलब्रह्मोपदेशविधिर्नाम प्रथमाधिकरणम् ॥

**End:**

स्वानुभूतिविभवावगाहिना मायिदेवविभुना महात्मना ।
श्रीशिवानुभवसूत्रमुत्तरं तन्त्रमुक्तमिति शोभनं परम् ॥
य एतदाचरत्येवं स आचार्यवरो विभुः ।
परानुभवसूत्रेऽस्मिन् परमार्थः परं पदम् ॥

**Colophon :**

इति श्रीशिवसिद्धान्ततन्त्रे विशेषार्थप्रकाशके गुरुशिष्यसंवादे अवसानविधिर्नाम पञ्चमाधिकरणम् ॥

---

R. No. **1736.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 25. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

Fol. 25*b* is left blank.

अच्युताश्रमपद्धतिः.

ACYUTĀŚRAMAPADDHATIḤ.

A digest of Dharmaśāstras relating to the duties and rituals to be observed by Sannyāsins (ascetics): by Acyutāśrama, disciple of Cidānandāśrama. This work is also called Sannyāsidharmasaṅgraha. Yatidharmasamuccaya is quoted.

Incomplete.

**Beginning :**

यद्वाक्यतः परं ब्रह्म जातोऽहं तत्क्षणादिह ।
तं वन्दे यतिधर्मज्ञं चिदाश्रमगुरुं भजे ॥

श्रीरामं परमानन्दस्वरूपं शिष्यशेवधिम् ।
चिदानन्दाश्रमं नत्वा वक्ष्येऽहं म(ह्य)च्युताश्रमः ॥

सर्वसंन्यासिनां धर्मसंग्रहमृषिशासितम् ।

तत्रादौ सर्वसंन्यासकरणे विधिरुच्यते ॥

कृच्छ्रं चान्द्रायणं कृत्वा पावनार्थमनाश्रमी ।
आश्रमी चेच्च कृच्छ्रं तु तेनासौ योग्यतां व्रजेत् ॥

कृच्छ्रलक्षणं याज्ञवल्क्येनोक्तम्—

**End :**

तदुक्तं यतिधर्मसमुच्चये—

धर्मसंकरसंकीर्णे स्थाने सोपद्रवे यतिः ।
मुहूर्तं नोपतिष्ठेत यत्र धर्मः पराङ्मुखः ॥

तस्करोपद्रवे ग्रामे ब्रह्महत्यादिदूषिते ।
दुर्भिक्षे राष्ट्रभेदे वा वर्षास्वप्याश्रमं त्यजेत् ॥

R. No. **1737.**

Paper. 10¾ × 9½ inches. Foll. 13. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915-16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

Fol. 13*b* is left blank.

**श्येनकारिकाः.**

ŚYĒNAKĀRIKĀḤ.

Similar to the work described under R. No. 360 *ante*. A metrical treatise laying down rules for the construction of the fire-altar in the form of a Śyēna bird (hawk) which has its wings spread in full.

Complete.

**Beginning:**

श्येनपावकयुक्ताया वेदेर्मानं प्रकीर्त्यते ।
विहारमाने सर्वत्र पदं पञ्चदशाङ्गुलम् ॥
सार्धसप्तविधे वह्नौ द्विपदव्युत्क्रमो भवेत् ।
प्राचीमादौ परिज्ञाय पृष्ठ्यां रज्जुं वितत्य च ॥

**End:**

पक्षसंज्ञास्तु सप्तैता उक्ताछन्दस्य संज्ञकाः ।
शिरःप्रदेशे शिष्टाः स्युः चतस्रो राष्ट्रसंज्ञकाः ॥
लोकम्पृणास्ततः शिष्टा एकविंशतिरेव हि ।
हिरण्यादियथासूत्रं समासाः श्येनकारिकाः ॥

---

R. No. **1738.**

Paper. 10¾ × 9½ inches. Foll. 40. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Tiru Śrīnivāsavarada Tātācārya of Villiyambākkam, Chingleput district.

(*a*) **कपिञ्जलसंहिता.**

KAPIÑJALASAṀHITĀ.

Foll. 1*a*—35*a* and 36*a*.

Same work as that described under No. 5213 of the D.C.S. MSS., Vol. XI.

Contains Adhyāyas 20 to 32 as follow:—

२०. पुष्पविधानम्.
२१. अङ्कुरार्पणम्.
२२. ध्वजारोहणम्.
२३ उत्सवविधानम्.
२४. पुष्पयागविधानम्.
२५. मन्त्रकोशविधानम्.
२६. जीर्णोद्धारविधिः.
२७. मुद्रालक्षणम्.
२८. स्थापकविधिः.
२९. पूरणविधिः.
३०. पत्रच्छेदविधिः.
३१. प्रायश्चित्तविधिः.
३२. पवित्रारोपणविधिः.

**Beginning:**

अथ वक्ष्यामि पुष्पाणां ग्राह्याण्यन्यानि च द्विज ।
पात्रे पुष्पाणि गृह्णीयात्पाणी प्रक्षाल्य वाग्यतः ॥

* * * *

**Colophon:**

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां पुष्पविधानं नाम विंशोऽध्यायः ॥

**End:**

सर्वेषां दक्षिणां दद्याद्भोजनाच्छादनादिभिः ।
इति सम्यक् समाख्यातं पवित्रारोपणं मया ॥

**Colophon:**

इति श्रीपाञ्चरात्रे कपिञ्जलसंहितायां पवित्रारोपणविधिर्नाम द्वात्रिंशोऽध्यायः ॥

Foll. 35*b* and 36*b* are left blank.

---

(*b*) गरुडपञ्चाक्षरीकल्पः.
GARUḌAPAÑCĀKṢARĪKALPAḤ.

Foll. 37*a*—40*b*.

The portion here deals with the repetition of the five-syllabled Mantra relating to Garuḍa (the divine kite) and with the rituals connected therewith.

Contains the 13th Adhyāya named नानाविषनिग्रहविधि of the Kāśyapasaṁhitā.

**Beginning:**

चिकित्सा विंशतिर्लुप्ताः चतस्रोऽन्याश्च दुर्जयाः ।
हन्त्येका दंशनात्तासां छाययैका हरेन्नरान् ॥

आत्मानं दर्शयित्वैका गण्डेनैकेन च श्रुतः ।
स्पर्शना(र्शा)शनोदकस्रावदंशः स्यालूतिकाविषम् ॥
ह्रां ह्रीं ह्रूं पदमुच्चार्य क्षिप ओं स्वाहया युतः ।

End:

पत्रपुष्पफलमूलवृतं च बीजकण्टकपयस्त्वथेच्छया ।
चार्ममेव दशधा विषजातं स्थावरं विविधवेगमिति स्यात् ॥

Colophon:

इति श्रीकाश्यपीये गरुडपञ्चाक्षरीकल्पे नानाविषनिग्रहविधिस्त्रयोदशोऽध्यायः ॥

---

R. No. **1739.**

Paper. 10¾ × 9½ inches. Foll. 9. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Trivedi Kṛṣṇasvāmi Śrautigal of Mullandram, North Arcot district.

**विभागरत्नमालिका.**

VIBHĀGARATNAMĀLIKĀ.

This book gives the history of the Diṇḍimas and relates how this family arose from a colony of certain Brahmin families settled in and near Mettapāḍi (near Arcot in the North Arcot district) at the instance of a Cōḷa king. It is stated that he brought them from Mandāra, a village on the banks of the Ganges. They are said to be eight persons of eight Gōtras who came to the south and that they at first became divided into 21 families. At the end of the work it is stated that there were 70 houses or families belonging to their descendants. The value of the work lies in the fact that it contains much historical information leading to the identification of a number of poets and authors.

Complete.

**Beginning:**

जयन्ति जगतीतले कवयतां च वाचां पुरो
वलन्ति वसुधावलारिहृदये त एते बुधाः ।
वसन्ति विदुषां शिरोनटनरङ्गके ये परं
ह्यवापुरनपायतो विमतखण्डनं डिण्डिमम् ॥
मूलाण्डवास्तव्यमहाजनानां कालान्तरेऽपि स्वकुलावगत्यै ।
वेलां खलाब्धेः सुविवेकपत्रमालां सुहृत्कण्ठगतां सृजामि ॥

अस्ति मन्दारकं नाम वृन्दारकपुरोपमम् ।
मन्दाकिनीजलक्लेदमन्दादित्यं महापुरम् ॥

* * * *

चोलस्य राज्ञः किल काञ्चिमण्डले चिकीर्षतो बुद्धिरभूच्छिवालयान् ।
मन्दाकिनीतीरजुषो द्विजन्मनो निजाग्रहारेषु निवासयिष्यतः ॥

* * * *

चोलो भूमिपतिर्विचिन्य बहुशो विद्वद्गणालङ्कृता-
न्सर्वानभिचितस्त्रिवेदकृतिनो नित्यक्रियातत्परान् ।
शैवे ब्रह्मणि निष्ठितान्विधिमुपस्पृश्यात्मपर्यन्तकं
काञ्चीमण्डलमानिनाय सहसा संमान्य संमान्य तान् ॥

End :

काश्यपा दशवेश्मानो गौतमा नववेशिनः ।
सावर्ण्याः सप्तदशकाः शाण्डिल्याः सप्तवेशिनः ॥
श्रीवत्साश्च त्रिवेश्मानो भरद्वाजा दशालयाः ।
सामगा गौतमाश्चैव अष्टालयकुटुम्बिनः ।
षड्वेश्मानस्तु साङ्कृत्या इति सप्ततिसङ्ख्यकाः ॥

---

R. No. **1740.**

Paper. 10¾ × 9½ inches. Foll. 4. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Guntūr Sōmappa Śāstri of Tuni, Gōdāvari district.

देवीत्रिशतीनामस्तोत्रम्.

DĒVĪTRIŚATĪNĀMASTŌTRAM.

Same work as that described under No. 9121 of the D.C.S. MSS., Vol. XVII.

Complete.

---

R. No. **1741.**

Paper. 10¾ × 9½ inches. Foll. 41. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Peddiuṭi Yajñanārāyaṇaśāru of Sākurru, Gōdāvari district.

तत्त्वबोधिनीव्याख्या—तर्कोज्जीविनी.

TATTVABODHINĪVYĀKHYĀ: TARKOJJĪVINĪ.

By Agnihōtrasūri. Same work as that described under R. No. 1459 *ante*, but with beginning as given below.

Contains the Pramēyapariccḥēda incomplete.

**Beginning:**

परीक्षापरिकरत्वेनेति । साक्षान्मोक्षोपयोगितया प्रमेयस्य प्रथमतो निरूपणम् । इतरभिन्नत्वेन प्रमेयतत्त्वावधारणे प्रतियोगितया संशयादेरपि पश्चान्निरूपणमिति भावः ।

---

R. No. **1742.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 75. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Bhagavatī Kāśinātha Śāstri of Kōṭipalli, Gōdāvari district.

न्यायसिद्धान्तमञ्जरीदीपिका—तर्कप्रकाशः.

NYĀYASIDDHĀNTAMAÑJARĪDĪPIKĀ: TARKAPRAKĀŚAḤ.

By Śrīkaṇṭha. Same work as that described under No. 4223 of the D.C.S. MSS., Vol. VIII.

Contains from मतभेदेन शक्तिलक्षणोपपादन to तात्पर्यवाद (incomplete) in the Śabdakhaṇḍa.

Fol. 75*b* contains the table of contents of the fragment.

---

R. No. **1743.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 8. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Raṅgarāmānujacakravartyācāriyar of Pallakachēri, South Arcot district.

प्राकृतभाषाप्रक्रिया.

PRĀKṚTABHĀṢĀPRAKRIYĀ.

This is a treatise in the grammar relating to the Prākṛt language which is said to consist of six kinds, viz., (1) Prākṛtī, (2) Śūrasēnī, (3) Māgadhī, (4) Paiśacī, (5) Cūlikāpaiśācī, (6) Apabhraṁśa. A list of the contents is given below; and it will be seen that at the outset the uses of the Prākṛt are given.

Complete.

**Beginning :**

भाषा द्विधा संस्कृता च प्राकृती चेति भेदतः ।
कौमारपाणिनीयादिसंस्कृता संस्कृता मता ॥
इयं तु देवतादीनां मुनीनां नायकस्य च ।
विप्रक्षत्रवणिक्क्षुद्रमान्त्रिकश्रुकिनामपि ॥
लिङ्गिनां च विटादीनामनीचानां प्रयुज्यते ।
प्रकृतेः संस्कृतायास्तु विकृतिः प्राकृती मता ॥
षड्विधा सा प्राकृती च शू(शौ)रसेनी च मागधी ।
पैशाची चूलिकापैशाच्यपभ्रंश इति क्रमात् ॥
तत्र तु प्राकृतं स्त्रीणां सर्वासां नियतं भवेत् ।
योगिन्यप्सरसां शिल्पकारिणामपि संस्कृतम् ॥

**End :**

(सूत्रम् )—तणेणतेसिंतेसितेहिंकेहिं तादर्थ्ये ॥

तादर्थ्ये द्योत्ये एते प्रत्यया भवन्ति । रामतणेण, रामतेसिं, रामतेसि, रामतेहिं, रामकेहिं रामार्थम् इत्यादि ॥

(सूत्रम्)— लिङ्गमतन्त्रम् ॥ स्पष्टम् ॥

**Colophon :**

इत्यपभ्रंशभाषासामान्यप्राक्रिया ॥
प्राकृतभाषाप्राक्रिया समाप्ता ॥

Fol. 8*b* is left blank.

The fly-leaf gives the contents of the work as given below :—

१. प्राकृतादिविनियोगविधिः.
२. प्राकृतसामान्यप्रक्रिया.
३. सन्धिप्रकरणम्.
४. प्राकृतीसामान्यप्रक्रिया.
५. शौरसेनीसामान्यप्रक्रिया.
६. मागधीसामान्यप्रक्रिया.
७. पैशाचीसामान्यप्रक्रिया.
८. चूलिकापैशाचीसामान्यप्रक्रिया.
९. अपभ्रंशसामान्यप्रक्रिया.

---

## R. No. 1744.

Paper. 10¾ × 9½ inches. Foll. 69. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Mantha Channaya Śāstrulugāru of Pantuluvār Agrahāram, Gōdāvari district.

गदाधरीयटिप्पणी.

GADĀDHARĪYAṬIPPAṆĪ.

By Lakṣmīnṛsiṁha. Similar to the work described under No. 4289 of the D C S. MSS., Vol. VIII.

Contains the Vyāptivāda complete and the Hētvābhāsa incomplete

**Beginning:**

प्रणम्य जानकीनाथं लक्ष्मीनृहारेधीमता।

गदाधरव्याप्तिवादटिप्पणीयं विलिख्यते ॥

नन्वप्रमाणसाधर्म्मेणेत्यादिग्रन्थेनानुमानप्रामाण्यव्यवस्थापनेनानुमानप्रामाण्यपरीक्षायाः समाप्तत्वात्तत्कारणत्वेन व्याप्तिग्रहोपायादिकं प्रदर्शनीयमिति शङ्काव्युदासाय समारब्धेति। दत्ते च तद्विशेषणे कथं तद्व्युदास इति शङ्कायां तद्विशेषणसूचितार्थमेव दर्शयति—व्याप्तिग्रहोपायाकथनेनेत्यादिना।

* * * *

**Colophon:**

इति गादाधरटिप्पण्यां व्याप्तिवादपूर्वपक्षः ॥

**End:**

ननु हेतुवदाभासन्त इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहेतुपरत्वे दुष्टहेतुनिरूपणस्यैव प्रतिज्ञातत्वात्तल्लक्षणमप्याकाङ्क्षितं वक्तुमुचितम्। अतस्तदनुक्तौ मूलस्य न्यूनता। अन्यव्युत्पत्त्या.

---

R. No. **1745.**

Paper. 10¾ × 9½ inches. Foll. 52. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Ayyagāri Sītārāmayyagāru of Sākurru, Gōdāvari district

जगदीशीयसिद्धान्तलक्षणक्रोडपत्रम्.

JAGADĪŚĪYASIDDHĀNTALAKṢAṆAKRŌḌAPATRAM.

Similar to the work described under No. 4333 of the D.C.S. MSS., Vol. VIII.

Complete.

**Beginning:**

प्रथमलक्षणे समवायेन वह्न्यभावमादाय महानसीयवह्न्यभावमादाय च वह्निमान्धूमादित्यत्राव्याप्तिवारणार्थं साध्याभावप्रतियोगितायां साध्यतावच्छेदक-

संबन्धावच्छिन्नत्वं साध्यतावच्छेदकावच्छिन्नत्वं च विशेषणं देयमिति मथुरानाथः। अत्रेयमाशङ्का —महानसीयवह्न्यभावस्यापि साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेनाव्याप्तितादवस्थ्यम्। तादृशाभावीयप्रतियोगितायां वह्नित्वमहानसीयत्वोभयत्वैतत्त्रितयस्य चावच्छेदकत्वात्।

**End:**

तथाच वृक्षान्तरवृत्तिकपिसंयोगनिष्ठप्रतियोगितावच्छेदकीभूतकपिसंयोगत्वावच्छिन्नाधिकरणत्वस्यैतद्वृक्षे सत्त्वान्नाव्याप्तिरिति तदभिधानमिति वदन्ति॥

**Colophon:**

जगदीशीयसिद्धान्तलक्षणीक्रोडं संपूर्णम्॥

Fol. 38*a* is left blank.

---

## R. No. 1746.

Paper 10¾ × 9½ inches. Foll. 14. Lines, 20 in a page. Grantha Good.

Transcribed in 1915–16 from a MS. of Ayyagāri Sītārāmayyagāru of Sākurru, Gōdāvari district.

जगदीशीयसिद्धान्तलक्षणक्रोडपत्रम्.

JAGADĪŚĪYASIDDHĀNTALAKṢAṆAKRŌḌAPATRAM.

Similar to the above.

Wants both the beginning and the end.

**Beginning:**

जगदीशीयसिद्धान्तलक्षण्युपरि पत्रिका—

सामानाधिकरण्यं न धूमत्वनिष्ठावच्छेदकतायामिति न कोऽपि दोषः। तथा समवायेन जातिविशिष्टस्य समवायेन वह्नित्वाविशिष्टस्य चाभावमादाय समवायेन जातिविशिष्टस्य कालिकेन वाह्नित्वाविशिष्टस्य साध्यतायां ह्रदत्वादिहेतावव्याप्तिः।

**End:**

तादात्म्यकालिकान्यतरसंबन्धेन साध्यतास्थले तावताप्यव्याप्त्यपरिहार इत्याशयः। स्वाश्रयसमेतत्वमेकार्थसमवायः।

Fol. 14*b* is left blank.

R. No. 1747.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 68. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Peddinṭi Yajñanārāyaṇagāru of Sākurru, Gōdāvari district.

(*a*) सामान्यनिरुक्तिक्रोडपत्रम्.

SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Foll. 1*a*—58*a*.

This treatise on the general characteristics of fallacies in syllogistic reasoning, is intended to be a refutation of Gadādhara's criticisms on Bhavānandasiddhāntavāgīśa's views on the subject. By Pañcānanabhaṭṭācārya, a descendant of Candranārāyaṇa.

Incomplete.

**Beginning:**

तर्ककोडपत्रं पञ्चाननभट्टाचार्यविरचितम्—स्वव्यधिकरणप्रकारावच्छिन्ना या विशेष्यता तदनिरूपकत्वं सर्वांशे याथार्थ्यं भट्टाचार्येणाभिहितम्। स्वव्यधिकरणत्वं स्वाधिकरणनिरूपितवृत्तित्वाभावः। स्वपदं विशेष्यतापरम्। प्रकारावच्छिन्नत्वं तु प्रकारनिष्ठप्रकारतानिरूपितत्वम्।

**End:**

किंतु बाधश्चासौ व्यभिचारश्चेति कर्मधारयेन बाधाभिन्नविशिष्टव्यभिचारपरम्। बाधपदं चोक्तविशिष्टान्तराघटितत्वेनाघटितप्रकृतानुमितिप्रतिबन्धकज्ञानपरम्। तथाच यादृशविशिष्ट.

The scribe of the original MS. adds thus (vide fol. 31*b*).—

अय्यगार्यन्वये जातः कामसूरिर्जनैर्नुतः।
मासि भाद्रपदे क्रोडमलिखच्चान्द्रवैष्णवम्॥

The following remarks on this work are found on fol. 49*a*:—

भवानन्दसिद्धान्तवागीशभट्टाचार्यकल्पोपरि गादाधरभट्टाचार्यस्य यो दोषः तस्योद्धारः श्रीचन्द्रनारायणान्वयपञ्चाननभट्टाचार्येण कृतः॥

---

(*b*) सामान्यनिरुक्तिक्रोडपत्रम्.

SĀMĀNYANIRUKTIKRŌḌAPATRAM.

Foll. 58*b*—68*a*. Fol. 68*b* is left blank.

By Candranārāyaṇa. Same work as that described under No. 4241 of the D.C.S. MSS., Vol. VIII.

Incomplete.

The scribe adds at the end—

विख्याते कौशिकीतीरे ग्रामे साकुर्तिनामके ।
कौण्डिन्यगोत्रसंभूतो वसन्कामेश्वराभिधः ॥
वत्सरे विभवाख्ये तु वैशाखे कृष्णपक्षके ।
नवम्यामलिखत्क्रोडं चान्द्रनारायणं मुदा ॥

**Colophon:**

इति पञ्चाननभट्टाचार्यविरचितं क्रोडपत्रं समाप्तम् ॥

---

R. No. **1748.**

Paper. 10¾ × 9½ inches. Foll. 11. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of V. Gōpālakṛṣṇammagāru of Indupalli, Gōdāvari district.

Foll. 1*a*—3*b* give the different readings contained in the MS. described under R. No. 1424(*b*) *ante* as compared with the original of this MS.

**भगवन्नामकौमुदीप्रकाशः.**

BHAGAVANNĀMAKAUMUDĪPRAKĀŚAḤ.

Foll. 4*a*—11*b*.

Contains the portion in continuation of that found in the MS. described under R. No. 1424(*b*) *ante*; the author is herein stated to be Anantadēva instead of Nandadēva as given in R. No. 1424(*b*).

**End:**

नभसो मणिः सूर्यः चान्द्री किरणलहरी चेति चेतश्चकोराणां चमत्कृतिर्यस्याः सकाशादिति ॥

भगवन्नामकौमुद्याः प्रकाशोऽयं विनिर्मितः ।
संतोषयतु भक्तानां चेतःकुमुदमण्डलीम् ॥
इत्येषात्ममयी पूजा श्रीमद्गोपालपादयोः ।
अर्पिता तेन मे देवः प्रीयतां गोकुलेश्वरः ॥

**Colophon:**

इति श्रीमदापदेवसूनुनाऽनन्तदेवेन विरचिते श्रीभगवन्नामकौमुदीप्रकाशे तृतीयः परिच्छेदः ॥

## R. No. 1749.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 6. Lines, 20 in a page. Grantha and Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Vaṅka Jagannātha Śāstrulugāru of Indupalli, Gōdāvari district.

(*a*) आकाशखण्डनम्.

ĀKĀŚAKHAṆḌANAM.

Foll. 1*a*—1*a*. Fol 1*b* is left blank. Character, Grantha.

A treatise refuting the view that Ākāśa or ether is not to be considered as a separate Dravya or substance. It is intended to support Śirōmaṇi Bhaṭṭācārya's view as against that of the older school of Naiyāyikas.

Complete.

**Beginning :**

आकाशं नाम नातिरिक्तं द्रव्यं मानाभावात्। अथ शब्दो द्रव्याश्रितः गुणत्वात् भावकार्यत्वाद्वेत्यनुमानादेव पृथिव्यादिवाधेनातिरिक्ताकाशसिद्धिरिति चेत्, अत्र भट्टाचार्यानुयायिनः। एतदनुमानेन प्रमाणान्तरसिद्धस्य भगवदात्मन एव शब्दसमवायित्वासिद्धेरतिरिक्तद्रव्यकल्पने गौरवात्।

**End :**

षोढा सन्निकर्षविभागस्यैव निर्युक्तिकत्वेनानादेयत्वादिति कृतमतिरिक्ताकाशाभ्युपगमेनेति ब्रूमः॥

**Colophon :**

इत्याकाशखण्डनम्॥

---

(*b*) विशिष्टवैशिष्ट्यवादः.

VIŚIṢṬAVAIŚIṢṬYAVĀDAḤ.

Foll. 5 and 6. Character, Dēvanāgarī.

Similar to the work described under No. 4282 of the D.C.S. MSS., Vol. VIII.

Incomplete.

**Beginning :**

विशेषणतावच्छेदकप्रकारकनिर्णयकाले विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुता कल्प्यते।

**End :**

तादृशसमूहालम्बनबोधीयोभयधर्मावच्छिन्नविषयताया दण्डत्वप्रकारतानिरूपितरक्तत्वावच्छिन्नविशेष्यतारूपोऽपि रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यत्वाभिन्नत्वात्। न च रक्तत्वाव.

R. No. **1750.**

Paper. 10¾ × 9½ inches. Foll. 13. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Vaṅka Jagannātha Śāstrulugāru of Indupalli, Gōdāvari district.

**तर्कमञ्जरीटीका.**

TARKAMAÑJARĪṬĪKĀ.

A commentary on the Tarkamañjarī, which cannot be identified.

Wants both the beginning and the end; contains the portion relating to Anumāna or inference.

**Beginning :**

तथाचानुमित्यनन्तरमापादयामीत्यनुव्यवसायापत्त्या आपत्तित्वस्येवापत्त्यनन्तरमप्यनुमिनोमीत्यनुव्यवसायापत्तेरनुमितित्वस्याप्यसिद्धेः ।

**End :**

ननु साध्यत्वं सिद्धिकर्मत्वादिरूपतया गुरुतरमत आह—लिङ्गज्ञानं वेति । लिङ्गनिवेशेऽपि गौरवादत आह—

Fol. 13*b* is left blank.

---

R. No. **1751.**

Paper. 10¾ × 9½ inches. Foll. 201. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Nēmāni P. Sundaramgāru of Pērūr, Gōdāvari district.

**स्मृतिकदम्बकम्.**

SMṚTIKADAMBAKAM.

A digest of the Smṛtis in regard to the funeral ceremonies to be performed in connection with the death of a Brahmin: by Narasiṁha, also called Śiṅgābhaṭṭāraka, son of Koṇḍubhaṭṭa and Gaurāma. The portion here is continued in the MS. described under the next number.

Contains the following subjects :—

सर्वप्रायश्चित्तम्, कृच्छ्रलक्षणम्, मृत्तिकास्नानविधिः, परिषत्प्रायश्चित्तम्, प्रकीर्णकप्रायश्चित्तम्, व्रताङ्गदानानि, कर्तृक्रमः, कर्णमन्त्रजपः, धनिष्ठापञ्चकमरणप्रायश्चित्तम्, विद्युदादिहतप्रायश्चित्तम्, अनाथप्रेतसंस्कारविधिः, प्रेताग्न्युत्पत्तिः, अनुपनीतसंस्कारः, बालमरणे आशौचनिर्णयः, द्विपत्नीकस्यैकपत्नीमरणे कर्तव्यम्, अनुगमनाशौचम्, दहनविधिः, अनुमरणविषयः, वपननिर्णयः, अस्थिसञ्चयनम्, यतिसंस्कारविधिः, तिलोदकदानम्, सापिण्ड्यनिर्णयः, ब्रह्मचारिणामाशौचनिषेधः, ज्येष्ठस्यैव कर्माधिकारः, दशाहमध्ये पाषाणनाशप्रायश्चित्तम्, आशौचिनां नियमाः, अग्निनाशप्रायश्चित्तम्, द्वितीयदिनकृत्यम् ।

**Beginning :**

अथ शिङ्गाभट्टारकाः जातकरणनामकरणान्नप्राशनादीनि कर्माण्युक्त्वा तदनन्तरं पैतृमेधिकं कर्म समन्त्रकं शास्त्रार्थपूर्वकं वक्ष्यन्ति । तद्यथा—यस्य कस्यचित्पुरुषस्य वा स्त्रियो वा मरणसमये अद्भिः स्नापयित्वा धौतं वासः परिधाप्य यथोक्तसर्वप्रायश्चित्तं कुर्यात् । तत्रादौ सर्वप्रायश्चित्तविधिरुच्यते—यः कश्चित्परलोकभयेन जीवन्नेव पापपरिहारार्थं प्रायश्चित्तं कर्तुमिच्छति स पुरुष उत्तरायणे पञ्चाङ्गशुद्धि(द्ध)दिवसे नद्यां स्नात्वा विष्णुमन्त्रं जपन् ।

See under the next number for the end.

---

R. No. **1752.**

Paper. 10¾ × 9¾ inches. Foll. 217. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915-16 from a MS. of Gorti Sūrayagāru of Neduvūru, Gōdāvari.

**स्मृतिकदम्बकम्.**

SMRTIKADAMBAKAM.

Same work as the above. This is a continuation of the MS. described above.

Contains the following subjects:—

तृतीयदिनमारभ्य दशाहपर्यन्तकृत्यम्, दशाहविधिः, एकादशाहविधिः, वृषोत्सर्गविधिः, एकोद्दिष्टश्राद्धविधिः, सपिण्डीकरणम्, त्रयोदशाहकृत्यम्, महालयम्, गजच्छाया, मन्वादयः, दर्शश्राद्धम, दशाहमध्ये सूतकप्राप्तौ विशेषः ।

**End :**

ज्ञातीनां मरणं यत्तु दशाहान्तादिसूतकम् ।
आदशाहमतिक्रम्य ज्ञातीनां न च सूतकम् ॥

**Colophon :**

श्रीमद्वीरनृसिंहपादयुगलं भक्त्या सदा वन्दय-
न्सर्वासर्वयआर्यसूनुविभवः श्रीकुण्डुभट्टः पिता ।
माता गौरमगर्भसिन्धुरुदयः श्रीनारसिंहः सुधीः
स्मृत्यालोचनमौनिवाक्यरचनैः स्मृत्याः कदम्बं स्फुटम् ॥

इति स्मृतिकदम्बकं संपूर्णम् ॥

R. No. **1753.**

Paper. 10¾×9½ inches. Foll. 127. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Nēmāni P. Sundaramgāru of Pērūr, Gōdāvari district.

**स्मृतिकदम्बकम्.**

SMṚTIKADAMBAKAM.

Same work as the above.

Contains from the तृतीयाह्निककृत्य to सपिण्डीकरण incomplete.

---

R. No. **1754.**

Paper. 10¾×9½ inches. Foll. 1022. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Rāmōji Bhānu Pantulugāru of Pērūr, Gōdāvari district.

Bound in two volumes.

**धर्मखण्डः.**

DHARMAKHAṆḌAḤ.

Same work as that described under R. No. 1644 *ante*.

Complete in Adhyāyas 1 to 133. Adhyāyas 121 to 133 contain the following subjects :—

इन्द्रजिद्वधः, कुम्भकर्णविबोधनम्, कुम्भकर्णवधः । रावणशक्त्या लक्ष्मणस्य मूर्छा, रावणवधः, शिवागमनम्, रामस्य पुनरयोध्याप्रवेश, श्रीपट्टाभिषेकः, श्रीरामायणकथाश्रवणफलम् ॥

**End :**

श्रवणं धर्मखण्डस्य भक्तिश्रद्धासमन्वितम् ।
यथाविभवदानं च नाल्पस्य तपसः फलम् ॥
धर्मखण्डद्वयं श्रुत्वा भक्तिश्रद्धासमन्वितः ।
ईर्ष्यामत्सरनिर्मुक्तस्तरत्येव भवाम्बुधिम् ॥

* * * *

धात्रीसुतायै सुरवन्दितायै कदम्बमूलाकृतिदेहभासे ।
स्त्रीपुंसरूपाकृतिदेहधार्यै नमः शिवायै च नमः शिवाय ॥

**Colophon :**

इति श्रीधर्मखण्डे धर्मोपाख्याने उतरे शैवे वाल्मीकिचरित्रे त्रयस्त्रिंशदुत्तरशततमोऽध्यायः ॥

Fol. 1022*b* is left blank.

R. No. **1755.**

Paper. 10¾×8½ inches. Foll. 171. Lines, 20 in a page. Grantha. Good.

Transcribed in 1915–16 from a MS. of Kaṟṟa Simhādri Śāstri of Enugulamahāl, Gōdāvari district.

भागवतव्याख्या—भागवतार्थतत्त्वदीपिका.

BHĀGAVATAVYĀKHYĀ: BHĀGAVATĀRTHATATTVA-DĪPIKĀ.

Same work as that described under R. No. 1525(*b ante*. By Bhāṣya kārasūri of Kauṇḍinyagōtra. He is said to be the son and disciple of Vēṅkaṭārya and grandson of Rāmānuja. He is also said to be the nephew of Vēṅkaṭadēśika, son of Sampatkumāra. The author states that he received his knowledge of the Bhāgavata from his father.

Contains Adhyāyas one and two complete in the first Skandha.

**Beginning:**

शुक्लाम्बरधरं (. . .) विघ्नोपशान्तये ॥
गुरुं मत्पितरं वन्दे रामानुजगुरोः सुतम् ।
वेङ्कटार्यं बुधवरं मम भागवतप्रदम् ॥
वन्देऽस्मन्मातुलं साक्षान्मम सर्वोपकारकम् ।
श्रीमत्सम्पत्कुमारस्य पुत्रं वेङ्कटदेशिकम् ॥
भवन्ति ज्ञानिनः सर्वे यं नमस्कृत्य सर्वदा ।
शशिमण्डलमध्यस्थं हयग्रीवं तमाश्रये ॥

उपनिषद्भागोपबृंहणपरेषु तत्रापि सात्त्विकतया प्रत्यक्षश्रुत्यनुगुणतया च प्रबलेषु प्रबन्धेषु वसिष्ठपौत्रप्रत्यक्षश्रुत्यभीष्टतमपञ्चमश्रुतिप्रवर्तकभगवदंश-पाराशर्यतनयपरमर्षिप्रणीतं श्रीमद्भागवताख्यं पुराणमशेषजगत्प्रार्थितं परमनिःश्रेय-सार्थिभिरत्यन्तमुपादेयम् ।

* * * *

तत्र प्रथममिष्टदेवतोपासनात्मकं मङ्गलमाचरति प्रथमश्लोकेन—जन्माद्य-स्येत्यादिना । अत्र गायत्र्युपक्रमः प्रतीयते धीमहीतिशब्दतः ।

---

R. No. **1756.**

Paper. 10¾ × 9½ inches. Foll. 168. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Ayyagāri Sītārāmayyagāru of Sākuṟṟu, Gōdāvari district.

अद्वैतरत्नकोशभावार्थप्रकाशिका.
ADVAITARATNAKOŚABHĀVĀRTHAPRAKĀŚIKĀ.

Fol. 168*b* is left blank.

A commentary on the Tattvavivēkadīpana of Nṛsiṁhāśramamuni described under No. 4589 of the D.C.S. MSS., Vol. IX: by Śāśvatānandatīrtha, disciple of Nārāyaṇatīrtha.

Contains the second Pariccḥēda, of which the beginning is wanting.

**Beginning:**

प्रत्यक्षबाधनाशङ्क्याह—न चेति । प्रत्यक्षस्य सविशेषणन्यायेन विशेषणभूतविषयविषयित्वमित्याह—न हीति । विशिष्टोत्पत्तिनाशानुभवस्य विशेषणस्थायित्वग्राहकप्रत्यक्षविरोधेन विशेष्यज्ञानविषयत्वात् ।

**End:**

जिज्ञासातद्द्वारकेति, तमेतं वेदानुवचनेनेति श्रुतिरिति भावः । सन्नुन्ना सदधिष्ठिता । पराभिमतमायास्वातन्त्र्यनिरासाय सदधिष्ठानत्वोक्तिरिति ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमन्नारायणतीर्थमुनीन्द्रपूज्यपादशिष्यशाश्वतानन्दतीर्थविरचितायामद्वैतरत्नकोशभावार्थप्रकाशिकायां द्वितीयः परिच्छेदः ॥

---

R. No. 1757

Paper. 10¾ × 9½ inches. Foll. 28. Lines, 20 in a page Dēvanāgarī. Good.

Transcribed in 1915–16 from a MS. of Vaṅka Jagannātha Śāstrulugāru of Indupalli, Gōdāvari district.

तत्त्वचिन्तामण्यालोकटिप्पणी.
TATTVACINTĀMAṆYĀLŌKAṬIPPAṆĪ.

Fol. 28*b* is left blank.

A commentary on Jayadēva's Ālōka. Similar to the work described under R. No. 1690 *ante*.

Contains the Anyathākhyātivāda.

**Beginning:**

तद्वतीति । प्रमालक्षणे व्यावर्त्याप्रसिद्धिरिति मूलपाठे इदं सम्यगेव । विशेषणव्यावर्त्याप्रसिद्धिरिति पाठे तु विशेषणस्य विशेषणशब्दस्य तद्वतीत्यादेरितिशेषः, अधिगतोऽध्याहार इति योज्यम् ।

**End:**

विशिष्टज्ञानसामग्री हि विषयनिरूपितं संसर्गं बोधयति, न तु संसर्गमात्रम्, अतिप्रसङ्गात् । न च यस्य संसर्गस्याभावाग्रहः तं संसर्गं संबोधय-

तीति करुप्यमिति वाच्यम् । अभावस्यालीकाप्रतियोगित्वादधिकसंसर्गस्य तथापि विषयत्वाभावादिति ॥

**Colophon:**

अन्यथाख्यातिवादः समाप्तः ॥

श्रीजयदेवकृतालोकटिप्पण्यामन्यथाख्यातिवादः समाप्तः ॥

---

R. No. **1758.**

Paper. 10¾ × 9½ inches. Foll. 12. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of P. Nārāyaṇācāriyar of Sākuṟṟu, Gōdāvari district.

**वैखानसधर्मसूत्रव्याख्या.**

VAIKHĀNASADHARMASŪTRAVYĀKHYĀ.

By Nṛsiṁhavājapēyin.

Contains the tenth Praśna, which forms the third Praśna of the Dharmasūtra. This portion is in continuation of that contained in the MS. described under R. No. 1609 *ante*.

**End:**

पुष्पाञ्जलिं दत्वा तद्रूपं नारायणं संस्तुत्य द्वादशनामभिर्देवं नारायणं बलिदेवताश्च ब्राह्मणांश्च प्रणमेत् । अन्तहोमं जुहोति । एवं कृते सत्यभीष्टपरामुत्कृष्टां गतिं मृतको गत्वा विष्णुलोके महीयते विष्णुवत्पूज्यते । तस्मात्प्रयत्नेन नारायणबलिः कर्तव्यः ॥

**Colophon:**

इति दशमप्रश्नदशमखण्डभाष्यम् ॥

---

R. No. **1759.**

Paper. 10¾ × 9½ inches. Foll. 68. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of P. Nārāyaṇācāriyar of Sākuṟṟu, Gōdāvari district.

Fol. 56*b* is left blank.

**वैखानसश्रौतप्रयोगक्लृप्तिः.**

VAIKHĀNASAŚRAUTAPRAYŌGAKLṚPTIḤ.

A manual of the procedure relating to the conduct of the sacrificial rituals as contained in the Vaikhānasaśrautasūtra: by Kṛṣṇamāryādhvarin of Parāśara family and Valmīkigōtra. The author states that he composed this work by the grace of God (Nṛsiṁha) worshipped on the Maṅgaḷagiri hill in the Guntūr district.

Contains the following subjects:—आधानप्रयोगः, पावमानेष्टिप्रयोगः, अग्निहोत्रप्रयोगः, प्रवासेष्टिप्रयोगः, पक्षहोमप्रयोगः, वास्तोष्पतिहोमप्रयोगः, अवसितहोमप्रयोगः, अन्वारम्भणीयेष्टिप्रयोगः, दर्शपूर्णमासेष्टिप्रयोगः, आग्रयणेष्टिप्रयोगः, आहवनीयानुगमनप्रायश्चित्तप्रयोगः, निरूढपशुबन्धप्रयोगः.

**Beginning:**

अथाग्न्याधेयं व्याख्यास्यामः—अग्न्याधेयं करिष्यन् सूत्रोक्तलक्षणामरणीमाहृत्य शोधयति। उदगयन आपूर्यमाणपक्षे पुण्यनक्षत्रे दिने ग्रहे सौम्ये सूत्रोक्तलक्षणेन विहारं कल्पयित्वा विप्रैरनुज्ञात इत्यादि कूश्माण्डानि च जुहुयात् इत्यन्तं सूत्रोक्तात्मशुद्धिं कृत्वा उक्तनक्षत्र उपवसथेऽहनि प्रातरौपासनं हुत्वा दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य सर्वकर्मभ्यः पूर्वमग्निहोत्रं होष्यन् अग्नीनाधास्ये। सर्वकर्मभ्यः पूर्वं दर्शपूर्णमासाभ्यां यक्ष्यमाणोऽग्नीनाधास्ये। सर्वकर्मभ्यः पूर्वं सोमेन यक्ष्यमाणोऽग्नीनाधास्ये इति आधानसंकल्पस्त्रिविधः।

* * * *

**Colophon:**

पराशरस्यान्वयसंभवेन वाल्मीकिशिष्यस्य तु गोत्रजेन।
श्रीकृष्णमार्याध्वरिणा प्रयोगक्लृप्तिः कृता स्वीयकृतौ समस्ता॥

* * * *

श्रीमन्मङ्गलशैलनाथकृपया श्रीकृष्णमार्याध्वरी
श्रीवैखानससूत्रमभ्युदहरज्जीर्णं त्रयीवित्तमः।
तत्सूत्राधिकृतप्रयोगगमनीं क्लृप्तिं करोत्युज्ज्वलां
* दृष्ट्वा तां सुधियोऽभिनन्दत(त)मां त्रैविद्यवृद्धाश्चिरम्॥

**End:**

अपो अन्वचारिषं रसेन समसृक्ष्महि। पयस्वाग्ँ अग्नआगमं तं मा संसृज वर्चसा इत्याहवनीयमुपतिष्ठते। तथा पत्नी शालामुखीये समिध आदायोपतिष्ठते।

* * * *

आयतनेऽग्निं प्रतिष्ठाप्यापोऽवरोहयति। शतं ब्राह्मणान् भोजयेत्॥
इति निरूढपशुबन्धः॥

---

* ये वैखानससूत्रिणो जगति ते यष्टुं यतन्तां बुधाः॥ इति पाठान्तरम्॥

R. No. 1760.

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 69. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of P. Nārāyaṇācāriyar of Sākurru, Gōdāvari district.

## वैखानसाह्निकानुक्रमदीपिका.

## VAIKHĀNASĀHNIKĀNUKRAMADĪPIKĀ.

This work lays down rules for the performance of ablutions and other rituals that have to be observed every day by a follower of the Vaikhānasasūtra. By Vēṅkaṭayōgin, son of Sītāmbikā and Koṇḍārya of Koṇḍa family. The author refers to Sundararājīya, Bhāskarabhaṭṭīya and Sūtrasaraṇī as works relating to the household rituals, and states that he wrote a work in regard to certain topics connected therewith.

Contains the following subjects :—

ब्राह्मे मुहूर्ते हरिचिन्तनविधिः, मूत्रपुरीषोत्सर्गविधिः, शौचविधिः, दन्तधावनविधिः, दर्भलक्षणम्, आचमनविधिः, नित्यस्नानविधिः, क्रियाङ्गस्नानविधिः, काम्यस्नानविधिः, ऊर्ध्वपुण्ड्रविधिः, सन्ध्यावन्दनविधिः, and तर्पणविधिः (incomplete).

**Beginning :**

श्रीवेङ्कटेशं मदभीष्टदैवं श्रीमन्नृसिंहं कुलदैवतं मे ।
सूत्रागमाढ्यं विखनोमुनिं च भृग्वादिकान् कल्पकृतः प्रणम्य ॥
श्रीकोण्डवंशोद्भवकोण्डमार्यपुत्रेण वैखानससंस्क्रियाणाम् ।
विरच्यते वेङ्कटयोगिनाऽऽ सुधीमतानुक्रमदीपिकेयम् ॥
अत्राग्राह्यं समुत्सृज्य ग्राह्यं गृह्णन्तु निर्मलाः ।
विद्वांसः सूत्रवेत्तारो हंसाः क्षीरमिवाम्भसि ॥

अथ तत्रभगवता विखनसा प्रतिपादितानां तत्तत्कालविहितानामष्टादशशरीरसंस्काराणां ततः सुन्दरराजीयभास्करभट्टीयसूत्रसरण्यादिग्रन्थोक्तरीत्या सीमन्तेन सह ऋतुसंगमनगर्भाधानपुंसवनविष्णुबलिहोमकान् चतुःसंस्कारान् उपनयनेन साकं जातकर्मोत्थानहोमकरणान्नप्राशनप्रवासागमनपिण्डवर्धनचौलाभिधान् सप्त संस्कारान्, पाणिग्रहणेन सार्धं पारयणव्रतबन्धविसर्गोपाकर्मसमावर्तनाख्यांश्चतुरः संस्कारान् मेलयित्वा तदङ्गभूतपुण्याहाङ्कुरारोपणाधारसामान्यहोमान्तहोमाभ्युदयिकप्रयोगपूर्वकं बालबोधार्थमनुक्रमणिकां लिखित्वा तत्रोक्तविध्यर्थानां मन्वादिश्रुतिवचनप्रमाणारूढत्वोपन्यासेन महाजनप्रतिग्राह्यतामुत्पादयितुमिच्छुना

मया प्रथमं द्विजातिभिर्नित्यं कर्तव्यानामाह्निककर्मणामनुक्रमदीपिका पुरतः समारभ्यते । तत्रापि—

प्रातः स्नात्वा द्विजः कुर्यान्नित्यनैमित्तिकाः क्रियाः ।
अस्नात्वा नो चरेत्कर्म जपहोमार्चनादिकम् ॥

* * * *

Colophon:

इति श्रीमदुभयवेदान्तस्वतन्त्रेण समधीतसाङ्गवैखानससूत्रतन्त्रेण विद्वज्जनविधेयेन वेङ्कटयोगिनामधेयेन विदुषा रचितायां वैखानसानुक्रमदीपिकायां नित्यस्नानविधिः समाप्तः ॥

श्रीवैखानससूत्रतन्त्रनिरतः श्रीकोण्डवंशोद्भवः
कोण्डार्यस्य तनूभवो बुधनुतः सीताम्बिकागर्भजः ।
धीमान् वेंकटयोगिनाम विबुधो वैखानसानुक्रमे
नित्यस्नानसुदीपिकां व्यरचयत्स्मृत्यर्थमानान्विताम् ॥

End:

यमः—

अक्षतैरपि वा शुक्लैस्तिलैर्देवान् प्रतर्पयेत् ।
अक्षतैः शबलैर्वापि ऋषीन् ऋषिगणानपि ॥
पितॄंश्चैव तिलैः कृष्णैर्जातिलैर्वा तिलैरपि ।

व्यासः—

विना रूप्यसुवर्णेन विना पुष्पाक्षतैः कुशैः ।
विना मन्त्रैश्च देवर्षीन् तर्पयेन्निष्फलं भवेत् ॥
खड्गमौक्तिकहस्तेन विना रूप्येण चाम्बुना ।
कुशैस्तिलैर्विना यस्तु पितॄन्नैव . . . ॥

---

## R. No. 1761.

Paper. 10¾ × 9½ inches. Foll. 23. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of T. Ramaṇayyagāru of Ralli, Gōdāvari district.

**वीरागमः.**

VĪRĀGAMAḤ.

Same work as that described under No. 5502 of the D.C.S. MSS., Vol. XI.

Contains the 321st Paṭala.

**Beginning:**

आदौ कल्याणमूर्तिं च द्वितीयं चन्द्रशेखरम् ।
गङ्गाधरं तृतीयं च चतुर्थकमुमापतिम् ॥

* * * *

नवमे श्रीरथं चैव दशमे तीर्थसेवनम् ।
शैवास्त्रतीर्थं दानस्य कुट्टनं चाङ्कुरार्पणम् ॥

ध्वजाधिवासनं चैव भेरीकलशपूजनम् ।
स्तम्भप्रतिष्ठा विधिवद्ध्वजस्यारोपणक्रिया ॥

**End:**

शैवोत्सवेष्विदं कृत्यं कर्तव्यं शुभकारणम् ।
दर्शनेन नृणां सौख्यं सर्वसंपत्समृद्धित(द)म् ॥

एतत्कथां ये प्रपठन्ति नित्यं शृण्वन्ति वा ये विलिखन्ति भक्त्या ।
तेषां (नृणां) भक्तिरचञ्चला स्यात्ते वै परां मुक्तिमवाप्नुवन्ति ॥

**Colophon:**

इति श्रीवीरागमे क्रियापादे उत्सवतन्त्रे कन्नदब्रह्मोपाख्यानं नामैकविंशत्युत्तरशतत्रयतमः पटलः ॥

---

R. No. **1762.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 56. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1915–16 from a MS. of Tiru Śrīnivāsavaradatātācāriyar of Villiyambākkam, Chingleput district.

(*a*) श्रुतबोधः—द्राविडव्याख्यासहितः.

ŚRUTABODHAḤ WITH TAMIL COMMENTARY.

Foll. 1*a*—37*a*.

Same work as that described under No. 1800 of the D.C.S. MSS., Vol. III, but with Tamil commentary and with the following colophon. Complete.

इति श्रीमदजितसेनाचार्यविरचितश्रुतबोधाभिधानच्छन्दोलक्षणग्रन्थः समाप्तः ॥

(*b*) वृत्तरत्नाकरः—द्राविडव्याख्यासहितः.

VṚTTARATNĀKARAḤ WITH TAMIL COMMENTARY.

Foll. 37*a*—56*b*.

By Kēdārabhaṭṭa. Same work as that described under No. 1782 of the D.C.S MSS., Vol. III, but with Tamil commentary.

Complete.

---

R. No. **1763.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 62. Lines, 20 in a page. Grantha and Tamil. Good.

Transcribed in 1915-16 from a MS. of S. Gōpālācārya of Villiyambākkam, Chingleput district.

प्रतिष्ठातिलकम्, द्राविडव्याख्यासहितम्.

PRATIṢṬHĀTILAKAM WITH TAMIL COMMENTARY.

The first chapter contained herein treats of the duties and rites prescribed for a Jaina belonging to any of the three (higher) castes. By Brahmasūri.

Contains the first Parvan.

**Beginning:**

जिनाधीशमहं वन्दे विध्वस्ताशेषदोषकम् ।
सर्वज्ञं सर्वशास्त्रस्य कर्तारं त्रिजगत्प्रभुम् ॥

* * * *

अथोच्यते त्रिवर्णानां शौचाचारविधिक्रमः ।
शौचाचारौ विधिप्राप्तौ देहं संस्कर्तुमर्हतः ॥

* * * *

प्रातरेव समुत्थाय तल्पाद्दक्षिणपार्श्वतः ।
निषण्णस्तत्र पूर्वास्य एकाग्रश्चिन्तयेदिति ॥

**End:**

इत्यादिलौकिकाचारेष्वभिज्ञः परमार्थदृक् ।
प्रवर्तमानो लभते लोकद्वयसुखं सुधीः ॥

* * * *

एवं सन्ध्योपासनादिक्रियायां सर्वज्ञस्याराधनायां च सक्तः ।
भुक्त्वा तत्सन्नाकलोकादिसौख्यं प्रान्ते यास्यत्यक्षयं ब्रह्मरूपम् ॥

* * * *

**Colophon:**

इति श्रीब्रह्मसूरिविरचिते जिनसंहितासारोद्धारे प्रतिष्ठातिलकनामनि त्रैवर्णिकाचारसंग्रहे सूत्रप्रसङ्गे सन्ध्यावन्दनदेवताराधनौपासनविश्वदेवसन्तर्पणादिविधानियोगो नाम प्रथमं पर्व ॥

Fol. 62*b* is left blank.

---

R. No. **1764.**

Paper. 10¾ × 9½ inches. Foll. 152. Lines, 20 in a page. Dēvanāgarī. Good.

Transcribed in 1915-16 from a MS. of Tāta Tambanna Śāstrigāru of Indupalli, Gōdāvari district.

परिभाषेन्दुशेखरव्याख्या—चित्प्रभा.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ: CITPRABHĀ.

A commentary on the Paribhāṣēnduśēkhara of Nāgēśabhaṭṭa, described under No. 1463 of the D.C.S. MSS., Vol. III. The author of this work is Brahmānandasarasvatī according to the Catalogus Catalogorum.

Breaks off in अकृतव्यूहपरिभाषा which is the 56th Paribhāṣā.

**Beginning:**

विद्याधीशं त्रिनेत्रं विमलमतियुतं वैद्यनाथाभिधेयं
जन्मस्थित्यन्तकारीं निखिलजनिमतां यश्च पूज्यः सुरेशैः ।
आनन्दाब्धिर्महेशः सकलकृतिनतो दुर्गमो बोधहीनैः
सत्यज्ञानस्वरूपो विगतपरिमितिस्तं नमामो गिरीशम् ॥
यस्यान्नायोऽभिधत्ते चकितमतिशयं निष्कलङ्कोऽप्यबाधो
यस्य स्मृत्या भवाब्धिं तरति गतमलः शुद्धसंवित्कृतात्मा ।
तं श्रीकृष्णं दयेशं निगमनुतिचरं बन्धनं प्राणराशेः
ध्यायंध्यायं नमामश्चरितकलुषहं लग्धरं वेणुमन्तम् ॥
यां शक्तिं समुपासते हि विबुधा देवेन्द्ररुद्रादयो
यस्याधीशसहस्रतुण्डफणभृच्छक्तो न वक्तुं गुणान् ।
यस्या वेदवचांसि तत्त्वमचलं शक्तान्य(नि)वक्तुं स्वतः
तां ध्यायेन्मुनिशृङ्गशैलनिरतां प्राप्तातिभाग्यावलिम् ॥
जितदुरितसमूहं गणेशं जितमतिधीरमुनीशवन्द्यपादम् ।
जानिनिलयसुसङ्गसन्निधानाद्विपदमपाकुरुते . . . . ॥

चित्प्रभानामिकां व्याख्यां परिभाषेन्दुशेखरे ।
बालानां सुखबोधाय कुर्वे भाष्या(नुसारिणीम्) ॥

स्वचिकीर्षितनिबन्धनसमाप्तिप्रतिबन्धकदुरितप्रशमाय शिष्टाचारप्रतिपालनाय च शिष्टाचारानुमितश्रुतिप्रमाणकनिखिलजगद्गुरुश्रीपरमेश्वरनत्यात्मकमङ्गलमाचरंश्चिकीर्षितं प्रतिजानीते—नत्वेत्यादिना । तत्र चतुष्टयी शब्दानां प्रवृत्तिरिति पक्षे कस्मिंश्चित्पुरुषविशेषे संज्ञात्वेन विनियुक्त इति संज्ञाशब्दः । तत्र तेन रथकाराधिकरणन्यायेन योगजोपस्थितिं प्रति रूढ्यर्थोपस्थितेः प्रतिबन्धकत्वात्पुरुषविशेषोपस्थितौ काश्चिन्नागेशः पुरुषविशेषः परिभाषेन्दुशेखरं कुरुत इत्यन्वयः ।

End :

एतत्प्रवृत्तौ चेति । समर्थग्रहणे सामर्थ्याज्ज्ञापकपरग्रन्थसामर्थ्याच्च न स्वरूपनिमित्तविनाशस्यैव ग्रहणमित्याग्रहः । अपि तु यद्येकदेशः सिध्यतीति भावः । अत्रापिशब्दः स्वरूप.

---

R. No. **1765.**

Paper. $10\frac{3}{4} \times 9\frac{1}{2}$ inches. Foll. 88. Lines, 20 in a page. Telugu. Good.

Transcribed in 1915–16 from a MS. of Pēri Vēṅkaṭaratnadīkṣitulugāru of Pālagummi, Gōdāvari district.

आपस्तम्बीयाध्वरतन्त्रव्याख्या—प्रयोगरत्नमाला.

ĀPASTAMBĪYĀDHVARATANTRAVYĀKHYĀ; PRAYŌGARATNAMĀLĀ.

By Cauṇḍapācārya. Same work as that described under R. No. 795 *ante*.

Contains the fifth or the Ādhāna Praśna without its beginning.

---

R. No. **1766.**

Palm-leaf. $1\frac{7}{8} \times 1\frac{1}{8}$ inches. Foll. 103. Lines, 6 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. K. Umāmahēśvara Śāstrulugāru of Pithāpuram.

(*a*) शाण्डिल्यस्मृतिः.

ŚAṆḌILYASMṚTIḤ.

Foll. 1*a*—21*b*.

Same work as that described under No. 2723 of the D.C.S. MSS., Vol. V.

Breaks off in the fourth Adhyāya.

(*b*) हारीतस्मृतिः.

HĀRĪTASMṚTIḤ.

Foll. 22*a*—56*b*.

Same work as that described under No. 2734 of the D.C.S. MSS., Vol. V.

Incomplete.

---

(*c*) पराशरस्मृतिः.

PARĀŚARASMṚTIḤ.

Foll. 57*a*—103*a*. Fol. 103*b* is left blank.

Same work as that described under No. 2633 of the D.C.S. MSS., Vol. V.

Incomplete.

---

R. No. **1767.**

**Paper.** 10½×4 inches. Foll. 211. Lines, 13 in a page. Telugu. Good.

Purchased in 1915–16 from Garimalla Sōmayājulugāru of Kōtipalli, Gōdāvari district.

परिभाषेन्दुशेखरव्याख्या—वाक्यार्थचन्द्रिका.

PARIBHĀṢĒNDUŚĒKHARAVYĀKHYĀ: VĀKYĀRTHA CANDRIKĀ.

Foll. 1*a*—210*a*. Foll. 210*b* and 211 are left blank.

A commentary on the Paribhāṣēnduśēkhara of Nāgēśabhaṭṭa, which work has been described under No. 1463 of the D.C.S. MSS., Vol. III: by Hariśarman, son of Bhāgavata Bhāskarasūri and disciple of Kāśīnātha. The author was a Pandit in the court of Vijayarāma Gajapati, king of the Kaliṅga country.

Complete.

**Beginning:**

जयन्ति जगतां मातुश्चरणारुणदीधितयः ।
विजृम्भन्ते यतः पुंसां विद्याकमलिनीश्रियः ॥
काशीनाथपदाम्भोधिं कलयन् मानसे हरिः ।
विवृणोति यथाबुद्धि परिभाषेन्दुशेखरम् ॥
यद्यप्यत्यन्तगम्भीरो नागेशवचनक्रमः ।
तथापि बुद्धिवैशद्यसाधनार्थोऽयमुद्यमः ॥

जयति श्रीमहाराजः कलिङ्गवसुधाधिपः ।
सूर्यवंशसुधासिन्धुस्फुरत्पूर्णक्षपाधिपः ॥
राजद्विजयरामाख्याविख्यातामितविक्रमः ।
वनीपकमनोऽभीष्टविश्राणनसुरद्रुमः ॥
तदीयागण्यकारुण्यप्राप्ताभीष्टश्रिया मया ।
प्रणीयते निबन्धोऽयं प्राप्नुयात्तद्यशो दिशः ॥

अथ नागेशोपाध्यायः प्रारिप्सितप्रकरणपरिसमाप्तिप्रतिबन्धकीभूतप्रत्यूहपरिहाराद्यनेकफलसम्पादकतया कृतमिष्टदेवतानमस्कारात्मकं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नन् प्रेक्षावदुपकाराय प्रतिजानीते—नत्वत्यादिना । स्वापकर्षबोधानुकूलव्यापाररूपनातिक्रियाकर्मत्वस्य गुणवत्ताव्याप्यस्य पारमार्थिके निर्गुणे ब्रह्मणि बाधितत्वादाह—साम्बशिवमिति । अम्बा सकलचराचरजगन्मातृत्वेन श्रुतिप्रसिद्धा परा प्रकृतिस्तया परिक्रीडमानमनन्तकल्याणगुणपरिपूर्णं शिवात्मकं ब्रह्मेत्यर्थः । शिवात्मकत्वोक्तिरुपास्यदेवतास्वरूपनिरूपणाय । नागेश इति नामनिर्देशः कीर्त्यनुवृत्त्यर्थः ।

**End:**

एवञ्च पदप्रयुक्त एव गुरुलघुभावो मुख्यत्वात् प्राचुर्येण विचार्यते। मात्राप्रयुक्तस्तु तदपेक्षया स्वल्पफलत्वात् क्वचिद्विचार्यते, क्वचिन्न । एवञ्च पदलाघवरहितमात्रालाघवमकिञ्चित्करम्। पदलाघवं तु मात्रालाघवानुपहितमपि श्रेय एवेत्योतःश्यनीति सूत्रस्थयोर्भाष्यकैयटयोर्निष्कर्षः। तदेतत्प्रायेणेत्युपसंहरन्नुपाध्यायस्सूचयतीति सकलाभीष्टसिद्धिरित्याहुः ॥

काशीनाथकटाक्षेन्दोरेषा वाक्यार्थचन्द्रिका ।
समुल्लासयतां नित्यं सतां मानसकैरवम् ॥
यदत्र न्यूनमधिकं दुरुक्तं वापि किंचन ।
सर्वमेतत्समीकर्तुं सन्तस्सन्ति सहस्रशः ॥

**Colophon:**

इति श्रीमन्महाराजाधिराजश्रीमद्विजयरामगजपतिराजमहागजसार्वभौमसंस्थानपण्डितेन काशीनाथविद्वन्महोपाध्यायचरणकमलसेवासंप्राप्तविद्यावाहितेन भागवतोपनामकभास्करसूरितनूजन्मना हरिशर्मणा विरचिता वाक्यार्थचन्द्रिकाख्या परिभाषेन्दुशेखरव्याख्या सम्पूर्तिमगमत् ॥

R. No. 1768.

Paper. 11 × 4 inches. Foll. 253. Lines, 13 in a page. Telugu. Good.

Purchased in 1915–16 from Garimalla Sōmayājulugāru of Kōtipalli, Gōdāvari district.

शब्दरत्नव्याख्या—चित्रप्रभा.

ŚABDARATNAVYĀKHYĀ: CITRAPRABHĀ.

Foll. 1*b*—236*a*. Foll. 1*a*, 149*b*, 207*b*, 214*b* and 236*b* are left blank.

A commentary on the Śabdaratna or Laghuśabdaratna of Haridikṣita, which work is described under No. 1403 of the D.C.S. MSS., Vol. III. The commentary is called Citraprabhā and its author is Hariśarman, the same as the author of Vākyārthacandrikā described above. He here mentions Ānandagajapati as his patron.

Complete.

**Beginning:**

य इदं श्रुतिगोचरो जगन्निखिलं भासयति स्वशक्तिभिः ।
स जयत्यपृथक्स्थितार्थकः परमे व्योमनि वाचको विभुः ॥
जयतु महाराजेन्द्रः श्रीमानानन्दगजपतिमहीन्द्रः ।
अयमस्तु मम निबन्धस्तत्कीर्तिसुधांशुबलवदनुबन्धः ॥
श्रीकाशिनाथगुरुवरकारुण्यमयेन परिकरेण हरिः ।
वितनोति शब्दरत्नव्याख्यां चित्रप्रभाभिख्याम् ॥

विघ्नविघातादिविविधफलसम्पत्तये कृतमिष्टदेवताप्रशंसालक्षणं मङ्गलमार्ष सम्प्रदायाविच्छित्तये निबध्नाति—शेषविभूषणमिति । तद्गुणसंविज्ञानो(न)बहुव्रीहिलब्धायाः शेषस्तुतेः प्रयोजनं दर्शयति—शेषाशेषेति । महाभाष्यगूढार्थज्ञानलाभायेति तदर्थः । तस्य च प्रकृतग्रन्थरचनायामुपजीव्यत्वादावश्यकता स्पष्टैव । सकलमिति । निखिलाभीष्टप्रदाननिपुणायाः परमेश्वरकृपादृष्टेर्विघ्ननिवारणं न किञ्चिदिति भावः । एतेन ग्रन्थादावभीष्टतमस्य विघ्नविघातस्य मुख्यसाधनं विघ्नराजप्रशंसनमुपेक्ष्य स्वर्गमोक्षादिसाधनमप्यन्यदेवताप्रशंसनमनुपयुक्तमित्यपास्तम् । कर्मधञन्तस्य वीप्सायां द्विरुक्तावर्थसाङ्कर्त्यहानिरित्याह—णमुलन्तमिति । कार्यब्रह्मेति ।

**End:**

ननु प्रसितशब्दोऽयं यदि षिङ् बन्धन इत्यतो निष्ठायां निष्पन्नस्तदा बद्ध इत्यर्थः । यदि तु षोऽन्तकर्मणीत्यतो निष्ठायां तदा नष्ट इत्यर्थः इति कुतोऽऽसौ तत्परार्थकत्वनियम इत्यत आह—रूढत्वादिति । समुदायशक्तिजन्यपदार्थो-

पस्थितः(ते)रवयवजन्यपदार्थबोधप्रतिबन्धकत्वात्। तदुच्यते—योगाद्रूढिर्बलीयसीत्यभियुक्तैः इत्याशयः। अयं च न्यायो वक्तृतात्पर्यानुमापकसामग्र्यन्तरासत्त्वे रूढेः प्राबल्यबोधकः। तत्सत्त्वे तु तथाविधतात्पर्यविषयो यौगिकोऽप्यर्थो बोद्धृबोधोपयोगी, वक्तृतात्पर्यगोचरपदार्थविषयकबोधेनैव प्रवृत्तिनिवृत्त्यन्यतरात्मकाभीष्टप्रयोजनसिद्धेरिति सर्वमनवद्यमित्याहुः ॥

जयतु प्रथितप्रतापकीर्त्योर्निधिरानन्दमहीन्द्रसार्वभौमः।
अयमस्य विभोः क्रियानिबन्धः श्रियमायुर्जयमुच्चकैश्च कीर्तिः(म्) ॥
श्रीकाशिनाथगुरुवर्यकृपाकटाक्षसञ्जातधीविभवशाणकृतोरुयत्ने।
चित्रप्रभाऽजनि घने लघुशब्दरत्ने सेयं चिराय तनुतां विदुषां विनोदम् ॥

**Colophon:**

इति श्रीमद्राजाधिराजश्रीमदानन्दगजपतिराजसंस्थानपण्डितेन श्रीमत्काशिनाथविद्वन्महोपाध्यायचरणकमलसेवासंप्राप्तविद्याविशेषोपहितेन भागवतोपनामकभास्करसूरितनूजन्मना हरिशर्मणा विरचिता चित्रप्रभाख्या शब्दरत्नव्याख्या सम्पूर्तिमगमत् ॥

Foll. 237 to 251*a*, 252*a* and 253*a* contain a few passages of the Citraprabhā dealing with Pañcamīvibhakti complete and portions of the Ṣaṣṭhī-Dvitīyā- and Prathamā-vibhaktis. Foll. 242*b*, 251*b* and 253*b* are left blank.

---

R. No. **1769.**

Palm-leaf. $16\frac{1}{4} \times 1\frac{1}{2}$ inches. Foll. 42. Lines, 9 in a page. Telugu. Good.

Purchased in 1915-16 from E. Śrīnivāsācāryulugāru of Gollaprōlu, Pithāpuram.

**भगवद्गीताव्याख्या—श्रीनिवासकृपा.**

BHAGAVADGĪTĀVYĀKHYĀ: ŚRINIVĀSAKṚPĀ.

A brief commentary on the Bhagavadgītā, which commentary is stated to contain the essence of the Yatirāja or Rāmānujācārya's commentary on the Bhagavdgītā. For further particulars, see R. No. 1857(*d*).

Contains Adhyāyas 7 to 12 only complete and a few lines in the 13th Adhyāya.

**Beginning:**

एवं पूर्वषट्केन परमपुरुषप्राप्त्युपायभूततदुपासनाङ्गभूतमात्मयाथात्म्यानुसन्धानपूर्वककर्तृत्वफलाभिसन्धिरहितकर्मानुष्ठानसाध्यं प्राप्तुः प्रत्यगात्मनो दर्शन-

मुक्तम् । इदानीं मध्यमेन षट्केनाङ्गीभूतां परविद्यां स्मृतिसन्ततिप्रत्यक्षभक्तिरूपापन्नामुपदेक्ष्यन् आदौ तद्विषयभूतं परमात्मस्वरूपं निरूपयन् श्रीभगवानुवाच । तत्र प्रथमं श्रोतव्यविषयस्यादृष्टचरत्वात् श्रोतुरवधानं विदधाति—

मय्यासक्तमनाः पार्थ योगं युञ्जन् मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥

हे पार्थ मदाश्रयः अहमेवाश्रयो धारको यस्य सः अत्यर्थमप्रियत्वेन मदनुभवेन विना विशीर्यमाणः कार्याक्षम इति यावत् । अत एव मयि विषये योगं मद्विषयानुभवम् ।

* * * *

**Colophon :**

इति श्रीभगवद्गीताभाष्यार्थसङ्ग्रहे सप्तमोऽध्यायः ॥

**End :**

विविक्तात्मनिष्ठात् स्वभक्तियोगनिष्ठस्य श्रैष्ठ्यं प्रतिपादयन्नुपसंहरति—

ये तु धर्मामृतमिदं यथोक्तं पर्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥

ये तु पूर्वोक्तविविक्तात्मनिष्ठयोगनिष्ठविलक्षणाः श्रद्दधानाः श्रद्धावन्तः मद्भोग्यमिदं मदुपासनं यथोक्तं मत्कर्मकृत् इत्यादिप्रकारेण पर्युपासते सेवन्ते, अनुतिष्ठन्तीत्यर्थः । ते भक्ताः भक्तियोगनिष्ठाः अतीव अत्यर्थं प्रियाः, नत्वक्षरयोगिवत् प्रियत्वमात्रमिति भावः । अत एव पूर्वमपि "उदारास्सर्व एवैते" इत्यैश्वर्यकैवल्यार्थिनां प्रियत्वमात्रमुक्त्वा "ज्ञानी त्वात्मैव मे मतम्" इति परमप्रियत्वमुक्तवानिति मन्तव्यम् । अनेन "मय्यावेश्य मनो ये माम्" इत्यध्यायादावुक्त एव भगवद्योगः पूर्वषट्कप्रधानार्थतया चोपसंहृत इत्यनुसन्धेयम् ॥

**Colophon :**

इति श्रीभगवद्गीताभाष्यार्थसङ्ग्रहे द्वादशोऽध्यायः ॥

प्रथमषट्के शास्त्रावतरणोपोद्घातभूतपार्थगतास्थानस्नेहकारुण्यादिनिवृत्तिहेतुभूतं भगवत्प्राप्त्युपायभूतभक्तियोगाङ्गभूतमात्मयाथात्म्यानुसन्धानपूर्वककर्मयोगसाध्यं प्राप्तुः प्रत्यगात्मनो दर्शनं सपरिकरमुक्तम् । द्वितीयषट्के तदङ्गिभूतो भगवत्प्राप्त्युपायभक्तियोगस्सपरिकरः प्रतिपादितः । इदानीं तृतीयषट्के षट्कद्वयोदितमर्थजातम्.

## R. No. 1770.

Palm-leaf. $14\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 53. Lines, 9 in a page. Telugu.

Purchased in 1915–16 from E. Śrīnivāsācāryulugāru of Gollaprōlu, Pithāpuram.

(*a*) वासवदत्ता.
VĀSAVADATTĀ.

Foll. 1*a*—24*b*.

By Subandhu. Same work as that described under R. No. 734(*a*) *ante*.

Complete.

---

(*b*) वासवदत्ताविवरणम्.
VĀSAVADATTĀVIVARAṆAM.

Foll. 25*a*—49*b*.

Same work as that described under R. No. 821(*b*) *ante*.

Complete.

Fol. 50 is left blank. Foll. 51 to 53 contain 39 stanzas of the Mahānāṭaka.

---

## R. No. 1771.

Palm-leaf. $15\frac{3}{4} \times 1\frac{1}{2}$ inches. Foll. 60. Lines, 7 in a page. Telugu. Good.

Purchased in 1915–16 from E. Śrīnivāsācāryulugāru of Gollaprōlu, Pithāpuram.

(*a*) मेघसंदेशः.
MĒGHASANDĒŚAḤ.

Foll. 1*a*—5*b*.

A well known poem of Kālidāsa.

Contains the Uttarabhāga only.

---

(*b*) मेघसंदेशव्याख्या—संजीवनी.
MĒGHASANDĒŚAVYĀKHYĀ: SAṀJĪVANĪ.

Foll. 6*a*—10*b*.

A commentary on the Mēghasandēśa of Kālidāsa: by Mallināṭha.

Contains the Uttarabhāga incomplete.

---

(*c*) यतिराजविंशतिः.
YATIRĀJAVIṀŚATIḤ.

Fol. 11.

By Saumyajāmātṛmuni. Same work as that described under R. No. 173(*f*) *ante*.

Complete.

(*d*) यतिराजविंशतिव्याख्या.

YATIRĀJAVIṀŚATIVYĀKHYĀ.

Foll. 12*a*—21*b*.

A commentary on the work described above. The name of the commentator is not stated.

Complete.

**Beginning:**

यः स्तुतिं यतिपतेः(ति)प्रसादनीं व्याजहार यतिराजविंशतिम् ।
तं प्रपन्नजनचातकाम्बुदं नौमि सौम्यवरयोगिपुङ्गवम् ॥

यः वरमुनिः यतिपतिप्रसादनीं यतीनां पतिर्यतिपतिः तं प्रसादयत्यनुग्राहयतीति यतिपतिप्रसादनी ताम्, यतिपतिकर्तृकानुसन्धातृविषयानुग्रहजननीम् । यतिराजविंशतिं, यतिराजस्य विंशतिः यतिराजविषयकविंशतिसङ्ख्याकश्लोकयुक्तां तां स्तुतिं स्तोत्रं व्याजहार उक्तवान् तं स्वकृतस्तोत्रानुसन्धानद्वारा सर्वचेतनोज्जीवनरूपमहोपकारिणम् ।

**End:**

अङ्गीकारहेतुमाह—अज्ञोऽयमिति । अयं जनः अज्ञः ज्ञानरहितः कृत्याकृत्यविवेकशून्यः । आत्मगुणलेशविवर्जितः आत्मनः गुणा ज्ञानभक्त्याद्याः तेषां लवः लेशः तेन विवर्जितश्च रहितोऽपि भवति । तस्मादुपायान्तरशून्यत्वादनन्यशरणः त्वद्व्यतिरेकरक्षकान्तर(र)हितः । अयं मया अवश्यं रक्षणीय इति मत्वा अनुसन्धाय इदं विज्ञापनं अङ्गीकुरुष्वेत्यर्थः ॥

---

(*e*) वरदराजस्तवव्याख्या.

VARADARĀJASTAVAVYĀKHYĀ.

Foll. 22*a*—55*b*.

A brief commentary on the Varadarājastava of Śrīvatsāṅkamiśra, which work has been described under R.No. 175(*h*) *ante*: by Rāmānuja-Vipaścit, a pupil of Vēṅkaṭācārya.

Complete.

**Beginning:**

हस्त्यद्रीशस्तोत्रमध्यात्मगर्भं पूर्वाचार्यैर्व्याकृतं विस्तरेण ।
श्रीवत्साङ्कं लक्ष्मणार्यं च नत्वा सङ्क्षिप्याहं व्याकरोमि स्वशक्त्या ॥

अखिलहेयप्रत्यनीककल्याणगुणैकतानं(नं) स्वेतरसमस्तवस्तुविलक्षणं सकलजगत्कारणं परव्यूहविभवार्चान्तर्यामिरूपेण पञ्चधा च स्थितं चर्तुमुखमखहविर्भा-

गाङ्गीकारार्थं वेगवतीतीरे काञ्च्यां पुण्यकोट्यां सत्यव्रतक्षेत्रे हस्तिशैलशिखरेऽवतीर्णमद्यापि पुत्रनेत्रक्षेत्रधनधान्यादिवरप्रदानेन प्रकटीकृतेश्वरभावं वरदराजमधिकृत्य मुमुक्षुभिः सर्वदानुसन्धेयमर्थपञ्चकं चानुसन्दधत् श्रीवत्साङ्कमिश्रः सकलजगदुज्जीवनार्थं स्वोज्जीवनार्थं च स्तोत्रं[च]प्रवर्तयामास । तत्रामी पञ्चार्थाः, प्राप्यं प्राप्ता प्राप्त्युपायः फलं विरोधि चेति ।

प्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः ।
प्राप्त्युपायः फलप्राप्तिः तथा प्राप्तिविरोधि च ॥

इति ।

* * * *

रागद्वेषभगवदपचारादयः प्राप्तिविरोधिन इति । एवं स्थिते प्रथमं हस्तिगिरिमाहात्म्यमनुसन्दधानः प्राप्यदशापन्नं वरदराजमभिष्टौति—(स्वस्तीति) ।

**End:**

भक्तजनैरिति प्रपन्नस्याप्युपलक्षणम् । अथवा भक्तजनैरचिन्त्यं स्वेतरविसदृशतया चिन्तयितुमशक्यम्, अतएवात्यद्भुतमत्याश्चर्यम् । अप्रतर्कणं तर्कागोचरम् । पद्यत इति पदं स्थानं स्वरूपं वा कथं प्राप्नुयाम् । त्वत्कृपामन्तरेण कथं प्राप्नुयामिति ॥

वेङ्कटाचार्यशिष्येण रामानुजविपश्चिता ।
हस्त्यधीशस्तुतेर्व्याख्या यथामति विनिर्मिता ॥

**Colophon:**

वरदराजस्तवव्याख्यानं संपूर्णम् ॥

Foll. 56*a* to 57*a* contain a few stanzas of Jyōtiṣaviṣaya. Foll. 40*b* and 57*b* to 60*b* are left blank.

---

## R. No. 1772.

Palm-leaf. 16 × 1¼ inches. Foll. 129. Lines, 7 in a page. Telugu. Much injured.

Purchased in 1915–16 from E. Śrīnivāsācāryulugāru of Gollaprōlu, Pithāpuram.

रामायणव्याख्या—सुबोधिनी.

RĀMĀYAṆAVYĀKHYĀ: SUBŌDHINĪ.

A commentary on the Vālmīkirāmāyaṇa: by Abhinavarāmabhadrāśrama, a disciple of Raghūttamāśrama.

Contains the Ayōdhyākāṇḍa only complete.

**Beginning:**

सीतासमेतं श्रीरामं भरतं पङ्कजेक्षणम् ।
लक्ष्मणं लक्ष्मणेनापि शत्रुघ्नं च नमाम्यहम् ॥

बालकाण्डे भगवतः श्रीरामभद्रस्यावतारमुक्त्वा ताटकावधादितः चरित्रमुपवर्णितम् । अथायोध्याकाण्डे श्रीरामचन्द्रस्य पितृवाक्यपरिपालनादि चरित्रं वर्ण्यते—गच्छता मातुलकुलमिति । मातुलकुलं मातुलगृहं गच्छता भरतेन । नित्यशत्रुघ्नः कामादिजेता । अनघः वैषम्यरहितः । प्रीतिपुरस्कृतः प्रीत्या स्नेहेन संमानितः । तदा स्वगमनकाले नीतः प्रापितः । मातुलगृहावासजनितसौख्यमनेन विनाऽसत्कल्पमिति धिया नीत इत्यर्थः ।

**End:**

अलङ्कुरु आत्मानमिति शेषः । वसनाभरणस्रजां समाहारो वसनाभरणस्रजम् । तस्यामिति । अभिषिच्य स्नात्वा हुताग्निकान् कृताग्निहोत्रान् तापसानपृच्छच, अनुज्ञां लब्ध्वा स्थितवानिति शेषः । ताविति । तस्य वनस्य । तस्मिन् वने । सञ्चारं सञ्चरणप्रदेशम् । राक्षसैस्समभिद्रुतं सम्यगुपद्रुतम् । ऊचुरिति सम्बन्धः । रक्षांसीति । व्याघ्राः हिंस्रपशवः । क्षमं युक्तम् । —स्त्रीति ऋषिभिरुक्तप्रकारेणैव । कृतस्वस्त्ययनः कृतमङ्गलाशीर्वादः ॥

**Colophon:**

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरघूत्तमाश्रमपूज्यपादशिष्यणाभिनवश्रीरामभद्राश्रमेण विरचितायां रामायणसुबोधिन्यामयोध्याकाण्डव्याख्यायामेकोनविंशत्युत्तरशततमः सर्गः ॥

अयोध्याकाण्डटीका समाप्ता ॥

---

R. No. **1773.**

Palm-leaf. 16⅛ × 1½ inches. Foll. 56. Lines, 8 in a page. Telugu. Slightly injured.

Presented in 1915-16 by E. Śrīnivāsācāryulugāru of Gollaprōlu, Pithāpuram.

**चित्रमीमांसा.**

CITRAMĪMĀMSĀ.

By Appayadīkṣita. Same work as that described under R. No. 822(*a*) *ante* and under No. 34 of M. Seshagiri Sastri's Report on the

Search for Sanskrit and Tamil MSS., No. 2, but with the addition of a few lines at the end as given below.

Breaks off in the Atiśayōktyalaṅkāra.

**End:**

तत्राप्रस्तुतविषयप्रतिपादकातिरिक्तस्य प्रस्तुतविषयप्रतिपादकस्याभावात् । न च कार्यकारणभावादिनिबन्धनाप्रस्तुतप्रशंसायामिव सारूप्यनिबन्धनाप्रस्तुतप्रशंसायामपि निबध्यमानादप्रस्तुतात् प्रस्तुतमप्यवगम्यते ।

* * * *

एवमपि यद्धेतुत्वं निबध्यते तत्प्रस्तुताप्रस्तुतयोरभेदाध्यवसायेनैव निर्वाह्यम् । अलङ्कारसर्वस्वकारादिभिश्च वाच्यासम्भवोदाहरणेषु तथैव निर्वाहः कृतः ।

---

R. No. 1774.

Palm-leaf. 16 × 1¼ inches. Foll. 37. Lines, 6 in a page. Telugu. Very much injured.

Presented in 1915-16 by E. Śrīnivāsācāryulugāru of Gollaprōlu, Pithāpuram.

(*a*) श्रुतिगीताव्याख्या— भागवततात्पर्यचन्द्रिका.

ŚRUTIGĪTĀVYĀKHYĀ: BHĀGAVATATĀTPARYA-CANDRIKĀ.

Foll. 1*a*—31*a*.

Same work as that described under No. 2572 of the D.C.S. MSS., Vol. IV, Part II. A commentary on the Śrutigītā, which forms the 87th Adhyāya of the tenth Skandha of the Śrī-Bhāgavata: by Vēṅkaṭakṛṣṇa.

Complete.

**Beginning:**

विष्णुरातः विष्णुना भगवता रातः दत्तः द्रौण्यस्त्रविप्लुष्टाङ्गत्वेऽपि

* * * *

सामान्यराहित्यं परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च, समस्तकल्याणगुणात्मकोऽसौ, विष्णोर्नुकं वीर्याणि प्रवोचं . . . . .

यो वा अनन्तस्य गुणाननन्तानुक्रमिष्येत्स तु बालबुद्धिः ।
रजांसि भूमेर्गणयेत्कथञ्चित्कालेन नैवाखिलशक्तिधाम्नः ॥ इति

* * * *

परं ब्रह्मेति श्रुतेः । साक्षात् कथं चरन्ति मुख्यवृत्त्या कथं वर्तन्ते । ब्रह्मणि श्रुतीनां गौणवृत्त्या वर्तने वेदैश्च सर्वैरहमेव वेद्यः, शास्त्रयोनित्वादित्यादिप्रमाणविरोधादिति प्रश्नः । अत्रोत्तरं श्रीशुक आह—

बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः ॥
मात्रार्थं च भवार्थं च आत्मने कल्पनाय च ।

तत्प्रश्नस्य सर्वोपनिषत्सारमुद्घट्टोत्तरं वक्तव्यम् । तच्चानुपह(नवहि)तचित्तैः दुर्जयैः(ज्ञेयम्) । चञ्चलं हि मनः कृष्णेत्याद्युपदर्शितरीत्या मनसो दुर्ग्रहत्वान्मनआदिना सृष्टिश्च सूक्ष्मार्थपरिज्ञानार्थमेव भगवता कृतेत्याह—बुद्धीति । प्रभुः निखिलजगत्प्रभुः ।

**End:**

तत्र प्रकृतिपुरुषनियन्तृत्वं यं सम्पद्य जहात्यजामि . . . . . प्रदत्त्वेमभिधायैतादृशवैभवविशिष्टं नारायणं निरन्तरं ध्यायेदित्युक्त्वा सर्वासु श्रुतिषु निखिलजगत्कारणत्वनिखिलचेतनाचेतननिय . . . . त्वादिकल्याणगुणविशिष्टतया प्रतिपादितः श्रीमन्नारायण एवेति प्रतिपादितं भवति ॥

**Colophon:**

इति श्रीवेङ्कटकृष्णविरचितायां श्रीभागवततात्पर्य(चन्द्रिकायां सप्ताशीति)तमोऽध्यायः ॥

---

(*b*) मन्त्रकल्पः.

MANTRAKALPAḤ.

Foll. 32*a*—35*a*. Foll. 31*b* and 35*b* are left blank.

Similar to the work described under No. 7995 of the D.C.S. MSS., Vol XV.

Incomplete.

**Beginning:**

वश्याकर्षणसन्तापहोमे स्वाहां प्रयोजयेत ।
क्रोधोपशमके शान्तौ पूजने च नमो वदेत ॥
वौषट् संमोहनोद्दीपपुष्टिमृत्युञ्जयेषु च ।
हुंकारं प्रीतिपं(फट्कृतिं) चैव भेदने मरणे तथा ॥

**End:**

मारणं चैव विज्ञेयं त्रीणि संपूर्णमाचरेत् ।
खे बीजं साध्यनामात्तु एकैकं पल्लवं तथा ॥

सहस्रं पल्लवं चैव जपेन्मारणकर्मणि ।
ए(कै)कं मन्त्रवर्णन्तु साध्यनामाक्षरैककम् ॥
फट्कारं (च) तथा प्रोक्तं हुङ्कारं च तदा परम् ।
त्रिसहस्रजपादेवमुच्चाटनमुदीरितम् ॥

Foll. 36*a*—37*a* contain Hayagrīvaikākṣarīmantra. Fol. 37*b* is left blank.

---

R. No. 1775.

Palm-leaf. 14½ × 1¾ inches. Foll. 83. Lines, 6 in a page. Telugu. Good.

Purchased in 1915–16 from E. Śrīnivāsācāryulugāru of Gollaprolu, Pithāpuram.

शरणागतरत्नमालिका.

ŚARAṆĀGATARATNAMĀLIKĀ.

सर्वदोषोद्धारेण निरूपितस्य ब्रह्मणि अभिन्ननिमित्तोपादानत्वादेः प्रधानादिवादानामाभासत्वानिरूपणे कदाचिच्छैथिल्यं भवेत् । तन्माभूदित्येवमर्थं प्रधा-

नादिवादनिराकरणप्रधानः द्वितीयः पाद आरभ्यते । रचनानुपपत्तेश्च नानुमानम ।

**End:**

सोऽर्जुनेति गीतास्थं भगवद्वचनमेतान्यन्यानि च वचनानि विष्णौ प्रसक्तापरभावगमकानां तामसक्रीडारूपत्वं व्यवस्थाप्य तस्मिन् परब्रह्मत्वं स्थिरीकुर्वन्ति । न ह्येवं शिवादिदेवतान्तरस्य प्रसक्तापकर्षवारकवचनं भारते दृश्यते । तस्मात् विष्णुपरत्वपरं भारतमिति ॥

**Colophon:**

द्वितीयपादः समाप्तः ॥

---

R. No. **1808.**

Palm-leaf. 10½ × 1¾ inches. Foll. 56. Lines, 6 in a page. Grantha. Good.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

(*a*) सामानाधिकरण्यवादः.

SĀMĀNĀDHIKARAṆYAVĀDAḤ.

Foll. 1*a*—5*a*. Fol. 5*b* is left blank.

By Anantārya. Same work as that described under R. No. 128(*b*) *ante*.

Wants the beginning; otherwise complete.

---

(*b*) शरीरवादः.

ŚARĪRAVĀDAḤ.

Foll. 6*a*—10*a*. Foll. 10*b* and 11 are left blank.

By Anantārya. Same work as that described under No. 5045 of the D.C.S. MSS., Vol. X.

Incomplete.

---

(*c*) शास्त्रैक्यभङ्गवादः.

ŚĀSTRAIKYABHAṄGAVĀDAḤ.

Foll. 12*a*—18*b*.

By Rāmasubrahmaṇya Śāstri of Tiruviśanallūr, Tanjore distrist.

Similar to the work described under No. 5051 of the D.C.S. MSS., Vol. X.

Wants the beginning.

**Beginning:**

ब्रह्मजिज्ञासा धर्मजिज्ञासानिरूपितैकशास्त्रचवती तत्सङ्गतत्वात्, तद्व्याख्येय-व्याख्यानरूपत्वात् तदुद्देश्यफलोद्देश्यकवृत्तिविषयत्वात् तदर्थतात्पर्यकतदुक्तन्त-दुक्तमित्यादिशैलीघटितत्वात्। यदेवं तदेवं धर्मजिज्ञासागतप्रथमद्वितीयाध्यायपादा-दिकमिति विशिष्टाद्वैतिनः ।

**End:**

तथाच प्रकरणतर्कादिशास्त्राद्योर्भेदेऽपि व्याकरणप्रमेयशब्दसाधुत्वाप्रमाप-कत्वादेकमेव । अत्राग्निहोत्रादिब्रह्मोपासनान्तरूपैकधर्मप्रतिपादकत्वेऽप्यन्त्यार्थ-सूत्रावृत्तिर्भेदक इति सिद्धं शास्त्राभिन्नत्वम् ॥

**Colophon:**

ऐकशास्त्रचवादस्समाप्तः ।

---

(*d*) आनन्तर्यवादः.

ĀNANTARYAVĀDAḤ.

Foll. 18*b*—23*a*.

A discussion as to the condition precedent required for beginning the enquiry into the nature of the Brahman, as intended in the word **अथ** occurring in the first Sūtra of the Brahmasūtra: by Mahāmahō-pādhyāya Rāmasubbā Śāstri.

Complete.

**Beginning:**

तेषु सत्सु धर्मजिज्ञासायाः प्रागूर्ध्वं च शक्यते ब्रह्म जिज्ञासितुं ज्ञातुञ्चेति भाष्यश्रीः । धर्मजिज्ञासायाः ब्रह्मजिज्ञासापूर्ववृत्तित्वनियमाभावेन न कर्मविचा-रानन्तर्यमथशब्दार्थ इति बोधयतीत्यद्वैतिनः । तत्र विशिष्टाद्वैतिनां प्रथमा-कक्ष्या ।

**End:**

अस्मदुक्तसम्भावनात्मकनित्यानित्यवस्तुविवेकः विचारात्पूर्वं सम्भवत्येव ॥

**Colophon:**

इति रामसुब्बाशास्त्रिरचितः आनन्तर्यार्थवादः ।

---

(*e*) अनुपनीतसन्न्यासभङ्गः.

ANUPANĪTASANNYĀSABHAṄGAḤ.

Foll. 23*b*—26*b*.

A condemnation of the view that a person who has not been invested with the sacred string is also eligible for becoming a

Sannyāsin just as a householder or a Brahmacārin, to whom the Upanayana has been performed: by Mahāmahōpādhyāya Rāmasubrahmaṇya Śāstri of Tiruviśanallūr, Tanjore district

Complete.

**Beginning:**

यदहरेव विरजेत्तदहरेव प्रव्रजेत्,

"यदा मनसि वैराग्यं जायते सर्ववस्तुषु ।
तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत् ॥

इति श्रुतिस्मृतिभ्यां संन्यासस्य वैराग्यमात्रहेतुकत्वावगमात् ब्रह्मचारिगृहस्थवनस्थानामिवानुपनीतस्यापि संन्यासेऽधिकार इति ।

विशिष्टाद्वैतिनां द्वितीया कक्ष्या—

**End:**

नापि गार्हस्थ्याद्याश्रमे संन्यासव्यवच्छेदार्थकः, गृहाद्वा वनाद्वेति तत्र संन्यासविधानात् । किन्त्वनुपनीतसंन्यासव्यवच्छेदा(र्थ एवेति)नानुपनीतसंन्यासे किञ्चित् प्रमाणमस्तीति सुस्थम् ॥

**Colophon:**

रामसुब्बाशास्त्रिविरचितः अनुपनीतसंन्यासभङ्गः ॥

---

(1) निर्विशेषवादः.

NIRVIŚĒṢAVĀDAḤ.

Foll. 27*a*—47*a*.

A hostile criticism of the view that the Brahman devoid of all qualities admits of investigation and that the Brahmasūtras relate to such Brahman: By Rāmasubrahmaṇya Śāstri.

Incomplete.

**Beginning:**

सगुणब्रह्मवादिनां प्रथमा कक्ष्या—

केन चिदंशेन केन चिद्धर्मेण वा ज्ञाते खलु जिज्ञासा। निर्विशेषे निरंशे च कथं जिज्ञासा । तथाच जिज्ञासासूत्रं न निर्विशेषब्रह्मवादिनां सङ्गच्छत इति ।

निर्गुणब्रह्मवादिनां द्वितीया कक्ष्या—

यद्विषयकं ज्ञानं संशयरूपं प्रथमं जायते तान्निर्णयाय तस्मिन् जिज्ञासेत्याभाणकः ।

**End:**

सदा पश्यन्ति सूरयः नित्यमुक्तविषयश्रुतिः छान्दोग्ये स + मे तस्मै मृदितकषायाय तमसः पारं दर्शयति भगवान् सनत्कुमार इति मुक्तियोग्यश्रुतिः।

(*g*) ओङ्कारवादार्थः.

ŌṄKĀRAVĀDĀRTHAḤ.

Foll. 47*b*—51*a*. Fol. 51*b* is left blank.

By Rāmasubrahmaṇya Śāstri. Similar to the work described under No. 4871 of the D.C.S. MSS., Vol. X.

Complete.

**Beginning :**

अस्तु वा ज्ञानेच्छाया अविधेयत्वात् जिज्ञासापदस्य विचारे लक्षणेति अत्र कर्तव्यपदाध्याहारः, सूत्रेषु सर्वेष्वाद्यन्तयोरोङ्काराध्याहारश्चाध्याह्रियमाणोङ्कारस्य ब्रह्मान्वय्योतत्वप्रतिपादकत्वम् । (ननु) सं यज्ञपतिराशिषेत्यादाविव साकाङ्क्षत्वात्कथमध्याहारः । कथं वैकदेशे ओतत्वान्वयः । आदौ प्रयोगेण तल्लाभे किमर्थमन्ते प्रयोगः । कथं तस्य जन्मादिसूत्रेष्वन्वय इति ।

**End :**

अनङ्गभूते ब्रह्मणि कथमोङ्कारार्थान्वयः । न चोपकारत्वात् ब्रह्मणोऽङ्गत्वमुपपन्नमिति वाच्यम्, उपकारत्वलक्षणशेषत्वस्य शेषः परार्थत्वादित्यत्र पूर्वतन्त्र एव निरस्तत्वादिति दिक् ॥

**Colophon :**

इत्योङ्कारवादार्थः सम्पूर्णः ॥

---

(*h*) प्रणवार्थनिर्णयः.

PRAṆAVĀRTHANIRṆAYAḤ.

Foll. 52*a*—56*b*

In this work the author, Rāmasubrahmaṇya Śāstri, purports to prove that the Praṇava denotes Viṣṇu and not any other god, such as Rudra or Brahman

Incomplete.

**Beginning :**

विष्णुरेवोङ्कारार्थः, न रुद्रादिः । दशोपनिषदन्तर्गतप्रश्नोपनिषदि यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीतेति परपुरुषशब्दिते नारायण ओङ्कारबोध्यत्वनिर्देशात ।

**End :**

रुद्रवाक्येन तच्छब्दप्रथमपुरुषाभ्यां च रुद्रादन्यं रुद्रादिसर्वान्तर्यामिणं नारायणमुपक्रमे प्रतिपाद्य यो वै रुद्रः स भगवान् यश्च ब्रह्मा तस्मै.

## R. No. 1809.

Palm-leaf. 16 × 1⅝ inches. Foll. 105. Lines, 10 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. N. Veṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

Fol. 1 is left blank.

शाब्दिकचिन्तामणिः.

ŚĀBDIKACINTĀMAṆIḤ.

Foll. 2*a*—105*b*. Fol. 51*b* is left blank.

By Gōpālakṛṣṇa Śāstri. Same work as that described under R. No. 143 *ante*.

Contains the Āhnikas five and six in the first Pāda of the first Adhyāya.

---

## R. No. 1810.

Palm-leaf. 17½ × 1⅝ inches. Foll. 49. Lines, 10 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

Foll. 19*b* and 43*b* are left blank.

(*a*) ब्रह्मसूत्रतत्त्वार्थविलासः.

BRAHMASŪTRATATTVĀRTHAVILĀSAḤ.

Foll. 1*a*—46*b*.

A commentary on the Brahmasūtras in accordance with the view that the individual soul is different from the Supreme Brahman, which is one of the two views explained by Śaṅkarācārya in his commentary thereon: by Rāmasubrahmaṇya Śāstrigaḷ of Tiruviśanallūr, Tanjore district, who explains the scope of his work in the introductory stanza.

Breaks off in the first Pāda of the second Adhyāya.

**Beginning:**

नत्वा श्रीशाङ्करं भाष्यं तदुक्तार्थ(र्थ)विचारतः ।
तदीयपक्षयोर्मध्ये भिदापक्षं लिखाम्यहम् ॥

द्वौ पक्षौ श्रीशाङ्करभाष्ये निरूपितौ—अभेदपक्षो भेदपक्षश्च । यत्पक्षे जीवब्रह्मभेदः कल्पितः औपाधिकश्च, तयोरभेदः स्वाभाविकः पारमार्थिकश्च, ब्रह्म च निर्गुणम्, ब्रह्मभिन्नं च कृत्स्नं जगत् मिथ्या ।

* * * *

भेदपक्षरहस्यमनुसन्धेयमित्यलम् । तस्मात् भाष्योक्तभेदपक्षमाश्रित्य ब्रह्मसूत्राणि व्याख्यास्यन्ते—

अथातो ब्रह्मजिज्ञासा ॥

आत्मा वारे द्रष्टव्यः श्रोतव्यो(मन्तव्यो)निदिध्यासितव्य इति वाक्यं विषयः। अथ, आचार्यादुपनिषदां ब्रह्मणि तात्पर्यनिर्णयानुकूलमानसव्यापाररूपाच्छ्रवणादनन्तरम्। अतः, श्रुतार्थस्य युक्तिभिः प्रतिष्ठापनरूपान्मननाद्धेतोः। ब्रह्मजिज्ञासा, ब्रह्मणो विष्णोः "नारायणपरं ब्रह्म तत्त्वं नारायणः परः" इति श्रुतेः। जिज्ञासा, इच्छाविषयज्ञानम्, निदिध्यासनमिति यावत् ।

* * * *

**Colophon:**

रामसुब्रह्मण्यशास्त्रिविरचिते श्रीब्रह्मसूत्रतत्त्वार्थविलासभाष्ये प्रथमाध्यायस्य स्पष्टब्रह्मलिङ्गवाक्यविचाराख्यः पादः समाप्तः ॥

**End:**

'विष्णुं क्रान्तं वासुदेवं विजानन् विप्रो विप्रत्वं गच्छते तत्त्वदर्शी' इति आनुशासनिकपर्वगतव्यासवचनं च विष्णोः क्षत्रियत्वेन क्षत्रियमात्रोपास्यत्वं वदन् भवान् पश्यतु ॥

**Colophon:**

साङ्गचतत्त्वच्छायापन्नवाक्यविचारश्चतुर्थः (पादः) समाप्तः॥

रामसुब्रह्मण्यशास्त्रिविरचिते ब्रह्मसूत्रतत्त्वार्थविलासभाष्ये प्रथमाध्यायः समाप्तः ॥

प्रथमाध्याये प्रत्यक्षानुमानाभ्यां दर्शनात् स्मृतेश्चेति सूत्रांशेन ब्रह्मणि वेदान्तार्थसमन्वयदार्ढ्यार्थमुपबृंहणतया मन्वादिस्मृतयो गृहीताः। तासां वेदान्तोपबृंहणत्वमयुक्तम्। प्रधाने जगत्कारणत्वपराध्यात्मशास्त्राख्यस्मृत्यनवकाशदोषप्रसङ्गात् ।

* * * *

तत्प्रतिषधसूचनेन जाग्रति तत्त्वंभावः सूच्यते। तदेतन्मध्ये सृष्ट्यधिकरणे-

---

(5) गीतोपनिषद्विलासः.

GĪTŌPANIṢADVILĀSAḤ.

Foll. 47*a*—49*b*.

A commentary interpreting and explaining the Bhagavadgītā in such a way as to lend support to the view that the individual soul is

really distinct from the Supreme Brahman: by Rāmasubrahmaṇya Śāstri of Tiruviśanallūr, Tanjore district.

Complete.

**Beginning:**

गीतोपनिषत् पारमार्थिकजीवब्रह्मभेदपरा। तथाहि —

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम् ॥

इत्युपक्रमे तयोः सर्वे वयं न भविष्याम इत्यनेन भेदस्य मोक्षदशायामपि सत्तावगमात्।

**End:**

तथाच अन्यत्सर्वं परित्यज्य सर्वैश्वर्यसम्पन्नः सर्वेश्वरः शम्भुः आकाशमध्यगः शिव एकाश्शिवङ्कर इति ध्येय इति वाक्यार्थस्य स्वारसिकत्वादितिशब्दः प्रकारवाची, न तु समाप्तिवाची, समाप्तार्थवशिखेति पदेनैव समाप्तेः कथितत्वात् ॥

**Colophon:**

गीतोपनिषद्विलासः समाप्तः ॥

---

R. No. **1811.**

Palm-leaf. $15\frac{3}{8} \times 1\frac{1}{8}$ inches. Foll. 39. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

**पूर्वोत्तरमीमांसावादनक्षत्रमालिका.**

PŪRVŌTTARAMĪMĀṂSĀVĀDANAKṢATRAMĀLIKĀ.

By Appayadīkṣita. Same work as that described under R. No. 1788 *ante*.

Contains the Vādas one to six complete, and the seventh incomplete.

१. मासाग्निहोत्रवादः.
२. हिंसिधात्वर्थवादः.
३. गुणगुण्येकशक्तिवादः.
४. गुणगुण्यनेकशक्तिवादः.
५. गुणगुण्येकशक्तिपक्षश्रेयस्त्ववादः.
६. गुणपक्षनिरासवादः.
७. अरुणैकहायनीसामानाधिकरण्यवादः.

**Beginning:**

उद्धाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः॥

तन्त्रान्तरेष्वनुपपादितमर्थजातं यत्सिद्धवद्व्यवहृतं ध्वनितं च भाष्ये ।
तस्य प्रसाधनमिह क्रियते नयोक्त्या बालप्रियेण मृदुवादकथापथेन ॥

शेषीभवदपि भाष्ये सुमहति सूत्रेऽग्निहोत्रमिव ।
स्वातन्त्र्येण प्रकरणमर्थप्रतिपादने समर्थमिदम् ॥

कुण्डपायिनामयनाख्ये सत्रे श्रूयते—

उपसद्भिश्चरित्वा मासमग्निहोत्रं जुह्वति तन्मासाग्निहोत्रं नैत्यमिकाग्निहोत्राद्विद्यते न वेति जरन्मीमांसकानुसारिणः । सिद्धान्तिनश्च विप्रतिपत्त्या संशये सति सिद्धान्तानुसारिणो वादिनः प्रथमा कक्ष्या ॥

For the end see under the work described under R. No. 1788 *ante*.

---

R. No. **1812.**

Palm-leaf. 15½ × 1¼ inches. Foll. 72. Lines, 5 in a page. Grantha. Slightly injured.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

Foll. 1—13 contain some witty stanzas.

(*a*) ललितास्तवरत्नम्.
LALITĀSTAVARATNAM.

Foll. 14*a*—35*b*.

Same work as that described under No. 10828 of the D.C.S. MSS., Vol. XIX.

Complete.

---

(*b*) शिवकर्णामृतम्.
ŚIVAKARṆĀMṚTAM.

Foll. 36*a*—62*b*. Fol. 63 is left blank.

By Appayadīkṣita. Same work as that described under R. No. 110 *ante*.

Complete.

Foll. 64*a*—65*a* contain some stanzas of Saundaryalaharī. Fol. 65*b* is left blank. Foll. 66*a*—70*a* contain some witty stanzas. Foll. 70*b* is left blank. Foll. 71*a*—71*b* contain a few sentences of Bagalāmukhīmālāmantra. Fol. 72 is left blank.

R. No. **1813.**

Palm-leaf. 15½ × 1¼ inches. Foll. 30. Lines, 8 in a page. Grantha. Injured.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

वेदान्तकल्पलतिका.

VĒDĀNTAKALPALATIKĀ

This work condemns the Nyāya, the Vaiśēṣika, the Śāṅkhya, the Mīmāṁsā and the Yōga systems of philosophy as well as the Śaivism, and explains the Vēdānta system of Vyāsa, Śaṅkara and Surēśvara, and lays down the means of obtaining salvation: by Madhusūdana.

Complete.

**Beginning:**

मीमांसया कपटतो भुजगाम्बयेव स्वाधीनतामुपनिषद्वनितेव नीता ।
येनोद्धृतामृतफलेन गरुत्मतेव तस्मै नमो भगवतेऽद्भुतशङ्कराय ॥

दुरापः शास्त्रार्थो नियतयतमानैरपि बुधै-
र्न संप्रातुं शक्यो मलिनमतिना यद्यपि मया ।
तथापि श्रीविश्वेश्वरचरणपङ्केरुहसुधा-
सुधाराभिस्सिक्तो न कथमपि रिक्तोऽस्मि भविता ॥

सत्तर्कपुष्पनिकरैः परमात्मबोधनिष्ठाफलेन दधती परमां विभूतिम् ।
शारीरकार्थसुरशाखिगता सुधीभिर्वेदान्तकल्पलतिकेयमुपासनीया ॥
निर्धूय जैमिनिपतञ्जलिगौतमोक्तीः काणादकापिलशिवादिमतानि चाहम् ।
श्रीव्यासशङ्करसुरेश्वरसूत्रितार्थशुद्धिं व्यनज्मि विशदां मितभाषितेन ॥

मुमुक्षूणामनुष्ठेयविक्षेपविनिवृत्तये ।
मोक्षं ससाधनं वच्मि परपक्षनिरासतः ॥

अथ मोक्षे तत्साधने च विप्रतिपद्यन्ते विपश्चितः । तत्र लोकायतिकास्तावत् प्रकृतलोकानुसारिणो मनुष्यत्वादिविशिष्टभूतचतुष्टयसङ्घात एव चैतन्यं मन्यमाना नानागमपुराणानुमानान्तरप्रसिद्धमपि देहादिव्यतिरिक्तं चैतन्यं बन्धमोक्षभागिनमशुद्धबुद्धयोऽपलपन्ति नाप्रत्यक्षं प्रमाणमिति वदन्तः ।

**End:**

तत्सिद्धमात्मैवाविद्यानिवृत्त्युपलक्षितो मोक्षः । तत्साधनं च वेदान्तवाक्य-

. . . . . कान्यानुपरक्तब्रह्मार्थैक्यसाक्षात्कार एव श्रवणाद्यपनीतप्रतिबन्धः सन्निति सर्वं समञ्जसम् ॥

न्यायैर्निर्धूय दुष्टानिह कपिलकणादाक्षपादादिवादा-
नादायादुष्टमेकं श्रुतिमितमसृतद्वारमद्वैतवादम् ।
वेदान्तैकप्रमेयं परमसुखमयं ज्ञानमज्ञानशून्यं
मोक्षं व्याचक्षते यं कमपि सुकृतिनः सोऽहमेवास्मि पूर्णः ॥

**Colophon:**

इति श्रीवेदान्तकल्पलतिकायां मधुसूदनकृतौ मुक्तिपर्यायः ॥ समाप्तश्चायं ग्रन्थः ॥

---

## R. No. 1814.

Palm-leaf. 17½ × 1⅝ inches. Foll. 48. Lines, 6 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

(*a*) पञ्चरुद्रतात्पर्यसङ्ग्रहः.

PAÑCARUDRATĀTPARYASAṄGRAHAḤ.

Foll. 1*a*—6*a*.

Herein it is stated briefly that the expressions Śiva and Rudra in the Atharvaśikhōpaniṣad do not denote God Śiva, but denote God Viṣṇu. The work is by Rāmasubrahmaṇya Śāstri.

Complete.

**Beginning:**

किं ध्यानं को वा ध्याता कश्च ध्येय इत्युपक्रम्य ध्यानं निरूप्य ध्याता ध्याता रुद्र इत्यन्तेन ध्यातारं निरूप्य प्राणं सह करणैर्नादान्ते मनसि संप्रतिष्ठाप्य ध्यायीत ध्यानं प्रध्यायितव्यम् । इदं सर्वं ब्रह्मविष्णुरुद्रेन्द्रास्ते सर्वे संप्रसूयन्ते । सर्वाणि चेन्द्रियाणि सह भूतैः न कारणम् ।

**End:**

श्रीबादरायणीयशारीरकशास्त्रोक्तरीत्या श्रीहरिज्ञानभजनमेव मोक्षचक्षुः । श्रीभगवान् हरिरेव मुक्तप्राप्यः । 'द्वैपायनः स्वयं चक्षुः कृष्णस्तेऽस्तु परायणः' इत्यानुशासनिक एकपञ्चाशदुद्विशततमाध्यायवचनात् ॥

**Colophon:**

श्रीरामसुब्बाशास्त्रिभिर्विरचितः पञ्चरुद्रतात्पर्यसङ्ग्रहः समाप्तः ॥

(*b*) शास्त्रैक्यभङ्गवादः.

ŚĀSTRAIKYABHAṄGAVĀDAḤ.

Foll. 6*b*—9*a*.

By Rāmasubbā Śāstri. Same work as that described under R. No. 1808(*c*) *ante*.

Complete.

**Colophon:**

रामसुब्बाशास्त्रिभिर्विरचितः शास्त्रैक्यभङ्गवादः समाप्तः ॥

---

(*c*) आनन्तर्यवादः.

ĀNANTARYAVĀDAḤ.

Foll. 9*a*—11*a*.

By Rāmasubbā Śāstri. Same work as that described under R. No. 1808(*d*) *ante*.

Complete.

**Colophon:**

रामसुब्बाशास्त्रिभिर्विरचितः आनन्तर्यवादः सम्पूर्णः ।

---

(*d*) अनुपनीतसंन्यासभङ्गवादः.

ANUPANĪTASANNYASABHAṄGAVĀDAḤ.

Foll. 11*a*—12*b*.

By Rāmasubbā Śāstri. Same work as that described under R. No. 1808(*e*) *ante* with the sentence अद्वैतिनां प्रथमा कक्ष्या in the beginning.

Complete.

**Colophon:**

रामसुब्बाशास्त्रिभिर्विरचितः अनुपनीतसंन्यासभङ्गवादः समाप्तः ॥

---

(*e*) निर्विशेषवादः.

NIRVIŚĒṢAVĀDAḤ.

Foll. 12*b*—17*b*. Fol. 14*b* is left blank.

By Rāmasubbā Śāstri. Same work as that described under R. No. 1808(*f*) *ante*, wherein see for the beginning.

Complete.

**End:**

तस्मात् सगुणब्रह्मज्ञानं मायातीतलोकानुभाव्यपूर्णानन्दमुक्तिसाधनमिति ॥

**Colophon:**

श्रीरामसुब्बाशास्त्रिविरचितो निर्विशेषवादः समाप्तः ॥

(*f*) वेदान्तसूत्रमुक्तावलीटीका—तत्त्वार्थविबोधनम्.

VĒDĀNTASŪTRAMUKTĀVALĪṬĪKĀ: TATTVĀRTHAVIBŌDHANAM.

Foll. 18*a*—29*b*.

A gloss on the Brahmānandasarasvatī's Vēdāntasūtramuktāvali, which is a commentary on the Brahmasūtras and which is described under R. No. 1386 *ante*. In this work the author Rāmasubrahmaṇya Śāstri explains that God Nārāyaṇa alone is denoted in and forms the scope and aim of the Brahmasūtras.

Breaks off in the third Pāda of the first Adhyāya.

**Beginning:**

श्रीरामपादाब्जनिमग्नमानसः श्रीरामसुब्राख्यसुधीः सतां मुदे ।

श्रीसूत्रमुक्तावलिग्रन्थटीकां करोमि तत्त्वार्थविबोधनाख्याम् ॥

मङ्गलपद्ये श्रीमन्नारायणप्रभोरिति पदेन ब्रह्मसूत्राख्यशास्त्रप्रतिपाद्यत्वं श्रीमन्नारायणस्येति सूचितम् ।

अथातो ब्रह्मजिज्ञासा ॥ इदं तु बाध्यम्—यद्यपि हेत्वानन्तर्यमप्यथशब्दार्थो दृष्टः, अथैष ज्योतिरित्यादाविति नाथशब्दमात्रेणानन्तर्यप्रतियोगिनो नित्यानित्यवस्तुविवेकादेः हेतुत्वं सिध्यति ।

**End:**

अक्षरमम्बरान्तधृतेः ॥

विलिगमकाभावादिति । तत्पुरुषे पूर्वपदस्येव बहुव्रीहावुत्तरपदलक्षणया पक्षद्वयसाम्यादित्यर्थः ॥

ईक्षतिकर्मव्यपदेशात्सः ॥

फलफलिनोः समानविषयत्वे बाधकाभावादिति । असति बाधके तयोः समानविषयत्वमिति भावः ॥

दहर उत्तरेभ्यः ॥

---

(*g*) शाब्दबोधवादः.

ŚĀBDABŌDHAVĀDAḤ.

Foll. 30*a*—32*a*.

A criticism of the view of the grammarians that the predicate determines the import of a sentence. The author Rāmāsubbā Śāstri supports the Naiyāyika school.

Complete.

**Beginning:**

यत्तु सिद्धान्तकौमुदीकारशब्देन्दुशेखरकारादिभिराधुनिकैः वैयाकरणत्वमाभिमन्यमानैरुक्तं भावप्रधानमाख्यातमिति यास्कस्मृत्या तिङर्थापेक्षया धात्वर्थस्य भावस्य प्राधान्यावगमात् धात्वर्थमुख्यविशेष्यक एव पचतीत्यादौ शाब्दबोध इत्यङ्गीकर्तव्यमिति, तन्न ।

**End:**

कर्मणि द्वितीयेत्यादिसूत्रस्थकर्मादिपदस्यापि कर्मत्वादिरूपधर्मपरत्वावश्यकतया सूत्रस्थधर्मिनिर्देशबलेन षष्ठीविभक्तेः सम्बन्धिरूपधर्मिवाचकत्वानुपपत्तेः। यथोत्तरं मुनीनां प्रामाण्यमिति वैयाकरणसिद्धान्तरीत्या भाष्यविरोधे सूत्रस्यैवान्यथा नेयत्वात् ॥

**Colophon:**

रामसुब्बाशास्त्रिविरचितः शाब्दबोधवादः समाप्तः ॥

---

(*h*) ओङ्कारवादार्थः.

ŌṄKĀRAVĀDĀRTHAḤ.

Foll. 32*b*—34*a*.

By Rāmasubrahmanya Śāstri. Same work as that described under R. No. 1808(*g*) *ante*.

Complete.

---

(*i*) प्रणवार्थनिर्णयः.

PRAṆAVĀRTHANIRṆAYAḤ.

Foll. 34*a*—36*b*. Fol. 37*a* is left blank.

By Rāmasubbā Śāstri. Same work as that described under R. No. 1808(*h*) *ante*.

Complete.

**End:**

'श्रौतस्मार्तानि कर्माणि कुर्यात्तु हरिरोमिति' (इति) लेखनात् श्रीहरेरोंकारबोध्यत्वावगमात् इति सर्वं सुस्थम् ॥

**Colophon:**

श्रीमदश्वत्थनारायणशास्त्रिणां पौत्रेण श्रीरामशंकरशास्त्रिणां पुत्रेण श्रीशिवरामशास्त्रिणामन्तेवासिना रामसुब्रह्मण्यशास्त्रिणा विरचितः प्रणवार्थनिर्णयः समाप्तः॥

(7) मतरहस्यरत्नावलिः.

MATARAHASYARATNĀVALIḤ.

Foll. 37*b*—47*b*.

In this work the author gives his own interpretations on the principles of the Advaita Vēdānta, and reviews some other religious systems from this standpoint. By Rāmasubrahmaṇya Śāstrin son of Rāma-Śaṅkara Śāstrin and grandson of Aśvatthanārāyaṇa Śāstrin and disciple of Śivarāma Śāstrin.

Complete in four Pariccḥēdas

**Beginning:**

पदार्थौ द्विविधः दृक् दृश्यं चेति। दृक् द्वि(विधा) उपहितानुपहितभेदात्। उपहिता दृक् हिरण्यगर्भादिस्तम्भान्तजीवरूपेश्वररूपभेदेन द्विविधा। तत्र ईश्वरः अविद्योपाधौ बिम्बभूतः। जीवस्त्वन्तःकरणतत्संस्कारान्यतरावच्छिन्नाज्ञानप्रतिबिम्बभूतः। अनुपहिता तु निर्वाणदशायां केवलैव भाति।

**End:**

यद्यपि पुष्टिभक्त्या मुक्तिसिद्धौ प्रयाससाध्यमर्यादाभक्तौ कोऽपि न प्रवर्तेत। तथापि निर्हेतुकभगवत्कृपा अस्मद्विषये सेत्स्यतीत्यत्र नियमाभावेन सर्वो जन्तुः मर्यादाभक्तौ प्रवर्तत एव। पुष्टिभक्तिः सर्वेषां फलकोटावपि निविषे(र्विषये)त्याहुः। गणितानन्दः ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्द इति श्रुत्युक्तः।

**Colophon:**

अश्वत्थनारायणशास्त्रिणां पौत्रेण रामशङ्करशास्त्रिणां पुत्रेण श्रीशिवरामशास्त्रिणामन्तेवासिना रामसुब्रह्मण्यशास्त्रिणा विरचितायां मतरहस्यरत्नावल्यां चतुर्थः परिच्छेदः स्समाप्तः॥ समाप्तोऽयं ग्रन्थः॥

Fol. 48 is left blank.

---

R. No. **1815.**

Palm-leaf. $15\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 6. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.R.y. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

तत्त्वकौस्तुभः.

TATTVAKAUSTUBHAḤ.

By Bhaṭṭōjidīkṣita. Same work as that described under No. 4583 of the D.C.S. MSS., Vol. IX.

Contains the first Pariccḥēda only

R. No. **1816.**

Palm-leaf. 15 × 1¼ inches. Foll. 57. Lines, 8 in a page. Grantha. Injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district

**न्यायसिद्धान्तमञ्जरी.**

NYĀYASIDDHĀNTAMAÑJARĪ.

By Jānakīnātha. Same work as that described under No. 4215 of the D.C.S. MSS., Vol. VIII.

Contains the Pratyakṣa only, but wants the beginning.

---

R. No. **1817.**

Palm-leaf. 12¾ × 1¼ inches. Foll. 11. Lines, 7 in a page. Grantha. Much injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviś nallūr, Tanjore district.

**भक्तचानन्दप्रकाशः.**

BHAKTYĀNANDAPRAKĀŚAḤ.

In this treatise Bhakti or devotion to God is divided into two kinds; and the bliss arising from devotion is said to be higher than that resulting from salvation: by Rāmasubbā Śāstri.

Complete.

**Beginning:**

तिशतविदितं मुक्तचानन्दं यद्यपि भगवान् ददाति भक्तानाम् ।
भक्तचानन्दो भवति गरिष्ठो भक्तविशेषानपेक्ष्य दातव्यः ॥

भक्तिर्द्विविधा—निर्गुणा सगुणा च । फलानुद्देश्यकत्वे सति विच्छेदशून्यत्वे सति नान्तरीयकसुखधारारूपेण परिणतमनोवृत्तिरूपत्वं निर्गुणभक्तेर्लक्षणम् । सगुणभक्तावतिव्याप्तिवारणाय प्रथमं सत्यन्तम् ।

**End:**

वासुदेवे भगवति भक्तियोगः प्रयोजितः ।
जनयत्याशु वैराग्यं ज्ञानं च तदहेतुकम् ॥

इति श्रुतिस्मृतिभ्यामित्यर्थः ।

भक्तचानन्दप्रकाशोऽयं ब्रह्मानन्दसमुज्ज्वलः ।
भवतु श्रीपतेः प्रीत्यै भक्तचानन्दोज्ज्वलाय मे ॥

**Colophon:**

अश्वत्थनारायणशास्त्रिपौत्रेण रामशङ्करशास्त्रिपुत्रेण शिवरामशास्त्रिरूपश्रीपति-शिष्येण रामसुब्वाशास्त्रिणा विरचितः भक्तचानन्दप्रकाशः सम्पूर्णः ॥

---

R. No. **1818.**

Palm-leaf. 15½ × 1⅝ inches. Foll. 40. Lines, 10 in a page. Grantha. Slightly injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

(*a*) तत्त्वचिन्तामणिदीधितिप्रकाशिका.

TATTVACINTĀMAṆIDĪDHITIPRAKĀŚIKĀ.

Foll. 1*a*—11*b*.

By Gadādharabhaṭṭācārya. Same work as that described under Nos. 4041 and 4046 of the D.C.S. MSS., Vol. VIII.

Contains the Sāmānyanirukti which breaks off in the second Lakṣaṇa.

---

(*b*) व्याप्तिपञ्चकादिवादपत्रम्.

VYĀPTIPAÑCAKĀDIVĀDAPATRAM.

Foll. 12*a*—40*a*. Foll. 21*b*, 26*b* and 40*b* are left blank.

Contains the Pañcalakṣaṇī, the Caturdaśalakṣaṇī of Gadādhara and of Jagadīśa, and the Pakṣatā and the Hētvābhāsa of Gadādhara.

Incomplete.

**Beginning:**

व्याप्तिपञ्चके द्वितीयलक्षणे साध्याभावपदवैयर्थ्यात् कर्मधारयं त्यक्त्वा जघन्योऽपि तत्पुरुषः स्वीकृतः। ननु स्वप्रतियोगिकत्वस्वसामानाधिकरण्योभयसम्बन्धेन साध्यवद्भिन्नो यः साध्याभावः तद्वदवृत्तित्वमित्यर्थकरणेऽव्याप्यवृत्तिसाध्यकेऽव्याप्त्यभावात् कथं कर्मधारयः त्यक्तः।

* * * *

जागदीश्यां हेतुसमानाधिकरणास्तादृशाभावाः स्वप्रतियोगिमत्ताग्रहविरोधिग्रहविषयसम्बन्धेन उभयवृत्तिर्यः तत्त्वमिति कृते न काप्यनुपपत्तिः इति।

**End:**

तत्रापि समवायेन प्रमेयस्य साध्यतायां द्रव्यत्वादिप्रकारकप्रमाविशेष्यत्वादिहेतौ साध्याभावस्य कालिकसम्बन्धावच्छिन्नाभावमादाय दोषवारणाय यत्सम्बन्धावच्छिन्नस्वाभावः साध्यवत्त्वाच्छेदेन वर्तते इत्यादेर्वक्तव्यतया वाग्जालमेवेति ध्येयम्।

## R. No. 1819.

Palm-leaf. $18\frac{1}{4} \times 1\frac{3}{8}$ inches. Foll. 35. Lines, 7 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

(*a*) ईशोपनिषद्विलासः.

ĪŚŌPANIṢADVILĀSAḤ.

Foll. 1*a*—3*a*.

A brief and critical commentary on some important portions of the Īśāvāsyōpaniṣad. In this, as in the other similar works described under the various sub-divisions of this number, the author says that the individual soul is different from the Supreme Brahman and that God Viṣṇu is the Supreme Brahman. By Rāmasubrahmaṇya Śāstri.

Complete.

**Beginning:**

जगत्यां प्रपञ्चे कृत्स्नं जगज्जातमीश्वरेण वासितं व्याप्तमित्यर्थकस्येशावास्यमिदं सर्वं यत् किञ्च जगत्यां जगदित्युपक्रमस्य . . . . . त्वात् भूयिष्ठान्ते नमउक्तिं विधेमेत्युपसंहारस्य च भेदविषयत्वात् नैनद्देवा आप्नुवन् पूर्वमर्षत् यस्तु सर्वाणि भूतानि आत्म(नि प)श्यति सर्वभूतेषु चात्मानमित्यादिना भेदस्याभ्यासात् कर्तृत्वाणुत्वज्ञातृत्वज्ञानस्वरूपत्वादियुक्तजीवस्वरूपस्य ।

**End:**

अव्यवहितपूर्वार्धे यत्ते रूपं कल्याणतममिति नपुंसकलिङ्गशब्दगृहीतस्य पुंलिङ्गशब्देन ग्रहणस्यात्यन्तागतिकविषयत्वात् प्राक् यत्र पुरुषस्य सन्निहितस्य पुंलिङ्गशब्दगृहीतेन्यार्थ्यत्वाच्च सर्वं सुस्थम् ॥

**Colophon:**

ईशोपनिषद्वि(लास)ः समाप्तः ॥

---

(*b*) केनोपनिषद्विलासः.

KĒNŌPANIṢADVILĀSAḤ.

Fol. 3.

A brief commentary on some important portions of the Kēnōpaniṣad: by the same author as that of the last.

Complete.

**Beginning:**

केनेषितं पतति प्रेषितं मन इति उपक्रमस्य जैवमनःप्राणादिप्रेरकेश्वरविषयत्वेन जीवब्रह्मभेद . . . . . स्वर्गे लोकेऽजय्ये प्रतितिष्ठतीत्युपसंहा-

रस्य स्वर्गे आनन्दो ब्रह्मेत्युक्तरीत्या सुख . . . . . शास्त्रैः लोक्यमानत्वेन लोके अजय्ये क्षयित्वादिलक्षणपराभवरहिते ब्रह्मणि प्रतितिष्ठतीत्यर्थकतया जीव-ब्रह्मणोराधाराधेयलक्षणभेदपरत्वात् ।

**End:**

इन्द्रादिदेवभिन्नतया ब्रह्मणः प्रशंसनादर्थवादादिह चेदवेदीत् सत्यमस्ति न चेहा . . . . . न्महती विनष्टिरित्यादिना भेदज्ञानोपपत्तिकथनादुक्तषड्विध-तात्पर्यलिङ्गबलेन केनोपनिषत् जीवब्रह्मभेदपरैवेति (सि)द्धम् ॥

**Colophon:**

केनोपनिषद्विलासः ॥

---

(*c*) **कठोपनिषद्विलासः.**

KAṬHŌPANIṢADVILĀSAḤ.

Foll 4*a*—5*b*.

By the same author as that of the last. Similar to the above. Complete.

**Beginning:**

स्तोममहदुरुगायं प्रतिष्ठां दृष्ट्वा धीरो न चिकेतोऽत्यस्राक्षीः ।

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम् ।

अध्यात्मयोगा(धिग)मेन देवं मत्वा धीरो हर्षशोकौ जहाति । इत्युपक्रमस्य द्रष्टृद्रष्टव्यभावेन जीवब्रह्मभेदपरत्वात् ब्रह्मप्राप्तो विजरोऽभूद्विमृत्युरित्युप-(संहार)स्य प्राप्यप्राप्तृत्वेन ब्रह्मजीवपरत्वात् ।

**End:**

अत एवाणोरणीयान् महतो महीयानात्मास्य जन्तोर्निहितो गुहाया-मित्युत्तरमन्त्रे अस्येति सर्वनाम्ना मन्त्रगृहीतं जीवं परामृश्य तद्गुहानिहितत्वेन परमात्मा निर्दिष्ट इति ॥

**Colophon:**

कठवल्लीविलासः समाप्त. ।

---

(*d*) **प्रश्नोपनिषद्विलासः.**

PRAŚNŌPANIṢADVILĀSAḤ.

Foll. 5*b*—6*b*.

By the same author as that of the last. Similar to the above. Complete.

**Beginning:**

ते हैते ब्रह्मपरा ब्रह्मनिष्ठाः प(रं ब्रह्मा)न्वेषमाणा इत्युपक्रमस्यान्वेष्यान्वेषयितृभावेन ब्रह्मजीवभेदपरत्वात् ।

अरा इव रथनाभौ कला यस्मिन् प्रतिष्ठिताः ।
तं वेद्यं पुरुषं वेत्थ मा वो मृत्युः परिव्यथाः ॥

इत्युपसंहारस्य वेद्यवेदयितृत्वेन ब्रह्मजीवभेदपरत्वात् परं पुरुषमभिध्यायीतेत्यनेन ।

**End:**

वृत्तिप्राणस्य च तदुत्क्रमणकाले हृदयगुहायां जीवसहचरितस्य प्राज्ञस्य परमात्मन उत्क्रमणस्योक्तत्वेन तदर्थं जीव . . . . . ङ्गीकारस्य श्रुतिसूत्रविरुद्धत्वादिति ॥

**Colophon:**

प्रश्नोपनिषद्विलासः समाप्तः ॥

---

(*e*) मुण्डकोपनिषद्विलासः.

MUṆḌAKŌPANIṢADVILĀSAḤ.

Foll. 6*b*—10*b*.

By the same author as that of the last. Similar to the above. Complete.

**Beginning:**

यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवतीत्युपक्रमस्य विज्ञात(विज्ञातृभा)वात्मककर्मकर्तृभावलक्षणब्रह्मजीवभेदविषयत्वात् । न च यस्मिन् विज्ञात इत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञया मृद्विज्ञानेन तत्प(रिणा)मकार्यस्य घटादेः शुक्तिविज्ञानेन तद्विवर्तकार्यस्य रजतादेर्वा यथोपादानाभेदाद्विज्ञानं तथा ब्रह्मविज्ञानेन ।

**End:**

परब्रह्मभावस्यावृतत्वेनाभूतसमतया च्विप्रत्यय इति कल्पना तु अतिक्लिष्टा । सप्तमी चाभेदे विरुद्धा । तस्यास्तृतीयार्थक(त्व)कल्पनैव दोष इति न क्वचिदपि मुण्डके जीवब्रह्माभेदगन्ध इति ॥

**Colophon:**

मुण्डकोपनिषद्विलासः समाप्तः ॥

---

(*f*) माण्डूक्योपनिषद्विलासः.

MĀṆḌŪKYŌPANIṢADVILĀSAḤ.

Foll. 11*a*—12*b*.

By the same author as that of the last. Similar to the above. Complete.

**Beginning:**

ओमित्येतदक्षरमिदं सर्वं तस्योपव्याख्यानं भूतं भव्यं भविष्यदिति सर्वमोङ्कार एव । यच्चान्यत् त्रिकालातीतं तदप्योङ्कार एव । सर्वं ह्येत(द्ब्रह्मायमा)त्मा ब्रह्म इति सर्वात्मकत्वेनोङ्कारः वर्णविशेषात्मकः गुणवादेन स्तुतः । वर्णविशेषे कृत्स्नाचिदात्मकत्वस्य जीवरूपत्वस्य ब्रह्मरूपत्वं . . . . संभावितत्वात् । सर्वं ह्येतत् ब्रह्म इत्यस्य हि यस्मात्परिदृश्यमानसर्ववेदात्मकमेतदक्षरमित्यर्थः ।

**End:**

ओङ्काराक्षरं केचिन्मन्यन्त इति । यद्यप्यस्मत्कृताथर्वरहस्योक्तरीत्या माण्डूक्योपनिषत् नोपनिषत्त्वेन व्यासाभिमता, तथापि ऋष्यन्तरमतरीत्या केनोपनीषद् इव माण्डूक्योपनि . . . . . त्वार्थमुक्तमिति ध्येयम् ॥

**Colophon:**

माण्डूक्योपनिषद्विलासः समाप्तः ॥

---

(*g*) तैत्तिरीयोपनिषद्विलासः.

TAITTIRĪYŌPANIṢADVILĀSAḤ.

Foll. 13*a*—11*b*.

By the same author as that of the last. Similar to the above. Complete.

**Beginning:**

ब्रह्मविदाप्नोति परमित्युपक्रमस्य प्राप्तप्राप्यत्वेन जीवब्रह्मभेदपरत्वात् एतमानन्दमयमात्मानमुपसंक्रम्य, इमान् लोकान् कामान्नी कामरूप्यनुसञ्चरन्। एतत्साम गायन्नास्ते, इत्याद्युपसंहारस्य मुक्तजीवब्रह्मभेदपरत्वात् विज्ञानमयादन्योऽन्तरात्मानन्दमयः, ते ये शतं प्रजापतेरानन्दाः स एको ब्रह्मण आनन्दः, आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन, रसं ह्येवायं लब्ध्वानन्दी भवति, अथ सोऽभयं गतो भवतीत्यादिना जीवब्रह्मभे . . . . दाभ्यासात पूर्वोक्तरीत्या तयोर्भेदस्यापूर्वत्वात् ।

**End:**

एक इति एकत्वबोधनेन जीवब्रह्माभेदबोधनात् प्र . . . . . जीवब्रह्मभेदस्यैवाधाराधेयभावबोधिसप्तमीतो लाभः ॥

**Colophon:**

इति तैत्तिरीयोपनिषद्विलासः समाप्तः ॥

(*h*) ऐतरेयोपनिषद्विलासः.
AITARĒYŌPANIṢADVILĀSAḤ.

Fol. 15.

By the same author as that of the last. Similar to the above.

Complete.

**Beginning:**

आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चन मिषदित्युपक्रमे एक एवेति विशेषणसम्बन्ध्येवकारेण शङ्खः पाण्डर एवेतिवत् एकत्वायोगव्यवच्छेदस्यैवात्मनि कथनेन तेनात्मव्यतिरिक्तनिषेधः । आत्मव्यतिरिक्तव्यवच्छेदस्य विवक्षितत्वे पार्थ एव धनुर्धर इतिवत् आत्मैवेदमग्र आसीदिति विशेष्यसम्बन्ध्येवकारेण भवितव्यम् ।

**End:**

नेतृत्वप्रतिष्ठितत्वादियुक्तिरूपोपपत्तिकथनादुक्तषाड्विधतात्पर्यलिङ्गबलेनैतरेयोपनिषत् भेदपरेति ॥

**Colophon:**

ऐतरेयोपनिषद्विलासः समाप्तः ॥

---

(*i*) छान्दोग्योपनिषद्विलासः.
CHĀNDŌGYŌPANIṢADVILĀSAḤ.

Foll. 15*b*—20*a*.

By the same author as that of the last. Similar to the above.

Complete.

**Beginning:**

उत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवति इति छान्दोग्यषष्ठप्रपाठकोपक्रमस्य मुण्डकोपनिषदुपक्रमतात्पर्यवर्णनरीत्या एकविज्ञानेन सर्वविज्ञानप्रतिज्ञया जीवब्रह्मभेदपरत्वात् तद्धास्य विजज्ञाविति विजज्ञाविति उक्तषष्ठप्रपाठकोपसंहारस्यास्योद्दालकसम्बन्धि तत् ब्रह्म श्वेतकेतुर्विजज्ञौ ज्ञातवानिति ।

**End:**

प्रकृतिपरिणामस्यापि परोक्षत्वेन तेन तच्छङ्कावारणासंभवात् । तस्मात् जीवब्रह्मणोर्भेदः ब्रह्म च न निर्गुणमिति छान्दोग्योपनिषत्तात्पर्यमित्यलम् ॥

**Colophon:**

छान्दोग्योपनिषद्विलासः समाप्तः ।

---

(*j*) श्वेताश्वतरोपनिषद्विलासः.
ŚVĒTĀŚVATARŌPANIṢADVILĀSAḤ.

Fol. 20.

By the same author as that of the last. Similar to the above. Complete.

**Beginning:**

ब्रह्मवादिनो वदन्ति ।

किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च संप्रतिष्ठिताः ।
अधिष्ठिताः केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ।

इत्युपक्रमस्य जीवब्रह्मवे(भे)दविषयत्वात् ।

यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

इत्युपसंहारस्यापि तयोर्भेदविषयत्वात् ।

**End:**

जीवब्रह्मैक्यपर इति प्रौढम् । श्रीमत्स्यकूर्मवराहमोहिन्याद्यवतारेषु यत् परमात्मनः स्त्रीपुरुषबालयुवस्थविरनटनादि तदनुवाद्यत्वादुक्तमन्त्रस्य अत एव नटलिङ्गं वक्ष्यसीति सङ्गच्छते ॥

**Colophon:**

इति श्वेताश्वतरोपनिषद्विलासः समाप्तः ॥

---

(*k*) बृहदारण्यकोपनिषद्विलासः.

BṚHADĀRAṆYAKŌPANIṢADVILĀSAḤ.

Foll. 21*a*—35*b*.

By the same author as that of the last. Similar to the above. Complete.

**Beginning:**

बृहदारण्यकोपनिषदि षष्ठाध्याये द्वितीयब्राह्मणे उक्तोपनिषत्क इतो मुच्यमानः क्व गमिष्यसीति नाहं तद्भगवन्वेद यत्र गमिष्यसी(ष्यामी)ति अथैवैते हन्त तद्वक्ष्यामि यत्र गमिष्यसीति ब्रवीतु भगवानित्युपक्रमस्य मुक्तगन्तव्यब्रह्मविषयत्वेन जीवब्रह्मभेदविषयत्वान्मुक्तगन्तव्यत्वरूपगुणविशिष्टब्रह्मविषयत्वात् । तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायं पुरुषः ।

**End:**

न वस्त्वपरिच्छेदो घटकः अन्तशब्दस्य समाप्तिविनाशनिश्चयार्थेषु प्रयोगदर्शनेन त्वच्छून्यार्थकानन्तशब्देन वस्त्वपरिच्छेदस्य योगेनापि बोधनासङ्गतिरिति शिवम् । बृहदारण्यकोपनिषदः सगुणब्रह्मपरत्वं च बृहदारण्यकविलासे उपपादितमिति शिवम् ॥

R. No. **1820.**

Palm-leaf. 8⅓ × 1½ inches. Foll. 41. Lines, 14 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

Fol. 10 is lost.

जीवन्मुक्तिविवेकसारसङ्ग्रहः.

JĪVANMUKTIVIVĒKASĀRASAṄGRAHAḤ.

A brief summary of what is contained in the Jīvanmuktivivēka of Vidyāraṇya, which work is described under No. 4579 of the D.C.S. MSS., Vol. IX : by Sadēkānanda.

Complete.

**Beginning :**

नत्वा श्रीशङ्करं विद्यातीर्थारण्यमहेश्वरौ ।
जीवन्मुक्तिविवेकाद्यै सारसङ्ग्रहमुद्धरे ॥

आदौ विद्वत्स्वरूपं च तत्संन्यासं च साधनम् ।
जीवन्मुक्तस्वरूपं च तत्तत्फलमतिस्फुटम् ॥

पश्चाद्विविदिषाभेदं तत्संन्यासं च साधनम् ।
तथा विदेहमुक्तिं च तत्तत्फलमनुक्रमात् ॥

शास्त्रोक्ततत्त्ववित्कोऽसौ सम्यग्व्युत्पन्नसंज्ञकः ।
स्वापरोक्षब्रह्मतत्त्वज्ञानवान् हि प्रकीर्तितः ॥

स एव तत्त्वविन्नाम निश्चयः सर्वसंमतः ।

स तु कृतोपास्तिरकृतोपास्तिरिति द्विविधः । तयोराद्यः स्वतन्त्रापरोक्षज्ञानवानित्येकविध एव । द्वितीयस्तु परतन्त्रस्वतन्त्राभासपराजितापरोक्षज्ञानवानिति त्रिविधः । एवमुक्तचतुर्विधज्ञानिनां स्वरूपं विभज्य स्पष्टमुदाहरामः । तत्राद्यो मलिनवासनारहितस्तत्सहितश्चेति द्विविधः । तावुभौ जीवन्मुक्तिप्राचीनापन्नजनकयाज्ञवल्क्यवन्निस्संशयस्वतन्त्रापरोक्षज्ञानिनौ ।

**End :**

तत्रार्थदोषो यत्किञ्चिच्छब्ददोषोऽथवा क्वचित् ।
भाति चेद्विदुषा नूनं पादपांसुमिव त्यजेत् ॥

ततोऽवशिष्टशब्दार्थौ सम्यक् पूर्वोत्तरार्धयोः ।
विचार्य सुचिरं कालं तत्पक्षौ च परीक्ष्य च ॥
विदेहजीवन्मुक्त्योश्च तारतम्यं विजानताम् ।
ज्ञात्वा यत्र फलाधिक्यं तत्र विश्रम्यतां बुधैः ॥
इत्येवं मुनिना सम्यक् सदेकानन्दवाणिना ।
श्रीमेधादक्षिणामूर्तिसद्गुरोः क(रुणानिधेः) ॥
कटाक्षलेशतो भक्त्या जीवन्मुक्तिविवेकतः ।
सारसङ्ग्रहमुद्धार्य विद्यारण्यपदेऽर्पितम् ॥

---

R. No. 1821.

Śrītāla. 11 × $1\frac{7}{8}$ inches. Foll. 91. Lines, 10 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

Fol. 6*b* is left blank. Fol. 48 is lost.

लघुचन्द्रिकाव्याख्या—विट्ठलमिश्रीया.

LAGHUCANDRIKĀVYĀKHYĀ: VIṬṬHALAMIŚRĪYĀ.

A commentary by Viṭṭhalamiśra on the Laghucandrikā of Brahmānandasvāmin, which work is described under No. 4531 of the D.C.S. MSS., Vol. IX.

Breaks off in the Sadasadvilakṣaṇatvarūpamithyātvanirūpaṇa in the first Paricchēda.

**Beginning:**

इष्टदेवतानमस्कृतिरूपं मङ्गलं विघ्नविघातायाचरन् शिष्यशिक्षायै निबन्धाति—नम इति । नवघनश्यामोऽत एव कामेनापि कामितो यो देहस्तद्वत इत्यर्थः । न चैवं न कर्मधारयान्मत्त्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर(इति) व्युत्पत्तिविरोध इति वाच्यम्, प्रकृते मत्त्वर्थीयस्यावयवसौन्दर्यरूपप्रशस्त्यात्मकतया बहुव्रीहेस्तदर्थाप्रतिपादकत्वेन विरोधाभावात् । न केवलमिष्टासिद्ध्यर्थमेव तं नमस्कुर्मोऽपि तु तदीयसौन्दर्यादिगुणश्रवणजनितभक्त्यापीति भावः ।

* * * *

गुरुस्मृतिमपि शिक्षयति—श्रीति । चिकीर्षितं प्रतिजानीते—अद्वैतसिद्धीति । योगरूढ्या विष्णुपदार्थस्य श्रीनारायणस्येश्वरत्वेन नित्यसिद्धमोक्षस्यौपचारिकप्राप्तिसादृश्येऽप्यन्वयायोग्यत्वात् व्याचष्टे—विष्णुरिति ।

**End:**

तथाच तत्क्षणविशिष्टो घटो विषय इत्यत्र विषयताकाले विद्यमानेन विषयताश्रयेण तत्क्षणेन तत्क्षणानवच्छिन्नघटादिभ्यो व्यावर्तितो घटो विषय इति बुध्यत इति भावः ।

Foll. 90—91 contain some witty stanzas.

---

R. No. **1822.**

Śrītāla. 16½ × 2 inches. Foll. 38. Lines, 18 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

सङ्ग्रहवैद्यनाथदीक्षितीयम्.

SAṄGRAHAVAIDYANĀTHADĪKṢITĪYAM.

Similar to the work described under R. No. 1491 *ante*.

Wants the beginning and the end in the Śrāddha Kāṇḍa.

**Beginning:**

आहिताग्निमग्निभिर्दहन्निति बोधायनस्मरणम् । मनुश्च—

आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः ।
अनाहिताग्निरेकेन लौकिकेनेतरे जनाः ॥
आहिताग्निः पूर्वमृतां स्वाग्निभिर्दाहयेत् स्त्रियम् ।
शक्ये विवाहेऽथाशक्ये निर्मन्थ्येनैव दाहयेत् ॥

पुनर्दारग्रहणस्य पत्नीदाहविनियुक्ताग्नित्रयस्य विधुरस्य उत्सृष्टाग्नेर्विच्छिन्नाग्नेर्वा मरणे प्रेताधानमेव ।

**End:**

नाद्यात्सूर्यग्रहात्पूर्वमह्नि सायं शशिग्रहात् ।
ग्रहकाले च नाश्नीयात् स्नात्वाश्नीयाच्च मुक्तयोः ॥
मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा ।
अमुक्तयोरस्तगयोरद्यात् दृष्ट्वा परेऽहनि ॥ इति ॥

**Colophon:**

इति ग्रहणनिर्णयः ॥

## R. No. 1823.

Śrītāla. $19\frac{3}{4} \times 2\frac{3}{5}$ inches. Foll. 46. Lines, 14 in a page. Grantha. Good.

Purchased in 1915-16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

### नारदधर्मशास्त्रम्.

### NĀRADADHARMAŚĀSTRAM.

Foll. 1*a*—15*b*.

A work on the Dharma Śāstra like the Yājñavalkyasmṛti and dealing with religious duties and Hindu law. It is attributed to Nārada.

Contains the Vyavahārakāṇḍa complete. The following subjects are dealt with therein :—

१. व्यवहारमातृका.
२. सभाप्रकरणम्.
३. ऋणादानम्.
४. लेख्यविधानम्.
५. साक्षित्वाघटनविधिः.
६. अग्निविधिः.
७. पानीयविधिः.
८. विषविधिः.
९. कोशविधिः.

व्यवहारपदानि.

१. ऋणादानम्.
२. निक्षेपविधिः.
३. संभूयसमुत्थानम्.
४. दत्ताप्रदानकम्.
५. दानादानविधिः.
६. वेतनस्यानपाकर्म.
७. अस्वामिविक्रयः.
८. विक्रीयासंप्रदानम्.
९. क्रीतानुशयः.
१०. समयानपाकर्म.
११. सीमाबन्धः.
१२. स्त्रीपुंसयोगः.
१३. दायभागः.
१४. साहसम्.
१५. वाग्दण्डपारुष्ये.
१६. द्यूतसमाह्वानम्.
१७. प्रकीर्णकम्.
२८. संकीर्णकम्.

**Beginning :**

इति ह स्माह भगवान् मनुः प्रजापतिः सर्वभूतानुग्रहार्थमाचारस्थितिहेतुभूतं शास्त्रं चकार । यत्रादौ लोकसृष्टिर्भूतप्रविभागः तद्देशप्रमाणं परिषल्लक्षणम् । वेदवेदाङ्गयज्ञविधानसारो व्यवहारः । कण्टकशोधनं राजवृत्तम् । वर्णधर्माश्रमप्रविभागः विवाहन्यायस्त्रीपुंसविकल्पो दायादानुक्रमश्राद्धविधानशौचकल्पो भक्ष्याभक्ष्यलक्षणम् । विक्रेयाविक्रयमीमांसापातकभेदैः स्वर्गनरकानुदर्शनं प्रायश्चित्तान्युप-

निषदो रहस्यानीत्येवं चतुर्विंशतिप्रकरणानि । तदेतल्लोके शतसहस्रमासीत् । तेनाध्यापकसहस्रेण मनुः प्रजापतिरुपनिबध्य देवर्षये नारदाय प्रायच्छत् । स च तस्मादधीत्य महत्त्वान्नायं ग्रन्थः सुकरो मनुष्याणाम् ।

* * * *

प्रकरणात् प्रकरणमनुक्रान्तम् । तत्र तु नवमं प्रकरणं । व्यवहारो नाम । यस्येमां देवर्षिर्नारदः सूत्रस्थानीयां चकारेत्यस्याभिमुखम् ।

लोकसंरक्षणार्थाय धर्मसंस्थापनाय च ।
राज्ञां दोषहरश्चैव व्यवहारः प्रकीर्तितः ॥

* * * *

**Colophon:**

इति श्रीनारदीये धर्मशास्त्रे व्यवहारमातृकायां प्रथमोऽध्यायः ॥

**End:**

विदुर्य एव देवत्वं राज्ञो ह्यमिततेजसः ।
तस्य ते प्रतिगृह्णन्तु न लिप्यन्ति कथञ्चन ॥
लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणोऽग्निर्हुताशनः ।
हिरण्यं सर्पिरादित्य रा(आ)पो राजा तथाष्टमः ॥
एतानि सततं पश्येन्नमस्येदर्चयेत्स्वयम् ।
प्रदक्षिणं च कुर्वीत यथास्यायुः प्रवर्धते ॥

**Colophon:**

इति श्रीनारदीयधर्मशास्त्रे सङ्कीर्णकं नामाष्टादशं विवादपदम् ॥

Foll. 16*a*—18*b* contain a few stanzas of the Nītiśṛṅgāraśatakas of Bhartṛhari. Foll. 19*a*—22*b* contain Vyākaraṇaviṣaya. The remaining foll. are left blank.

---

R. No. **1824.**

Palm-leaf. 16⅝ × 1¼ inches. Foll. 18. Lines, 4 in a page. Grantha. Good.

Presented in 1915-16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

**व्याकरणविषयः.**

VYĀKARAṆAVIṢAYAḤ.

Similar to the work described under No. 1683 of the D.C.S. MSS., Vol. III.

Incomplete.

**Beginning :**

येनाक्षरमिति श्लोकस्य शाब्दबोधः । यच्छब्दस्य बुद्धिविषयतावच्छेदकोपलक्षितधर्मावच्छिन्नोऽर्थः । तत्प्रकृतिकतृतीयायाः कर्तृत्वमर्थः । क्रियाकारकयोस्सम्बन्धवाचिका द्वितीया भवतीति भाष्यानुरोधात् । अक्षरसमाम्नायो वर्णात्मको वेदः ।

**End :**

यदि कृतौ तर्हि तद्धर्मावच्छिन्नावच्छेदकताकाधेयतासम्बन्धावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकतासम्बन्धेन शाब्दबोधं प्रति तद्धर्मान्यवृत्तिविषयतासम्बन्धेन ज्ञानस्य व्यापकतया तत्प्रति च तद्धर्मभेदस्य कारणतया व्यापकसामग्रीविरहेण गच्छतीत्यादाविवाव्युत्पन्नत्वम्.

---

R. No. **1825.**

Palm-leaf. $12\frac{3}{4}$, $13\frac{5}{8}$, and $15\frac{5}{8} \times 1\frac{1}{4}$, $1\frac{5}{8}$ inches. Foll. 119. Lines, 7 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

**व्यामोहविद्रावणम्.**

VYĀMŌHAVIDRĀVAṆAM.

A hostile criticism of the Śaivamaṇḍana which is itself an unfavourable criticism of Viṣṇutattvarahasya which is a work establishing that Viṣṇu is the Supreme Brahman : by Rāmasubrahmaṇya Śāstri.

Incomplete.

**Beginning :**

यत्पादपङ्कजधुनी भवतापहन्त्री यन्नामसंस्मर(णमत्र)पुमर्थहेतुः ।
यस्माज्जनिस्थितिलया जगतो भवन्ति तस्मै नमो भगवते पुरुषोत्तमाय ॥
यत्कृपालवमात्रेण वाग्मी भवति मानवः ।
रामसुब्रह्मण्यनामा गुरुवर्यः प्रसीदताम् ॥
विष्णुतत्त्वरहस्यस्य खण्डनं शैवमण्डनम् ।
यत्तस्य कुण्ठनं कुर्वे गुरुवर्यप्रसादतः ॥
पाषण्डसन्दोहसृगालसङ्घविद्रावणोद्यद्धरिवर्यरूपः ।
व्यामोहविद्रावणनामकोऽयं ग्रन्थः सतामावहतु प्रमोदम् ॥

अस्ति तावन्निरस्तनिखिलदोषः समस्तकल्याणगुणगणः अखिलचिदचिच्छरी-

रको निखिलजगद्धेतुरहेतुः परमात्मा नारायणः य आत्मापहतपाप्मा विरजो विमृत्युर्विशोकोऽविचिकित्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः ।

* * * *

न चेश्वरश्चेति रुद्रस्यापि प्रत्यभिज्ञानात् शिवरूपत्वमेवेति वाच्यम् । विष्णुश्चेति शब्दार्थोभयप्रत्यभिज्ञानापेक्षया केवलार्थप्रत्यभिज्ञाया दुर्बलत्वात् । अतस्तत्रत्येश्वरशब्दो भगवति यौगिकः । किञ्चेश्वरशब्दो योगरूढ इति नातीवाभिनिवेष्टव्यम् । किन्तु केवलयौगिकमयोगशक्यतावच्छेदकव्यापकप्रयोगशालित्वे सति तच्छून्याप्रयुक्तो यः शब्दः तत्सामान्यस्य प्रोक्षण्यधिकरणन्यायेन केवलयौगिक-(त्व)मेव ।

**End:**

तदेव शुक्रं तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिन् लोकाः श्रिताः सर्वे तदु नात्येति कश्चन ॥

इत्युपक्रमोपसंहारयोः परमपुरुषासाधारणस्वभावप्रतीतेरिति । अवतारितश्चेदं श्रुतप्रकाशिकायाम् । पूर्वपक्षयुक्तिं परिहरति—कामाकाममितीति । अयमाशयस्तत्तोन्नीयते ।

---

R. No. **1826.**

Palm-leaf. 14¾ × 1¼ inches. Foll. 79. Lines, 8 in a page. Grantha. Slightly injured.

Presented in 1915–16 by M.R.Ry. N. Vēṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

**सामान्यनिरुक्तिपत्रम्.**

SĀMĀNYANIRUKTIPATRAM.

Foll. 1*a*—52*b*. Fol. 11*b* is left blank.

Similar to the work described under No. 4320 of the D C.S. MSS., Vol. VIII.

Contains स्वाव्यापकप्रतिबन्धकताशून्यत्वकल्प, अनुमित्यवृत्तित्वकल्प and नचपत्र.

**Beginning:**

स्वाव्यापकप्रतिबन्धकताशून्यत्वसम्बन्धेन अनुमितिप्रतिबन्धकताविशिष्टो योऽनाहार्याप्रामाण्यज्ञानानास्कन्दितनिश्चयवृ(स्तद्वृ)त्तित्वविशिष्टयद्रूपावच्छिन्नविषय-

कत्वव्यापकं प्रकृतानुमितिप्रतिबन्धकत्वं तद्रूपावच्छिन्नत्वमित्यनेन वह्न्यभाववज्ज-लादिमद्वृत्तिं जलवद्ध्रदेऽतिव्याप्तिवारणं(णे)संभवति गुरुतरविशिष्टद्वयाघटितत्वविशेषणं व्यर्थम्।

**End:**

न च वह्न्यभाववद्ध्रदवान् देश इति ज्ञानमादायैव लक्षणं सङ्गमनीयमिति वाच्यम्, वह्न्यभाववद्ध्रदत्वावच्छिन्नमुख्यविशेष्यतात्वस्य तादृशप्रतिबन्धकतावच्छेदकतया असम्भवस्य दुर्वारत्वादिति ॥

Foll. 53*a*—56*a* contain a few sentences of चतुर्दशलक्षणीपत्र, 56*a*—68*b* पक्षतविचार, 69*a*—71*b* विरोधिविषयताप्रयुक्तत्वविचार in the Sāmānyanirukti of Gadādharabhaṭṭācārya and 72*a*—79*b* साधारणलक्षणपत्र.

---

## R. No. 1827.

Palm-leaf. 15½ × 1½ inches. Foll. 75. Lines, 9 in a page. Grantha. Much injured

Presented in 1915-16 by M.R.Ry. N. Veṅkaṭarāma Śāstri of Tiruviśanallūr, Tanjore district.

### तत्त्वचिन्तामणिदीधितिव्याख्या.

### TATTVACINTĀMAṆIDĪDHITIVYĀKHYĀ.

A commentary on the Tattvacintāmaṇidīdhiti: by Madhurānātha.

Contains the Pañcalakṣaṇī which wants the beginning, the Siṁhavyāghri complete and the Caturdaśalakṣaṇi incomplete.

Foll. 26*b* and 38*b* are left blank.

**Beginning:**

रज्ञानाभाव इत्यनन्तरं बाधाभावमुद्रयेति पूरणीयम्।

* * * *

मणौ व्याप्तिज्ञाने का व्याप्तिरिति। विषयत्वेनावच्छेदकत्वं सप्तम्यर्थः। न तावद-व्यभिचरितत्वमिति। व्याप्तिरित्यनुषज्यते।

* * * *

व्यधिकरणधर्मावच्छिन्नं विना व्यापकतायां सामानाधिकरण्येत्यस्य वैयर्थ्यापत्त्यावतारकत्वासङ्गतेः।

इति शिरोमणेः प्रथमलक्षणरहस्यम्।

**End:**

न च साध्यवत्ताज्ञानप्रतिबन्धकत्वं साध्यवत्ताज्ञानत्वावच्छिन्नप्रतिबध्यता-निरूपितप्रति.

---

R. No. **1828.**

Palm-leaf. 17 × 1¼ inches. Foll. 27. Lines, 8 in a page. Telugu. Good.

Purchased in 1915–16 from M.R.Ry. A. M. Śrīnivāsacāriyar of Agaram, Chingleput district.

(*a*) व्यावहारिकसत्यत्वखण्डनम्.

VYĀVAHĀRIKASATYATVAKHAṆḌANAM.

Foll. 1*a*– 6*a*.

Same work as that described under R. No. 1364(*a*) *ante*.

Complete.

---

(*b*) प्रपञ्चमिथ्यात्वखण्डनम्.

PRAPAÑCAMITHYĀTVAKHAṆḌANAM.

Foll. 6*a*—12*a*.

Same work as that described under R. No. 1364(*b*) *ante*.

Complete.

---

(*c*) आश्रयानुपपत्तिः.

ĀŚRAYĀNUPAPATTIḤ.

Foll. 12*a*—14*b*.

Same work as that described under R. No. 1364(*c*) *ante*.

Complete.

---

(*d*) तिरोधानानुपपत्तिः.

TIRŌDHĀNĀNUPAPATTIḤ.

Foll. 14*b*—15*a*.

Same work as that described under R. No 1364(*d*) *ante*.

Complete.

---

(*e*) स्वरूपानुपपत्तिः.

SVARŪPĀNUPAPATTIḤ.

Fol. 15.

Same work as that described under R. No. 1364(*e*) *ante*.

Complete.

(*f*) लक्षणानुपपत्तिः.
LAKṢAṆĀNUPAPATTIḤ.

Foll. 15*b*—16*a*.

Same work as that described under R. No. 1364(*f*) *ante*.

Complete

---

(*g*) प्रमाणानुपपत्तिः.
PRAMĀṆĀNUPAPATTIḤ.

Foll. 16*a*—18*a*.

Same work as that described under R. No. 1364(*g*) *ante*.

Complete.

---

(*h*) अविद्याखण्डनम्.
AVIDYĀKHAṆḌANAM

Foll. 18*a*—19*a*.

Same work as that described under R. No. 1364(*h*) *ante*.

Complete.

---

(*i*) भेदसमर्थनम्.
BHĒDASAMARTHANAM.

Foll. 19*a*—23*a*.

Same work as that described under R. No. 1364(*i*) *ante*.

Complete.

---

(*j*) परतत्त्वनिश्चयः.
PARATATTVANIŚCAYAḤ.

Foll. 23*a*—25*b*.

Same work as that described under R. No. 1364(*j*) *ante*.

Complete.

---

(*k*) अभेदखण्डनम्.
ABHĒDAKHAṆḌANAM.

Foll. 25*b*—27*b*.

Same work as that described under R. No. 1364(*k*) *ante*.

Complete.

---

## R. No. 1829.

Palm-leaf. 15 × 1⅛ inches. Foll. 76. Lines, 6 in a page. Grantha. Much Injured.

Presented in 1915–16 by M.R.Ry. A. M. Śrinivāsācāriyar of Agaram, Chingleput district.

सुदर्शनशतकम्, सव्याख्यानम्.

SUDARŚANAŚATAKAM WITH COMMENTARY.

The text is by Kūranārāyaṇa. Same work as that described under No. 10655 of the D.C.S. MSS., Vol. XIX.

Complete.

---

R. No. **1830.**

Palm-leaf. 16 × 1⅓ inches. Foll. 26. Lines, 7 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from M.R.Ry. A M. Śrīnivāsācāriyar of Agaram, Chingleput district.

(*a*) नारायणनिरुक्तिः.

NARĀYAṆANIRUKTIḤ.

Foll. 1*a*—22*a*. Fol. 21 is left blank.

This is intended to refute the arguments contained in the work described under R. No. 405 *ante*, and to establish that the word Nārāyaṇa can refer only to God Viṣṇu.

Complete.

**Beginning:**

श्रीवेङ्कटाचलाधीशं श्रिताभीष्टप्रदायकम् ।
समस्तजगदाधारं श्रीनिवासमहं भजे ॥

नारायणपदस्य महायोगविद्भूढिभ्यां मूर्तित्रयवाचकत्वं पुराणादिषु प्रसिद्धमित्यादिः अतः सर्वेषां पुराणानां नहिनिन्दान्यायेनेतरप्रशंसार्थत्वात् प्रमाणमित्यन्तो ग्रन्थः स्वमतासाधकत्वात् स्वमतविरोधिपर्यवसितत्वात् स्वमतपरमतयोरनङ्गीकृतार्थप्रतिपादकत्वात् परमताज्ञानविजृम्भितत्वात् स्वमतस्याप्यज्ञानकृतत्वात् श्रुत्यादिविरुद्धत्वात् व्याकरणविरुद्धत्वात् न्यायविरुद्धत्वात् परस्परासङ्गत(त्व)ाच्च विदुषामनादरणीयः ।

**End:**

बिम्बप्रतिबिम्बभावपक्षेऽस्माभिरुक्तानि दूषणान्यवच्छेदकपक्षे लगन्तीति न तत्पक्षमादायाप्याशा कार्या । विवरणवाचस्पत्ययोरङ्गीकृतौ प्रतिबिम्बावच्छेदकपक्षौ वाचस्पत्यविवरणानुसारिभिरेव खण्डितौ च । तस्मात् तत्तन्मूर्तिवाचकनाम्नां तत्तन्मूर्त्यवस्थितत्वस्यैव वक्तव्यत्वादेकैकमूर्तेस्त्रितयनामवाच्यत्वं संभवतीति ग्रन्थो विदुषामग्राह्य एवेति सिद्धम् ॥

(*b*) नारायणशब्दनिर्वचनम्.

NĀRĀYAṆAŚABDANIRVACANAM.

Foll. 22*a*—26*b*.

By Gōvindanāyaka, disciple of Pāpayya. Same work as that described under R. No. 405 *ante*.

Complete.

**Colophon:**

इयं गोविन्दनायककृतिः परिसमाप्ता ॥

---

R. No. **1831.**

Palm-leaf. $18\frac{1}{2} \times 1\frac{1}{8}$ inches. Foll. 97. Lines, 5 in a page. Telugu. Injured.

Purchased in 1915–16 from M.R.Ry. A. M. Śrinivāsācāriyar of Agaram, Chingleput district.

शारीरकसूत्रव्याख्यानम्.

ŚĀRĪRAKASŪTRAVYĀKHYĀNAM.

A very brief commentary on the Brahmasūtras of Vyāsa, in accordance with the Viśiṣṭādvaita system of Vēdānta.

Complete.

**Beginning:**

अथातो ब्रह्मजिज्ञासा । त्रिपदं सूत्रम् । अथ कर्मज्ञानानन्तरम् । आत्मनि कर्मज्ञानस्य वृत्तत्वाद्धेतोः । ब्रह्मणो जिज्ञासा ब्रह्मजिज्ञासा ब्रह्मज्ञानेच्छा ब्रह्म ज्ञातव्यमित्यर्थः । (जन्माद्यस्य यतः ।) त्रिपदम् । अस्य जगतः जन्मादि सृष्ट्यादि । आदिशब्देन पालनसंहारौ । तेन सृष्टिपालनप्रलया इत्यर्थः । यतः यस्मात् ब्रह्मणः । यस्मात् ब्रह्मण इदं प्रपञ्चस्य सृष्ट्यादिकं प्रवर्तते तदेव जिज्ञास्यमित्युक्तम् । (शास्त्रयोनित्वात् ।) एकपदमिदम् । शास्त्रं वेदान्तं योनिः कारणं यस्य तच्छास्त्रयोनि तस्मात् । ब्रह्मज्ञानकारणत्वात् शास्त्रस्य तद्योनित्वं ब्रह्मणः, अत्यन्तातीन्द्रियत्वात् ब्रह्मणः ।

* * * *

**Colophon:**

इति प्रथमस्याध्यायस्य प्रथमः पादः ।

**End:**

भोगमात्रसाम्यलिङ्गाच्च । भोगमात्रे ब्रह्मानुभवरूपभोग एव साम्यलिङ्गाच्च; ब्रह्मसाम्यप्रतिपादनादित्यर्थः । सोऽश्नुते सर्वान् कामानित्याद्युक्तमेव । न जगद्व्या-

पारो ब्रह्म(ा)साधारणः मुक्तस्य वक्तुं युक्तमिति भावः । अनावृत्तिः शब्दादनावृत्तिः शब्दात् । परमपुरुषं प्राप्तस्य मुक्तस्यानावृत्तिः पुनरावृत्तिः पुनः संसारं प्रत्यावृत्तिः आगमनं नास्ति । कुतः? शब्दात्, स खल्वेवं वर्तयन्नित्यादि न च पुनरावर्तते न च पुनरावर्तत इत्यादिश्रुतेः, मामुपेत्येत्यादिस्मृतेश्चेत्यर्थः ॥

**Colophon:**

इति शारीरकसूत्रव्याख्याने चतुर्थाध्यायस्य चतुर्थः पादः ॥

The scribe gives the date of transcription—

भवाख्यवत्सरे मासे श्रावणे द्वादशीतिथौ ।
इन्दुवासरसंयुक्ते लिखिता सूत्रवृत्तिका ॥

---

R. No. **1832.**

Palm-leaf. $18\frac{7}{8} \times 1\frac{1}{4}$ inches. Foll. 94. Lines, 8 in a page. Grantha. Injured.

Presented in 1915-16 by M.R.Ry. A. M. Śrīnivāsācāriyar of Agaram, Chingleput district.

तर्कभाषाव्याख्या—भावार्थदीपिका.

TARKABHĀṢĀVYĀKHYĀ: BHĀVĀRTHADĪPIKĀ.

By Gaurīkānta. Same work as that described under R. No. 212(*c*) *ante.*

Incomplete Wants the beginning and the end and many leaves are also lost.

---

R. No. **1833.**

Palm-leaf. $14 \times 1\frac{5}{8}$ inches. Foll. 102. Lines, 6 in a page. Telugu. Slightly injured.

Purchased in 1915-16 from M.R.Ry. A. M Śrīnivāsācāriyar of Agaram, Chingleput district.

रहस्यत्रयजीवातुः.

RAHASYATRAYAJĪVĀTUḤ.

By Nārāyaṇamuni, disciple of Śaṭhāriyōgīndra. Same work as that described under No. 5339 of the D.C.S. MSS., Vol. XI.

Complete.

---

R. No. **1834.**

Palm-leaf. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. Foll. 62. Lines, 6 in a page. Telugu. Good.

Purchased in 1915-16 from M.R.Ry. A. M. Śrīnivāsācāriyar of Agaram, Chingleput district.

(*a*) सिद्धान्तन्यायचन्द्रिका.
SIDDHĀNTANYĀYACANDRIKĀ.

Foll. 1*a*—41*b*.

A treatise in Viśiṣṭādvaita Vēdānta, refuting the arguments of the Dvaitins in regard to the doctrine that God is the material as well as the efficient cause of the Universe: by Dēvarāja, disciple of Varadāryaguru.

Incomplete.

**Beginning:**

नमस्ते भव्यरूपाय कल्याणगुणसिन्धवे ।
मम सर्वस्वभूताय विनताभाग्यराशये ॥
कर्मब्रह्मात्मकं शास्त्रं येन साक्षात्कृतं कलौ ।
तं देशिकवरं मूर्ध्ना प्रणमामि पुनः पुनः ॥
वरदार्यगुरोर्लब्धवेदान्तज्ञानसम्पदा ।
रच्यते देवराजेन सिद्धान्तन्यायचन्द्रिका ॥

श्रुतिस्मृति(ती)स्सूत्रवचांसि येन यस्त्वेककण्ठानि समाततान ।
अर्थद्वयं तद्विवृणोतु कामं स भाष्यकृन्मे परमार्थवेदी ॥

तत्र भगवद्भाष्यकारैः सदेव सोम्येदमग्र आसीत् तत्त्वमसीत्यादौ श्रूयमाणसामानाधिकरण्यमुपादानोपादेयभावेन शरीरात्मभावेन च निर्व्यूढम् । तदुभयमपि न संभवतीति माध्वाभिक्षुभिः प्रतिपादितम् । ते खल्वेवमाहुः—त्वत्सिद्धान्ते उपादानादतिरिक्तमुपादेयद्रव्यं नास्तीत्यङ्गीकारात् ।

* * * *

अत्रोच्यते । ब्रह्मणो जगदुपादानत्वे तस्य यद्वियदादिद्रव्याभेदप्रसञ्जनं तदस्मत्सिद्धान्तापरिज्ञानविजृम्भितम् । अस्मत्सिद्धान्ते केवलं वियदादिद्रव्यस्य उपादेयत्वा(न)ङ्गीकारात् । वियदादिविशिष्टब्रह्मण एवोपादेयत्वाङ्गीकारात् तदभेदापादनमिष्टापत्तिपराहतम् । भाषितञ्चेदं भगवद्भाष्यकारैः ।

**End:**

तत्र प्रमाणान्तरस्यानपेक्षितत्वात् प्रमाणान्तराणामपि बहूनां सद्भावात् । यच्चोक्तं भगवतो जगदुपादानत्वेन प्रत्यक्षं प्रमाणं तु न तस्याप्रवृत्तेरिति तत्तु त्वन्मतविरुद्धम्; आत्मनि महतां प्रत्यक्षेण दृश्याद्यभावस्य सिद्धत्वादिति तत्त्वप्रकाशिकोक्त्या.

(*b*) ब्रह्मशब्दार्थविचारः.

BRAHMAŚABDĀRTHAVICĀRAḤ.

Foll. 42*a*—50*b*.

This work investigates into the meaning of the word, Brahman, in accordance with the Viśiṣṭādvaita Vēdānta.

Incomplete.

**Beginning:**

आवश्यकं मुमुक्षूणां ब्रह्मशब्दार्थनिर्णयः ।
यन्मूलं ब्रह्ममीमांसाशास्त्रतत्त्वावधारणम् ॥

इह खलु बृहति बृंहयति तस्माद्उच्यते परं ब्रह्मेति श्रुतेः बृहत्त्वात् बृंहणत्वाच्च तद्ब्रह्मेत्यभिधीय(ते इति)स्मृतेश्चानवधिकातिशयबृहद्बृंहणं च ब्रह्म बृहतेर्धातोस्तदर्थत्वादिति जन्माद्यधिकरणश्रीमद्भाष्याच्च निरतिशयबृहत्त्वं बृंहणत्वं च पृथगेव शक्यतावच्छेदकम् । बृहति बृंहयतीति पृथगभिधानस्वारस्यात् ।

**End:**

आकाशाधिकरणेऽपि सदादिशब्दाः साधारणाकारा इत्युक्तम् । आरम्भणाधिकरणेऽपि न ब्रह्मादिशब्दाः तुल्यप्रकरणस्थाः, तुल्यप्रकरणस्थेन नारायण शब्देन विशेषिताः, तमेव गमयन्तीति । पाशुपताधिकरणेऽपि.

Fol. 51 contains a few stanzas of Vasiṣṭhasmṛti.

---

(*c*) शतदूषणी.

ŚATADŪṢAṆĪ.

Foll. 52*a*—62*b*. The remaining leaves are left blank.

By Vēdāntadēśika. Same work as that described under R. No. 426 *ante*.

Contains the third and the tenth Bhaṅgas.

---

R. No. **1835.**

Śrītāla. $19\frac{3}{4} \times 2\frac{1}{4}$ inches. Foll. 91. Lines, 11 in a page. Nandināgarī. Fair.

Purchased in 1915–16 from M.R.Ry A. M. Śrīnivāsācāriyar of Agaram, Chingleput district.

Foll. 1 and 91 are left blank.

सुभाषितसुरद्रुमः.

SUBHĀṢITASURADRUMAḤ.

Foll. 2*a*—90*b*.

Similar to the work described under R. No. 149(*b*) *ante*.

Contains the Stabakas one and two complete and the third incomplete in the third Skandha.

**Beginning:**

स्वामिन् प्रख्यातनानासहृदयहृदयाह्लादिसाहित्यविद्या-
स्फायद्भूयोरहस्यप्रकटनपटुवाक्तोषिताशेषलोक ।
अन्योक्तच्याद्यात्मकानि प्रणयपरवशेनेरितानि त्वया म-
य्याकर्ण्यानन्दभूमाद्भुतरसभरितो भूरि पद्यान्यभूवम् ॥
श्रीकृष्ण . . यन्ति कानिचिदिह प्रौढार्थसन्दर्भिता-
न्यन्यानि स्फुटमार्दवानि च ततः शब्दार्थचित्राणि च ।
पद्यानि श्रुतिमागतानि हृदयं हर्षाब्धिमग्नं मुहुः
कुर्वन्त्युत्सुकतामधुः कियदहो वाग्देवतावैभवम् ॥
प्रागष्टादशवर्णनात्मकतया ते यौवनार्हाण्यहं
पद्यानि प्रतिपादयाम्यवहितः स्कन्धे तृतीये शृणु ।
इत्यावेदितमेव तानि नितरां श्रोतुं ममोत्कण्ठते
चेतः प्रेमभरेण सम्प्रति मयि श्रीमन् गुरो कीर्तय ॥
श्रीमच्चित्रचरित्रपुत्र भवतो भूयोऽनुयोगक्रिया-
चातुर्येण ममाप्यहर्षि मनसा तान्यद्य ते कीर्तये ।
यान्यष्टादशवर्णनानुगततत्तद्वर्णनारूपतां
बिभ्राणानि महाकवीश्वरकृतिष्वन्तःप्रविष्टानि च ॥

तत्रादौ समुद्रवर्णनम्—

अस्ति क्षीरार्णवं शौरेरन्तःपुरनिदानभूः ।
अवतंसोदयोद्यानमपर्णागृहमेधिनः ॥

* * * *

**Colophon:**

इति श्रीसुभाषितसुरद्रुमे तृतीयस्कन्धे देशवर्णनं नाम प्रथमस्तबकः ॥

* * * *

**Colophon:**

इति सुभाषितसुरद्रुमे तृतीयस्कन्धे राजगृहवर्णना नाम तृ(द्वि)तीय-स्तबकः ॥

अथ राजचरित्रस्तबके राजप्रशंसा—

प्रसादस्य प्रकोपस्य प्रत्यहं दृश्यते फलम् ।
अप्रत्यक्षं तु देवानां राजा प्रत्यक्षदेवता ॥

**End:**

उष्णोष्णशीकरसृजः प्रबलोष्मणोऽन्तरुत्फुल्लनीलनलिनोदरतुल्यभासः ।
एकान्विशालशिरसो हरिचन्दनेषु नागान्बबन्धुरपरान्मनुजा निरासुः ॥

---

R. No. 1836.

Śrītāla. $9\frac{3}{8} \times 1\frac{5}{8}$ inches. Foll. 32. Lines, 16 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R.Ry. Śrīnivāsācāriyar of Tiruvahīndrapuram, South Arcot district.

मालविकाग्निमित्रम्—गुणोत्तराख्यासहितम्.

MĀLAVIKĀGNIMITRAM WITH THE COMMENTARY GUṆŌTTARĀ.

Foll. 1*a*—26*b*.

The commentator is Śrīkaṇṭha. Same work as that described under R. No. 602 *ante*.

Complete.

Foll. 27*a* to 32*b* contain the Bhāgavata, 10th Skandha.

---

R. No. 1837.

Palm-leaf. 15 × $1\frac{1}{8}$ inches. Foll. 145. Lines, 5 in a page. Grantha. Much injured.

Purchased in 1915-16 from M.R.Ry. Śrīnivāsācāriyar of Tiruvahīndrapuram, South Arcot district.

यादवाभ्युदयम्.

YĀDAVĀBHYUDAYAM.

By Vēdāntadēśika. Same work as that described under No. 11624 of the D.C.S. MSS., Vol. XX.

Contains the Sargas 12 to 18 complete. Many leaves are lost in the middle.

---

R. No. 1838.

Palm-leaf. $15\frac{1}{8} \times 1\frac{1}{4}$ inches. Foll. 19. Lines, 9 in a page. Grantha. Slightly injured.

Purchased in 1915-16 from M.R Ry. E. Narasiṁhācāryar of Śiruvaḷūr.

## वैखानसागमः (काश्यपीयः).
## VAIKHĀNASĀGAMAḤ (KĀŚYAPĪYAḤ).

A treatise on the worship of consecrated images of gods in Viṣṇu temples; similar to the one described under No. 5367 of the D.C.S. MSS., Vol. XI.

This work is said to have been related by Kāśyapa.

Contains from the 28nd Adhyāya of which the beginning is wanting and breaks off in the 49th Adhyāya. Many leaves are left blank.

Deals with the following subjects :—

१. कर्षणविधिः.
२. तरुणालयविधिः.
३. वास्तुपुरुषस्वरूपम्.
४. दारुसङ्ग्रहणम्.
५. शिलाग्रहणम्.
६. इष्टकालक्षणम्.
७. प्रथमेष्टकाविधिः.
८. विमानलक्षणम्.
९. ध्रुवबेरमानम्.
१०. दशावतारः.
११. स्वतन्त्रलक्ष्मीलक्षणम्.
१२. परिवारालयविधानम्.
१३. शूललक्षणम्.
१४. शूलस्थापनम्.
१५. रत्नन्यासः.
१६. बिम्बनिर्माणे मृत्सङ्ग्रहणम्.

**Beginning :**

दी निवेद्य . . . . . लङ्कृत्य रात्रावेव निशीथे यक्षरक्षः-पिशाचेभ्यो माषापूपसक्तुलाजसमन्वितं जलमुक्तप्रदेशे परितः क्षिप्त्वौषधिशालि-माषयवगोधूमपिष्टकैरुदकमधुपयोभिरपूपलाजचरुभिः क्रमेण नागेभ्यो बलिं दत्वा प्रभाते स्नात्वा स्नानविधानेन युगलाङ्गुलादीन् पञ्चगव्यैः क्षीरेण गन्धोदकेन वा विष्णुगायत्र्या प्रक्षाल्य संस्थाप्य युगे शेषं सितायाम् ।

* * * *

**Colophon :**

इति श्रीवैखानसे काश्यपप्रोक्ते ज्ञानकाण्डे कर्षणाविधिर्नाम द्वाविंशति-रध्यायः ॥

**End :**

शैषिकं रत्नवर्णाभं श्यामाम्बरधरं किरीटकेयूरहारप्रलम्बयज्ञोपवीतिनं . . . भुजमेवं कारयेत् । अन्येषामपि सर्वेषां रूपवर्णपर्षत्प्रभृतीनि तत्रोक्तविधिना बुध्या युक्तो हि कारयेच्छूलग्राहिणवदार्ववश्मनो ग्रहण.

R. No. **1839.**

Palm-leaf. $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Foll. 43. Lines, 7 in a page. Telugu. Good.

Purchased in 1915-16 from M.R.Ry. A. M. Śrīnivāsācāriyar of Agaram, Chingleput district.

(*a*) भगवत्प्रतिष्ठाप्रयोगः.

BHAGAVATPRATIṢṬHĀPRAYŌGAḤ.

Foll. 1*a*—9*a*.

Same work as that described under R. No. 1343(*a*) *ante*.

Complete.

---

(*b*) भगवद्विवाहप्रयोगः.

BHAGAVADVIVĀHAPRAYŌGAḤ.

Foll. 9*a*—19*a*.

Same work as that described under R No. 1343(*b*) *ante*.

Complete.

---

(*c*) भारद्वाजसंहिता.

BHĀRADVĀJASAṀHITĀ.

Foll. 19*a*—26*a*.

Same work as that described under R. No. 1343(*c*) *ante*.

Breaks off in the 11th Adhyāya.

Fol. 26 contains Bimbasaṅkaryanirūpaṇa and Gōpuramaṇṭapādipratiṣṭhāvidhi. Foll. 27*a*—31*a* contain Sarvadēvatāpratiṣṭhā, Prāṇapratiṣṭhāvidhi, Samprōkṣaṇavidhi, Karmapuṇyāhavācana, Aupāsana, and Bhagavadārādhana.

---

(*d*) नित्यार्चनविधिः.

NITYĀRCANAVIDHIḤ.

Foll. 31*a*—33*b*.

Same work as that described under R. No. 1343(*g*) *ante*.

Complete.

---

(*e*) भगवद्भक्तप्रतिष्ठाविधिः.

BHAGAVADBHAKTAPRATIṢṬHĀVIDHIḤ.

Foll. 33*b*—37*a*.

Same work as that described under R. No. 1343(*h*) *ante*.

Complete.

Foll. 37*a*—38*a* contain Saṁhāra, Sṛṣṭi, and Sthiti Nyāsas, 38*a*—43*a* a few passages taken from the Vāsiṣṭhasaṁhitā, and the Bhagavadārādhanaprayōga. Fol. 43*b* is left blank.

---

## R. No. 1840.

Palm-leaf. 16 × $1\frac{3}{8}$ inches. Foll. 48. Lines, 6 in a page. Grantha. Much injured.

Presented in 1915–16 by M.R Ry. E. Narasiṁhācārya of Śiruvaḷūr.

(*a*) कालामृतम्, उज्ज्वलासहितम्.

KĀLĀMṚTAM WITH UJJVALĀ.

Foll. 1*a*—28*a*. Fol. 28*b* is left blank.

Same work as that described under R. No. 917 *ante*.

Contains the Bindus six and seven which want the beginning and the end respectively.

---

(*b*) जैमिनिसूत्रव्याख्या—ज्योतिःप्रदीपिका.

JAIMINISŪTRAVYĀKHYĀ: JYŌTIḤPRADĪPIKĀ.

Foll. 29*a*—39*b*.

This is a commentary on the two Adhyāyas, viz., Phalajñāpaka and Āyurjñāpaka, of Jaimini's astrological Sūtras. Similar to the work described under R. No. 383(*b*) *ante*. The commentary is called Jyōtiḥpradīpikā and was written by Lakṣmaṇa.

Contains the first Adhyāya incomplete.

**Beginning:**

वन्दे सामनिधिं कलानिधिमतिं प्रीत्या युतं मङ्गलं
छन्दोगेषु बुधं गुरुं वरकविं सर्वे नमस्यन्ति यम्।
दैत्यारि . . . . . .
. . . . ग्रहरूपमाश्रितमहं वन्दे शुभाकाङ्क्षया ॥
जैमिनीयस्य सूत्रस्य लक्ष्मणाख्यसुधीरहम्।
ज्योतिःप्रदीपिकां वक्ष्ये . . . . . ॥

. . . . . रुषस्य नानारूपाङ्गभूतज्योतिश्शास्त्रतत्त्वं भगवता भर्गेण पार्वत्यै उपदिष्ट[वा]तया स्कन्दाय तेन . . . . (परमकारुणिकेन मुनिना जैमिनिना लोकानां तत्त्वबोधाय रचितेषु सूत्रेषु

* * * *

मङ्गलपूर्वकं कृतमिदमाद्यं प्रतिज्ञासूत्रम् —

उपदेशं व्याख्यास्यामः । उपदिश्यते सकलरहस्यमनेन . . . . . देशोपात्तं व्याख्यास्यामः प्रकटीकरिष्याम इत्यर्थः । अस्य ग्रन्थस्य द्वावध्यायौ फलज्ञापकश्चायुर्ज्ञापकश्च ।

**End:**

त्रिकोणे पञ्चमनवमयोः उपचये द्वित्र्येकादशात्मके वा सति पित्रादीनां स्वस्य च मैत्री वक्तव्या । तृतीये चतुर्थसप्तमादितः । एवमेव कनिष्ठभ्रातृमातृकल.

Fol. 40 is left blank.

Foll. 41—43*a* contain a few sentences of Yōgādhyāya and Vivāhaprakaraṇa. Fol. 43*b* is left blank. Foll. 44—48*a* contain Navagrahajapa in Telugu character.

---

R. No. **1841.**

Paper. $9\frac{3}{8} \times 7\frac{3}{8}$ inches. Foll. 15. Lines, 20 in a page. Grantha. Much injured.

Purchased in 1915–16 from M.R.Ry. E. Narasiṁhāchāriyar of Śiruvaḷūr.

**वेदान्तसंज्ञानिरूपणम्.**

VĒDĀNTASAṀJÑĀNIRŪPAṆAM.

Same work as that described under R. No. 1719(*b*), *ante*

Incomplete.

---

R. No. **1842.**

Paper. $9\frac{1}{2} \times 7\frac{7}{8}$ inches. Foll. 12. Lines, 24 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. E. Narasiṁhāchārya of Śiruvaḷūr.

**स्त्रीपुंधर्मः.**

STRĪPUṀDHARMAḤ.

Foll. 1*a*—11*a*. Foll. 11*b* to 12 are left blank.

A treatise in law regulating the suits between the husband and the wife.

Incomplete.

**Beginning:**

अथ स्त्रीपुंधर्मः—ननु,

गुरुशिष्यो(ष्यः)पितुः पुत्रो दाम्पत्ये स्वामिभृत्ययोः ।
विरोधे तु मिथस्तेषां व्यवहारो न सिध्यति ॥

इति मिताक्षराधृतस्मृतिवचनेन स्त्रीपुंसयोर्विरोधे व्यवहारनिषेधात् स्त्रीपुंधर्मस्य व्यवहारपदत्वं न संभवतीत्याशङ्क्य समाधत्ते चण्डेश्वरः—यद्यपि स्त्रीपुरुषयोरन्योन्यमर्थिप्रत्यर्थिभावेन राजसभायां व्यवहारो निषिद्धस्तथापि प्रत्येकेन कर्माकर्णिकयापि ज्ञापिते परस्परहितव्यक्तिव्यतिक्रमे दण्डादिना जायापती निजधर्ममात्रे राज्ञा स्थापनीयौ; अन्यथा दण्डनीयाविति बोधयितुं व्यवहाराधिकरणे स्त्रीपुंधर्मः प्रदर्शित इति। मिताक्षराकारस्तु—

दुर्भिक्षे धर्मकार्ये वाप्यापौ संप्रतिरोधके।
गृहीतं स्त्रीधनं भर्ता नाकामो दातुमर्हति॥ इति स्मरणात्।

End:

पुत्रोत्पत्तौ तु अदृष्टमपि भवति; किन्तु तत्परम्परयेति मन्तव्यम्। एतेन सवर्णासु ज्येष्ठयेत्यत्र ज्येष्ठत्वं न वयःक्रमेण, किन्तु विवाहक्रमेणेति प्रतिपादितमिति मुख्यम्। गौणकल्पमाह—धर्मपत्नीत्यादि सदोषस्स्यात्।

---

R. No. 1843.

Paper. 13 × 7½ inches. Foll. 54. Lines, 32 in a page. Grantha. Much injured.

Purchased in 1915–16 from M.R.Ry. Narasiṁhācāryar of Śiruvaḷūr.

**शृङ्गारमञ्जरीसाहजीयम्.**

ŚṚṄGĀRAMAÑJARĪSĀHAJĪYAM.

A drama based on the life histroy of Sāhaji Mahārāja of Tanjore: by Appākavi or Peri Appā Śāstri, son of Aṇṇan Śāstrin, grandson of Kṛṣṇa and great grandson of Īśvara. The author's uncle was Vainatēya who wrote a commentary on the Prakāśa. Diṇḍimasārvabhauma states that Aṇṇan Śāstrin vanquished Kāmadēva in a controversy in the court of Vēṅkaṭapati who gave him a golden palanquin and the village called Ērakaram. Aṇṇan Śāstri had three sons, of whom the eldest Viśvanāthāryadīkṣita was clever in commenting on the Śiddhāñjana and other works of Kṛṣṇānandayatīndra. The second son was Vainatēyasūri. The author was the third son and was a favourite of the King Sāhaji. He was given the title of Kāvitārkikasārvabhauma by his teacher, Kṛṣṇānandayatīndra. The opinions of Gaṅgādharamakhin, Rāmabhadramakhin, Bhūmināṭha, Śrīdhara Vēṅkaṭēśakavi, Vēdakavi, his disciple Śrīnivāsakavi, Rājagōpālakavi, Nārāyaṇa Śāstrin, and Vēṅkaṭakṛṣṇadīkṣita about the author's learning are quoted. Kavirākṣasa is also mentioned along with Vēdakavi. The drama was intended to be staged on the occasion of the festival in the Caitra month at Tiruvaiyār, Tanjore district.

Contains one (wants the beginning) to five Aṅkas complete. Breaks off in the sixth Aṅka.

**Beginning:**

सू—मारिष इतस्तावत्।

(प्रविश्य) पारिपार्श्वकः—भावैषोऽस्मि।

सू—अद्य किल धर्मसंवर्धनीसहायस्य भगवतः पञ्चनदीश्वरस्य चैत्रोत्सव-प्रसङ्गेन नानादिगन्तवास्तव्यो जनः परिमिलितस्तिष्ठति। तेन चादिष्टोऽस्मि।

पा—कथमिव।

सू—तत्रभवतः शतमखमुखनिखिलनिलिम्पवर्गजीवातुभुजबलवैभवस्य साहजिमहाराजस्य चरितानुबन्धिनः कस्याचिन्महाकविग्रथितस्य शृङ्गाररसप्रधानस्य नाटकस्य प्रयोगेण वयं विनोदनीया इति।

पारिपार्श्वकः—युक्तमेवादिष्टम्, परन्तु सामाजिकनिर्दिष्टगुणानुबन्धः कस्य वा कवेः तादृशः प्रबन्ध इति।

सू—विचिन्त्य किं न जानासि; सकलकलापाण्डित्यधुरन्धरस्य साहजिमहीपुरन्दरस्य करुणामृतपूरितापाङ्गतरङ्गितविलोकनपूर्वकनियोगानुभावसमुन्मिषितसारस्वतवैभवं . . . चरणकमलविहितविनीतभावं तेनैवापादितव्यपदेशं धा . . . . रूपदेशमप्राकृतगुणोत्तरमप्पाकविम्।

अपि च—

कृ(तवे)दान्तासिद्धान्तः कृष्णो यस्य पितामहः।
विश्वज्ञानोदधिस्सं(वि)दीश्वरः प्रपितामहः॥

अस्य हि—

जनकचरणाः . . . . शिरोमणि-
प्रमुखनिखिलग्रन्थप्रौढाः पतञ्जलिसूरयः।
अमरतटिनीरिङ्खद्वीचिच्छटामदहारिणी
जयति वचसां धाटी येषां पटीरपरीमला॥

अपि च—

प्रकाशहृदयग्रन्थनिर्माणव्यक्तनैपुणाः।
पितृव्याः पुनरेतस्य वैनतेयविपश्चितः॥

उक्तञ्च डिण्डिमसार्वभौमेन—

विद्वत्सु व्यपदिष्टे वेङ्कटपतिदेवरायपरिपुष्टे।
वक्तर्यण्णम्भट्टे मुह्यन् पतति स्म कामदेवोऽयम्॥

अपिच—

रङ्गोजः किं मृगोऽजो न्विति विशयपदे व्याप्तिवेगे सभङ्गे
सद्युक्त्योघादमोघादतितरविगलद्धीमदे कामदेवे ।
सभ्यानभ्याशभाजः सपदि विदधती विस्मितान् सुस्मितास्या-
नण्णङ्छास्त्रीयवाक्छ्रीः प्रथयति निकटं वेङ्कटक्ष्माधिनेतुः ॥

अपिच—वेङ्कटविभुना कलिताः काञ्चनशिबिकादिसकलबहुमानाः ।
एरकरं तद्ग्रामं ननु जानीमः परम्पराप्राप्तम् ॥

पारि—ततस्ततः ।

सू—तनयाः पुनरेतेषां त्रेताग्नय इव त्रयः ।
स(न्तो) ज्येष्ठाः पुनस्तेषां विश्वनाथार्यदीक्षिताः ॥
गभीरतन्त्रसिद्धान्ततलस्पर्शसमुज्ज्वलम् ।
विज्ञानं विमलं येषां विज्ञा एव हि जानते ॥
कृष्णानन्दयतीन्द्राणां सिद्धाञ्जनमुखीः कृतीः ।
य एव सम्यग्व्याख्यातुं प्रभवन्तीति गीयते ।
वैनतेया इति पुनस्तेषामप्यनुजा मताः ।
प्रत्यक्षो यत्र हैरम्बः प्रयच्छत्यभिकाङ्क्षितम् ॥
कनीयानेष सर्वेषां तनीयानपि बुद्धिमान् ।
य एष साहभूपालपरमप्रेमभाजनम् ॥
लक्ष्म्यम्बा यस्य जननी लक्ष्मीरिव गुणोज्ज्वला ।
तनयेष्वपि यत्रैव तस्या वात्सल्यगौरवम् ॥

तेन पुनरप्पाकविना शृङ्गारमञ्जरीसाहजयिं नाम नाटकं प्रणीतम् । तेन सरसं प्रयाक्तुमधुनोचितम् ।

पारि—नन्वितोऽपि निपुणतराः सन्ति कविराक्षसवेदकाविप्रभृतयः कवयः ।

* * * *

शिक्षितविमतग्रन्थैः श्रीकृष्णानन्ददेशिकैरेव ।
कवितां परीक्ष्य सरसां कवितार्किकसार्वभौमता दत्ता ॥

* * * *

आभिहितं च तदन्तेवासिना श्रीनिवासकविना ।

पा—कथमिव ।

अनितरसमपरिपाटीं पेरियप्पाशास्त्रिवाग्घाटीम् ।
प्रभवः परिशङ्कन्ते गङ्गा यमुना सरस्वती वेति ॥

* * * *

सोऽयं कविः प्रसिद्धः परिषदियञ्चेद्गुणान् परिज्ञात्री ।
पुण्यं च साहचरितं वयमपि दक्षाः प्रयोगविधौ ॥

* * *

पारि—प्रकृतकथाभागोऽपि स्मारित इव भावेन । किं स्मृतिसमनन्तरमेव,

स्वप्नं कञ्चन दृष्ट्वा स्मयमान साहराज इव ।
अहमपि किमपि ध्यायन्ननुपदकरणीयमाशु कलयामि ॥

इति निष्क्रान्ताः ॥

प्रस्तावना ।

End:

कटाक्षाणां तस्याश्चिकुरनिकराणामपि सतां
वहन्तः सादृश्यं किमपि विजयन्ते मधुकराः ।
अमुष्यास्संलापानधिकमधुरिम्णः कलयतां
शुकानां माधुर्यं परिणमति चाटूक्तिषु परम् ॥

अपिच—

अमुष्या सङ्गीतस्नुतनवसुधासारलहरी-
समुद्यच्छद्विन्दुव्यतिकरमहिम्ना परभृताः ।
कलं गायन्त्येते कलमधुरशब्दाः पुनरिमे
मयूरा अप्येवं . . . . . भन्ते घनयशः ॥

* * * *

रसभावप्रणयिनः । स्मृतिमभिनीय ।

. . . . . .

परिक्रम्यावलोक्य । अहो . . . . . न्दरसाः
प्रतिस्पर्धिरसः । तदनु . . . . . .
या पद्मे नयनपरिपाटी . . . . . चिः कोकयुगले . . .
. . . पङ्क्तौ हसितरुचिरा ।

---

R. No. **1844.**

Śrītāla. 17 × 2¼ inches. Foll. 120. Lines, 14 in a page. Grantha. Good.

Purchased in 1915–16 from M.R.Ry. Appunni of Elappulli, near Palghat.

नामलिङ्गानुशासनव्याख्या—सुबोधिनी.
NĀMALIṄGANUŚĀSANAVYĀKHYĀ: SUBODHINĪ.

A commentary on the Nāmaliṅgānuśāsana of Amarasiṁha: by Jātavēdadīkṣita, son of Yājñika Dēvaṇabhaṭṭōpādhyāya who is said to be the author of a Mīmāmsābhāṣyavivaraṇa.

Contains from the beginning of the first Kāṇḍa to the end of the Siṁhādivarga.

Beginning:

ज्ञानादयो विवर्धन्ते सिध्यन्त्येव हि सिद्धयः ।
ययोः प्रसादात्तौ वन्दे परावरगुरू क्रमात् ॥
अस्ति सर्वमनोह्लादि नामलिङ्गानुशासनम् ।
नामव्युत्पत्तिसिद्ध्यर्थं बालोसूत्परि(बालैस्सम्प्रति)पठ्यते ॥
तेषां तदर्थबोधार्थं मृदुसंस्कृतभाषया ।
(इयं) सुबोधिनी रम्या विस्तरेण विरच्यते ॥
अनुक्तमुक्तशेषं च ग्रन्थान्तरगतं त्विह ।
मूलग्रन्थार्थकथने निष्फलत्वान्न लिख्यते ॥
बालानां प्राप्तपाठानां नार्थः सर्वानुवादने ।
तेनातिदीर्घं व्याख्येयं प्रतीकेनानुगम्यते ॥
नामच्छेदच्छलेनैव ज्ञाप्यते तत्र विस्मृतम् ।
शेषं सर्वानुवादेन व्याख्येयमनुभाष्यते ॥

ग्रन्थारम्भे यन्मङ्गलसाधनमिष्टदेवताराधनं शिष्टाचारानुमेयवेदोक्तं न केवलमाराधनकर्तुरेव मङ्गलसाधनम्; किन्तु पुण्यान्तरवदन्यान् प्रति कर्तव्यमित्युपदेशकस्यापि तत्र लघूपायात् मङ्गलमवाप्तुं ग्रन्थस्यादौ यस्येत्यादिश्लोकेन बोद्धॄन् प्रति प्रशस्तो देव आराध्य इत्युपदिश्यते । श्लोकोऽयं व्यर्थः । तत्र प्रथमं तावत्प्रधानभूतोऽर्थः प्रदर्श्यते—यस्य भगवतो देवस्य ज्ञान[स्य]दयासिन्धोः ज्ञानदययोरत्यर्थप्रभूतयोर्विपुलाश्रयस्य सर्वज्ञस्य सर्वभूतानुकम्पित्वशालिन इति यावत् ।

* * * *

यस्यापि नामानि भवन्ति सर्वाण्युक्तानि विष्णोर्जगदात्मकस्य ।
स प्रीयतामुत्सुकसुप्रसक्तिव्याख्यानतो व्याकृतनामधेयम् ॥

**Colophon :**

इति मीमांसाभाष्यविवरणकृद्याज्ञिकदेवणभट्टोपाध्यायात्मजजातवेददीक्षित-कृतायां सुबोधिन्याख्यायाममरकोशवृहद्वृत्तौ प्रथमकाण्डोक्तनामलिङ्गविवेचनम् ॥

प्रथमकाण्डग्रन्थसङ्ख्या त्रीणि सहस्राणि पञ्चशतम् ।

**End :**

अस्वैरिणः क्रियन्त इति व्युत्पत्त्या गृह्यकशब्दः स्वैरप्रचारराहित्यनिबन्ध-नेषु गृहासक्तपक्षिमृगेषु वर्तत इति युक्तमुक्तम्—गृह्यकाश्च त इति ॥

**Colophon :**

सुबोधिन्याख्यायाममरकोशवृहद्वृत्तौ मृगादिवर्गोक्तनामलिङ्गविवेचनम् ॥

---

R. No. **1845.**

Śrītāla. $13\frac{7}{8} \times 1\frac{3}{4}$ inches. Foll. 66. Lines, 10 in a page. Malayāḷam. Good.

Presented in 1915-16 by M.R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

अनर्घराघवव्याख्यानम्—विक्रमीयम्.

ANARGHARĀGHAVAVYĀKHYĀNAM : VIKRAMĪYAM.

By Mānavikrama. Same work as that described under R. No. 132(*a*) *ante*.

Breaks off in the third Act.

---

R. No. **1846.**

Śrītāla. $14 \times 2\frac{1}{8}$ inches. Foll. 118. Lines, 13 in a page. Malayāḷam. Good.

Presented in 1915-16 by M.R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

याज्ञवल्क्यस्मृतिव्याख्या—ऋजुमिताक्षरा

YĀJÑAVALKYASMṚTIVYĀKHYĀ : ṚJUMITĀKṢARĀ.

Foll. 1*a*–118*a*. Foll. 16*b*, 34*b*, 61*b*, 67*b* and 118*b* are left blank.

By Vijñānēśvara. Same work as that described under No. 2682 of the D.C.S. MSS., Vol. V.

Contains the Vyavahārakāṇḍa complete.

---

R. No. **1847.**

Śrītāla. 14 × $2\frac{1}{8}$ inches. Foll. 46. Lines, 13 in a page. Malayāḷam. Good

Purchased in 1915-16 from M.R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

(*a*) वृत्तरत्नाकरव्याख्या—मणिमञ्जरी.

VṚTTARATNĀKARAVYĀKHYĀ: MAṆIMAÑJARĪ.

Foll. 1*a*—8*b*. Fol. 9 is left blank.

By Nārāyaṇapurōhita, son of Nṛsiṁhayajvan. Same work as that described under No. 1792 of the D C.S. MSS., Vol. III.

Incomplete.

---

(*b*) रोगचिकित्सा.

RŌGACIKITSĀ.

Foll. 10*a*—46*b*. Fol. 27 is left blank.

A work on medicine, prescribing cures for the treatment of consumption, leprosy, etc.

Incomplete.

**Beginning:**

देहे दोषरसादिधातुमलमूले स्वस्वपापेरिता
रोगाः स्युर्ज्वररक्तकासवमिहिक्काश्वासयक्ष्मारुचिः ।
हृद्रोगस्वरसादतृण्मदमुखा दुर्नाम चोद्वर्तनं
विस्रंसग्रहिणीगदाल्पबहुमूत्राद्यास्ततो विद्रधिः ॥
वृद्ध्यान्त्रामयगुल्मकुक्षिनहनाष्ठीलातुनी कामिला
पाण्डुः शोफविसर्पसंयुतमसूरीश्चित्रकुष्ठक्रिमिः ।
वातव्याधिरथास्रवातमिति ते दोषैः पृथग्वन्धतः
सर्वैः स्थानविशेषकारुभिरसङ्ख्याता विकारा इमे ॥
दक्षापमानसंक्रुद्धरुद्रमानस[निश्वास]सम्भवः ।
ज्वरोऽष्टधा पृथग् द्वन्द्वं संघातागन्तुकाः स्मृताः ॥

**End:**

कार्पासिपत्ररजनीकरञ्जैर्मूत्रपेषितैः ।
पादौ संसेदयेद्धीमान् क्षि(स्त्री)पद्यां तु यथासुखम् ॥
विपाटिकायां परमं महातिक्तघृतं हितम् ।
जळूका सा हरेद्रक्तं सिरया वा यथाबलम् ॥

---

R. No. **1848.**

Palm-leaf. $8\frac{5}{8} \times 1\frac{1}{8}$ inches. Foll. 44. Lines, 6 in a page. Malayāḷam. Good.

Purchased in 1915–16 by M.R.Ry. Appuṇṇi of Elappuḷḷi, near Palghat.

(*a*) चाणक्यसूत्रम्.

CĀṆAKYASŪTRAM.

Foll. 1*a*—28*a*. Fol. 28*b* is left blank.

This is a treatise in the form of Sūtras laying down ethical and political maxims of great import and of common acceptance. The Sūtras are attributed to Cāṇakya, and are different from the Arthaśāstra of Cāṇakya.

Complete.

**Beginning:**

सुखस्य मूलं धर्मः । धर्मस्य मूलमर्थः । अर्थस्य मूलं राज्यम् । राज्यस्य मूलमिन्द्रियजयः । इन्द्रियजयस्य मूलं विनयः । विनयस्य मूलं वृद्धोपसेवा । वृद्धोपसेवाया मूलं विज्ञानम् । विज्ञानेनात्मानं सम्पादयेत् । सम्पादितात्मा जितात्मा भवति । जितात्मा सर्वार्थैः संपूज्यते । सा हि सम्पत्प्रकृतिसम्पदं करोति ।

**End:**

कृमिशकृन्मूत्रभाजनं शरीरम् । क्षमायुक्तस्य तपो हि वर्धते । विनिपातप्रतीकारः । तस्मात्सर्वेषां कार्यसिद्धिर्भवति ॥

**Colophon:**

इति चाणक्यसूत्रम् ॥

---

(*b*) പണിക്കൊക്കയുടെലക്ഷണം.

PAṆIKKORKKAYUDELAKṢAṆAM.

Foll. 29*a*—41*b*.

See the fourth part of this Catalogue.

---

(*c*) श्रीरामस्तवः.

ŚRĪRĀMASTAVAḤ.

Foll. 42*a*—44*a*. Fol. 44*b* contains a few stanzas of Śivastōtram.

A eulogy on Rāma addressed to mind exhorting it to do service to Rāma and to worship Him.

Complete.

**Beginning:**

नित्यं किं धावसि चलविषयाननुभवितुं सुखलेशाभासान् ।
गुरुतरदुःखानतिदुस्साधानत्यन्तायासानंहोमूलान् ॥

उग्रभयङ्कररौरवादिनरकशतहेतूनेतानपि परिहर ।
सीतापतिमाशु परिचर शं भो चेतः श्रीरामं भज शरणम् ॥

**End:**

श्रितचिन्तामणिमतिकरुणाकरमरिधरमुरुतरशरकोदण्डम् ।
भो चेतः श्रीरामं भज शरणम् ॥

**Colophon:**

श्रीरामस्तवम्(:) ॥

---

R. No. **1849.**

Śrītāla. 9¼ × 2 inches. Foll. 50. Lines, 12 in a page. Malayāḷam. Good.

Purchased in 1915–16 from M.R.Ry. Appuṇṇi of Elappulli, near Palghat.

(*a*) प्रबोधदीपिका.
PRABŌDHADĪPIKĀ.

Foll. 1*a*—32*b*. Fol. 17 is left blank.

A treatise in 12 Ullāsas explaining in simple language the principles of the Advaita Vēdānta.

Complete.

**Beginning:**

अध्यारोपापवादाभ्यां ज्ञातव्यस्तत्त्वनिर्णयः ।
न कर्मणा न प्रजया त्यागेन न धनेन वै ॥

अध्यारोपो नाम शुक्तिरजतादिवत् सच्चिदानन्दलक्षणे ब्रह्मणि प्रपञ्चारोपः । सोऽपि परमार्थवस्त्ववबोधाकारेणाज्ञानेनापतितः । अज्ञानमेव गुणानां साम्यावस्था ।

* * * *

**Colophon:**

इति प्रबोधदीपिकायां प्रथमोल्लासः ॥

**End:**

विज्ञानतत्त्वो विविदिषासंन्यासिनः । हंससंन्यासिनश्च वरीयान् परमहंसो भूत्वा देहावसाने परिपूर्णब्रह्मस्वरूपो भवति ॥

**Colophon:**

इति प्रबोधदीपिकायां द्वादश उल्लासः ॥

जगज्जीवेशभेदेन वर्ण्यते यस्त्रिधा बुधैः ।
तस्याङ्घ्रिपङ्कजे नित्यं वन्दे सच्चित्सुखात्मनः ॥

Fol. 33 contains a few lines of Mṛtyucakraviṣaya. Foll. 34—35 are left blank.

---

(*b*) **प्रवेशकः.**

PRAVĒŚAKAḤ.

Foll. 36*a*—48*b*. Foll. 49-50 are left blank.

An introductory metrical treatise in grammar according to the Pāṇini's system.

Complete.

**Beginning:**

अशेषागमतात्पर्यकैरवोद्बोधचन्द्रिकाम् ।
उपास्महे ज्ञानमुद्रां रामचन्द्रकरोदिताम् ॥
लक्ष्म्या प्रकाशविषयं रञ्जयन्निजया निजम् ।
नित्यमुद्यन् विजयते सुकृतालम्बनं रविः ॥
प्रवेशक संस्क्रियते शब्दशास्त्रप्रवेशकः ।
सुगमोऽयमृजुर्मार्गो बालानां मन्दचेतसाम् ॥
प्रवेशकेन जानन्ति शब्दान् व्याकरणक्षमान् ।
इक्षुं खादन्ति नादन्ता रसं शर्करया विदुः ॥
दर्पणे पणमात्रेऽपि दन्ती प्रतिफलेद्यथा ।
तथाल्पेऽपि प्रकरणे महद्व्याकरणं स्फुरेत् ॥
पाठक्रमः प्रसिद्धोऽत्र पञ्चाशद्वर्णसन्ततेः ।
लळयोरविशिष्टत्वं मतं व्याकरणे सताम् ॥
स्वराश्चतुर्दशात्राद्या अच इत्यपि संज्ञिताः ।
अनुस्वारो विसर्गश्च तत्परौ क्रमतः स्मृतौ ॥

**End:**

तदन्तग्रहणं वर्णे प्रकृते स्याद्विशेषणे ।
तदादिग्रहणं तद्वत्प्रत्ययस्य विशेषणे ॥
यदेकवर्णश्चादेशो लोपश्चान्त्याक्षरस्य वै ।
शिदनेकाक्षरो लुक्श्लुलुपः सर्वस्य कीर्तिताः ॥
परस्य विहितं कार्यं परस्यादेर्भवेद्यथा ।
ईदास आनस्यासीनो हृदयाम्बुरुहे हरिः ॥

**Colophon:**

इति प्रवेशकः समाप्तः ॥

## R. No. 1850.

Śrītāla. $7\frac{1}{2} \times 2\frac{2}{5}$ inches. Foll. 72. Lines, 17 in a page. Malayāḷam. Good.

Purchased in 1915–16 from M.R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

Foll. 23*b*, 38*b* and 59*b* are left blank.

व्यवहारमालिका.

VYAVAHĀRAMĀLIKĀ.

Foll. 1*a*—66*b*.

A treatise in law, compiled from various authorities like Manu, Yājñavalkya, Kātyāyana, etc. This is apparently the original of which a Malayāḷam translation exists.

Complete.

**Beginning :**

नमोऽस्तु नरसिंहाय भक्तानुग्रहकारिणे ।
अजाय बहुरूपाय सर्गस्थित्यन्तकारिणे ॥
मनुमुख्यसरस्समुद्भवैः सुकुमारैः प्रसवैर्वचोरसैः ।
त्रिदिवाप्तिफलैर्नृपोचितां रचयामि व्यवहारमालिकाम् ॥

याज्ञवल्क्यम्—

व्यवहारान् नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह ।
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः ॥

अन्यविरोधेन स्वात्म(सं)बन्धितया कथनं व्यवहारः । नृप इति न क्षत्रिय-मात्रस्यायं धर्मः । प्रजापालनेऽधिकृतस्यान्यस्यापीति कात्यायनः ।

सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः ।
ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः ॥

अत्र ब्राह्मणा अनियुक्ताः सभासदस्तु नियुक्ता इति भेदः । मनुः—

अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकञ्चैव गच्छति ॥
दिवसस्याष्टमं भागं मुक्त्वा कालत्रये तु यः ।
स कालो व्यवहाराणां शास्त्रदृष्टः परः स्मृतः ॥

**End :**

सर्वस्वं तु हरेद्राजा चतुर्थं वावशेषयेत् ॥

यदा च संचितं द्रव्यं ब्राह्मणेभ्यः प्रयच्छति ।
तद्राज्ञाप्यनुमन्तव्यमेष धर्मः सनातनः ॥
एवं सर्वानिमान् राजा व्यवहारान् समापयेत् ।
व्यपोह्य किल्बिषं सर्वं प्राप्नोति परमां गतिम् ॥

इति प्रकीर्णकम् ।

**Colophon:**

व्यवहारमालिका समाप्ता ॥

Fol. 67 contains some sentences of Vyavahāraviṣaya. Foll. 68*a*—72*b* contain Dhātupāṭha.

---

R. No. **1851.**

Śrītāla. 7¼ × 2 inches. Foll. 136. Lines, 13 in a page. Malayāḷam. Good.

Purchased in 1915–16 from M.R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

**मानवेदचम्पुभारतम्.**

MĀNAVĒDACAMPUBHĀRATAM.

Foll. 1*a*—126*a*. Foll. 38*b*, 47*b*, 54*b* and 126*b* are left blank.

A Campukāvya on the story of the Mahābhārata: by Mānavēda, nephew of Vikrama (Prince of Calicut) and disciple of Kṛṣṇa.

Complete in 12 Stabakas.

**Beginning:**

लक्ष्मीमातनुतात्स वो मुनिवरो व्यासाभिधानोऽनिशं
यः प्रालेयगिरावपान्तरतमोरूपेण नित्यं तपः ।
तन्वानस्य कला हरेरविकला लोकोपकारोद्यता
द्रागस्यन्दत भारतामृतझरी यस्येयमास्येन्दुतः ॥
नृत्यन्तं रजनीमुखे स्वपितरं स्तुत्यं त्रिलोकीजनैः
नित्यं तन्निजकर्णतालपवनैरत्यन्तमानन्दयन् ।
आज्ञानश्च यथा वयं भुवि कराग्रेणोरुनादं कृपा-
निष्णात्मा स हि विघ्नराज इह मे विघ्नान् विजेष्णीयताम् ॥
विद्यादानविशारदा विनमतां बालेन्दुराजज्जटा-
जूटाशारदनीरदावलिरुचीनीकारदा शारदा ।

शब्दब्रह्ममयी विरिञ्चवदनाम्भोजन्मरङ्गस्थली-
शैलूषी लघु मोमुषीतु शमलं मे शेमुषीमेयुषी ॥

* * * *

राज्ञामेकावलम्बे ज्वलनकुलभुवां शारदाम्भोदवर्णे
सव्ये भागे तुषाराचलसुकृतपरीपाकदेदीप्यमाने ।
लक्ष्मीग्रामाधिवासे प्रणतिपरनृणां शश्वदक्षीणलक्ष्मी-
दानोन्निद्रे दयार्द्रे रतिरुदयतु मे कामदे वामदेवे ॥
एतामाशु कृतिर्मम प्रथयतादध्यासिताब्जप्रभं
गाढाश्लिष्टगलं श्रिया परिलसच्चन्द्रावतंसोज्वलम् ।
नित्यं संभृतिभूतिदन्तिदमनं निःशेषभूतानतं
शश्वत्संश्रितसर्वमङ्गलमशोकावासवासं मुहुः ॥
लक्ष्मीमक्षीणरूपामनिशमनुभवन्भूमिजां भूरिमोदं
तन्वन्नास्थां सुमन्त्रे भुवि च तिलकयन्नन्वयं चित्रभानोः ।
विश्वामित्राधिकानन्दथुविपुलभुजाविक्रमो विक्रमाख्यो
राजा रामाभिरामो जगदवनकलालालसी लालसीति ॥

* * * *

स्वस्रीयोऽस्य खलु क्षमावलरिपोः श्रीमानवेदाभिधः
सुश्राव्यं त्वरितं सुधाकरकुलक्षोणीभुजां पावनम् ।
विद्वत्सम्मतचम्पुभारतनिबन्धस्याद्भुतार्थावली-
सिन्धोः पूर्वतयाद्य वर्णयति तत्सन्तो लभन्तां मुदम् ॥
श्रीमान् सीमातिगामिप्रसृमरमहिमा चन्द्रमाः सान्द्रमोदं
सेन्द्रैरास्वाद्यमानः सकलसुरगणैः रोहिणीप्राणनाथः ।
नेत्रादत्रेः पुराभूत्प्रभव उरुभुजा विक्रमात्राणविश्व-
क्षोणीचक्रान्तराणां भरतकुलभुवां भूभुजां मानभाजाम् ॥

* * * *

आमोदभाजां सुमनोगणानामालम्बभूराविरभूदमुष्मात् ।
मान्यो वदान्यो नृपतिर्ययातिः पयःपयोधेरिव पारिजातः ॥

* * * *

ततो ययातिस्तु पुरुहूतेन पुरा पुरूरवसे प्रतिपादितं प्रतिष्ठानाभिधानमखिल-विभवाधिष्ठानभूतमधिष्ठानवरमधिष्ठानाभीष्टदानैः प्रतीष्टमोदाः क्षरदमृताक्षरैरुदितैः रञ्जसा रञ्जिताः प्रजाः प्रजा इव निजाः प्रतिपालयन्.

* * * *

Colophon:

इति मानवेदविरचिते चम्पुभारते प्रथमस्तबकः ॥

End:

इत्थं ते खलु जातकर्मकृतसंस्काराः कुमारास्त्रय
स्तस्मिन् हस्तिननाम्नि पत्तनवरे विश्रेजिरे निर्भरम् ।
शश्वत्संश्रितभूतितायनपराः सम्भावनीयाः सतां
मध्येवेदि समिद्धमिद्धमहसस्तेताम्रयस्ते तथा ॥
एवं देवोपमेषु त्रिषु सपदि कुमारेषु जातेषु तेषु
व्यासात्सा वासवी सोऽपि च सुरतटिनी नन्दनस्थे च देव्यौ ।
नानन्दामासुरासूदितहृदयरुजः पूर्णकामाः किमुक्तैः
भूयोभिर्मोदभारो निखिलतनुभृतां मेदुरः प्रादुरासीत् ॥

Colophon:

इति श्रीमानवेदविरचिते चम्पुभारते द्वादशस्तबकः ॥

The scribe adds—

श्रीमत्कृष्णाभिधगुरुकृपासारमाध्वीरसार्द्रैः
हृद्यैरुद्यत्परिमलभरैर्गद्यपद्याभिधानैः ।
कालोद्भुद्भैः स्तबकलसितैर्विश्ववर्या सपर्या
पुष्पव्रातैरिह विरचिता नन्दसूनोर्मयैषा ॥
सानन्दानन्तभोगिप्रवरपरिलसन्मङ्गलोत्तुङ्गमूर्तिः
श्रीमद्वत्सं दधानो महिततरवृषस्कन्धदेदीप्यमानः ।
वासं तन्वन्नशोकोपपदपुरवरे सर्वदो माधवो मे
पादाम्भोजन्मभाजः सपदि वितनुतादुत्तमां मुक्तिलक्ष्मीम् ॥

Foll. 127*a*—136*b* contain Anumitiprakaraṇa in Muktāvali.

---

R. No. **1852.**

Śrītāla. 7½ × 1 inches. Foll. 165. Lines, 6 in a page. Malayāḷam. Good.

Purchased in 1915-16 from M.R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

(*a*) **त्रिपुरदहनम्.**

TRIPURADAHANAM.

Foll. 1*a*—25*a*. Fol. 25*b* is left blank.

A small poem in three Āśvāsas narrating the story of the burning of the demon, Tripura, by God Śiva. The stanzas are in what are called the Ardhayamaka style. The author is Vāsudēva.

Complete.

**Beginning :**

श्रपुरतिगौरच्छायं जयति विभोरभिदधाति गौरच्छायम् ।
विषकटुका येनाहिश्रेणी भूषणमिव स्वभूकायेऽनाहि ॥

येन च कालोऽलोपि स्मरं च निजघान योऽम्बिकालोलोऽपि ।
योऽस्थाद्विषमास्वाद्य स्वस्थः सुरततिषु जातविषमास्वाद्यः ॥

* * * *

अथ पुरतोऽमरपाता स्वचमूश्चलयन्सबाणतोमरपाताः ।
सुदुरासदसारेभे स्थितः स्वयं योद्धुमसुरसदसारेभे ॥

* * * *

पुरत्रये मुदं दधुर्निवासमापुरत्र ये ।
पराभवेन वर्जिताः प्रणामतत्परा भवे ॥

**Colophon :**

इति वासुदेवविरचिते त्रिपुरदहने प्रथम आश्वासः ॥

अथ हरिमापन्नत्वाद् द्युसदः क्षीरोदवसतिमापन्नत्वा ।
हृतसर्वस्वा दित्याः कुलजैस्तैरश्विरुद्रवस्वादित्याः ॥

**End :**

विपिनं कैलासालंकारि विशन्ती सकेतकैलासालम् ।
मदनरिपुं सामाद्यन्निर्दयमगजोपगूह्य पुंसामाद्यम् ॥

बबन्धुरेव बन्धुरे स्ववर्त्मनि स्थितिं जनाः ।
पिनाकिनापि नाकिनाममोदि मोदकारिणा ॥

**Colophon :**

इति त्रिपुरदहने महाकाव्ये तृतीय आश्वासः । आहत्य प्रथमाश्वासमारभ्य तृतीयाश्वासपर्यन्तं शताधिकपञ्चनवतिग्रन्थाः । त्रिपुरदहनकाव्यं समाप्तम् ॥

---

(*b*) **शौरिकथोदयः.**

ŚAURIKATHŌDAYAḤ.

Foll. 26*a*—63*b*.

A poem similar in style to the work described under the last sub-division. It narrates the story of Kṛṣṇa chronicled in the Bhāgavata.

Breaks off in the fifth Āśvāsa.

**Beginning:**

अवनतदेवं देहं पुंसः परमस्य सम्पदे वन्देऽहम् ।
यत्पदमम्बुध्यन्ते यतयो यत्तत्त्वमुत्तमं बुध्यन्ते ॥

गोपततिः पूतनया यतो यतः प्राप्यत क्षतिः पूतनया ।
योऽधित दूर्वाभोऽगं पपुश्च गोप्यो दृशा यदूर्वाभोगम् ॥

* * * *

योऽजनि सत्यवतीतः कलुषालोकं कलौ च सत्यवतीतः ।
कथया भारत्या गामकृत च स प्राप्तदुरितभारत्यागाम् ॥

जयति सुधामा रामः क्षितिपालः काव्यवीरुधामारामः ।
दधदिभमस्तकलीलामंसेन बिभर्ति योऽयमस्तकलीलाम् ॥

अस्यां मे यमितायां शौरिकथायां शुभप्रमेयमितायाम् ।
करुणालेशं सन्तः कुर्वन्तु कवेर्बलाबले शंसन्तः ॥

अथ षट्सु कुमारेषु भ्रात्रा व्यापादितेषु सुकुमारेषु ।
सुतमेकं सद्वेषं प्रासूयत देवकी सकंसद्वेषम् ॥

**End:**

यदुपवनमुपाश्रिततृट्क्षुद्रोगच्छेदयोनिकेतकवाटम् ।
यन्नासुरलोकोऽपि क्षुद्रो गच्छेदयोनिकेतकवाटम् ॥
स विश्वकर्मनिर्मिते पुरे पुरेव वैष्णवे ।
उवास वासवानुजः सुखं सुखण्डितासुरः ॥

**Colophon:**

इति शौरिकथायां चतुर्थ आश्वासः ॥

अथ रिपुभूपालस्यप्रदायिनो भीष्मकस्य भूपालस्य ।
समजनि दुहिता रम्भास्तम्भोरूः काचनामृदुहितारम्भा ॥

* * * *

इति निजवासायातः स्वामी प्रणिगद्य कुक्ति वासायातः ।
वेगेनागादगतः पुनरपि बदरीं हरिः स नागादगतः ॥

(*c*) नलोदयम्.

NALŌDAYAM.

Foll. 64*a*—84*b*.

This is the text of which a commentary has been described under R. No. 101 *ante*, and it narrates the story of Nala. This poem also is written in the Yamaka style and is attibuted to Kālidāsa.

Complete in four Āśvāsas.

**Beginning :**

हृदय सदा यादवतः पापाटव्या दुरासदाया दवतः ।
अरिसमुदायादवतः त्रिजगन्मा गाः स्मरेण दायादवतः ॥

**End :**

नलेन पूर्यतायतायतायतायता चिराय सा ।
सदायमुन्महां महामहामहास्त सम्पदः ॥

**Colophon :**

इति नलोदये चतुर्थ आश्वासः ॥

---

(*d*) नलोदयव्याख्यानम्.

NALŌDAYAVYĀKHYĀNAM.

Foll. 85*a*—165*a*. Fol. 164*b* is left blank.

Similar to the commentary described under R. No. 101 *ante*.

Almost complete.

**Beginning :**

श्रिये स्तात् स्वप्रभं धाम तद्वो विश्वावभासकम् ।
प्रवर्तन्तेऽखिलोद्भूतिस्थितिसंहृतयो यतः ॥

प्रणम्याग्रे गणाधीशं वाग्देवीं च यथागमम् ।
नलोदयस्याल्पधिया व्याक्रिया क्रियते मया ॥

इह शब्दवैचित्र्यमात्रप्रकाशनपरे काव्ये गहनार्थव्यक्त्यर्थत्वासंभवाद्दुष्कर-पदच्छेदमात्रविधावपि अस्मत्सधर्मणामल्पप्रज्ञानां येषां केषाञ्चित् यदा कदाचिद्यः कश्चिदुपकारः स्यादित्येवमर्थोऽयमस्मदुद्यमः, नतु वैदग्ध्यविद्योतनायेत्येवं विदुषा सदास्मिन् कर्मणि तितिक्षितव्यम् । प्रारिप्सितस्य ग्रन्थस्यादाववघ्नेन परिसमाप्त्यर्थं प्रचयार्थं च शिष्टाचारादभीष्टदेवतां प्रणमति—हृदयेत्यादिश्लोकचतुष्टयेन ।

अर्थः—हे हृदय मनः सदा सर्वकालम् यादवतो यदुवंशे प्रादुर्भूतात् परस्मात् पुंसो मा गाः मा गमः ।

**End:**

सनाथा सती आपत् सा सजीवनावना एवंप्राणरक्षणाभूदित्यर्थः ॥

**Colophon:**

इति नलोदयविवरणे तृतीयः परिच्छेदः ॥

अथेति कथान्तरं द्योत्यते। भीमोक्तिधनानां द्रविणरूपाणां द्रविणानामायं लाभं ददाति विभर्ति नान्यः ।

* * * *

नलेनेति । सा पूः स्वनगरी यतायता नष्टा संयतलोका आयता आयामवती नलेन चिराय आयता दीर्घकालं प्राप्ता अयं नलः उन्महाः उदितदीप्त.

---

R. No. **1853.**

Śrītāla. $13\frac{1}{4} \times 1\frac{5}{8}$ inches. Foll. 60. Lines, 10 in a page. Malayāḷam. Much injured.

Purchased in 1915-16 from M R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

Fol. 30*b* is left blank.

**कुमारसम्भवव्याख्यानम्.**

KUMĀRASAMBHAVAVYĀKHYĀNAM.

A commentary on the well-known Kumārasambhava of Kālidāsa: by Vidyāmādhava

Contains the Sargas 1 (almost complete), 2, 5 and 6 complete.

**Beginning:**

गणेशस्कन्धसंयुक्तौ वन्दे वाञ्छितसिद्धये ॥
महाकविमहेन्द्रेण कालिदासेन यत् कृतम् ।
कुमारसम्भवाख्यं तत्काव्यं व्याख्यातुमारभे ॥

काव्यानामादावाशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमिति तेषामन्यतमस्य कर्तव्यत्वादत्रादौ विशिष्टवस्तुनिर्देशं करोति—अस्त्युत्तरस्यामिति । हिमालयो नाम नगाधिराजः उत्तरस्यां दिशि अस्ति, नामेति प्रसिद्धिवाचकमव्ययम् । हिमालय इति प्रसिद्धो गिरिराजः उदीच्यां दिशि अद्यापि वर्तते ।

**End:**

यद्यस्माकं विभुमप्यमी भावाः स्पृशन्ति स्वतन्त्रमीश्वरमपि बाधन्ते तस्मादन्येषु कर्कशेषु भावम् । पुष्पिताग्राख्यमर्धसमवृत्तमिदम् ॥

कुमारसंभवस्यास्य व्याख्याने गुणवानयम् ।
षष्ठः सर्गः समाप्तोऽभूद्विद्यामाधवनिर्मिते ॥

## R. No. 1854.

Śrītāla. 13¾ × 1⅞ inches. Foll. 208. Lines, 15 in a page. Malayāḷam. Good.

Purchased in 1915–16 from M.R.Ry. Appuṇṇi of Elappulḷi, near Palghat.

(*a*) रघुवंशव्याख्या—पदार्थदीपिका.

RAGHUVAṀŚAVYĀKHYĀ: PADĀRTHADĪPIKĀ.

Foll. 1*a*—40*a*. Fol. 40*b* is left blank.

This is a short commentary on the Raghuvaṁśa of Kālidāsa by Nārāyaṇa, pupil of Kṛṣṇa.

Contains the first five Sargas only. Wants two lines in the beginning.

**Beginning:**

. . . . . बालेन्दुकोमलाः ।
दैत्यवर्गतमस्स्तोमविदारणसुदारुणाः ॥
भाति ब्रह्मखले काचित्करुणा शरणार्थिनाम् ।
. . . . . बालक्रियोपेता मिता व्याख्या विलिख्यते ॥
विद्वांसो हि समत्सरा नृपतयः कार्येषु पर्याकुला
मूढाः प्रौढतमःप्रमोहमलिनाः किं तैरलं चिन्तया ।
एषा स्यात् फलशालिनी नरम . . . . . क्षये
सन्तः सन्ति परोपकारनिरताः शृण्वन्तु ते मे गिरम् ॥

इह खलु रघुवंशाभिधानं महाकाव्यं करिष्यन् महाकविः कालिदासः आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्यादिप्रबन्धमुखलक्षणानुसारेण प्रारिप्सितस्य ग्रन्थस्याविघ्नपरिसमाप्तये शिष्टाचारमनुस्मरन्निष्टदेवतानमस्कारं तावत्करोति—वागर्थाविति । अहं पार्वतीपरमेश्वरौ वन्दे पार्वतीं परमेश्वरं च वाङ्मनःप्रह्वतालक्षणया प्रणत्या पूजयामि । वदि अभिवादनस्तुत्योरिति धातुः ।

**End:**

अत्राङ्गैकदेशसौन्दर्योक्त्या सर्वाङ्गसौन्दर्यं लभ्यते । कुशलैर्विद्वद्भिः प्रसाधकजनैर्विरचितः विनयादिजात्ययौवनचक्रवर्तिविभवाद्यनुरूपो वेषः आकल्पो यस्य उत्तरसर्गार्थोपक्षेपश्चानेन श्लोकेन कृत इत्यवसेयम् ॥

**Colophon:**

इति श्रीकृष्णशिष्यस्य नारायणस्य कृतौ रघुवंशव्याख्यायां पदार्थदीपिकायां पञ्चमः सर्गः ॥

(*b*) शिशुपालवधव्याख्या—सर्वङ्कषा.
ŚIŚUPĀLAVADHAVYĀKHYĀ: SARVAṄKAṢĀ.

Foll. 41*a*—149*b*. Fol. 142*b* is left blank.

By Mallinātha. Same work as those described under R. Nos. 51(*a*) and 488(*u*) *an e*.

Contains the Sargas one to nine complete and 99 stanzas of the 19th Sarga.

---

(*c*) नैषधव्याख्या—जीवातुः.
NAIṢADHAVYĀKHYĀ: JĪVĀTUḤ.

Foll. 150*a*–175*a*. Fol. 175*b* is left blank.

By Mallinātha. Same work as that described under R. No. 233 *ante*.

Contains the Sargas one to two only.

---

(*d*) किरातार्जुनीयव्याख्या—सुखबोधिनी.
KIRĀTĀRJUNĪYAVYĀKHYĀ: SUKHABŌDHINĪ.

Foll. 176*a*—192*a*. Fol. 192*b* is left blank.

A commentary on the Kirātārjunīya of Bhāravi: by Dēvarājabhaṭṭa, son of Kṛṣṇadvaipāyanabhaṭṭa. The author refers to another commentary by Prakāśavarṣa.

Contains the Sargas one to three.

**Beginning:**

यस्य लक्ष्मीभुजाश्लेषः कण्ठे कङ्कणराजयः ।
मणिमाला इवाभान्ति स वः पायाज्जनार्दनः ॥
प्रकाशवर्षप्रभृतिप्रणीता व्याख्या न पूर्णा इति भारवीये ।
काव्ये प्रभूतां विदधाति टीकां श्रीदेवराजो विदुषां निदेशात् ॥
अनूद्य सर्वं पदसिद्धिमुक्त्वा पदान्वयेन प्रकटय्य वाक्यम् ।
प्रदर्श्य भावं सुखबोधिनीं तां करोत्ययं बालविबोधनार्थम् ॥

श्रिय इति । प्रत्यूहप्रशमाय प्रबन्धप्रारम्भे मङ्गलं कर्तव्यमिति व्यवहितान्वयेनापि कविना प्रथमतः श्रीपदं प्रयुक्तम् । कुरूणामधिपस्य सुयोधनस्य ।

* * * *

मालिनी वृत्तम् । वसुमुनिविरतिश्चेन्मालिनी नौ मयौ यः इति शुभम् ।

**Colophon:**

इति श्रीमत्कृष्णद्वैपायनभट्टसूनुना देवराजाचार्येण विरचितायां सुखबोधिन्याख्यायां किरातार्जुनीयव्याख्यायां प्रथमः सर्गः ॥

**End:**

भुवमालिलिङ्गे आलिङ्गितवान् । कीदृशीं भुवम्? स्फुरन्तीं कम्पमानाम् । तत्र सात्त्विकं कम्पनम् । दिव्यं दिवि भवम् । द्युप्रागादिना यत् । वेलाम्भसो विकृतिः तत्सम्बन्धात्तटो वेला तत्र वीचयो निभृता इति गोप्यः स्पर्शोचिता इवेत्यर्थः । वसुमुनिविरतिश्चेन्मालिनी नौ मयौ यः । इति शुभम् ॥

**Colophon:**

इति किरातार्जुनीयव्याख्यायां तृतीयः सर्गः ॥

---

(*e*) मानवेदचम्पुभारतटिप्पणी—कृष्णीया.

MĀNAVĒDACAMPUBHĀRATAṬIPPAṆĪ: KṚṢṆĪYĀ.

Foll. 193*a*—202*b*.

This is a short commentary on the Campubhārata of Mānavēda, which is described under R. No. 1851 *ante*. By Kṛṣṇa.

Contains the first Stabaka.

**Beginning:**

ध्यायंध्यायमिभाननं हृदि सदा श्रीमानवेदाभिध-
क्षोणीभृत्कृतचम्पुभारत . . . . . ।
( . . . . . )
कृष्णीयं खलु टिप्पणाख्यमिति तद्व्याख्यानमालोक्य हि ॥

अपान्तरतमो नाम मुनिर्भूत्वा । अपगतमान्तरतमो यस्येत्यपान्तरतमाः । लोकोपकारे विषये उद्यताः अस्यन्दत प्रास्रुत ; स्यन्दू प्रस्रवणे ।

**End:**

उपान्तमिति । अहेः वृत्रस्य "सर्पावृत्रवही" ("सर्पे वृत्रासुरेऽप्यहिः") इति वै । बिभराम्बभूव बभार । लिटि भीहीभृहुवामित्याम्प्रत्ययः श्लुवद्भावः श्लाविति द्विर्वचनम् ॥

**Colophon:**

इति श्रीमानवेदविरचितस्य चम्पुभारतस्य टिप्पणे कृष्णीये प्रथमः स्तबकः ॥

---

(*f*) चन्द्रालोकव्याख्यासङ्ग्रहः.

CANDRĀLŌKAVYĀKHYĀSAṄGRAHAḤ.

Foll. 203*a*—208*b*.

This gives that portion of the Kuvalayānanda of Appayadīkṣita which comments on the stanzas of the Candrālōka.

Complete.

**Beginning:**

. . . मात्रं हि व्याख्या सङ्गृह्य लिख्यते ।

मुदे कुवलयानन्दाद् बालानां मृदुचेतसाम् ॥

. . . . . सहृदयहृदयाह्लादित्वेन चारुसादृश्यमुद्भूततया लसति व्यङ्ग्यमर्यादां विना स्पष्टं प्रकाशते तत्रोपमालङ्कारः । हंसीवेत्युदाहरणम् । इयं च पूर्णोपमा ।

**End:**

अत्र कार्यावश्यम्भावतः शैघ्र्यप्रत्यायनार्थं कार्यकारणाभेदव्यपदेशः रूपके सादृश्याभेदव्यपदेशः । इह कार्यात् कारणभावादिति भावः ।

इत्थमिति ॥

**Colophon:**

इति कुवलयानन्दाच्चन्द्रालोकव्याख्यामात्रं संगृह्य लिखितम् ॥

---

R. No. **1855.**

Palm-leaf. 16 × 1⅞ inches. Foll. 195. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Śrīrājavatsavāya Varāhanarasiṁharājugāru of Bhīmavarapukōṭa, Tuni, Gōdāvari district.

(*a*) सङ्कल्पसूर्योदयव्याख्या—प्रभाविलासः.

SAṄKALPASŪRYŌDAYAVYĀKHYĀ: PRABHĀVILĀSAḤ.

Foll. 1*a*—111*a*. Fol. 111*b* is left blank.

A commentary on the well-known drama, Saṅkalpasūryōdaya, of Vēdāntadēśika: by Ahōbilācārya of Ātrēyagōtra who, in the introductory stanza, salutes Parāṅkuśārya.

Complete.

**Beginning:**

श्रीशं श्रियं वेङ्कटदेशिकेन्द्रं पराङ्कुशार्यं यमिनं प्रणम्य ।

अहोबिलोऽयं विवृणोति विद्वान् सङ्कल्पसूर्योदयमत्रिवंश्यः ॥

इह खलु भगवान् कवितार्किककण्ठीरवः सर्वतन्त्रस्वतन्त्रः श्रीमान् वेङ्कटनाथनामा वेदान्ताचार्यः श्रीमच्छारीरकभाष्यस्यातिगहनगम्भीरतया तत्रायासमसहमानान् शिष्यानवलोक्य दयालुतया तदाश्रितार्थजातं सुखेन प्रतिबोधयितुं

नाटकापदेशेन प्रकटयन् तत्राशीराद्यन्यतमस्य शिष्टाचारतयाशीर्वादरूपं मङ्गलमाचरति—यद्भक्तीत्यादिना । यत्पदद्वयेन नारायणः परामृश्यते । भक्तिपदेन वेदनादिपदवाच्यं दर्शनसमानाकारं प्रीतिरूपापन्नं ध्रुवानुस्मरणमुच्यते ।

**End:**

शान्तिरसः पुरुषाश्रिततया वर्णितः, रौद्रादयो विवेकमोहाद्याश्रयतया वर्णिता इति भिन्नाश्रयतया विरोधाभासमामनन्तीत्येषा दिक् । भरतवाक्यम् । भरतस्य नटस्य वाक्यम् । आशिषमाशास्ते—अङ्गीकुर्वन्त्विति । आर्यो धर्मः कृतयुगधर्मः । अस्मिन् नाटके निबद्धे कृतौ । श्रीमान् अनपायलक्ष्मीसमेतः । प्रीयतां प्रीतो भवतु । अनेन प्रशस्तिर्नाम निर्वहणसन्धेरङ्गमुक्तम् । प्रशस्तिः शुभशंसनमिति लक्षणात् ॥

**Colophon:**

इत्यात्रेयगोत्रसम्भूतेन श्रीमदहोबिलनाम्ना विदुषा विरचिते सङ्कल्पसूर्योदयव्याख्याने प्रभाविलासाख्याने निःश्रेयसलाभो नाम दशमोऽङ्कः ॥

The MS. is said to have been transcribed on Friday, the 14th day of the dark fortnight of the Māgha month in the year Piṅgala.

---

(*b*) सङ्कल्पसूर्योदयः.

SAṄKALPASŪRYŌDAYAḤ.

Foll. 112*a*—189*b*.

This is an allegorical drama in ten Acts written by Vēdāntadēśika with a view to expounding the Viśiṣṭādvaita Vēdānta and as a reply to Kṛṣṇa Miśra's Prabōdhacandrōdaya. The characters are the various virtues and vices, and the latter are represented in the end to have been vanquished.

The subject-matter of the ten Acts is as follows :—

| | |
|---|---|
| १. स्वपक्षप्रकाशः. | ६. स्थानविशेषसङ्ग्रहः. |
| २. परपक्षप्रतिक्षेपः. | ७. शुभाश्रयनिर्धारणम्. |
| ३. मुक्त्युपायारम्भः. | ८. मोहादिपराजयः. |
| ४. कामादिव्यूहभेदः. | ९. समाधिसम्भवः. |
| ५. डम्भाद्युपालम्भः. | १०. निःश्रेयसलाभः. |

Breaks off in the tenth Act.

**Beginning:**

श्रीमान् वेङ्कटनाथार्यः ( . . . ) सदा हृदि ॥

यद्भक्तिप्रचयात्मके दिनमुखे दृष्टिक्षमः क्षेत्रिणः
क्षिप्रं संसृतिशर्वरीं क्षिपति यत्सङ्कल्पसूर्योदयः ।
तत्त्वैरस्त्रविभूषणैरधिगतस्वाधीननित्योन्नतिः
श्रीमानस्तु स मे समस्तविपदुत्तारायं नारायणः ॥

अपि च—

लक्ष्ये यत्र श्रुतिमितगुणाकृष्टिलब्धावधानैः
प्रत्यग्बाणः प्रणवधनुषा सत्त्ववर्षी प्रयुक्तः ।
मध्येवक्षः स्फुरति महसा पत्रलः कौस्तुभात्मा
पद्माकान्तः स भवतु दयादुग्धसिन्धुः श्रियै नः ॥

नान्द्यन्ते सूत्रधारः.

**End:**

देव्या सुमत्या सह नैःश्रेयसीं नियतिमास्थाय निवत्स्यामीति सविमर्शं निष्क्रान्तः ॥

**Colophon:**

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु सङ्कल्पसूर्योदये समाधिसंभवो नाम नवमोऽङ्कः ।

ततः प्रविशति विष्णुभक्तिः ।

विष्णुभक्तिः (आलम्बनविशेषाधीनमात्मनो वैभवं निर्वर्ण्य)—

अहं वैकुण्ठदास्यैकलास्यलीलाविनोदिनी ।
विश्वकिल्बिषसंहारविभ्रमारभटी नटी ॥

* * * *

इति विवेकसुमतिविष्णुभक्तीः सप्रसादबहुमानं समीक्षमाणः सिसाधयिषितोत्तरकृत्यो निष्क्रान्तः).

Foll. 190—192 contain the Śrīstuti of Vēdāntadēśika. Foll. 193—195 are left blank.

---

R. No. **1856.**

Śrītāla. 8½ × 1¾ inches. Foll. 315. Lines, 14 in a page. Telugu. Good.

Presented in 1915-16 by M.R.Ry. Śrīrājavatsavāya Varāhanarasimharājugāru of Bhīmavarapukōṭa, Tuni, Gōdāvari district.

Foll. 1—2 are left blank.

(*a*) विष्णुसहस्रनामभाष्यम्—भगवद्गुणदर्पणम्.

VIṢṆUSAHASRANĀMABHĀṢYAM: BHAGAVADGUṆA-DARPAṆAM.

Foll. 1*a*—85*a*. Fol. 85*b* is left blank.

By Parāśarabhaṭṭa. Same work as that described under No. 9073 of the D.C.S. MSS., Vol. XVII. The commentary is called Bhagavadguṇadarpaṇa.

Complete.

The MS. is said to have been transcribed by Vēṅkaṭarāju at the instance of Śrīrājavatsavāya Jagannātha-Jagatirāju-Mahārājulugāru; and the copying was completed on Thursday, the 1st day of the dark fortnight of the month of Śrāvaṇa in the year Dhātu.

---

(*b*) भगवद्गीताभाष्यम्.

BHAGAVADGĪTĀBHĀṢYAM.

Foll. 86*a*—213*a*. Foll. 122*b*, 144 and 213*b* are left blank.

By Rāmānujācārya. Same work as that described under No 2073 of the D.C.S. MSS., Vol. IV, Part I.

Complete.

The MS. is said to have been copied for Śrīvatsavāya Jagannātha Jagatpatīndra from the MS. of Cilkamarti Vēṅkaṭācārya; and the transcription was completed on Sunday, the 12th day of the dark fortnight of the month of Caitra in the year Īśvara.

---

(*c*) विष्णुसहस्रनामभाष्यम्.

VIṢṆUSAHASRANĀMABHĀṢYAM.

Foll. 214*a*—270*b*. The remaining leaves are left blank.

By Śaṅkarācārya. Same work as that described under No. 9065 of the D.C.S. MSS., Vol. XVII.

Complete.

The copying of this MS. is stated to have been completed on the 12th day of the bright fortnight of the Jyēṣṭha month in the year Īśvara.

---

## R. No. 1857.

Palm-leaf. $16\frac{5}{8} \times 1\frac{3}{8}$ inches. Foll. 195. Lines, 7 in a page. Telugu. Good.

Presented in 1915-16 by M.R.Ry. Śrīrājavatsavāya Varāhanarasiṁharājugāru of Bhīmavarapukōṭa, Tuni, Gōdāvari district.

Foll. 1 and 2 are left blank. Foll. 3*a*—11*a* contain the Sundarakāṇḍa of the Rāmāyaṇa. Fol. 11*b* is left blank.

(*a*) चिदचिदीश्वरतत्त्वनिरूपणम्.

CIDACIDĪŚVARATATTVANIRŪPAṆAM.

Foll. 12*a*—23*a*. Fol. 23*b* is left blank.

By Kumāra Vēdāntācārya. Same work as that described under No. 4882 of the D.C.S. MSS., Vol. X.

Complete.

Fol. 24 contains Pavitraśrutivyākhyā.

---

(*b*) यतीन्द्रमतदीपिका.

YATĪNDRAMATADĪPIKĀ.

Foll. 25*a*—48*b*.

By Śrīnivāsadāsa, son of Gōvindārya and disciple of Mahācārya. Same work as that described under No. 4985 of the D.C.S. MSS., Vol. X.

Complete.

---

(*c*) गीतार्थसङ्ग्रहव्याख्या—बालप्रबोधिनी.

GĪTĀRTHASAṄGRAHAVYĀKHYĀ: BĀLAPRABŌDHINĪ.

Foll. 49*a*—55*b*.

A commentary on the Gītārthasaṅgraha of Yāmunācārya, which work has been described under No. 4876 of the D.C.S. MSS., Vol. X: by Jagannātha, pupil of Tātācārya. In a stanza at the end, the following other works are attributed to Yāmunācārya:—Siddhitraya, Āgamaprāmāṇya, Viṣṇutattvanirṇaya, Śrīstuti, Śrīśastuti (Stōtraratna).

Complete.

**Beginning:**

शुक्लाम्बरधरं (. . . .) शान्तये ॥

तातार्याचार्यप्रसादेन बालानां बोधसिद्धये ।

गीतार्थसङ्ग्रहव्याख्या जगन्नाथेन लिख्यते ॥

अत्र भगवान् परावरतत्त्वयाथात्म्यविदग्रेसरः यामुनाचार्यः तत्त्वजिज्ञासूनां भागवतानामनुजिघृक्षया श्रीमद्गीतार्थं व्याचिख्यासुः प्रथमतो गीताशास्त्रप्रतिपाद्यार्थं संगृह्णाति—

स्वधर्मज्ञानवैराग्यसाध्यभक्तचेकगोचरः ।

नारायणः परं ब्रह्म गीताशास्त्रे समीरितम् (:) ॥

स्वधर्मः स्ववर्णाश्रमधर्मः । ज्ञानं परशेषतैकरसयथावस्थितात्मविषयकज्ञानम् ।

**End:**

स चै ष योगमहिम्ना चुलुकितपरमपुरुषविभूतियुगलभगवन्नाथमुनियोगानुवर्ति-श्रीराममिश्रसकाशात् बहुशास्त्रविद्भिरस्माभिर्बहुशः श्रुतस्य भगवद्गीतार्थप्रपञ्चस्य सङ्ग्रह इति मुमुक्षुभिः सङ्ग्रह इति भावः ॥

मानत्वं भगवन्मतस्य महतः पुंसस्तदा निर्णयः
तिन्नास्सिद्धय आत्मसंविदखिलाधीशानतत्त्वाश्रयाः ।
गीतार्थस्य च सङ्ग्रहः स्तुतियुगं श्रीश्रीशयोरित्यमून्
यद्ग्रन्थाननुसन्दधे यतिपतिस्तं यामुनेयं न(नु)मः ॥
गीतार्थसङ्ग्रहव्याख्यां लब्धीं बालप्रबोधिनीम् ।
सुधियः परिगृह्णन्तु निर्मात्सर्यात्सुहृत्त्वतः ॥

**Colophon:**

इति गीतार्थसङ्ग्रहव्याख्यायाः समाप्तिः ॥

---

(*d*) भगवद्गीताव्याख्या—श्रीनिवासकृपा.

BHAGAVADGĪTĀVYĀKHYĀ: ŚRĪNIVĀSAKṚPĀ.

Foll. 56*a*—192*a*. Fol. 192*b* is left blank.

A brief commentary on the Bhagavadgītā, which is the same as the one described under R. No. 1769 *ante*: by Tirumalārya, pupil of Śrīraṅgārya of Tirupati and belonging to the family of Dēvarāja. The commentator is said to have had his mind purified by the performance of rituals, etc., as service to God.

Complete.

**Beginning:**

यस्य द्विरदवक्त्राद्याः (. . .) तमाश्रये ॥
स्वरसबहुविलासं सात्त्विकस्वीयदासं सरसमुखविलासं चन्द्ररुङ्मन्दहासम् ।
सुरविरसनिरासं सूरिदृश्यात्मभासं तिरुमलपुरवासं धीमहि(हे) श्रीनिवासम् ॥
प्राचीनोदितभाग्यभोग्य भगवत्कैङ्कर्यरूपक्रिया-
नुष्ठानातिविशुद्धचित्तमुकुरस्पष्टात्मलक्ष्मीनिधिः ।
श्रीगीतार्थबुभुत्सया तिरुमलार्यो देवराजान्वयः
स्वात्मेशं शरणं गतः परिणता व्याख्यात्मना तत्कृपा ॥

श्रीनिवासकृपाभिख्यां गीताव्याख्यामिमां बुधाः।
श्रीगीताभाष्यसारार्थसुधां पिबत जीविकाम् ॥

श्रियः पतिर्निखिलहेयप्रत्यनीककल्याणैकतानः स्वेतरसमस्तवस्तुविलक्षणानन्तज्ञानानन्दैकस्वरूपः स्वाभिमतानुरूपैकनित्यनिरवद्यनिरतिशय

* * * *

उपनिषत्सारतममर्थं प्रकाशयामास। एतत्सर्वं जानन्नपि प्रबलतरदुरितप्रमुष्टविवेको धृतराष्ट्रः सुयोधनविजयबुभुत्सया सञ्जयं पृच्छति।

धृतराष्ट्र उवाच—

धर्म (. . . . . .) सञ्जय ॥

हे सञ्जय कुरुक्षेत्रे कुरुक्षेत्राख्ये धर्मक्षेत्रे पुण्यदेशे।

**End:**

स्वसङ्कल्पायत्तस्वेतरसमस्तवस्तुस्थितिप्रवृत्तिभेदः कृष्णो वसुदेवसूनुः यत्र

* * * *

ध्रुवा निश्चला इति मतिर्ममेति ॥

**Colophon:**

इति श्रीमद्भगवद्गीताभाष्यार्थसङ्ग्रहे अष्टादशोऽध्यायः ॥

श्रीगीतार्थबुभुत्सया तिरुमलार्यप्रार्थितश्रीनिधेः
व्याख्याख्या करुणानदी दुरितमोक्षान्ता समुद्रान्वयम्।
मारङ्गार्यमुपास्य वाक्सफलतामापाद्य सम्बन्धिना-
मैश्वर्याक्षरमोक्षदाजनि कृपा रामानुजस्येदृशी ॥
तिरुमलपुरीलक्ष्मी(नाथ)त्वमेव जगत्पति-
र्न चलति तृणब्रह्माद्यन्तं यतस्त्वदचोदितम्।
अत इह न मे दोषा भूषा गुणः फलमेव वा
तव कृतिरियं न्यासाकारा तदैव समर्पिता ॥

The MS. is said to have been copied by Taṭṭalūri Vēṅkaṭarāyalu for Vēṅkaṭarāju, the transcription having been completed on Wednesday, the 14th day of the dark fortnight of Kārttika in the year Nala, of Sālivāhana Śaka, 1770 (9 ?).

Foll. 193 and 194 contain Śrīraṅgēśatārāvalistōtra. Fol. 195 is left blank.

R. No. **1858.**

Palm-leaf. 19⅛ × 1⅜ inches. Foll. 82. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915–16 by Daṇḍu Kṛṣṇsmūrtigāru of Mandapeta, Rāmachandrapuram taluk, Gōdāvari district.

Foll. 1 and 2 are left blank.

प्रायश्चित्तशतद्वयीव्याख्या.

PRĀYAŚCITTAŚATADVAYĪVYĀKHYĀ.

Foll. 3*a*—54*a*. Fol. 54*b* is left blank.

By Bhāskara. Same work as that described under No. 1081 of the D.C.S. MSS., Vol. II, wherein see for the beginning

Contains the first five Paṭalas.

**End:**

यजमानो म्रियेत तत्स्मरणार्थं सर्वप्रायश्चित्तं जुहुयात्। स्मार्तकर्मभ्रेषे सर्व-वेदभ्रेषे चेदं सर्वप्रायश्चित्तं बह्वृचब्राह्मणे चोक्तम् ॥

**Colophon:**

इति प्रायश्चित्तशतद्वयीव्याख्यायां पञ्चमः पटलः ॥

स्मार्तकर्मशातातपवचनम्—

क्लीबे देशान्तरस्थे च पतिते भिक्षुकेऽपि वा।

* * * *

पिता पितामहो यस्य अग्रजो वाथ कस्यचित्।

तपोऽग्निहोत्रमन्त्रेषु न दोषः परिवेदने ॥

**Colophon:**

इति प्रायश्चित्तशतद्वयीव्यवाख्यानं समाप्तम् ॥

Transcribed by Susarla Pāpaya Sōmayāji for Sītarāmadīkṣita, the transcription having commenced on Saturday, the 10th day of the dark fortnight of the month of Puṣya in the year Jaya, and completed on Saturday, the 5th day of the dark fortnight of the Puṣya month in the year Manmatha.

Foll. 55*a*—82*b* contain the Pūrvaprayōga of Āpastambasūtra.

---

R. No. **1859.**

Palm-leaf. 15¼ × 1¼ inches. Foll. 65. Lines, 7 in a page. Telugu. Slightly injured.

Presented in 1915–16 by M.R.Ry. Dēvulapalli Narasiṁha Śāstri of Mandapeta, Rāmachandrapuram taluk.

## राघवयादवीयम्.

## RĀGHAVAYĀDAVĪYAM.

